॥ श्रीः ॥

श्रीमद्भागवतीयं साङ्ख्यम्

लेखकः सम्पादकश्च

डा० बदरी नारायण शर्मा पञ्चोली.

श्रीलालबहादुरशास्त्रि केन्द्रीय-संस्कृत विद्यापीठम्

नव दिल्ली-११००१६

१९८९

आशुतोष अवस्थी
अध्यक्ष
श्री नारायणेश्वर वेद वेदाङ्ग समिति (उ.प्र.)

श्रीमद्भागवतीयं साङ्ख्यम्

प्रस्तावना लेखक :

आचार्यः श्रीपट्टाभिरामः शास्त्री

विद्यासागरः शास्त्ररत्नाकरः

(पद्मभूषणम्)

प्रधानसम्पादक :

डा० मण्डनमिश्र :

साहित्यमीमांसाचार्यः, एम. ए., पी. एच. डी.

श्रीलालबहादुरशास्त्रिकेन्द्रीयसंस्कृत विद्यापीठस्य प्राचार्यः ।

लेखक : सम्पादकश्च :

डा० बदरी नारायणः शर्मा पञ्चोली

आचार्यः एम. ए. विद्यावारिधिः (पी. एच. डी.), विद्यावाचस्पतिः (डी. लिट्.)

श्रीलालबहादुरशास्त्रिकेन्द्रीयसंस्कृतविद्यापीठ-दर्शनविभागाध्यक्षो प्रवाचकश्च ।

श्रीलालबहादुरशास्त्रिकेन्द्रीयसंस्कृत-

विद्यापीठम्

नव देहली—११००१६

प्रकाशक :

डा० मण्डनमिश्रः, प्राचार्य

श्रीलालबहादुरशास्त्रि-केन्द्रीय-संस्कृत-विद्यापीठम्,

शहीदजीतसिंहमार्गः कटवारियासरायः नव देहली—११००१६,

दूरभाषः—६५०८३१,

प्रकाशनवर्षम् : १९८६ ख्रि०,

प्रथमं संस्करणम् :

५५० पुस्तकानि,

अनुसन्धानप्रकाशनविभागस्यतस्वावधाने प्रकाशितः ।

मुद्रक :

पाराशरप्रिंटर्स, पन्चशील गार्डन, नवीन शाहदरा दिल्ली—११००३२

दूरभाष : २०३४०३,

श्रीः

प्रस्तावना

कस्या अपि शिक्षणसंस्थायाः समुन्नतिः तत्र नियुक्तानामध्यापकानां संस्था-सञ्चालकस्य प्राचार्यस्य तत्तद्विषयाध्ययने प्रवृत्तस्य छात्रनिवहस्य च कार्यविशेषेण भवति निर्णेया। तत्राध्ययनमध्यापनञ्चेति सर्वशिक्षणालयानां साधारणो व्यापारः। न हि साधारणव्यापारेण संस्थायाः समुन्नतिः परिगण्यते, साधारणत्वात्तस्य। अध्ययने-नाध्यापनेन च सह नूतनानां ग्रन्थानां प्रणयनम्, प्रणीतानां तेषां प्रकाशनम्, प्रकाशिता-नाञ्च तेषां सर्वत्र प्रसारणम्, नूतनविषयाधिगमाय विद्यार्थिनां प्रवर्त्तनम्, अधिगतवि-द्यानां विद्यार्थिनां मुखेन प्रतियोगितासु लेखनभाषणशैलीप्रशिक्षणम्, प्रशिक्षितान् तान् अन्यत्र शिक्षणसंस्थासु चर्चायै प्रतियोगितासु सम्प्रेष्य तेषां चातुर्यप्रदर्शनम्, विदुषां सङ्गोष्ठीपरिचालनम्, इत्येवमादयो व्यापारा असाधारणाः परिकीर्त्यन्ते। एतेष्व-साधारणव्यापारेषु यद्येकोऽपि संस्थायास्सदस्योऽध्यापकः छात्रो वा संल्लग्नस्तिष्ठेत्, शिक्षणसंस्थायाः गरीयस्त्वं संरक्षितं भवेत्। अस्मिन् असाधारणव्यापारे प्राचार्यस्यापि कौशलमावश्यकम्। स चेत् पुरातनपाडुलिपीरन्विष्य ता एकीकृत्य योग्यमध्यापकं निश्चित्य तस्मै काञ्चन पाण्डुलिपिं प्रदाय, नूतनं विषयं निर्द्धार्य तल्लेखनाय च तमादिश्य प्रतिभाशालिनं छात्रं तत्साहाय्यकरणाय नियुज्य यथायथं कार्याणि सञ्चाल-येत् तर्हि नूनं संस्था समुन्नता स्यात्। न खल्वभ्रंलिहनिकेतनानि निर्माय शिक्षणसंस्थां समुन्नतां निश्चिन्वन्ति विद्याविनोदरसिकाः। शिक्षणसंस्थायामध्यापनकार्यं कथं प्रचलति ? अनुशासने छात्राणां वर्तनं कीदृशं विद्यते ? असाधारणव्यापारेऽध्यापकानां प्रवृत्तिः कीदृशी ? प्रतिभाशालिनश्च्छात्राः कति निस्सरन्ति संस्थातः ? समयपरि-पालनं छात्रैरध्यापकैश्च कथमनुष्ठीयते ? इत्यादिकं पर्यवेक्ष्याभिभावकाः स्वीयान्य पत्यानि विद्यार्जनाय शिक्षणसंस्थासु प्रवेशयन्ति। तेन च शिक्षणसंस्था समाचीना परिगण्यते।

अस्मिन् क्रमे राजधान्यां दिल्लीनगरे सर्वकारेण प्रवर्त्तितं श्रीलालबहादुर-शास्त्रि-केन्द्रिय-संस्कृत-विद्यापीठं शिक्षणसंस्थाया अनुरूपाणि कार्याणि सम्पादयद् दिने-

दिने वर्द्धमानं विद्यानुरागिणां मुदं जनयतीति नितरामहं प्रसीदामि । तस्मिन् विद्यापीठे राजस्थानाभिजनः पञ्चोलीत्युपाह्वः श्रीबदरीनारायणशर्मा विद्यावाचस्पतिः नियुक्तः क्रमेण सम्प्रति दर्शनप्रवाचकपदे वर्त्तमानः "श्रीमद्भागवतीयं साङ्ख्यम्" इत्यभिधं ग्रन्थरत्नं प्रणिनायेति सन्तुष्यदन्तरङ्गोऽहमस्मि । विद्यापीठानुरूपोऽयं ग्रन्थमणिः, विद्यापीठसमनुन्नत्यवद्योतकश्च । पं. पञ्चोलीमहोदयोऽनुसन्धानात्मना ग्रन्थमिमं निबन्ध । तत्र किमिदं जगत् ? कस्मादिदं प्रावर्तिष्ट ? तत्र निखिलस्य जीववर्गस्य कस्सम्बन्धः ? सम्बन्धोऽयं किमु शाश्वतिकः ? किमु आगन्तुकः ? आगन्तुक-श्चेत् कथं स विच्छेद्यः ? शाश्वतिकश्चेत् कथं जीवानां पञ्चत्वप्राप्तिः ? इत्यादीनि साक्षात् परम्परया वा विचार्य निर्णेतुं प्रवृत्तानि निखिलानि विद्यास्थानानि विशेषेण चास्तिक-नास्तिकभेदेन विभक्तानि दर्शनानि । सर्वोऽपि दार्शनिकः तत्तन्मूलपुरुषेण महर्षिणाऽऽविष्कृतं मतं पोषयितुं तदीयं पन्थानं मसृणं विधातुम्, विपक्षिभिः प्रक्षिप्यमाणानि कण्टकानि प्रस्तरखण्डांश्च दूरीकर्तुं यत्नशीलो भवतीति न प्रच्छन्नमिदं दर्शनेषु कृत-परिश्रमाणाम् । एकैकोऽपि दार्शनिकः स्वमतसिद्धानि तत्त्वानि निरूपयन् पृथगिवावतिष्ठते । किन्तु तत्त्वाधिगमोपाया एव भवन्ति भिन्नाः, न भिन्नं भवति विचारणीयं तत्त्वम् । एकमेव हेमतत्त्वं स्वर्णकारेण विकारभावमापन्नं सत्, उच्चावचान्याभरण-रूपाणि धत्ते, एकयैव मृदा कुम्भकारो विविधरूपाणि पात्राण्याविष्करोति, एक एव पदार्थः पाकभेदेन नानारसवान् सञ्जायते । तथैवैकं तत्त्वं शास्त्रकारैः नैकविधेन प्रकारेण स्व स्वप्रतिभाविशेषेण निरूपितं दर्शनेषु दृश्यते । तत्र साङ्ख्यमित्यभिधीय-मानं दर्शनेषु नैकप्रकारेण वर्ण्यमानमुपलभ्यते । समदृष्ट्या विलोक्यमाने नैषामस्ति कश्चन मिथो विरोधः । विषमदृष्ट्या विलोक्यमाने नूनं प्रतीयेत विरोधः । विषमा च दृष्टिर्भवति काकानाम्, न हंसानाम् । 'सोऽहं हंसः' इत्युक्तदिशा समया दृष्ट्या हंसा भूत्वा तैस्तैर्दार्शनिकैः निरूपितानां तत्त्वानां विलोकने सति मनसश्शान्तिरुदियात् । शान्तेरवाप्तय एव शास्त्राणि निर्मितानि मनीषिभिः । 'य एव सर्वशास्त्रज्ञस्तस्य शान्तं मनस्सदा, इति वैयासिक्योक्त्या सर्वसिद्धान्तपरिज्ञानेन मनश्शान्तिमधिगच्छेत् । एक-देशज्ञानेन एकदेशस्य चाज्ञानेन कथं पदार्थतत्त्वनिर्णयो भवेत् ? तामिमां स्थितिं दूरीकर्त्तुं श्रीमद्भागवतं प्रवर्तितं व्यासाचार्यैः । न केवलं श्रीमद्भागवतं पुराणम्, अपि तु महदेकं दर्शनम्, शास्त्रञ्च । तैस्तैर्दार्शनिकैः प्रतिपादितं विविधं साङ्ख्यतत्त्वमेकत्र श्रीमद्भागवते निरूपयन् व्यासाचार्यः, य एव सर्वशास्त्रज्ञस्तस्य शान्तं मनस्सदा, इति स्वीयामुक्तिं समर्थयामासेव । समन्वयदृष्टिस्तदैव समुदियाद्यदा वयमेकत्र सर्वानेव मतभेदानधि-गच्छामः । जाते च समन्वये न भवेदशान्तेरवसरः । अज्ञानप्रयुक्ता खलु भवत्यशान्तिः । अस्माकमन्तःकरणेषु यादृशमज्ञानं यच्च—

यत्तामिस्रे नरककुहरे यद्बहिश्चक्रवालम्,
यत्पाताले यदपि धरणौ वार्षिकीषु क्षपासु ।
रूढं गाढं तम इति समस्तञ्च तच्चिन्त्यमानं
नास्माकान्तःकरणतमसो दासभावेऽपि योग्यम् ।।

इति वर्णितदिशा विद्यते । न ह्यज्ञानं नाम गाढं तमः शास्त्रेणास्त्रेणासिना वा दूरीकर्त्तुं शक्यते । तदर्थं महतः प्रकाशस्य भवत्यावश्यकता । स च प्रकाशः श्रीमद्भागवताध्ययनेन सञ्जायत इत्यत्र सन्ति बहून्युदाहरणानि ।

श्रीमद्भागवतमपि शब्दतोऽर्थतश्च विपुलं पुराणमतिगहनञ्च । तदस्मिन् सधैर्यं प्रविश्य श्रीपञ्चोलीमहोदयः साङ्ख्यतत्त्वमन्विष्य हृदयङ्गमया भाषया एकत्रीकृत्य नाम्ना 'श्रीमद्भागवतीयं साङ्ख्यम्' निबन्धं विरचयामास ।

अद्यतनेषु दिनेषु प्रतिभाशाली विद्याव्यसनी च छात्रलोकोऽल्पीयसा कालेन सर्वमधिगन्तुमभिलषति । तत्रायं ग्रन्थो महानुपकारकस्स्यादिति विश्वसिमि । यतो ह्यस्मिन् निबन्धे वेदेषु उपनिषत्सु पुराणेषु च प्रतिपादितं साङ्ख्यं सङ्गृह्य निरूपितमस्ति । साङ्ख्यस्वरू पाधिगमाय वेदानामुपनिषदां पुराणानाञ्च समेषामध्ययनाय भूयान् काल आवश्यकः, तावती सहनशक्तिश्चावश्यकी अस्यैकस्य निबन्धस्याध्यनेन 'अर्के चेन्मधु विन्देत किमर्थं पर्वतं व्रजेत्' इति न्यायेन बहुकालसाध्यं कष्टमनुभवितुं को वा प्रवर्तेत । साङ्ख्यशब्दस्य व्युत्पत्तिभेदेन शाब्दिकार्थेषु भिन्नेष्वपि तत्त्वार्थस्त्वभिन्नो भवति । अध्यापकानुरूपं कार्यमाचरितं पञ्चोलीमहोदयेन । वनतलस्यैकोऽपि वृक्षः कुसुमितस्समग्रं वनं स्वीयसौगन्ध्येन वासयत्येव, किमु वक्तव्यं यत्रानेकेऽनोकहाः पुष्पिता भवन्ति ।

श्रीलालबहादुरशास्त्रिकेन्द्रियसंस्कृतविद्यापीठस्य प्राचार्यः श्रीमण्डनमिश्रोऽपि नूनं प्रशंसाभाजनम्, य एतादृशेषु विद्यापीठगौरवसमेधकेषु कार्येषु विद्यापीठसदस्यान् अध्या पकानधीतिनश्च प्रोत्साहयन् विविधान् ग्रन्थांश्च प्रकाशयन् विद्यापीठमुन्नतशिखरमारोपयितुं सततं चेष्टते । पवित्रेऽस्मिन् कार्ये केन्द्रियशिक्षामन्त्रालयाधिकारिणः पर्याप्तां सामग्रीसम्पदं वितरन्तः न केवलं विद्यापीठस्यापि तु समस्तस्य संस्कृतजगतः प्रोत्साहजनका इति वाक्यं योजयन्नन्ते सर्वानेव विद्यापीठसदस्यान् संवर्द्धयामि यन्निलिम्पवाणीमनितरसाधारण्या सपर्यया तोषयन्तो भारतमातरं प्रीणयन्त्विति ।

संवत् २०४३
ज्येष्ठ कृष्णासप्तमी
३१-५-८६

पट्टाभिरामशास्त्री
वेदमीमांसानुसन्धानकेन्द्रम्
वाराणसी

प्रधानसम्पादकीयम्

भारतवर्षमिदं सुबहोः कालाद् विश्वगुरुत्वगौरवमावहति। गौरवमिदमस्मै देशाय यत्तत्त्वम्प्रयच्छति, तत्तत्त्वमस्ति दर्शनशास्त्रम्। यतोऽत्र विश्वस्मिन् विश्वे भ्राजमानम्भौतिकञ्चाकचक्यन्तु भारतादपि समधिकतममन्यत्र सुलभमास्ते। परमेतद्दर्शनमनेन च समधिगम्यमानाऽऽत्यन्तिकी दुःखनिवृत्तिः सुनिश्चितरूपेण नान्यत्र सुलभा। अतएवाऽत्र सर्वथा समपेक्ष्यते दर्शनशास्त्राणामनुशीलनन्तदर्थञ्च तद्विषयकङ्गवेषणङ्गवेषितविषयाणाम्प्रकाशनम्प्रचारणञ्च।

आत्मविषयकविचारपराणि सर्वाण्यपि शास्त्राणि दर्शनशास्त्रत्वेनोररीक्रियन्ते। तद्दर्शनं शरीरमेवाऽऽत्मत्वेन स्वीकुर्वच्चार्वाकदर्शनम्भवेत्, सर्वङ्खल्विदम्ब्रह्मेति प्रतिपादनपरं वेदान्तदर्शनं वा स्यात् सन्ति सर्वाण्यपि दर्शनानि, यतस्तैस्तैराचार्यैस्तथा तथाऽऽत्मविचारस्तदङ्गत्वेन च तत्त्वान्तरविचारो विहितोऽस्ति, "यत्परः शब्दः स शब्दार्थः" सिद्धान्तमेनमनुसृत्य सर्वेषामपि दर्शनानाञ्चरमम्परमञ्च लक्ष्यमेकमेवाऽस्त्यात्यन्तिकदुःखनिवृत्त्यात्मकङ्कैवल्यम्। "ज्ञानञ्च लोके यदिहास्ति किञ्चित् साङ्ख्यागतन्तद्धि महन्महात्मन्" "नास्ति साङ्ख्यसमं ज्ञानम्" "सङ्ख्यावान् पण्डितः कविः" इत्यादीनि वचांसि समनुसृत्य वक्तुं शक्यते यदस्य सर्वस्यापि तत्त्वज्ञानस्य कृते साङ्ख्यशब्दस्य प्रयोगो विहितोऽस्ति। तत्त्वज्ञानापरपर्यायत्वेनैव साङ्ख्यं स्वीकुर्वता डॉ. पञ्चोलिना पण्डितमार्त्तण्डानां श्रीहनुमत्प्रसादशास्त्रिणान्निर्देशने दिवङ्गतेषु च तेषु मन्निर्देशने वाराणसेयसंस्कृतविश्वविद्यालयतो विद्यावारिधिरित्युपाधये श्रीमद्भागवतीयं साङ्ख्यमिति नाम्ना शोध-प्रबन्धो लिखित्वा प्रस्तुतः शोधोपाधिश्चाधिगतः।

शोध-प्रबन्धेऽस्मिन् श्रीमद्भागवतमहापुराणप्रतिपादितन्तत्त्वज्ञानं विशेषतश्च नैकविधसृष्टिप्रक्रियाविवेचनम्प्रस्तुतमस्ति। तत्र नैकेषामाचार्याणान्तत्त्वगणनाविषयके वैमत्ये सत्यपि पारमार्थिकरूपेण तेषां समेषामप्यैकमत्यमेव सम्पद्यतेतरामिति समन्वयात्मदृशा स्पष्टीकृतम्। प्रसङ्गतश्च वेदोपनिषत्पुराणान्तरेषु च समुपलब्धसाङ्ख्यनिर्देशपूर्वकं साङ्ख्यतत्त्वविवेचनं सुस्पष्टतया व्यापकदृशा विधाय साङ्ख्यसिद्धान्ता-

श्चापि निर्दिष्टाः सन्तीति ग्रन्थस्यास्य तत्त्वबुभुत्सूनाङ्कृते भवति परमावश्यकतेति समनुभूय ग्रन्थोऽयम्प्रकाश्यते ।

डॉ. पञ्चोलिनोऽस्याः कृतेः प्रकाशने विद्यापीठमिदं व्यक्तिशश्चाहं विशिष्टं हर्षप्रकर्षमनुभवामि । विद्यापीठस्य शैशवकालत एव डॉ. पञ्चोलिनोऽस्य विकासे शोधस्नातकत्वेन प्राध्यापकत्वेन प्रवाचकत्वेन च विशिष्टं योगदानमस्ति । डॉ. पञ्चोली विद्यापीठस्यैतादृशः स्तम्भोऽस्ति, यदधिकृत्य संस्थेयङ्गौरवमावहति । एकतः स्वाध्ययनाऽध्यापनमननचिन्तनैश्छात्रमार्गदर्शनैश्चानेन विद्यापीठगरिम्णः समभिवृद्धिरकारि; अपरतश्च छात्रावासाऽधिष्ठातृत्वेनाऽनेन छात्रेभ्यो वात्सल्यमयं संरक्षणम्प्रयच्छताऽस्य सञ्चालनेऽसाधारणं योगदानं विहितम् । विद्यापीठस्य सांस्कृतिकदूतत्वेन भवता राजधान्याः प्रतिकोणं स्वविद्या-विनय-सौजन्यप्रभावतोऽस्याः संस्थायाः या प्रतिष्ठा समभिवर्धिता सा संस्थायारैतिह्ये स्वर्णाक्षरेषूल्लेखनीयाऽस्ति । अहमस्याः कृतेः प्रकाशनपुण्यप्रसङ्गे डॉ. पञ्चोलिनमभिनन्दयामि तस्य वैदूष्यपूर्णाङ्कृतिमिमाञ्च राष्ट्राय समर्पयामि ।

ग्रन्थस्यास्य भूमिकाँल्लिखित्वा श्रद्धेयैः गुरुवर्य्यैः आचार्यैः श्रीपट्टाभिरामशास्त्रिभिर्यदस्माकम्महत्त्वं वर्धितन्तदर्थङ्कृतज्ञतां सहस्रशो प्रणामाञ्जलीश्च समर्पयामि ।

नव देहली-१६

बुद्धजयन्ती १९८६ **डा. मण्डन मिश्रः**

—०—

॥ ऊँ श्री : ऊँ ॥

अवतरणिका

श्रीशङ्कमलपत्राक्षं सर्वपालनतत्परम् ।
सर्वदं शर्मदन्नौमि श्रद्धया संश्रये परम् ॥
प्रणवाख्यम्परञ्ज्योतिः भ्राजते भुवनत्रये ।
तदेव भ्राजताम्मेऽन्तः परमानन्ददम्महः ॥

परमात्मनो परमानुग्रहेण वाराणसेयसंस्कृतविश्वविद्यालयतो विद्यावारिधिः (पी-एच्. डी.) इत्युपाधये गुरुवर्य्याणां स्व. श्रीहनुमत्प्रसादशास्त्रिणाम्मार्गनिर्देशने दिवङ्गतेषु च तेषु गुरुवर्य्याणां डॉ. मण्डनमिश्रमहोदयानाम्मार्गनिर्देशने लिखितो वाराणसेयसंस्कृतविश्वविद्यालयेन चैकोनसप्तत्युत्तरैकोनविंशतितमख्रिष्टाब्दे विद्यावारिधिः (पी-एच्. डी.) इत्युपाधये स्वीकृतः श्रीमद्भागवतीयं साङ्ख्यमित्याऽऽख्यः शोध-ग्रन्थः श्रीलालबहादुरशास्त्रिकेन्द्रीयसंस्कृतविद्यापीठप्राचार्यैः ग्रन्थस्यास्य प्रधानसम्पादकैः गुरुवर्य्यैः डॉ. मण्डनमिश्रैः सम्प्रति प्रकाश्यते। तदर्थमहन्तेषाञ्चरणारविन्देषु सश्रद्धं शतशः प्रणामाञ्जलीः प्रस्तूय कृतज्ञतां समभिव्यञ्जयामि। ग्रन्थस्यास्याऽध्येतॄणाङ्कृते विषयप्रवेशसौकर्यार्थं प्रतिपादितविषयवस्तुविषये यत् किञ्चिद् विनिवेदयामि।

ग्रन्थस्यास्य मङ्गलाचरणानन्तरम्मया सर्वतः प्राग्विषयपरिचयस्तन्महत्त्वञ्च प्रस्तुतम्। तस्य भावोऽयमस्ति, यदत्र साङ्ख्यनाम्ना केवलं साङ्ख्यकारिकादिभिः ग्रन्थैः प्रतिपादितं साङ्ख्यमेव नास्ति, परमिह मया "सङ्ख्यावान् पण्डितः कविः, इत्यनेन प्रकारेणामरकोशे निर्दिष्टस्तत्त्वज्ञानाऽऽत्मकोऽर्थः स्वीकृतः। कथनस्यास्य तात्पर्यमिदमेव वर्त्तते यदस्मिन् ग्रन्थे मया श्रीमद्भागवतमहापुराणे यानि स्थलानि तत्त्वज्ञानपराणि समुपलब्धानि तानि सर्वाणि स्थालीपुलाकन्यायेन प्रायशः समुपवर्णितानि। यद्यपि मया श्रीमद्भागवते नैकधा सृष्टिस्थितिलयप्रतिपादनपराणि चतुरशीत्युत्तरत्रिशतसङ्ख्याकानि स्थलानि समधिगतानि परमिह केवल

ञ्चतुश्चत्वारिंशदुत्तरशतसङ्ख्याकान्येव स्थलानि विवेचितानि तदितराण्यप्येता-दृश्येवेति ग्रन्थविस्तरभिया परित्यक्तानि ।

श्रीमद्भागवतमहापुराणे भगवता श्रीकृष्णेन जिज्ञासुप्रवरमुद्धवमुद्बोधयता समन्वयाऽऽत्मिका दृक् प्रादायि । सैव दृगिह "साङ्ख्यस्य नैकविधत्वस्फूर्तिमूल-मित्येतस्मिन् प्रकरणे प्रस्फुटीकृतम् । तस्य तात्पर्यमिदमेवाऽस्ति यदत्र युक्तियुक्तम्-प्रतिपादनपरैर्महर्षिभिर्यत् किञ्चिदपि प्रतिपादितन्तत्सर्वमपि सङ्गच्छते । अतएव ग्रन्थेऽस्मिन् नैकधा प्रतिपादितं सर्वमपि तत्त्वविवेचनं पारमार्थिकरूपेणैकनिभमेवेति स्वीकृत्य विवेचितम् ।

श्रीमद्भागवतीयं साङ्ख्यमिति ग्रन्थविषये समेषामपि जिज्ञासा भवेदेव, यदत्र किन्नाम भागवतङ्किञ्च तत् साङ्ख्यमिति कृत्वैव तृतीयं प्रकरणं मया श्रीमद्भागवतमे कम्पुराणम्पुराणानामष्टादशत्वञ्चेति प्रस्तुतम् । तत्र पुराणलक्षणं श्रीमद्भागवते सर्वथा सङ्गच्छत एवेति ग्रन्थस्यास्य पुराणलक्षणङ्घटयता पुराणत्वं संसाधितन्तदनन्तरञ्च पुराणान्यष्टादशैव कथम्भवन्तीति स्पष्टीकुर्वताऽऽत्मनोऽष्टादशस्वरूपाणि चाऽपि निर्दि-ष्टानि तान्यनुसृत्यैवेह पुराणानामष्टादशत्वं महाभारतस्य पर्वणामष्टादशत्वं श्रीमद्भग-द्गीतायारध्यानामष्टादशत्वं श्रीमद्भागवतश्लोकसङ्ख्यायाश्चाप्यष्टादशसहस्रा त्मकता कथमिति सर्वोऽपि विषयः प्रतिपादितः, प्रकरणेऽस्मिन् सर्वेषामपि महापुराणानां सुसङ्क्षिप्तो परिचयश्चापि प्रस्तुतः । यद्यपि वैशिष्ट्यानि समवलोक्य भागवतत्वमुभयो श्चापि श्रीमद्भागवतदेवीभागवतयोः पुराणयोः सर्वथा महापुराणत्वं सङ्गच्छते तथापीह केवलं श्रीमद्भागवतमहापुराणमधिकृत्यैव लिखितमिति चाऽपि तत्र स्पष्टीकृतम् ।

पुराणकालनिर्णयाऽऽत्मके प्रकरणे मया सङ्क्षिप्तरूपेणाऽऽधुनिकानां विदुषा-म्मतानि प्रदर्श्य श्रीमद्भागवतादीनामाभ्यन्तरिकैः प्रमाणैः संसाधितं यदत्र द्वापरयुगस्य चरमे श्रीमद्भागवतस्य स्थितिर्नूनमेवाऽऽसीदर्थात् प्रायशः पञ्चसहस्राब्दतोऽपि सुपूर्वमेव पुराणान्यासन्निति संसाधितम् ।

पद्मपुराणस्योत्तरखण्डे श्रीमद्भागवतमाहात्म्यं समुपवर्णितमस्ति तदेवाऽधिकृत्य "श्रीमद्भागवतस्य पुराणेषु सुविशिष्टं सर्वातिशायि स्थानमस्ति मुख्यतश्चास्मिन् पुराणे तत्त्वज्ञानमेव प्रतिपादिसमस्तीति सुस्पष्टीकृतम् ।

वेदानाम्प्रामाण्यं यानि दर्शनानि स्वीकुर्वन्ति तानि सर्वाण्यपि दर्शनान्यास्तिकदर्शनानीति स्वीक्रियन्तेतरामथ च यानि दर्शनानि वेदानाम्प्रामाण्यन्नोररीकुर्वन्ति तान्येव नास्तिकदर्शनानीति प्रोच्यन्ते ।

परमिह सुबहूनाञ्जनानान्धारणाऽस्ति यदिदं साङ्ख्यदर्शनमपि नास्तिक-

साङ्ख्यशव्दविचाराख्ये प्रकरणे मया दुःखत्रयनिवृत्तिरूपस्य मोक्षस्य साक्षात् प्रयोजकस्य तत्त्वज्ञानस्य च प्रतिपादकन्दर्शनमेव साङ्ख्यमस्तीति नैकैः प्रमाणैः संसाधितम् । तथा चेह पूर्वन्निखिलमपि दर्शनशास्त्रजातं साङ्ख्यनाम्नैव व्यवहृतमासीत् कालान्तरे च दर्शनान्तराणामपि प्रचलनमभूत्, परमिह प्राचीनतमन्दर्शनन्तु साङ्ख्यमेवाऽस्तीति सर्वोऽपि विषयः सङ्क्षिप्तरूपेण प्रस्तुतः । साङ्ख्यपुराणयोः सम्बन्धरिति नामधेये प्रकरणे मया स्पष्टीकृतं यदत्र सर्वेष्वपि पुराणेषु पुराणत्वमेव तदा सङ्घटते यदा तेषु सृष्टिस्थितिलयाश्चाऽपि प्रतिपादिताः स्युः । साङ्ख्यदर्शनेऽपि सृष्टिस्थितिलयाः प्रतिपाद्यन्त एव । वंश्यानुचरितम्मन्वन्तराणि च साङ्ख्ये साक्षान्नैव प्रतिपादितानि भवन्ति, तथापि तेषाम्मूलकारणानि सर्वथाऽत्र विवेचितानि सन्तीति साङ्ख्यपुराणयोः प्रतिपाद्यविषयसाम्याऽऽत्मकः सम्बन्धोऽस्तीति निर्दिष्टमस्ति ।

श्रीमद्भागवतमहापुराणे नैकेषु स्थलेषु नैकधा प्रतिपादितं साङ्ख्यमित्येतस्मिन् प्रकरणे श्रीमद्भागवतमहापुराणस्य प्रथमस्कन्धस्य प्रथमाऽध्यायस्य प्रथमश्लोकतः समारभ्य श्रीमद्भागवतमहापुराणस्य द्वादशस्कन्धं यावत् समुपलब्धविभिन्नैर्नामरूपाऽऽत्मकैः स्वरूपभेदैर्नैकधा प्रतिपादिताः सृष्टिस्थितिलयाः सुसङ्क्षिप्तरूपेण प्रतिपादिताः सन्ति ।

अस्मिन् प्रकरणे प्रायशः सर्वैश्चापि दर्शनैः स्वीकृतानि सर्वाण्यपि सृष्टिस्थितिलयस्वरूपाणि परस्परन्निर्विवादरूपेण तत्त्वज्ञानाऽपरपर्यायकेण साङ्ख्यनाम्ना प्रतिपादितानि सन्ति । तस्य भावोऽयमस्ति यदत्र वैमत्यानि यानि परस्परं विरुद्धानीव प्रतिपाद्यन्ते, तानि सर्वाण्यपि व्यपगच्छन्ति पारमार्थिकरूपेण चैक्यमेव जायते, तत्त्वज्ञानजातस्येति सुनिश्चितम् । भेदास्तु केवलन्नाम्नामेव सन्ति । तत्त्वेषु तु पारमार्थिकमैक्यमेवेति विचार्य यथा तथा प्रतिपादितानि सर्वाणि प्रतिपादनान्यत्र गुम्फितानि ।

दर्शनमिति । एतादृश्याः सर्वथा भ्रान्तधारणायाः समूलोत्खातायास्य "वेदेषु प्रतिपादितं साङ्ख्यमित्येतस्मिन् प्रकरणे स्थालीपुलाकन्यायेन कानिचिदेव स्थलानि संहितानां सुप्रसिद्धोपनिषदाञ्च समुद्धरता संसाधितं यदिदन्दर्शनन्न केनाऽपि कथञ्चिदपि नास्तिकदर्शनत्वेन प्रतिपादयितुं शक्यते, यतोऽत्र सर्वथा समुपलभ्यते वेदमूलकताऽस्य दर्शनस्येति वेदेषूपनिषत्सु च साक्षादस्योपलब्धेः ।

साङ्ख्यदर्शनस्य व्यापकतां प्रतिपादयता मया "महाभारते प्रतिपादितं-साङ्ख्यम्" इत्येतस्मिन् प्रकरणे कानिचित् स्थलानि महाभारतस्य साङ्ख्यप्रतिपादकानि समुद्धृतानि तथा चेह "पुराणेषु प्रतिपादितं साङ्ख्यमिति प्रकरणे मया सुविशिष्टेष्वेकादशमहापुराणेषु समुपलब्धानि कानिचित् स्थलानि साङ्ख्यप्रतिपादकानि समुद्धृतानि सन्ति । तेनेदं सिध्यति यदिदं साङ्ख्यदर्शनम्प्राचीनतमं प्राचीन-संस्कृतवाङ्मये सुव्यापकं सर्वैश्चापि सस्नेहं सर्वथा समादृतञ्च दर्शनेषु रत्नायमानन्द-दर्शनमस्तीति निश्चितम् ।

साङ्ख्यदर्शने सामान्यतोऽत्र सर्वैश्चापि विद्वद्भिः पञ्चविंशतितत्त्वानि भवन्तीति सर्वथा स्वीक्रियते । यैः पञ्चत्रिंशत्तत्त्वानि स्वीक्रियन्ते तैः शब्दस्पर्शरूपरस-गन्धानां दिव्यादिव्यत्वभेदेन ज्ञानेन्द्रियाणान्दिव्यादिव्यत्वभेदेन च पञ्चत्रिंशत्तत्त्वत्वं संसाध्यते । तेनैव प्रकारेण ये चत्वारि तत्त्वान्येव सन्तीति मन्यते—ते पृथिवी, जलम्, तेजः, आत्मेति तत्त्वानि मन्यन्ते तैस्तत्त्वेष्वेतेष्वेव सर्वेषामपि तत्त्वान्तराणां समावेशो विधीयते ।

कथनस्यास्य तात्पर्यमिदमेवाऽस्ति यदत्र तत्त्वानां सङ्ख्यानन्नैकधा नैकैराचार्यै-राचरितम्परमिह यानि पञ्चविंशतितत्त्वानि साङ्ख्येन स्वीक्रियन्ते तेषामेव विभागान् विधाय कैश्चित् सङ्ख्या परिवर्धिता कैश्चिच्च परस्परं व्यूहान् विधाय सङ्ख्या स्वल्पतमीकृता । अतएवाऽत्र मया सुप्रसिद्धानि पञ्चविंशतितत्त्वानि पञ्चविंशतितत्त्व विवेचनमिति नामके ग्रन्थस्यास्यांशे विहितम् । तत्रापि मया समन्वयात्मकदृशा तत्त्वानां व्यापकान्येव स्वरूपाणि श्रुतिस्मृतिप्रमाणपुष्टानि विवेचितानि सन्ति ।

ग्रन्थस्यास्य चरमे प्रकरणे मया साङ्ख्यशास्त्रसिद्धान्ताश्चापि सङ्क्षिप्तरूपेण प्रतिपादिताः येन शास्त्रस्यास्य प्रमाणादिविषयिणी कीदृशी मान्यताऽस्ति सर्वेषामपि दर्शनानाञ्चरमलक्ष्यत्वेन प्रतिपाद्यमानस्य मोक्षस्य च किं स्वरूपमिति चाऽपि स्पष्टीकृतम् । साङ्ख्यमधिकृत्य लिलिखिषूणाङ्कृतेऽत्राऽऽशाप्रदसाङ्ख्यनाम्ना केचन ग्रन्थास्तेषामं-

शसङ्केताश्च आशाप्रदं साङ्ख्यमिति प्रकरणे विहिताः सन्ति; येन साङ्ख्यवाङ्मयस्य श्रीवृद्धिः सम्भवेत्।

सर्वथा किञ्चिज्ज्ञोऽप्यहं यदद्य यावत् संवृत्तोऽस्मि तत्र गुरुजनानां समनुग्रहस्तेषां शुभाशिराशिश्चैवाऽस्ति बीजमिति अकारादिवर्णमालायाः शिक्षकगुरुचरणेभ्यः समारभ्य विद्यावाचस्पतिः(डी. लिट्.)इत्युपाधये लिखितशोधप्रबन्धपर्य्यवेक्षकगुरून् यावत् सर्वेऽपि गुरुवर्य्याः सश्रद्धं स्मर्यन्ते कार्त्तज्ञ्यप्रकाशनपुरःसरम्भूयो भूयः प्रणम्यन्ते तेषाङ्गुरुनाजनानोमानि क्रमशोऽत्र चाधस्तात् प्रस्तूयन्ते। मम जन्मभुवि बरूँदनीति भीलवाड़ामण्डान्तर्गते राजस्थानप्रदेशस्थे ग्रामे राजकीये विद्यालये प्रारम्भिकशिक्षाप्रदातारः श्रीगिरिधारीलाल शर्माणः श्रीहरिवल्लभोपाध्यायाः, श्रीअर्जुनदेवाः श्रीधनेश्वरशर्माणः श्रीनन्दलालशर्माणश्चेतिबरूँदन्यामेव श्रीमुनिकुलब्रह्मचर्याश्रमे प्राथमिकसंस्कृतशिक्षाप्रदातारः श्रीरामगोपालभट्टाः सन्ति। जावरामध्यप्रदेशस्थायाङ्गोविन्दसंस्कृतपाठशालायां प्रथमामध्यमाप्रथमखण्डयोः शिक्षकाः श्रीकेशवप्रसादशास्त्रिणः शेलूबाजारमध्यप्रदेशस्थे श्रीमारवाड़िसंस्कृतमहाविद्यालये पूर्वोत्तरमध्यमयोः पाठयितारः श्रीरामावतारशास्त्रिणः, अकोलामध्यप्रदेशे काव्यतीर्थगुरवः श्रीभवानीशङ्करशास्त्रिणः, उदयपुरराजस्थानस्थे महाराणाआयुर्वेदमहाविद्यालये भिषग्वरशिक्षकाः श्रीप्रभुदत्तशास्त्रिणः श्रीवासुदेवशास्त्रिणः श्रीमदनकुमार शास्त्रिणः, श्री जगन्नाथशास्त्रिणः श्रीमोहनलालशास्त्रिणश्चेति, महाराणा संस्कृतकालेजेति नामके महाविद्यालये शास्त्र्याचार्यपाठकाः श्रीखड्गनाथमिश्राः स्व. श्रीलक्ष्मीनारायणपुरोहिताः स्व. श्रीचम्पालालशास्त्रिणः, श्रीरामसुखपञ्चोलिनः श्रीहरिकृष्णगोस्वामिनः, स्व. श्रीबिहारीलालशास्त्रिणः, श्रीकालिदासशास्त्रिणश्चेति। वाराणसयेसंस्कृतविश्वविद्यालये साहित्यगुरवः खिस्ते श्रीमुकुन्दशास्त्रिणः खिस्ते श्रीबटुकनाथशास्त्रिणः, श्रीद्विजेन्द्रनाथमिश्राश्चेति। दिल्लीस्थेऽखिलभारतीयसंस्कृतविद्यापीठे साङ्ख्ययोगविद्यावारिधिगुरवः डॉ. मण्डनमिश्राः स्व. महामहोपाध्यायाः श्रीपरमेश्वरानन्दशास्त्रिणः, स्व. पण्डितमार्त्तण्डाः श्रीहनुमत्प्रसादशास्त्रिणः, विद्यावाचस्पतयः श्री अमीरचन्द्रशास्त्रिणः, शिक्षाशास्त्रगुरवः श्रीरामस्वामिनः, डॉ. श्रीधरवासिष्ठाः, श्रीसुवालालोपाध्यायाः सुश्रीसुदेशकुमार्यश्चेति, विद्यावाचस्पतिपर्य्यवेक्षकाः कामेश्वरसिंहदरभङ्गासंस्कृतविश्वविद्यालये डॉ. रामसेवकझामहोदयाश्चेति। सर्वेऽप्यमी परमवात्सल्येन हार्दिकेन स्नेहभावेन च समनुगृह्य मे जीवनङ्कृतार्थीकृतवन्तः। अतएवाऽहं सर्वेषामप्यमीषाञ्चरणारविन्देषु सस्नेहङ्कोटिशः साष्टाङ्गम्प्रणमामि हार्दिकीङ्कृतज्ञताञ्च समभिव्यञ्जयामि।

पूज्यवर्य्याः सर्वेऽप्यभिभावकाश्चाऽपि भूयो भूयः समभिवन्द्यन्ते येषामनुग्रहेण शुभाशीर्भिश्च शरीरस्यास्य व्यक्तित्वस्यास्य च विकासः समभूत्तेषां सर्वेषामपि पादपद्मेषु सस्नेहं सश्रद्धङ्कोटिशः प्रणमामि । ते सन्ति—पूज्याः पितामह्यः स्व. श्रीप्रतापीदेव्यः, पूज्याः पितृवर्य्याः स्व० श्रीओङ्कारलालपञ्चोलिनः, मातृपादाः स्व. श्रीदमयन्तिदेव्यः, श्रीश्वसुरवर्य्याः श्रीकिशनलालशर्माणः श्वश्रूवर्य्याः श्रीमतीकाशीदेव्यः, ज्येष्ठतमावुत्ताः मन्त्रदीक्षाप्रदातृगुरवश्च श्रीपुरुषोत्तमशर्माणः, ज्येष्ठतमभगिन्यः श्रीमनोहरदेव्यः, ज्येष्ठतरभ्रातरः श्रीहरिशङ्करशर्माणः, ज्येष्ठतरभ्रातृजायाः श्रीअनूपदेव्यः, ज्येष्ठतरावुत्ताः स्व. श्रीमोहनलालव्यासाः, ज्येष्ठतरभगिन्यः श्रीरामसुखिदेव्यः, ज्येष्ठभ्रातरः श्री लक्ष्मीनायणपञ्चोलिनः ज्येष्ठभ्रातृजायाः स्व. श्रीकमलादेव्यः, ज्येष्ठावुत्ताः श्रीबंशिलालशर्माणः ज्येष्ठभगिन्यः स्व. श्रीशान्तिदेव्यस्तासां स्थानापन्नाः श्रीशान्तिदेव्यश्चेति । एतदतिरिक्तम्मातुलाः श्रीमधूसूदनाचार्याः पूज्याः श्रीनाथमुनिशास्त्रिणः, श्रीभूदेवशास्त्रिणः श्रीजनार्दनाचार्याः श्रीउत्सवेन्द्रशास्त्रिणः श्रीजडावचन्द्रभुँवालियाः श्रीभंवरलालत्रिपाठिनः स्व. श्रीकालूराम त्रिपाठिनः श्रीमांगीलालत्रिपाठिनःश्रीतुलसीरामपञ्चोलिनः श्रीरामकुमारपञ्चोलिनः श्रीपुरुषोत्तमचतुर्वेदाः श्रीकिशनलालजोशि श्रीलालूरामभट्टप्रभृतयः सर्वेऽपि समभिवन्द्यन्ते येषां शुभाशिषः सदैवाऽधिगम्यन्ते समनुग्रहश्च सदैवासीदस्ति भविष्यति चेति । प्रसङ्गेऽस्मिन् डॉ. रुद्रदेव त्रिपाठिनश्चापि प्रणम्यन्ते येषाम्भूयो भूयः प्रेरणयैव ग्रन्थस्यास्य प्रकाशनम्भवति । श्रीरमेशचन्द्रचतुर्वेदानामप्यहङ्कृतज्ञोऽस्मि यैः सर्वप्रथमं शोधकर्मणे प्रेरितोऽभूवमिति ।

ग्रन्थस्यास्य लेखनाऽवसरे सर्वविधसौविध्यप्रदायिनी मद्गेहलक्ष्मी गुरुवर्य्यैः लक्ष्मी देवीति प्रदत्तनाम्नी श्रीमतीलाडदेवी चापि कृतज्ञतापुरःसरं शुभाशीर्भिः समभिनन्द्यते वर्धाप्यते च यदत्र तत्सहयोगेनैवैतत्कर्म पूर्णतामेति । यथासमयङ्ग्रन्थममुं प्रकाशयितुङ्कृतप्रयत्नौ मुद्रणालयाऽध्यक्षः श्रीरामपालशर्मा विद्यापीठप्रकाशनविभागे वरिष्ठलिपिकः श्रीमदनमोहनसती चेत्युभावपि कृतज्ञताज्ञापनपूर्वकन्धन्यवादैः सभाज्येते ।

"गच्छतः स्खलनङ्क्वाऽपि भवत्येव प्रमादतः" सूक्तिमेनां समनुसृत्य ग्रन्थेऽस्मिँश्चाऽपि मे सुबहूनि स्खलनानि मेऽज्ञानपारश्यान्मुद्रणालयकर्मचारिणाम्प्रमादपारवश्याद् वा जातानि स्युरिति तदर्थमहं श्रीमतां समेषामपि पूज्यवर्य्याणां विदुषाम्पादारविन्देषु प्रमाणाञ्जलिपूर्वकङ्क्षमार्थी वर्त्ते, प्रार्थये च यदत्र भवद्भिः त्रुटिविषयकसूचनया समनुग्राह्योऽयं स्वजनरिति ।

ग्रन्थेऽस्मिन् विषयप्रतिपादने यत् किमपि वैशिष्ट्यम्परिलक्ष्यते तत् सर्वमपि गुरुजनानुग्रहप्रसादमात्रमेवास्ते । अथ चेह यानि कानिचिदपि स्खलनानि सन्ति तानि सर्वाणि मदनवधानजानीति विद्वद्वरेण्याः क्षमिष्यन्त्येवेति मे द्रढीयान् विश्वासः ।

बालकस्य तोकायितेनापि सर्वेऽप्यभिभावकाः सन्तुष्यन्त्येवेति निश्चितन्तथैव तोकायितमिव मे प्रयासं मन्यमानाः सर्वेऽपि शेमुषीमन्तो विद्वांसः सन्तोषमावक्ष्यन्त्येवेति निश्चितम् ।

एवं सत्यपि ग्रन्थेनानेन यदि केषाञ्चन जिज्ञासूनां विद्यार्थीनाञ्च काऽप्युपकृतिः स्यात्तर्हि मन्ये मया कृतोऽयम्प्रयासः सफलीभवेदेवेति निश्चप्रचम् ।

परमश्रद्धेयैः मम परमगुरूभिः पद्मभूषणैः आचार्यैः श्रीपट्टाभिरामशास्त्रिपादैः ग्रन्थस्यास्य प्रस्तावनालेखनेन योऽयमनुग्रहो विहितस्तदर्थमहन्तेषाञ्चरणाविन्दयोः सश्रद्धङ्कोटिशः प्रणमन् हार्दिकीङ्कृतज्ञताम्प्रकटयामि ।

वह्नियुगखनेत्राब्दे, माधवे कृष्णपक्षके ।
एकादश्यां रवौ शुभ्रे, भूमिकेयं निवेद्यते ।।

वैशाखकृष्णैकादशी रविवासरम्
२०४३ वैक्रमाब्दस्तदनु ४-५-१९८६ खृ०

डा. बदरीनारायणः शर्मा पञ्चोली
विद्यावाचस्पतिः (डी०लिट्०)
प्रणव-निवासः, गोविन्दपुरी, नवदेहली-१९
११४१ बी/६३

—०—

श्रीमद्भागवतीयं साङ्ख्यम्

विषयानुक्रमाणिका पृ० सं०

—०—

ॐ

श्रीमद्भागवतीयं साङ्ख्यम्

। श्रीगणेशाय नमः, श्रीसरस्वत्यै नमः, श्रीगुरुचरणकमलेभ्यो नमः, श्रीब्रह्मविष्णुमहेश्वरेभ्यः सशक्तिकेभ्यो नमो नमः ।।

प्रधानपुरुषौ दिव्यौ व्यक्तेऽप्यव्यक्तताञ्जुषौ ।
अनादिनिधनौ नौमि स्वतन्त्रावाश्रयौ विभू ।।

गणाधिपाय भारत्यै हरये परमात्मने ।
व्यासाय व्यासपुत्राय श्रीमद्भागवताय च ।।२।।

परमात्मावताराय साङ्ख्यज्ञानप्रदायिने ।
कपिलाय परेशाय कोटिशोऽस्तु नमो नमः ।।३।।

तच्छिष्यादासुरेर्ये ये साङ्ख्यशास्त्रप्रवर्त्तकाः ।
आसन् सन्ति भविष्यन्ति तेभ्योऽस्तु शतशो नमः ।।४।।

स्नेहस्निग्धान् पूज्यवर्यान् वात्सल्यरसपूरितान् ।
परया श्रद्धया नौमि साष्टाङ्गम्मे गुरून् गुरून् ।।५।।

बदरीत्यभिधा यस्य नारायणसमन्विता ।
पञ्चोलीत्यवटङ्कः स निबध्नाति सताम्मुदे ।।६।।

*

१. विषयपरिचयस्तन्महत्त्वञ्च

"नास्ति साङ्ख्यसमञ्ज्ञानं" तथा "ज्ञानञ्च लोके यदिहास्ति किञ्चित् साङ्ख्यागतं तद्धि महन्महात्मन्" इत्यादिरूपां महाभारत-भारतीं वीक्ष्य सर्वेषामपि विदुषाञ्चेतःसु किं तत्साङ्ख्यमिति जिज्ञासा स्वभावत एव समुत्पद्यते । अपरस्यां दिशि 'विद्यावतां भागवते परीक्षा' इत्यादीनि वाक्यानि परीक्षमाणानां सेयमपेक्षाऽपि न खलु नोत्पद्यते; अपि तु नूनमेव समुत्पद्यत एव, यत् कास्ता विद्याः याः समधीयानाश्चापि सम्यग्विदन्तोऽपि च भागवते परीक्षिता भवन्ति।

एतेन वाक्येन हि श्रीमद्भागवते कासाञ्चिद् सुविशिष्टानां विद्यानां सत्ता सम्भाव्यते याः सम्यगभिज्ञातवन्तस्तत्परीक्षास्वनुत्तीर्णांश्च नाममात्रेण विद्वांसः सन्तोऽपि वास्तविका विद्वांसो नैव गण्यन्ते। तासां सद्विद्यानां जिज्ञासानान्निखिलानामप्यपेक्षाणाञ्च समाधानायेह केवलमेतत्कथनमेव पर्याप्तं भवति। यदिह नानाविधानि साङ्ख्यान्येव श्रीमद्भागवते ताः सर्वा विद्या इति। एताः साङ्ख्यस्वरूपा विद्याः सम्यगविज्ञाय विविधज्ञानविज्ञानपरिपूर्णानि निखिलान्यपि शास्त्ररत्नानि न खलु सम्यगवगन्तुं शक्यन्ते, न वा पुराणानां पारायणं कुर्वन्नपि तेषां याथात्थयेन रहस्यं कश्चित्सम्यक् परिज्ञातुं शक्तः स्यात्।

आस्तामन्यत्, श्रीमद्भागवतमेव, तत्र विभिन्नेष्ववसरेषु स्थलेषु च वैविध्येन विनिरूपितं साङ्ख्यं सम्यगपरिज्ञाय सरहस्यं परिज्ञातमिति कश्चित् दृढं न विश्वस्यात्। भारतीया संस्कृतिः, सभ्यता धर्मकर्मादिकं च यत्किञ्चिदपि जनजीवने ओतप्रोतं वर्त्तते, तत्सर्वं साङ्ख्यज्ञानमूलकसर्वविधदर्शनविचारादिनिष्पन्नमेव भवतीति निश्चप्रचम्। तस्या दार्शनिक्याः पद्धतेः परिज्ञानाय सर्वविधानां ज्ञानविज्ञानशाखानां सुपरिचयाय च श्रीमद्भागवते निरूपितं विविधं साङ्ख्यज्ञानमत्यावश्यकं वर्त्तते एवेति शोधप्रबन्धोऽयमुपक्रान्तः।

२. साङ्ख्यस्य नैकविधत्वस्फूर्तिमूलम्

साङ्ख्यं खलु सर्वदर्शनेष्वादिममत्यन्तं प्राचीनञ्च। तस्य विषये न सर्वेषामिदं विदितं यत् "एकमेव साङ्ख्यविज्ञानं विविधशिष्याणां बोधमाधातुमाचार्यैर्नानाशैलीभिः। परिव्याख्यातम्। तत एव दर्शनेऽस्मिन् नानामतानि प्रचारं लेभिर" इति। ईश्वरकृष्णस्य साङ्ख्यकारिकाणाम् समुपलब्धानां साङ्ख्यसूत्राणामेव च ये सिद्धान्ताः सन्ति तेष्वेव सर्वसाधारणानां दृष्टावधुना सर्वं साङ्ख्यं परिसमाप्यते। अथ च तासां साङ्ख्यकारिकाणां तेषां साङ्ख्यसूत्राणाञ्च यत् किञ्चित् समुलभ्यमानं टीकाटिप्पण्यादिकमुपलभ्यते तत्रैवेति। परन्तु स्थितिरियन्नास्त्यपि तु बह्वीभ्यः सहस्राब्दीभ्यः पूर्वं सर्वे ऋषयो मुनयश्च साङ्ख्ये नानामतमतान्तराणां निरूपणं कुर्वन्ति स्म। तथा चोक्तं महाभारतेः—

साङ्ख्यं योगः पञ्चरात्रं वेदाः पाशुपतन्तथा।
ज्ञानान्येतानि राजर्षे विद्धि नानामतानि वै॥

(महा० शा० ३५९।६४)

इत्थमेव अहिर्बुध्न्यसंहितायाम् (१२।१८)—

साङ्ख्यरूपेण सङ्कल्पो वैष्णवः कपिलादृषेः।
उदितो यादृशः पूर्वं तादृशं शृणु मेऽखिलम्॥
षष्टिभेदं स्मृतं तन्त्रं साङ्ख्यं नाम महामुने। इत्यादिकरूपेण।

एतस्मिन् सार्धश्लोके स्पष्टमेव साङ्ख्यस्य षष्टिभेदाः प्रतिपादिताः। अतएव हि भगवता पञ्चशिखाचार्येण षष्टितन्त्रन्नाम साङ्ख्यस्य षष्टिभेदनिरूपकः कश्चिद्ग्रन्थो निरमायि।

भागवते चापि विभिन्नपदार्थवादिनामेकादशानां साङ्ख्यमतानान्निरूपणमकारि । तदेव च निरूपणं श्रीमद्भागवते नानाविधानि साङ्ख्यानि सन्तीति प्रस्तुतनिबन्धलेखने प्रेरणाप्रदमूलतामगात् । तथा चेह श्रीमद्भागवतस्यैकादशे स्कन्धे द्वाविंशेऽध्याये प्रथमश्लोकतः । पञ्चविंशतितमं श्लोकं यावन्मतानाममीषां यन्निरूपणं समुपलभ्यते, तदिह समुदाह्रियते । भक्तस्योद्धवस्य भगवन्तं श्रीकृष्णचन्द्रं प्रति, इत्थं प्रश्नः समभूत्—

कति तत्वानि विश्वेश ! सङ्ख्यातान्यृषिभिः प्रभो ।
नवैकादश पञ्च त्रीण्यात्थ त्वमिह शुश्रुम ॥१॥

केचित् षड्विंशतिं प्राहुरपरे पञ्चविंशतिम् ।
सत्तैके, नव, षट्, केचिच्चत्वार्येकादशापरे ॥२॥

केचित् सप्तदश प्राहुः षोड्शैके त्रयोदश ।
एतावत्त्वं हि साङ्ख्यानामृषयो यद्विवक्षया ॥३॥
गायन्ति पृथगायुष्मन्निमदन्नो वक्तुमर्हसि । इति

इह प्रश्ने हि (१) अष्टाविंशतितत्त्ववादिनाम् (२) षड्विंशतितत्त्ववादिनाम् (३) पञ्चविंशतितत्त्ववादिनाम् (४) सप्ततत्त्ववादिनाम् (५) नवतत्त्ववादिनाम् (६) षट्-तत्त्ववादिनाम् (७) चतुस्तत्त्ववादिनाम् (८) एकादशतत्त्ववादिनाम् (९) सप्तदशतत्त्व-वादिनाम् (१०) षोडशतत्त्ववादिनाम् (११) त्रयोदशतत्त्ववादिनाञ्च पृथगेकादशमतान्युल्लिखितानि सन्ति । तानि च तत्कालं प्रचलितान्यासन् । परमतत्त्वज्ञस्योद्धवस्य मतान्येतानि सर्वाणि हृदयङ्गमानि यथार्थानि च निश्चित्याप्येतेषां विभेदे को वास्तविको हेतुरिति जिज्ञासोदयः स्वाभाविक आसीत् । भगवता श्रीकृष्णेन तूत्तरमित्थं दत्तम्—

[2]युक्तं च सन्ति सर्वत्र, भाषन्ते ब्राह्मणाः यथा ।
मायां मदीयामुद्गृह्य वदतां किं नु दुर्घटम् ॥४॥

नैतदेवं यथात्थ त्वं, यदहं वच्मि तत्तथा ।
एवं विववतां हेतुः शक्तयो मे दुरत्ययाः ॥५॥

यासां व्यतिकरादासीद् विकल्पो वदतां पदम् ।
प्राप्ते शमदमेऽप्येति वादस्तमनुशाम्यति ॥६॥

परस्परानुप्रवेशात् तत्त्वानां पुरुषर्षभ ।
पौर्वापर्यप्रसंख्यानं यथा वक्तुर्विवक्षितम् ॥७॥

एकस्मिन्नपि दृश्यन्ते प्रविष्टानीतराणि च ।
पूर्वस्मिन् वा परस्मिन् वा तत्त्वे तत्त्वानि सर्वशः ॥८॥

---

१. श्रीमद्भागवतमहापुराणे एकादशस्कन्धे द्वाविंशेऽध्याये १-३ श्लोकाः
२. " " ५-९ "

पौर्वापर्यमतोऽमीषां प्रसंख्यानमभीप्सताम् ।
यथा विविक्तं यद्वक्त्रङ् गृह्णीमो युक्तिसंभवात् ।।९।।

भगवता श्रीकृष्णेनोद्धवम्प्रति प्रदत्तस्योत्तरस्याशयोऽयमस्ति यत्—

सर्वमेवेदमृषीणां साङ्ख्यप्रतिपादनं युक्तमेव । यतोऽत्र यथा ब्राह्मणाः (ब्रह्मवादिनो) भाषन्ते- तत्तथैव सर्वत्र (सर्वेषु मतेषु) वर्त्तत एव, पदार्थाः सर्वेऽपि यथा प्रतिपादिताः सन्तीति निश्चितम् । भगवतो मायां (प्रकृतितन्त्रम्) विभिन्नदृष्टिभिः परीक्ष्य विभिन्नैः प्रकारैर्वदतां तेषाम्मतेषु प्रतिपादितं किमपि दुर्घटन्नास्ति । यच्च तेषु केचिदेवं विवदन्ते, यत्—"यथा त्वमात्थ, एतदेवं, तथा नास्ति, किन्तु यदहं, वच्मि तत् तथा वर्त्तत इति ।" तेषामेवङ्खण्डन-मण्डनपूर्वकं विवदमानानां विवादेऽपि हेतुभूताः दुरत्यया भगवच्छक्तय एव । अनन्ताः सन्ति हि सृष्टिविज्ञाने कार्यकारणभावाः । तत्र कश्चिदेकेन कार्यकारणभावेन वस्तुतत्त्वं यदि परीक्षते, तर्हि तदितरस्तद्भिन्नमेव कञ्चित्कार्यकारणभावमुपादाय तत्र विचारं प्रवर्त्तयते । तत्रैकेन दृष्टे तत्त्वज्ञाने परः स्वदृष्टेन तत्त्वज्ञानेन गम्भीरतया साम्यमनवेक्ष्य यदि शङ्कते, यदि वा तत्खण्डनङ करोति, तदानीं द्वयोर्विवादो नासुलभः । यतो हि भगवच्छक्तयो दुरत्यया भवन्ति । न हि तासामियत्तया, ईदृक्तया वा परिच्छेदः सरलः । यासान्तु शक्तीनां व्यतिकरात्, परस्परम् मिश्रणाद्, विवेकेनाग्रहणाद्वा योऽसौ विकल्पः, भेदघटितं ज्ञानं विवादपदमभूत्, स तु विकल्पः शमे-दमे च प्राप्तेऽप्येति, स्वयमेव विनश्यति, तमन्वेव च वादोऽपि शाम्यति । इह च तत्त्वानां पौर्वापर्यप्रसङ्ख्याने योऽसौ विभेदस्तत्र तु कारणमिदमेव यत्—तत्त्वानि परस्परमनुप्रविष्टानि भवन्ति, तत्र च यस्य वक्तुर्यथा पूर्वस्मिन् वैकस्मिन्नपि तत्त्वे तदितराणि सर्वशस्तत्त्वानि प्रविष्टानि दृश्यन्ते, ततश्चामीषां पौर्वापर्येण (कार्यकारणभावो वा) प्रसंख्यानमभीप्सतां मुनीनां यद् वक्त्रं यथा विविक्तं भवति, तत् तथैव भवति । सर्वत्र च तन्मतेषु युक्तिसंभवात् तन्मतं तथैव (यथार्थत्वेन) वयमपि गृह्णीमः ।

अतितमामुदारोऽयं भगवतः समन्वयवादः, यो हि विवादशान्तये सर्वत्रैवोपयोक्तं शक्यते क्रान्तदर्शिभिः कविभिः । इयमेव पद्धतिर्भारतीयानां संस्कृतिं चिराज्जीवयति । नात्र कस्य-चिदपि विवादस्यावसरः । विश्वोद्भवस्थितिसंहृतीनां जटिलां समस्यां समाधाय त्रितापसन्त-प्तानां प्राणिनां सुखाय कल्याणमार्गदर्शने न कोऽप्यस्ति विमतः । किन्तु स्वजीवनबलिदानेन विश्वशान्तये कांश्चित् सिद्धान्तानाविष्कृतवतां येषां कश्चिदपि स्वार्थो नासीत्, तेषाङ्कीर्ति-विलोपेन तत्त्वगवेषकाणामुत्साहहननं नितान्तमनुचितम् । पूर्वन्तेषां दृष्टिकोणोऽवगन्तव्यः ।

ततो यदि ततोऽप्यधिकेन प्राञ्जलेन प्रकारेण किमप्याविष्कृतम्भवेत् तदा तदप्युपेक्ष्यम्, सति संभवे च तत्समन्वयोऽपि विधेयः । अन्यथा तु स्वमतप्रदर्शनमात्रमेवालम् खण्डनमण्डनादि-पङ्कात्क्षेपणप्रकारस्तु सर्वथापि हेय एव । एतेन युगयुगान्तराणां विवादाः स्वयमेवोपशाम्येयुः । विषमेऽपि समये न भवन्ति सर्वेऽपि मन्दबुद्धयः । केचनेदृशाश्चापि नियतं भवन्ति, ये ऽधिकारि-भेदाद्विविधैः प्रकारैर्निरूपितेषु शास्त्रीयतत्त्वेषु स्वबुद्धि, स्वरुचिं; स्वाधिकारं स्वां परिस्थिति-ञ्चानुरुध्य स्वकल्याणपर्याप्तानि तत्त्वानि स्वयमेव परिचिनियुः । आस्तामिदम् ।

भगवदुपदिष्टप्रकारमाश्रित्योदिष्टेषु ह्येकादशस्वपि साङ्ख्यप्रस्थानेषु सर्वत्रैक्यमेव प्रतीयते, न तु मनागपि वैमत्यम् । तथा चैतानि मतानि भगवदवचनैरेव व्याख्यायन्ते। (पौर्वापर्यन्त्विहाधिकसंख्याकतत्त्ववन्मतम्पूर्वमेवोपन्यस्येत्तदेव शोभत एवेति क्रमोऽत्र विपरिवर्त्यते)

अष्टाविंशति-तत्त्ववादिनां साङ्ख्यानाम्मतम्

प्रकृतिर्गुणसाम्यं वै, प्रकृतेर्नात्मनो गुणाः ।
सत्वं रजस्तम इति स्थित्युत्पत्त्यन्तहेतवः ॥१२॥

सत्वं ज्ञानं, रजः कर्म, तमोऽज्ञानमिहोच्यते ।
गुणव्यतिकरः कालः स्वभावः सूत्रमेव च ॥१३॥

पुरुषः प्रकृतिर्व्यक्तमहंकारो नभोऽनिलः ।
ज्योतिरापः क्षितिरिति तत्त्वान्युक्तानि मे नव ॥१४॥

श्रोत्रं त्वग्दर्शनं घ्राणो जिह्वेति ज्ञानशक्तयः ।
वाक्पाण्युपस्थपाय्वङ्घ्रि कर्माण्यङ्गोभयम्मनः ॥१५॥

शब्दः स्पर्शो रसो गन्धो रूपं चेत्यर्थजातयः ।
गत्युक्त्युत्सर्गशिल्पानि कर्मायतनसिद्धयः ॥१६॥

सर्गादौ प्रकृतिर्ह्यस्य कार्यकारणरूपिणी ।
सत्वादिभिर्गुणैर्धत्ते पुरुषोऽव्यक्त ईक्षते ॥१७॥

व्यक्तादयो विकुर्वाणा धातवः पुरुषेक्षया ।
लब्धवीर्याः सृजन्त्यण्डं संहताः प्रकृतेर्बलात् ॥१८॥

श्लोकानाममीषामाशयोऽस्ति; यत्

मतेऽस्मिन् पुरुषः, मूलप्रकृतिः, सत्त्वरजस्तमांसीति त्रयोगुणाः, महान्, अहंकारः खानिलानलजलेलेति पञ्चभूतानि, श्रोत्रत्वक्चक्षूरसनघ्राणानि पञ्च ज्ञानेन्द्रियाणि, वाक्पाणिपादपायूपस्थेति पञ्च कर्मेन्द्रियाणि, उभयेन्द्रियम्मनः, शब्दस्पर्शरूपरसगन्धाः पञ्च ज्ञानेन्द्रियाणां विषयाश्चेति सम्भूयेमानि सर्वाण्यष्टाविंशतितत्त्वानि सन्ति। प्रकृतेः पृथक् त्रयाणां गुणानां स्वीकारेऽत्रेदं बीजमस्ति—यत् तेषामुदयप्रलयौ दृश्येते, नत्वेवम्प्रकृतेः । पञ्चभूतानि, एकादशेन्द्रियाणि चेति षोडशकार्याणि, महदादीन्यष्टौ कारणानि यस्यां पूर्ववदेवान्तर्भूतानि सन्ति, तादृशी प्रकृतिः ह्येतेषाङ्गुणानां साहाय्यादेव सृष्टिस्थितिसंहाररूपाः नानाऽवस्थाः धारयति । अव्यक्तश्चेतनश्च पुरुषः प्रकृतेस्तासामवस्थानां केवलं साक्षिमात्रस्तिष्ठति । महदादीनि कारणतत्त्वानि पुरुषस्येक्षणशक्तेर्बलमवाप्य सर्वं विपरिणमयन्ति, विकुर्वते च । प्रकृतेराश्रयेण परस्परसहयोगेन च तानि ब्रह्माण्डं रचयन्ति । ज्ञानम्, अज्ञानम्, कर्म, कालः, स्वभावश्चेत्यादीनि पृथक् तत्त्वानि

सन्ति । प्रकृतेर्गुणः सत्त्वमेव ज्ञानम्, तमो गुण एवाज्ञानम्, रजो गुण एव कर्मगुणानां क्षोभहेतुरीश्वरः (चेतनतत्त्वमेव) कालः सूत्रात्मा (महत्तत्त्वमेव) प्रकृतेः क्षोभरूपः स्वभावः। ज्ञानेन्द्रियाणां पञ्चविषयवदिह कर्मेन्द्रियसम्बन्धीनि गत्युक्तिमलोत्सर्गमूत्रोत्सर्गशिल्प (कार्य) रूपाणि पञ्चकर्माणि पृथङ्नैव गणितानि तेषाङ्कर्मेन्द्रियाणामेव फलरूपत्वादिति ।[१]

२. षड्विंशतितत्त्ववादिनां साङ्ख्यानाम्मतम्

अनाद्यविद्यायुक्तस्य पुरुषस्यात्मवेदनम् ।
स्वतो न सम्भवेदन्यस्तत्त्वज्ञो ज्ञानदो भवेत् ॥१०॥

एतस्मिन् मते त्रिगुणात्मिका प्रकृतिस्तत्परिणामरूपाणि कार्यकारणभावाऽऽपन्नानि महदादीनि चेति चतुर्विंशतितत्त्वानि, पञ्चविंशतितमः पुरुषः षड्विंशतितम ईश्वरश्चेति षड्विंशतितत्त्वानि मन्यन्ते । सत्वरजस्तमांसीति **त्रयोऽपिगुणाः** प्रकृतेः पृथङ् नैव मन्यते । पुरुषः (जीवात्मा) अनादेः कालादविद्याग्रस्तत्वेन स्वयमात्मानं न विजानाति स्वतः सर्वज्ञ ईश्वर एव तस्य ज्ञानप्रद इतीश्वरोऽत्र पृथक् तत्त्व-स्वरूपात्मकः स्वीक्रियते, शिष्टं सर्वं पूर्ववत् ।

पञ्चविंशतितत्त्ववादिनां साङ्ख्यानां मतम्

पुरुषेश्वरयोरत्र न वैलक्षण्यमण्वपि ।
तदन्यकल्पनाऽपार्था ज्ञानन्न प्रकृतेर्गुणः ॥११॥

मतेऽस्मिन् प्रकृत्यादीनि चतुर्विंशतितत्त्वानि, पुरुषश्चैकः—इति सर्वाणि सम्भूय पञ्चविंशतितत्त्वानि वर्त्तन्ते । इह जीवेश्वरयोः सत्तायां चिन्मात्रतादिदृष्ट्या मनागपि भेदो नास्ति । अतोऽत्रैकस्मात्पुरुषाख्यतत्त्वादतिरिक्तं जीवेश्वरयोः पृथक्तत्त्वन्नैवमन्यते । ज्ञानं त्विह प्रकृतेर्गुणत्वेनोररीक्रियते अन्यदखिलं पूर्ववदेव ।

सप्तदशतत्त्ववादिनां साङ्ख्यानाम्मतम्

सङ्ख्याने सप्तदशके भूतमात्रेन्द्रियाणि च ।
पञ्च पञ्चैकमनसा आत्मा सप्तदशः स्मृतः ॥१२॥

श्लोकस्यास्य तात्पर्यमिदमस्ति यत्—मते ह्येतस्मिन् पञ्चभूतानि, पञ्चतन्मात्राः (विषया वा—शब्दस्पर्शरूपरसगन्धाख्याः) पञ्चज्ञानेन्द्रियाणि, एकम् मनः एकश्चात्मा (पुरुषः) एतानि सर्वाणि तत्त्वानि सम्भूय सप्तदशतत्त्वानि जायन्ते । प्रकृतिः महान् अहङ्कारः पञ्चकर्मेन्द्रियाणि पाञ्चभौतिको देहश्चेत्येतेषां पञ्चसु भूतेष्वेवान्तर्भावः । शिष्टमन्यत् पूर्ववत् ।

---

१. अत्र प्रमाणत्वेनोपन्यस्तानां श्लोकानां भावार्थ एव सर्वत्र प्रस्तुतः ।

षोडशतत्त्ववादिनां साङ्ख्यानाम्मतम्—

तद्वत् षोडशसङ्ख्याने आत्मैव मन उच्यते ।

एतस्मिन् मते पञ्च भूतानि, पञ्चतन्मात्राः (विषया वा), पञ्च ज्ञानेन्द्रियाणि एकम् मनश्चेति षोडशतत्त्वानि । आत्ममनसोरिहैकत्वं मन्यते । शिष्टमन्यत् पूर्ववदेवेति समवबोध्यम् ।

त्रयोदशतत्त्ववादिनां साङ्ख्यानाम्मतम्—

भूतेन्द्रियाणि पञ्चैव मन आत्मा त्रयोदश ॥२३॥

मतेऽस्मिन् पञ्चभूतानि, पञ्चज्ञानेन्द्रियाणि, एकम् मनः, एको जीवः, एकश्चेश्वर इति त्रयोदशतत्त्वानि सन्ति । इह पञ्चानान्तन्मात्राणां, पञ्चानाङ्कर्मेन्द्रियाणां, प्रकृतिमहदहङ्काराणां च पञ्चभूतेष्वन्तर्भावः । शिष्टम् सर्वं पूर्ववदेव ।

एकादशतत्त्ववादिनां साङ्ख्यानाम्मतम्—

आत्माऽसौ महाभूतेन्द्रियाणि च ॥२४॥

अस्मिन् मते पञ्चभूतानि, पञ्चज्ञानेन्द्रियाणि, एकश्चात्मा इत्येकादशतत्त्वानि सन्ति। मनसोऽत्राऽऽत्मन्यन्तर्भावो भवत्यन्येषां तत्त्वानाञ्च भूतेष्वेवान्तर्भावः कृतो वर्त्तते । परिशिष्टमन्यत् सर्वं पूर्ववदेवेत्यवगन्तव्यम ।

नवतत्त्ववादिनां साङ्ख्यानाम्मतम्—

अष्टौ प्रकृतयश्चैव पुरुषश्च नवेत्यथ ॥२४॥

मतेऽस्मिन् प्रकृतिः महान् अहङ्कारः, पञ्चमहाभूतानीत्यष्टौ प्रकृतयः, नवमश्चैकः पुरुष इति नवतत्त्वानि सन्ति । अन्येषां षोडशानां विकाराणां तु प्रकृतावेवाऽन्तर्भावः । शिष्टम् पूर्ववत् ।

सप्ततत्त्ववादिनां साङ्ख्यानाम्मतम्—

सप्तैव धातव इति तत्रार्थाः पञ्च खादयः ।
ज्ञानमात्मोभयाऽऽधारस्ततो देहेन्द्रियासवः ॥१९॥

एतस्मिन् हि मते जड़वर्गोऽप्येकः, चिदेका, ईश्वरश्चैकः, त्रीणीमानि तत्त्वानि मुख्यानि वर्त्तन्ते । जड़वर्गे, पञ्चभूतानि, चिच्च जीवः, परमेश्वरः परमात्मा वा जड़जीवयोरुपयोराधारः इति सप्तैव तत्त्वानि सन्ति । प्रकृत्यादीनामन्तर्भावो भूतेष्वेव । देहेन्द्रियादीनामुत्पत्तिरपि भूतेभ्य एव भवतीति तानि पृथक्तत्त्वरूपाणि नैव स्वीक्रियन्ते । शिष्टमन्यत् पूर्ववत् ।

षट्तत्त्ववादिनां साङ्ख्यानाम्मतम्—

षडित्यत्रापि भूतानि पञ्च षष्ठः परः पुमान् ।
तैर्युक्त आत्मसम्भूतैः सृष्ट्वेदं समुपाविशत् ॥२०॥

इह हि मते पञ्चभूतानि षष्ठश्च परमपुरूषः परमात्मा ह्येक इति षट् तत्त्वानि। परमात्मा च स्वसृष्टेः पञ्चभिर्भूतैर्युक्तो देहादीनि सृजति, तत्रैव चायञ्जीवरूपेण प्रविशति। ततोऽस्मिन्। जीवात्मनः परमात्मनि प्रकृत्यादीनाञ्च भूतेष्वन्तर्भावः कृतोऽस्ति। शिष्टं सर्वं पूर्ववदेव।

चतुस्तत्त्ववादिनां साङ्ख्यानाम्मतम्

चत्वार्येवेति तत्रापि तेज आपोऽन्नमात्मनः।
जातानि तैरिदं जातं जन्मावयविनः खलु ॥२१॥

एतस्मिन् मते पृथिवी, सलिलं, तेजः, आत्मा चेति चत्वारि तत्त्वानि सन्ति। वायुः सूक्ष्मस्तेजो रूप एवेति न तत्त्वान्तरम्। आकाशं तु इन्द्रियागोचरत्वेन न तत्त्वान्तरं मन्यते। अन्येषां तत्त्वानां तु एतेभ्य एव तत्त्वेभ्यः समुद्भूतत्वादेतेष्वेवान्तर्भावो विहितोऽस्ति। शिष्टं पूर्ववत्—

इति नाना प्रसङ्ख्यानं तत्त्वानामृषिभिः कृतम्।
सर्वं न्याय्यं युक्तिमत्त्वाद् विदुषां किमशोभनम् ॥

इत्येवं प्रदर्शितप्रकारेण ऋषिभिस्तत्त्वानां प्रङ्ख्यानं नानाविधं कृतमस्ति। नैतेषु परस्परं कश्चन विरोधो, न वा काचनाप्यनुपयुक्तता वर्त्तते। सर्वेष्वेषु समर्थनार्थाः युक्तयो ह्युपपत्तयश्च सन्तीति सर्वाणि मतानि न्यायानुकूलानि सन्ति। सकलं जगत् करामलकवद्विदतां विदुषां प्रतिपादनमशोभनं कथं नाम भवेदिति। इत्थं श्रीमद्भागवते ह्येकस्मिन्नेव स्थाने विभिन्नान्येकादशसाङ्ख्यप्रस्थानानि समुपलभ्यन्ते। इति तेषां दिग्दर्शनमिह कृतम्। इत्थमेव स्थलान्तरेष्वपि नैकधा प्रतिपादितन्तत्त्वज्ञानं सम्भाव्यत एवेति तद्विषयकम्प्रस्तुतं शोधकर्म सर्वथा युक्तियुक्तमेवेति शम्।

—०—

श्रीमद्भागवतमेकम्पुराणम्पुराणानामष्टादशत्वञ्च

१. श्रीमद्भागवतमहापुराणे पुराणलक्षणं सम्यक्घटत एवेति वक्तुं शक्तते यदिदं भागवतमेकं पुराणमस्ति इति, । प्रथिततमं पुराणलक्षणञ्चास्ति—

यत्—सर्गश्च प्रतिसर्गश्च, वंशो मन्वन्तराणि च ।
वंश्यानुचरितञ्चेति, पुराणं पञ्चलक्षणम् ।इति ।।

एतल्लक्षणमनुसृत्योदाहरणानि च प्रस्तूय श्रीमद्भागवतस्य पुराणत्वं संसाध्यते । तत्र—

अव्याकृतगुणक्षोभान्महतस्त्रिवृतो ग्रहम: ।
भूतमात्रेन्द्रियार्थानां सम्भव: सर्ग उच्यते ।। (१२।७।११)

गुणव्यतिकराकारोऽर्निविशेषो ऽप्रतिष्ठित: ।
पुरुषस्तदुपादानमात्मानं लीलयासृजत् ।।

विश्वं वै ब्रह्मतन्मात्रं संस्थितं विष्णुमायया ।
ईश्वरेण परिच्छिन्नं कालेनाव्यक्तमूर्त्तिना ।।

यथेदानीन्तथाग्रे च पश्चादप्येतदीदृशम् ।
सर्गो नवविधस्तस्य प्राकृतो वैकृतस्तु य: ।। (३।१०।१-३)

आद्यस्तु महत: सर्गो गुणवैषम्यमात्मनः ।।
द्वितीयस्त्वहमो यत्र द्रव्यज्ञानक्रियोदय: ।

भूतसर्गतृतीयस्तु तन्मात्रो द्रव्यशक्तिमान् ।।
चतुर्थ ऐन्द्रिय: सर्गो यस्तु ज्ञानक्रियात्मक: ।।

वैकारिको देवसर्ग: पञ्चमो यन्मयं मन: ।
षष्ठस्तु तमस: सर्गो वैकृतानपि मे श्रृणु ।। (३।१०।१४-१७)

वैकृतिक: सर्ग:

सप्तमो मुख्यसर्गस्तु षड्विधस्तस्थुषां च य: ।
वानस्पत्यौषधिलतात्वक्सारा वीरुधो द्रुमा: ।

उत्स्रोतसस्तम: प्राया अन्त. स्पर्शाविशेषिण: ।
तिरश्चामष्टम: सर्ग: सोऽष्टाविंशतिधा मत: ।

अविदो भूरितमसो घ्राणज्ञा हृद्यवेदिनः ।
गौरजो महिषः कृष्ण. सूकरो गवयो रुरुः ।
द्विशफाः पशवश्चेमे अविरुष्ट्रश्च सत्तम ।।

खरोऽश्वोऽश्वतरो गौरः शरभश्चमरी तथा ।
एते चैकशफाः क्षत्तः शृणु पञ्चनखान् पशून् ।।

श्वा शृगालो वृको व्याघ्रो मार्जारः शशशल्लकौ ।
सिंहः कपिर्गजः कूर्मो गोधा च मकरादयः ।

कंक-गृध्र-वट्-श्येन-भास-भल्लूक-बर्हिणः ।
हंस-सारस-चक्राह्व-काकोलूकादयः खगाः ।।

अर्वाक्स्रोतस्तु नवमः क्षत्तरेकविधो नृणाम् ।
रजोऽधिकाः कर्मपराः दुःखे च सुखमानिनः ।। (३।१०।१८।२५)

नभसोऽनुसृतं स्पर्शो विकुर्वन्निर्ममे ऽनिलम् ।
अनिलो हि विकुर्वाणो नभसोरुबलान्वितः ।।

ससर्ज रूपतन्मात्रं ज्योतिर्लोकस्य लोचनम् ।

अनिलेनान्वितञ्ज्योतिर्विकुर्वत् परिवीक्षितम् ।
आधत्ताम्भोरसमयं कालमायांशयोगतः ।

ज्योतिषाम्भो ऽनुसंसृष्टं विकुर्वद्ब्रह्मवीक्षितम् ।।
महीं गन्धगुणामाधात् कालमायांशयोगतः ।। (३।५।३२-३५)

प्रतिसर्गः

पुरुषानुगृहीतानामेतेषां वासनामयः ।
विसर्गो ऽयं समाहारो बीजाद् बीजं चराचरम् ।।

द्विपरार्धे त्वतिक्रान्ते, ब्रह्मणः परमेष्ठिनः ।
तदा प्रकृतयः सप्त, कल्पन्ते प्रलयाय वै ।।

एष प्राकृतिको राजन्, प्रलयो यत्र लीयते ।
अण्डकोशस्तु सङ्घातो, विघात उपसाधिते ।।

पर्जन्य शतवर्षाणि भूमौ राजन्य वर्षति ।
क्षयं यास्यन्ति शनकैः कालेनोपद्रुताः प्रजाः ।।

सामुद्रं दैहिकं भीमं रसं सांवर्त्तको रविः ।
रश्मिभिः पिबते घोरैः सर्वन्नैव विमुञ्चति ।

ततः संवर्त्तको वन्हिः संकर्षणमुखोत्थितः ।
दहत्यनिलवेगोत्थः शून्यान् भूविवरानथ ।।

उपर्यधः समन्ताच्च शिखाभिर्वह्निसूर्ययोः।
दह्यमानं विभात्यण्डं दग्धगोमयपिण्डवत् ॥

ततः प्रचण्डपवनो वर्षाणामधिकं शतम्।
शतं वर्षाणि वर्षन्ति नदन्ति रभसस्वनैः ॥ (१२।४।५-११)

तथैव—

तदा भूमेर्गन्धगुणं ग्रसन्त्याप उदप्लवे।
ग्रस्तगन्धा तु पृथिवी प्रलयत्वाय कल्पते ॥

अपां रसमथो तेजस्तल्लीयन्तेऽथ नीरसाः।
ग्रसते तेजसो रूपं वायुस्तद्रहितन्तदा ॥

लीयते चानिले तेजो वायोः खं ग्रसते गुणम्।
स वै विशति खं राजंस्ततश्च नभसो गुणम्।

शब्दं ग्रसति भूतादिर्नभस्तमनुलीयते।
तैजसश्चेन्द्रियाण्यंग देवान्वैकारिको गुणैः।

महान् ग्रसत्यहङ्कारं गुणाः सत्वादयश्च तम्। (१२।४।१४-१७)

वंशः

राज्ञां ब्रह्मप्रसूतानां वंशस्त्रैकालिको ऽन्वयः। (१२।७।१६)

चन्द्रसूर्यादिवंशानां वर्णनमत्रोदाहर्तुं शक्यते। ऐतिह्यस्य कुलपरम्परावर्णनस्य याथातथ्येन निरूपणमेव वंशत्वेन पुराणेषु प्रतिपादितम्। तच्च भागवतेऽपि सङ्क्षिप्य स्पष्टतः कृतमेव।

मन्वन्तरम्—

मन्वन्तरं मनुर्देवा मनुपुत्राः सुरेश्वरः।
ऋषयो ऽंशावतारश्च हरेः षड्विधमुच्यते ॥ (१२।७।१५)

स्वं स्वं कालं मनुर्भुङ्क्ते, साधिकां ह्येकसप्ततिम्। (३।११।२४)

वंशानुचरितम्—

वंशानुचरितन्तेषां वृत्तं वंशधराश्च ये। (१२।७।१६)

नैकविधवंशेषु समुत्पन्नानां विशिष्टव्यक्तीनां चरित्रवर्णनं तथा तेषां वंशपरम्परामेवेह वंशानुचरितमिति कथयन्ति।

उपर्युक्तप्रसङ्गेन स्पष्टीभवति यद्, अत्र श्रीमद्भागवताख्ये ग्रन्थरत्ने पुराणस्य पञ्चापि लक्षणानि सम्यग्घटन्त एवेति श्रीमद्भागवतं पुराणमेवेति सुनिश्चितम्। सृष्टेः प्रारम्भतः प्रलयकालं यावत् चतुरर्बुदद्वात्रिंशत्कोटिवर्षपरिमिते काले कास्काः स्थितयः कुत्र कुत्र कदा कदा जातास्तथा के कुत्र कदा अजायन्त, विषयस्यास्य वर्णनमेव मन्वन्तरत्वेन पुराणेषु प्रतिपादितम्

मस्ति भागवतेऽपि च तदुपलभ्यत एवेति सर्वथा श्रीमद्भागवतमहापुराणस्य पुराणत्वं संसिध्यत्येवेति शम् ।

१. पुराणानामष्टादशत्वम्—

श्रीमद्भागवतीयसाङ्ख्यस्य विवेचनात्पूर्वं किंविधं शास्त्रं श्रीमद्भागवतमित्येतद्विषयस्य विवेचनमप्यत्यावश्यकं भवतीति निश्चितम् । तत्र श्रीमद्भागवतमेकं पुराणशास्त्रमित्येव प्रश्नस्यास्योत्तरम् । पुराणानि कियन्ति कानि च तानीत्यपि नूनमेव विचारणीयम्भवतीति तद्विचार्य्यते । सन्ति हि पूर्वापरक्रमनिर्मितान्यष्टादशपुराणानि । तानि च—

मद्वयं भद्वयंचैव ब्रत्रयं वचतुष्टयम् ।
अनापकूस्कलिगानि पुराणानि प्रचक्षते ।।

श्लोकस्यास्य भावोऽयमस्ति यदिह—

१. मद्वयम्—मत्स्यपुराणं मार्कण्डेयपुराणञ्चेति पुराणद्विकम् ।

२. भद्वयम्-भविष्यपुराणं भागवतपुराणञ्चेति पुराणद्वयी ।

३. ब्रत्रयम्-ब्रह्माण्डपुराणं ब्रह्मवैवर्तपुराणं ब्रह्मपुराणञ्चेति पुराणत्रयी ।

४. वचतुष्टयम्-विष्णुपुराणं, वायुपुराणम्, वामनपुराणं, वराहपुराणञ्चेति पुराणचतुष्कम् ।

५. अ—अग्निपुराणमित्येकमेव पुराणम् ।

६. ना—नारदीयपुराणमित्येकमेव पुराणम् ।

७. प०—पद्मपुराणमिति पुराणमेकमेव ।

८. कू—कूर्मपुराणमिति प्रथितमेकमेव पुराणम् ।

९. स्क—स्कन्दपुराणम् सुप्रसिद्धमेकं सुविस्तृतञ्च पुराणम् ।

१०. लिङ्ग—लिङ्गपुराणम् इति एकम्पुराणम् ।

११. ग—गरूडपुराणमिति नामकमेकम्पुराणम् ।

इत्थं सम्भूयेमानि सर्वाणि पुराणान्यष्टादश सम्पद्यन्ते ।

भागवतं कतरद् ?

सूच्यामस्यां भागवतशब्देन श्रीमद्भागवतङ्कैश्चिद्गृह्यते, अपरैस्तु देवीभागवतम्, तत्र निर्णयं पश्चाद् वक्ष्यामः । परं श्रीमद्भागवतमेवेहास्माकं निबन्धेऽस्मिन्नभीप्सितम् । तदिह पुराणनिर्माणक्रमे पंचमं प्रसिध्यति । तथा हि पुराणानीमान्यष्टादशसङ्ख्याकान्येव कथमिति तेषामष्टादशत्वस्य रहस्यम्प्रस्तूयते ।

२: अष्टादशसङ्ख्यारहस्यम्—

पुराणान्यष्टादश भवन्ति, उपपुराणानि चापि तावन्ति, स्मृतयोऽपि तावत्यः, महाभारतस्य पर्वाण्यपि तावन्ति, श्रीमद्भगवद्गीतायारध्यायास्तावन्तः, श्रीमद्भागवतस्य श्लोकाश्चाष्टा-

दशसहस्रसङ्ख्याकारित्यैवमनेकत्राष्टादशसंख्यायाः सम्बन्धो भवतीति नूनमेव तत्र वर्त्तते किमपि रहस्यम् । तदपरिज्ञाय पुराणानां पूर्वापरक्रमः श्रीमद्भागवतस्य पंचमत्वञ्च निर्धारयितुन्नैव शक्यमिति तदेव पूर्वमिह प्रतिपाद्यते ।

५. आत्मनो ह्यष्टादशत्वनिरूपणम्

पुराणानि तावद् वर्त्तन्ते ह्यात्मविज्ञानशास्त्राणि । आत्मा चेह शास्त्रेषु द्वेधा निरूप्यते-जीवः, ईश्वरश्चेति । तत्रेश्वरोऽसीमो, जीवस्तु ससीमः । द्विविधमिममात्मानं स्वरूपतः श्रीमद्-भगवद्गीता, ब्रह्ममीमांसासूत्राणि, पुराणशास्त्राणि, महाभारताद्याः हीतिहासाश्च विवेचयन्ति । आत्मनस्तु स्वरूपेणैकत्वेऽपि विभिन्नानां परिस्थितीनामपेक्षया ह्यायतनान्यष्टादश सम्पद्यन्ते । तदायतनावच्छिन्नश्चात्माप्यष्टादशविध एव प्रत्येतुं शक्यः । इत्थमिह आत्मनिरूपणपराणि सर्वाण्यपि शास्त्राणि ह्यष्टादशभागेषु विभक्तानि सन्ति । केवलं ब्रह्मसीमांसादर्शनमेव षोडशेषु पादेषु निरूपितमस्ति, किमत्रैतत्कारणमिति पश्चात् वक्ष्यते ।

कान्यष्टादशात्मायतनानीति पूर्वं विविच्यते—आत्मा तावत्प्रजापतिरूपः, तस्माद्-द्विविधा सृष्टिः प्रवर्त्तते । देवतारूपा २. भूतरूपा च । द्विविधयोः सृष्ट्योर्मूलोपादानन्तु "ब्रह्म वर्त्तते" ततश्च । (१) ब्रह्म (२) देवता, (३) भूतानि, इमास्तिस्रः परिस्थितयः, तद्वशेन चेह आत्माऽपि । (१) क्षेत्रज्ञः, (२) अन्तरात्मा (३) भूतात्मा चेति त्रिविधः सम्पद्यते । क्षेत्रज्ञो ऽन्तरात्मा चाऽभिन्नः पदार्थोऽस्ति ; भूतात्मा तु बाह्यात्मापि कथ्यते । एतदात्मनिरूपणं भगवान् श्रीमनुश्चापि करोति तथाहि—

> योऽस्यात्मनः कारयिता तं क्षेत्रज्ञं प्रचक्षते ।
> यः करोति तु कर्माणि स भूतात्मोच्यते बुधैः ॥
> जीवसंज्ञोऽन्तरात्मान्यः सहजः सर्वदेहिनाम् ।
> येन वेदयते सर्वं सुखं दुःखं च जन्मसु ॥
> तावुभौ भूतसम्पृक्तौ महान् क्षेत्रज्ञ एव च ।
> उच्चावचेषु भूतेषु स्थितं तं व्याप्य तिष्ठति ॥इति॥
> (मनु० अध्याय-१२)

इहोक्तेष्वात्मसु यः क्षेत्रज्ञः सः प्रवर्त्तको विशुद्धः सोमाऽऽत्मा । यश्च भूतात्मा सः कर्मकर्ता बाह्यात्मा । यस्तु सुखदुःखादिवेदयिताऽन्तरात्मा स चान्द्रो महानात्मा जीवश्चाप्युच्यते । इत्थं त्रिविधपरिस्थित्यपेक्षया आत्मनो भेदत्रयं मन्यते । एतेषां त्रयाणामात्मनामग्निकायभेदात् पुनरनेके भेदाः भवन्ति । तथा हि—क्षेत्रज्ञा ऽऽत्मन एवायतनभेदाच्चत्वारो भेदा भवन्ति ।

(१) परात्परः (२) अव्ययः (३) अक्षरः (४) क्षरश्चेति तत्र (१) परात्परः शुद्धः, रसबलघनः, अनन्तविश्वाधिष्ठानं, भूमा, विश्वातीतश्चाऽऽत्मा परात्पर उच्यते ।

२. **अव्ययः**—मायाबलेन सीमितः पुरवासी आत्मा पुरुषः समुदीर्य्यते । एकोऽप्ययं

पुरुषः सृष्टावावयवकान्त्रीन्भावानधिकृत्य त्रिधा विभक्तो मन्यते। तत्र अव्ययः, अक्षरः, क्षर श्चेति। अव्ययः सृष्टेरालम्बनम् (३) अक्षरो निमित्तकारणम् (४) क्षरश्च परिणाम्युपादान-कारणम्। वस्तुनो निर्माणे हि आधारस्याप्यावश्यकता, निर्माणकर्त्तुश्चेतनस्याप्यावश्यकता, तद्वस्तुघटकस्योपादानस्याप्यावश्यकता। एतदेव शिवमहिम्नः स्तोत्रस्य—किमीह किङ्कायः स खलु किमुपायस्त्रिभुवनम्, किमाधारो धाता सृजति किमुपादान इति च "इति श्लोकेना-प्युच्यते। इत्थञ्च पुरुषास्त्रयः सम्पद्यन्ते। तेषान्निरूपणं श्रीमद्भगवद्गीतायाङ्कृतम्।

यथा—**द्वाविमौ पुरुषौ लोके क्षरश्चाक्षर एव च।**
क्षरः सर्वाणि भूतानि कूटस्थोऽक्षर उच्यते॥
उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः।
यो लोकत्रयमाविश्य विभर्त्यव्यय ईश्वरः॥

इह त्रिपुरुषात्मक एक एव पुरुषः। अव्ययोऽत्र केवलमधिष्ठानमात्रं साक्षी च। अक्षरः पुरुषोऽविना भूतत्त्वादेव स कर्त्तेत्युच्यते, वस्तुतस्त्वकर्त्ता। एतदभिप्रायेणैव "तस्य कर्त्तारमपि मां विद्ध्यकर्त्तारमव्ययम् इति" गीतायामुक्तम्। अन्तरात्माप्यायतनपञ्चकभेदात्पञ्चधा भिद्यते। अव्यक्तात्मा, महानात्मा, विज्ञानात्मा (बुद्धिः) मनः, प्राणश्च, एतेषाङ्क्रमशः स्वम्भुवा, परमेष्ठिना, सूर्येण, चन्द्रेण, पृथिव्या च सह सम्बन्धः। एतेभ्यो हि लोकेभ्यः प्राणिनां शरीरेषु पञ्चानामात्मनामायतनानि सम्पद्यन्ते। तत्राऽव्यक्तात्मा शान्तात्मा इत्युच्यते। तद्द्वारेण च सूर्यलोकादूर्ध्ववर्त्तिनामृषिपितृदेवमनुष्यरूपाँमृतप्राणानां शरीरे प्राप्तिर्भवति। महानात्मा" तु सत्त्वरजस्तमसां त्रयाणां। गुणानां प्रवर्त्तको भवति। विज्ञानात्मा बुद्धिसम्पृक्त आत्मा। स च धर्मज्ञानवैराग्यैश्वर्यरूपाणां चतसृ्णां विद्यावुद्धीनाम् अधर्माज्ञानावैराग्यैश्वर्यरूपाणां चतसृ्णां च विद्याबुद्धीनाम् प्रवर्त्तकः। मनस्तु सर्वेन्द्रियपरः "प्रज्ञानात्मा" उच्यते। स पञ्चज्ञानेन्द्रि-याणां पञ्च कर्मेन्द्रियाणाञ्च प्रवर्त्तकः। प्राणात्मापि (मुख्यप्राणः) प्रज्ञामात्राणाम्प्राणमात्रा-णाम्भूतमात्राणाञ्च प्रवर्त्तको भवति। एतेषां विशदन्निरूपणङ्कठोपनिषदि कृतमुपलभ्यते।

इन्द्रियाणि पराण्याहुरिन्द्रियेभ्यः परम्मनः।
मनसस्तु परा बुद्धिर्बुद्धेरात्मा महान् परः॥
महतः परमव्यक्तमव्यक्तात्पुरुषः परः।
पुरुषान्न परङ्किञ्चित्सा काष्ठा सा परा गतिः॥ (कठोपनिषद्)

भूतपरिस्थित्यवच्छिन्न आत्मा नवधा सम्पद्यते। स हि वाह्यात्मेत्युच्यते। भूतपरिस्थिते-रात्मनः देवेभ्यश्च वहिर्भूतत्वात्। नवसु च (१) शरीरात्मा सर्वापेक्षया बहिर्भूतः तत्रावस्थितो ऽग्निरूपो ह्यात्मा मर्त्यांऽमर्त्यभेदेन द्विधा विभज्यते, अत्र मर्त्यश्चित्याग्निरूपः, चित्यपृथ्वीरूपो वा। दृश्यपृथिव्यभिन्नो हि सः। मर्त्येऽग्नौ परस्य मर्त्याग्नेराहुत्या शरीरात्मनो निष्पत्तिर्भवति। अयम्भावोऽस्ति यदिह मर्त्ये पृथिव्यग्नौ मर्त्यस्यान्नादेः शुक्रादेर्वाऽऽहुत्या शरीरन्निष्पद्यते। तच्छरीरमेव चेह भूतात्मा इत्युच्यते।

(२) **हंसात्मा**—मर्त्याग्नौ चितौ वायोर्वाऽऽहुत्या वायुमयस्य हंसात्मनो निष्पत्तिर्भवति। असौ हंसात्मा पृथिव्यारुपरि चन्द्रमसश्चाधस्तादुभयोर्मध्ये यथेच्छं वायौ विचरति। पृथिव्या सह तस्य सम्पर्को नैव भवति। नासौ स्वपिति किन्तु सुप्तस्य शरीररक्षाङ्करोति। श्रुतिस्तमित्थन्निरूपयति स्वप्नेन शरीरमभिप्रहत्यासुप्तः सुप्तानभिचाकशीति शुक्रमादाय पुनरेति स्थानं हिरण्मयः पौरुष एकहंसः प्राणेन रक्षन्नवरं कुलायं, बहिः कुलायादमृतश्चरित्वा। स ईयते अमृतो यत्र कामं, हिरण्मयः पौरुष एकहंसः शरीरमिदं तस्य हंसात्मनः कुलायः। पूर्वस्मिन् कुलाये नष्टे स नवीनङ्कुलायन्निर्माति। मृत्योरनन्तरमपि कदाचित्प्रत्यक्षमायाति, कदाचिदालापमपि करोति, भगवता वेदव्यासेन महाभारतस्य युद्धान्ते मृतानां पुरुषाणां हंसात्मानः गान्धारीम्प्रति दर्शितारिति स्मर्यते।

(३) **दिव्यात्मा**—अयं पुनस्त्रिविधः वैश्वानरस्तैजसः प्राज्ञश्चेति। (क) वैश्वानरः-भूर्लोकस्य मर्त्याग्नौ ह्यमृतस्य चैतन्यस्य द्युलोकाग्नेराहुत्या वैश्वानरात्पुनः स्वरूपन्निष्पद्यते। (ख) तैजसः—मर्त्याग्निरूपे वायावन्तरिक्षे वाऽमृतचैतन्यस्याहुत्या तैजसात्मनः स्वरूपनिष्पत्तिर्भवति। (ग) प्राज्ञः—इन्द्ररूपे मर्त्याग्नौ (द्युलोकाग्नौ) अमृतचैतन्यस्याहुत्या प्राज्ञस्यात्मनः स्वरूपन्निष्पद्यते।

एषु वैश्वानरतैजसप्राज्ञेषु त्रिष्वपि अमृतचैतन्यस्य सम्पर्के समाने सत्यपि, भूतमात्राणान्तारम्याच्चैतन्यस्य विकासः समानो नैव भवति किन्तु परस्परम्भिन्नता भवति। तथा हि (१) वैश्वानरे भूतमात्रासम्पर्काधिक्याच्चैतन्यस्यातीव स्वल्पो विकासः सम्पद्यते, तस्मादेवेह भूतमात्राप्रधानः प्राणी "असंज्ञः" प्रोच्यते। तस्योदाहरणानि स्थावरलोष्ठादीनि। (२) तैजसप्राणिषु भूतमात्रायाः सम्पर्कस्य वैश्वानरापेक्षया न्यूनत्वाच्चैतन्यस्याधिकरूपेणाऽऽविर्भावो भवति। अतस्ते ह्यन्तःसंज्ञाः प्राणिनः प्रोच्यन्ते। ते च वृक्षादयः (३) प्राज्ञात्मविशिष्टेषु प्राणिषु भूतमात्रायाः ह्यतिन्यूनसम्पर्काच्चैतन्यस्य तैजसोऽपेक्षयाप्यधिको विकासः जायते। तादृशाः प्राणिनः ससंज्ञाः प्रोच्यन्ते, यथा मनुष्यादयः।

उक्तेषु त्रिष्वात्मसु तृतीयस्य प्राज्ञस्यात्मनः पुनस्त्रयः प्रकाराः—कर्मात्मा, चिदाभासः चिदात्मा चेति सम्पद्यन्ते। तत्र—

(१) **कर्मात्मा**—प्राणानां स्थित्यै कर्मणः परमाऽऽवश्यकता भवति। कर्मभिर्विना मनसः श्रोत्रचक्षुरादीनाञ्च प्राणानां स्थितिर्नैवभवितुमर्हति। तदुक्तं शतपथश्रुतौ अकृत्स्ना उ वै प्राणा ऋते कर्मणः, तस्मात् कर्माग्निमसृजत (आविस्तरां वा अग्निः कर्मणः) शत ह्येतस्मिन् कर्मग्नावेव पुण्यपापादिकर्मजन्याः संस्काराः समवतिष्ठन्ते। येषां भोगं विना विनाशो नैव जायते।

(२) **चिदाभासः**—ह्येतेन जीवात्मना सहैव सर्वव्यापकस्येश्वरस्य सम्बन्धो नूनमेव भवति, स चायं सम्बन्धो द्विविधः (१) अन्तर्यामः (२) बहिर्यामश्च। यथा जले द्रवावस्थाकर्त्तुर्वा रूपाग्नेर्जलेन सम्बन्धोऽन्तर्यामः। (२) बहिर्यामश्च—जलस्वरूपनिर्माणानन्तरन्तत्र

जले ह्यग्नेः सम्बन्धः बहिर्यामो नाम । पूर्वस्मिन्नग्निः स्वरूपधर्मतया स्थितो भवति, उत्तरस्मिंस्तु ह्यागन्तुकतयाऽऽश्रितो धर्मः । एतौ द्वौ सम्बन्धौ क्रमशः योगविभूतिपदाभ्यामपि गीतायां व्यवहृतौ विभूतिं योगञ्चेति चिदात्मनः ईश्वरस्य यो भागः शरीरे हृदयप्रदेशे स्थितेन विज्ञानात्मनोपहितो भूत्वा प्रवृक्तः (बहिर्निर्गतः) भवति, शरीरप्राणादीनान्धर्मैश्च संयुक्तो भवति, स चिदाभासेत्युच्यते । शरीरभेदादसौ नानात्वम् भजते । अयमेवेहेश्वरकृष्णादिसाङ्ख्यसम्मतः पुरुषः ।

चिदात्मा—सर्वव्यापकः सूर्यरश्मिवन्निखिलविश्वव्यापी । चिदात्मनो जगदीश्वरस्य भागः शरीरं व्याप्नुवन् चिदात्मेत्युच्यते । यथा सर्वत्र व्याप्तो ह्याकाशः घटादिषु व्याप्तोऽपि वस्तुतो घटादिनाऽसम्पृक्त एव भवति । घटधर्मैश्चापि न तस्य सम्पर्कः केवलङ्घटेनासौ निचाय्य (उपलक्षितः) घटाकाशशब्दव्यपदेश्यो भवति तथैवेश्वरस्यासौ विश्वव्याप्तश्चिद्भागो विभूतिरूपेण शरीरे वर्त्तमानोऽपि न शरीरधर्मै सम्पृच्यते तथाऽप्यसौ शारीरिक आत्मा कथ्यते । असौ शरीरेषु समानोऽस्तीत्यतो ह्येक एवाऽसावेवेश्वरो ह्यसावेव परो पुरुषः यस्य निरूपणम्भगवद्गीतायामित्थङ्कृतम्—

उपद्रष्टाऽनुमन्ता च भर्त्ता भोक्ता महेश्वरः ।
परमात्मेति चाऽप्युक्तो देहेऽस्मिन् पुरुषः परः ॥

इदमिहाधिकं विज्ञेयम् यदन्तिमश्चिदात्माऽयं शरीरेषु क्वचिद्विभूतिरूपेण क्वचिच्छ्रीरूपेण क्वचिदूर्क् स्वरूपेण च प्रतितिष्ठति । ब्रह्मक्षत्रविट्सु विभूतिश्च ऊर्क् च श्रीश्चेति त्रीणि वीर्याणि क्रमशस्तिष्ठन्ति । तत्र विभूतिप्राधान्याद् ब्राह्मणः ऊर्क्, प्राधान्यात्क्षत्रियः, श्रीप्राधान्याच्च वैश्यो भवति । चिदात्मनस्त्रयाणामेषां स्वरूपाणां वर्णनं श्रीमद्भगवद्गीतायाङ्कृतम्—यद् यद् विभूतिमत्सत्त्वं श्रीमदूर्जितमेव वा—तत्तदेवावगच्छत्त्वं मम तेजोऽंशसम्भवम् इति ।

इत्थमेक एव आत्मा ब्रह्मपरिस्थितेर्देवपरिस्थितेर्भूतपरिस्थितेश्च भेदात् । त्रिविधः सन् तदवान्तरभेदैर्विभज्यमानो ह्यष्टादशधा सम्पद्यते । तेषामष्टादशानामात्मनाम्परिचायकञ्चित्रमधस्तान्निर्दिश्यते—

(१) अमृतात्मा (क्षेत्रज्ञः)	(१) परात्परः पुरुषः (२) अव्ययः (३) अक्षरः (४) क्षरश्चेति ।
(२) ब्रह्मात्मा (अन्तरात्मा)	(१) शान्तात्मा (अव्यक्तात्मा) (२) महानात्मा (३) विज्ञानात्मा (४) प्रज्ञानात्मा (५) प्राणात्मा चेति
(३) शुक्रियात्मा (भूतात्मा)	(१) शरीरात्मा (भूतमयः) (२) हंसात्मा (वायुः) (३) दिव्यात्मा-इन्द्रो वैश्वानरो ह्यग्निः (४) तैजसो वायुः (५) प्राज्ञः, इन्द्रः—कर्मात्मा (६) चिदाभासः (७) चिदात्मा विभूतिलक्षणः (८) चिदात्मा श्रीलक्षणः (९) चिदात्मा ऊर्क् लक्षणः, सम्भूयाष्टादशस्वरूपाण्यात्मनो भवन्ति ।

एवमुपर्युक्तप्रकारेणाष्टादशधा भिन्नानामात्मनान्निरूपणकर्तॄणि सर्वाणि शास्त्राण्यऽप्यष्टादशसु विभागेषु विभक्तानि भवन्तीति तदेतद्रहस्यं स्फोरयितुमेव भगवता वेदव्यासेन गीताया रष्टादशाध्यायाः पुराणानामष्टादशत्वम् महाभारतस्याष्टादशपर्वाणीत्येव मन्येषाञ्चापि केषाञ्चन शास्त्राणामष्टादशैव विभागाः परिकल्पिताः इति ।

केचित्तु-पुराणानामष्टादशत्वसङ्ख्यायारन्यथैवोपपत्ति प्रतिपादयन्ति । इयञ्च तेषां वाचो युक्तिर्वर्त्तते, यद्—यद्यपि पौराणिकी शैली प्राधान्येन त्रैगुण्यरचनाविषयिणी, प्रकृतिविकासप्रतिपादिनी च वर्त्तते, तथा चेह प्रत्येकस्मिम् पुराणे गुणत्रयस्य, संसारस्य, गुणातीताव्यक्तब्रह्मणश्च प्रतिपादनं तस्य प्रतिपाद्यस्य प्राप्तेर्विधानानि च सन्ति तथापि कानिचित्पुराणानि प्राधान्येन सात्त्विकानि, कानिचिद्राजसानि् कानिचिच्च तामसानीति तानि नवधा भवन्ति । तेषु नव शक्त्यात्मकानि नव च शिवात्मकानीत्यष्थादशसङ्ख्यानि सम्पद्यन्ते । वस्तुतः पुराणसङ्ख्या नवैवास्ति, परं तन्त्रशास्त्रे शिवशक्त्यात्मकयोगेन नवसङ्ख्यैवेहाऽष्टादशताम्प्रतिपद्यते ।

सिद्धान्तमेनमनुसृत्यैवाष्टादशपुराणान्यष्टादशैव प्रधानस्मृतिकाराः ह्यष्टादशैव पर्वाणि महाभारतस्य, गीतायाश्चाष्टादशाध्यायारित्यादयोऽष्टादशसङ्ख्यापरिगणिता भवन्ति ।

ब्रह्मसूत्राणां षोडशपादैर्निरूपणस्य रहस्यम्

उक्तरीत्याऽऽत्मनोऽष्टादशधा शरीरे विद्यमानत्वेन तन्निरूपणपराणां शास्त्राणामष्टादशखण्डविभक्तत्वेऽपि केवलं ब्रह्मसूत्राणामेव षोडशपादैर्निरूपणन्तु भगवता वेदव्यासेन आत्मनः 'षोडशकलानान्निरूपणङ्कृतमिति विज्ञानसंसूचनाय ताश्च कलाः परात्परस्यैका अव्ययस्य पञ्च अक्षरस्य च पञ्च क्षरस्यापि च पञ्च विज्ञेयाः । (१) परात्परस्यैका कला, (२) अव्ययस्य-आनन्द-विज्ञानमनो-प्राण-वाग्रूपाः पञ्चकलाः । (३) अक्षरस्य—ब्रह्म विष्ण्यिन्द्राग्निसोमरूपाः पञ्चकलाः (४) क्षरस्य—प्राणाप्वागन्नान्नादरूपाः पञ्चकलाः सम्भूय च सर्वाः षोडशकलाः सम्पद्यन्ते । कलानां विशेषविवरणन्तु विस्तृतिभयात्त्यज्यते ।

अष्टादशपुराणानञ्चत्वारो विभागाः

(१) आदितः षट्सु पुराणेषु सृष्टिप्रक्रिया निरूपिता वर्त्तते, तेषाम्भवति प्रथमो विभागः ।

(२) ततोप्यग्रिमेषु चतुर्षु पुराणेषु सृष्टिकारणविचारे प्रचलितानां चतुर्णाम्मतानामुल्लेखः । सोऽयं द्वितीयो विभागः ।

(३) ततोऽप्याग्रिमेषु षट्सु पुराणेष्ववतारसृष्टेर्निरूपणमस्ति सोऽत्र तृतीयो विभागः ।

(४) अन्तिमयोर्द्वयोः पुराणयोः प्रतिसृष्टेः (प्रलयस्य) तदायतनस्य च निरूपणङ्कृतन्तैश्च चतुर्थो विभागः सम्पद्यते । पूर्वोक्तान्यष्टादशपुराणानि चतुर्धा विभक्तानि ।

संक्षेपतस्तु एवमपि वक्तुं शक्यते यदिह भगवता वेदव्यासेनाष्टादशष्वेषु पुराणेषु सृष्टिप्रतिसृष्ट्योर्विज्ञानमुपदिष्टमिति । तदिह सङ्क्षेपेण प्रतिपाद्यते ।

अष्टादशपुराणानामुत्पत्तिक्रमः

(१) **ब्रह्मपुराणम्**—"ब्रह्मा देवानाम्प्रथमः स्वयंभूव" इत्यादि श्रुत्यनुसारं सर्वप्रथमम् ब्रह्मणो ह्युत्पत्तिश्च वेदसृष्टिः लोकसृष्टिः, प्रजासृष्टिः धर्मसृष्टिश्चेति चतुर्विधा सृष्टिरधिदेवतवदिह भूतलेऽप्यस्मिन्कृता। एतेषामेव सर्वेषां विषयाणान्निरूपणम्ब्रह्मपुराणे सर्वप्रथमङ्कृतं वर्त्तते।

(२) **पद्मपुराणम्**—योऽसौ ब्रह्म समुत्पन्नः स कस्मादभवत् प्रश्नस्यैतस्योत्तरणायैव पद्मपुराणस्य रचनाऽभूत्। यतो हि पद्मयोनिरित्युच्यते ब्रह्मा। अतोऽत्र पद्मात् ब्रह्मणोह्युत्पत्तिं वक्तुं पद्मपुराणस्य रचना युक्तियुक्तैवास्ति। किम्पद्मं कथञ्च तदुत्पत्तिरित्यादिकम्प्रासङ्गिकं विज्ञानन्तु अतीव निगूढ़मिति नेह प्रतन्यते।

(३) **विष्णुपुराणम्**—पद्मन्तु विष्णोर्नाभ्युद्भूतमुच्यतेऽतएव तस्य पद्मस्य कारणं विष्णुस्तत्सम्बद्धानन्यांश्च विषयान्निरूपयितुं तृतीयं विष्णुपुराणं रचितम्।

(४) **वायुपुराणम्**—यस्य विष्णोर्नाभिः पद्ममुद्बभूव स विष्णुश्चापि क्वचिदवश्यम्प्रतिष्ठितः। क्वासौ प्रतिष्ठितोऽस्तीत्याकारकां स्वाभाविकीं जिज्ञासामुपशमयितुञ्चतुर्थं वायुपुराणं रचयामास। वायुशब्दोऽत्राऽऽकाशस्याऽपि वाचको भवति। वायोराकाशस्य च सहचारित्वात्। एतयोर्द्वयोः सहचरिततत्त्वयोरवबोधको ह्येकशब्दोऽपि प्रसिध्यति। यजुः इति यजुः शब्दः मूले यत् जूहति आभ्यां द्वाभ्यां गतिस्थितिबोधकाभ्यां शब्दाभ्यान्निष्पद्यते। तथा हि दूण् गतौ इति धातोः शत्रा निष्पन्नो यत् शब्दः गतिस्वभावस्य वायोर्बोधकोऽस्ति। जूः शब्दस्तु जू गतौ इति धातोः क्विपा निष्पन्नः जवतेऽस्मिन्निति व्युत्पत्त्याऽऽकाशस्य बोधकः सम्पद्यते। तावेतौ वाय्वाकाशौ ह्यनन्तौ स्तः। तथा चोक्तं श्रीमद्भगवद्गीतायां "यथाऽऽकाशस्थितो नित्यं वायुः सर्वत्रगो महान्" इति। आकाशवत्सर्वव्यापको ह्यनन्तः बाह्याकाश एव शेषनामा वायुः कथ्यते। वायोरस्य समुद्र एव दृश्यान् लोकान् परितः व्याप्तोऽस्ति। अतएव विष्णुः पुराणेषु तदन्यग्रन्थेषु च शेषशायीत्युच्यते। तदेतत्सर्वं तथ्यं वायुपुराणे प्राधान्येन निरूपितं विराजतेतराम्।

(५) **भागवतम्पुराणम्**— पूर्वोक्तस्यानन्तस्य शेषस्वरूपस्य वायोश्चाप्याधारः कोऽस्तीति जिज्ञासायां तदुपशान्तये तु भागवतम्पुराणम्पुरतोऽवतरति। भगवतो विष्णोराधारभूतः शेषाख्यो वायुः सरस्वन्नामकेऽपां समुद्रे प्रतितिष्ठति। तद्विवेचनहेतोरेवेदं पुराणं सारस्वत कल्पनाम्नाऽऽपि व्यपदिष्टम्भवति।

(६) **नारदीयम्पुराणम्**— पूर्वोक्तप्रतिपादनान्ते सरस्वन्नामकस्य समुद्रस्याऽपि कोऽस्त्याधारस्तथा कथमयमुत्पन्नः तथ्यस्यास्य जिज्ञासोपशान्तये षष्ठन्नारदपुराणमारचितमिति प्रतिपाद्यते। इह "आपो नारा इति प्रोक्ता आपो वै नरसूनवः" इति मनूक्तेर्नारशब्दस्य जलरूपोऽर्थः। विश्वस्य मूलम्मौलिकाः ऋषिसंज्ञकाः प्राणाः सन्ति तेभ्यः समुत्पन्ना ह्यापोमयाः प्राणविशेषाः नारेत्युच्यन्ते तस्मादापोमयानान्नारशब्दवाच्यानाम्प्राणानां समुत्पादकत्वादेव हेतोः

मौलिकानि ऋषितत्त्वानि नारदशब्दव्यवहार्याणि भवन्ति । तत्प्रतिपादकत्वादेव नारदीयम्पुराणं षष्ठतयाऽऽविष्कृतमभूत् । तदाविष्कारकत्वाच्च ऋषिविशेषोऽपि नारद इति प्रसिद्धोऽभूत् । इह नराणामिदन्नारमज्ञानं तद्द्यति खण्डयतीति नारदः इतिव्युत्पत्तिश्चापि पृथगर्थविशेषं सूचयतीत्यपि न विस्मरणीयम् । अयमाशयोऽस्ति यदिह मौलिकेभ्यः ऋषिप्राणेभ्यः सरस्वन्नामकस्य यस्य अप्समुदायस्याऽऽविर्भावो भवति तस्यापरन्नाम परमेष्ठीत्यप्यस्ति, तथा च शातपथी श्रुतिरस्ति आपो वा "इदं सर्वम् ता यत् परमे स्थाने तिष्ठन्ति यो हीहाभिखनेत् अप स्वाभिविन्देत् परमाद्भाः एतत् स्थानात् वर्षति यद्दिवः तस्मात् परमेष्ठी नाम ।" (शतः का० १, पृ० ६ ब्रा०)

एतस्मिन्नेव परमेष्ठीति संज्ञके सरस्वति समुद्रे वाह्याकाशरूपः यजुर्वेदविधोऽनन्तशेषस्तिष्ठति । बाह्याकाशलक्षणे तस्मिन् शेषे नाभिस्थाने सोमाहुतिलक्षणः यज्ञो भवति । यज्ञश्च विष्णुः "यज्ञो वै विष्णु" रिति शतपथश्रुतेः । तस्मिन् यज्ञे मृत्युमयं चित्याग्निजन्याऽप्पिण्डात्मकं पुष्करपर्णरूपं पद्ममाविर्भवति सा पृथिवी । ततश्च पिण्डरूपे तस्मिन् पृथिवीपद्मे प्रतिष्ठारूपो ह्यमृताग्निः प्रतितिष्ठति । अग्निरेव ब्रह्मा "अग्निर्ब्रह्म अग्निर्वै प्रजापतिः" इति शतपथश्रुतेः । तस्माद् ब्रह्मण एव समस्तं विश्वमुद्भवति । एतस्याः सृष्टिप्रक्रियायानिरूपणम्पूर्वोक्तेषु षट्सु पुराणेषु विहितमस्ति । तस्मादादिभूतानां षण्णाम्पुराणानां योऽयङ्क्रमः प्रोक्तः सोऽत्र वैज्ञानिकाऽऽधारेणैव निर्धारितो वर्त्तते । एतस्य विज्ञानस्य परिज्ञानेन समुद्रमध्ये शेषशय्यायां भगवतः श्रीविष्णोः शयनम्, तन्नाभेर्कमलस्योत्पत्तिस्तस्मात्कमलाच्च कमलयोनेर्ब्रह्मणो जन्म-ब्रह्मा च प्रजापतिः, स एव सर्वामपि सृष्टिमुत्पादयतीत्यादिकङ्कथानकं श्रवणे विचित्रमिव प्रतीयमानं हास्यास्पदीकृतञ्चापि च सर्वथा वास्तविकं वर्त्तते, स्फुटं वैज्ञानिकञ्चेति, प्रतिपादनेनानेन सिध्यतीति निश्चप्रचम् ।

भूयोऽप्यस्य सुस्पष्टं विनिगमनम्

सृष्ट्युद्भवक्रमे यदिदं शेषशायिनो विष्णोर्कथानकं प्राङ्निरूप्य विवृतन्तत्रेदमन्यदपि स्पष्टीकरणन्तच्च व्युत्क्रमेण बोध्यम् । इह यः समुद्रः सोऽप सङ्घातस्वरूपः सरस्वां समुद्रः परमेष्ठिनामा च वर्त्तते तन्निरूपणम्भागवतेऽस्ति । समुद्रे यः शेषः स चाऽपां सङ्घातरूपस्य समुद्रस्य मध्यवर्त्ती एमूषवराहरूपो वायुः वर्त्तते तत्प्रतिपादनञ्च वायुपुराणे वर्त्तते । शेषशय्यायां यो हि विष्णुः सः नवाहयज्ञरूपो विष्णुस्तन्निरूपणञ्च विष्णुपुराणे कृतमस्ति ।

विष्णोस्तस्य केन्द्रवर्ती यः सूर्यः सः एव तन्नाभिस्तस्माद् या सुषुम्नानाडी निर्गच्छति सैव तन्नालम् (नाभिनालम्) नालञ्च तत्पृथिवीं यावत् परिसरति । पृथ्वी च तदग्रभागे प्रतितिष्ठति । इयञ्च पृथिवी चतुष्पत्रपद्मरूपेणाष्टापत्रपद्मरूपेण वा निरूपिता वर्त्तते । तन्निरूपणमस्ति पद्मपुराणे । तस्मात् कमलाद्यस्य ब्रह्माण्डस्योत्पत्तिरभूदसौ पिण्डरूपायामस्यां पृथिव्यामन्तर्वर्त्तमानो ऽमृताग्निरूपो प्रजापतिः । एतन्निरूपणमस्ति ब्रह्मपुराणे । एतस्मात् प्रजापते-

रग्नेरेव समस्तायाः भूतभौतिकरूपायाः प्रजायाः समुत्पत्तिर्भवति । तदिदमखिलङ्कथानकमादिमेषु षट्सु पुराणेषु वर्णितं वैज्ञानिकरहस्यसूचकञ्च तच्चकास्तितराम् ।

इह चेयं सृष्टिर्निरूपिता सा चाधिदैविकी सृष्टिर्वर्त्तते ततोऽग्रे मार्कण्येयादिषु चतुर्षु पुराणेष्वाध्यात्मिकी सृष्टिर्निरूप्यते । भगवतो वेदव्यासस्य समये ह्याध्यात्मिक्याः सृष्टेः सम्बन्धे चत्वारि मतानि प्रचलितान्यासन् तानि चेमानि—(१) प्रकृतिकारणतावादः (२) अग्निकारणतावादः (३) सूर्यकारणतावादः (४) विवर्त्तकारणतावादश्चेति ।

(७) **मार्कण्डेयपुराणम्**— पुराणेऽस्मिन् प्रकृतिकारणतावादमनुसृत्य सत्त्वरजस्तमसान्त्रयाणाङ्गुणानां साम्यावस्थास्वरूपायाः प्रकृतेरेव समस्ता सृष्टिरुद्भूतेति निरूपितम् । एतन्मतप्रतिपादकञ्च साङ्ख्यस्य मतमासीदित्यस्ति निश्चप्रचम् ।

(८) **अग्निपुराणम्**— अस्मिन् पुराणेऽग्निषोमात्मकञ्जगदिति सिद्धान्तमनुसृत्याऽग्नेरेव समस्ता सृष्टिः प्रतिपादिता वर्त्तते । अयमेवाऽसावग्निकारणतावादः ।

(९) **भविष्यपुराणम्**—

अस्मिन् पुराणे अस्यैके सूर्यमेवैकं प्रभवं प्रलयं विदुः ।
सूर्याग्निना प्रजायेते अग्नीमध्यमपार्थिवौ ॥

इति शौनकवचनानुसारमग्नेरप्युत्पत्ति सूर्यादेव स्वीकृत्य सूर्यादेव समस्तायाः सृष्टेरुत्पत्तिः प्रतिपादिता । इदम्मतङ्केषाञ्चित् तत्कालभवानामृषीणामासीत् । तस्य च निरूपणं भविष्यपुराणे विहितं वर्त्तते ।

(१०) **ब्रह्मवैवर्त्तपुराणम्**—वर्त्तते "वाचारम्भणम् विकारो नामधेयं मृत्तिकेत्येव सत्यम्"इत्यादिरूपो ह्युपनिषदामेकः सिद्धान्तः । तदनुसारन्निर्विकारमसङ्गमेकम्ब्रह्मैव यथार्थवस्तु । प्रपञ्चस्त्वयन्न वस्तु सत् । केवलं रज्जुसर्पन्यायेन भ्रान्तिकल्पित एव । एवं हि सृष्टिं भ्रमविलसितङ्कथयतां विवर्त्तवादिनामिदम्मतञ्चतुर्थे ब्रह्मवैवर्त्तपुराणे निरूपितमस्ति ।

अवतारसृष्टिनिरूपकाणि षट्पुराणानि

पूर्वं प्रजापतिः सृष्टेः कारणमिति प्रतिपादितङ्किन्तु तदवान्तराण्यपि कानिचित्कारणानि भवन्ति । तानि चेह षट् स्वीक्रियन्ते । तन्निरूपकाणि पुराणान्यपि षडेव भवन्तीति निश्चितम् । तानि चेह क्रमशः कथ्यन्ते ।

(११) **लिङ्गपुराणम्**— पुराणेऽस्मिन् सृष्टेरुपादानङ्कारणङ्क्षरमिश्रितमक्षरतत्त्वमुच्यते । तस्मादेव समस्तञ्जगत् सञ्चरावस्थायामुत्पद्यते प्रतिसञ्चरावस्थायाञ्च विलीयते । तस्मादिह लयङ्गच्छतीति लिङ्गमिति व्युत्पत्त्या तदेव क्षरतत्त्वमिह लिङ्गमित्युच्यते । "यथा सुदीप्तात्पावकाद् विस्फुलिङ्गा" इत्यादिका मुण्डकश्रुतिश्चाप्युक्ताऽभिप्रायेणैवाऽक्षरं ब्रह्म जगतः प्रभवाप्यययोः स्थानं वक्ति । अक्षराणि च नाना-विधानि भवन्ति, अतः सृष्टिधाराश्चापि नाना-

रूपाः सन्ति । नानाविधानां सृष्टीनाम्तासाम्प्रवर्त्ताकानान्नैकविधानां लिङ्गानान्निरूपणं लिङ्ग पुराणे विहितं वर्त्तते ।

(१२) **वराहपुराणम्**—अक्षररूपाल्लिङ्गादुत्पन्नायां सृष्टौ बहवः सन्ति क्षरपिण्डाः । ते च सर्वे पृथिवीस्वरूपाः सन्ति । तेषां स्तम्भकः वायुविशेषो वराहो नाम । वृणोति समावृणोतीति वरः अह्योति व्याप्नोतीति अहः वरश्चासौ अहश्चेति वराहः, व्युत्पत्तिमेनामनुसृत्य वायुविशेषेण वराहेण संवेष्टितत्त्वादेव पिण्डास्ते नानारूपाः भवन्ति । वराहाश्चेमे खानिलानलजलेलानां पञ्चानामपि महाभूतपिण्डानाङ्क्रमशः पञ्च पृथगेव भवन्ति तद् यथा—

१. आकाशरूपस्य स्त्रम्भूपिण्डस्य वराहः आदिवराहः ।

२. आपोमयस्य वायुरूपस्य परमेष्ठिपिण्डस्य वराहो यज्ञवराहः ।

३. सूर्यपिण्डस्य वराह श्वेतवराहः ।

४. चन्द्रपिण्डस्य वराहो ब्रह्मवराहः ।

५. पृथिवींपिण्डस्य वराहो यमूषवराहः ।

स्वयम्भ्वादयः पञ्चपिण्डाः प्रजापतेरवतारस्वरूपाः सन्ति । पिण्डसम्पादकाः वराहेभ्यश्चैतेभ्यः याः पिण्डात्मिकाः नानासृष्ट्यः समुत्पद्यन्ते तासामवान्तराकारस्य वराहस्य निरूपणकर्तृ पुराणमेवेह वराहपुराणमित्युच्यते ।

(१३) **स्कन्दपुराणम्**—पूर्वोक्तेषु पृथिवीपिण्डेषु पृथ्वीशरीरनिर्माणकर्त्ता मर्त्याऽमृतभेदेन द्विविधो ह्यग्निर्भवति, स चायमग्नि प्रजापतिः प्रोच्यते, तस्य चाग्नेः सम्वत्सराग्निः, वैश्वानराग्निः कुमाराग्निः, चित्याग्निः, पासुकाग्निरिति पञ्चाऽवतारा: सम्पद्यन्ते । तन्मध्यात्कुमाराग्निम्प्रधानम्परिकल्प्य तस्मादेव पृथ्वीशरीराणामारम्भः प्रतिपाद्यते । कुमाराग्निबोधकम्पुराणमेवेह स्कन्दपुराणन्निगद्यते । स्कन्दस्यैवेह कुमारत्वात् कुमाराग्निप्रधानत्वादेव च पुराणस्यास्य कुमारनाम्नैव स्कन्दपुराणमिति जातम् ।

(१४) **वामनपुराणम्**—उपर्युक्तानां पृथिवीपिण्डानां विभिन्नैर्द्यु खण्डैः सहः सम्बन्धो ऽस्ति । तेषां समन्वयैनैव द्यावापृथिव्योः स्वरूपपन्निष्पद्यते । द्यावापृथिव्यावेव विश्वस्य जगतः प्रतिष्ठात्मके वर्त्तेते । अनन्ताश्चेह सन्ति द्यावापृथिव्यः । तत्र तिस्रः प्रधानभूताः रोदसी, क्रन्दसी, संयती चेति व्यवह्रियन्ते ।

पृथिवी तावद् गौरित्युच्यते । सहस्रं सन्ति गोतत्त्वानि । तत्र त्रिंशत्त्रिशद्गवां समूहैः ह्येकैऽहर्गणाः सम्पद्यन्ते । एवं सहस्रसङ्ख्यानाङ् गोतत्त्वानाम्प्रायशश्चतुस्त्रिशदहर्गणा भवन्ति । तत्र त्रयस्त्रिंशदहर्गणेषु षण्णां षण्णामहर्गणानां प्रत्येकमेकः स्तोभः सम्पद्यते । तत्र प्रथमः स्तोभः केवलमहर्गणत्रयात्मको भवति । अन्ये तु षडहर्गणात्मकाः षट्स्तोभाः सम्पद्यन्ते ।

ते च वाचः षट्कारो वषट्कार इति व्युत्पत्त्या एको वषट्कार सम्पद्यते पृथिवीपिण्डस्थो यज्ञरूपो विष्णुः स्तोभत्रयं यावदर्थात् नव, पञ्चदश, एकविंशतिस्तोमपर्यन्तं विक्रमणङ्करोति। एते त्रयस्स्तोभा एवेह वामनरूपस्य यज्ञात्मकस्य विष्णोस्त्रयो विक्रमाः। यत् सम्बन्धादसौ भगवान् "त्रिविक्रमः" इति कथ्यते। स हि त्रिषु स्तोभेषु पृथिव्यन्तो वामनरूपेण तिष्ठति। प्रथमं त्रिवृत्तस्तोमञ्चाक्रम्य पृथिवीमाक्रमते। द्वितीयम्पञ्चदशस्तोममाक्रम्याऽन्तरिक्षमधितिष्ठति। तृतीयमेकविंशतिस्तोममाक्रम्य द्युलोकमपि सङ्गृह्णाति। इत्थं त्रिषु पिण्डेषु त्रींल्लोकान्व्याप्नुवन्यज्ञरूपो भगवान्विष्णुः निखिलामपि सृष्टिमुत्पादयति। एतस्य रहस्यस्य निरूपणमेवेह वामनपुराणेन विहितं राजतेतराम्।

प्रसिद्धमस्त्याभाणकम्—"कश्यपात् सकलं जगद्" इति, शातपथ्यां श्रुतावपि "सर्वा वै प्रजाः काश्यप्य" इत्युक्तम्। कश्यपः प्राणविशेषः स एव कूर्मः। कूर्मशब्दस्य व्युत्पत्तिस्तु समस्तञ्जगद्, यदकरोत्तत्कूर्मः। अयम्भावः—कूर्माख्योप्राणी अधोभागे समतलः, मध्ये रिक्तः एवमुपरिष्टात्तु सर्वासु दिक्षु गोलाकारेण नम्रः, मध्ये चोद्गतः कन्दुकार्धभागमिव व्यवतिष्ठते, तथैव लोकत्रयात्मकः कूर्मः प्रजापतिश्चापि वर्त्तते। कूर्मप्रजापतेर्हि द्यौरुत्तरः कपालः, पृथिवी चाधरः कपालः, अन्तरिक्षञ्चास्य रिक्तमिव स्थानम्। तत्र द्युलोकस्तूपरि मध्ये च समुद्गतो क्षितिजभागे तु सर्वासु दिक्षु नतो भवति, अधस्तात् पृथिवीकपालन्तु समतलमेवेति निश्चितम्। एतेभ्यो भूर्भुवः स्वराख्येभ्यः पृथिव्यन्तरिक्षद्युलोकेभ्यः सारभूताः त्रयो रसाः मधुघृतदधिरूपाः समुद्भवन्ति। त एव रसाः कूर्मप्रजापतेः प्राणस्वरूपाः। त्रैलोक्यरसात्मकैः प्राणैरनुप्राणिताश्च कूर्मादेव समस्ताः प्रजाः प्रजायन्ते। तेषान्त्रयाणां रसानान्निषेकादेव च जायमानानाम्प्राणिनां शरीरनिष्पत्तिर्भवति। तस्मात सर्वाः प्रजाः काश्यप्यो प्रोच्यन्ते। एतस्यैव कूर्मतत्त्वस्य निरूपणं कूर्मपुराणे कृतमस्ति। शतपथब्राह्मणस्य सप्तमे काण्डेऽपि तन्निरूपणङ्कृतमस्ति। इह मधुदधिघृतरूपाणां रसानां विवेचनन्तु साम्प्रतमप्रकृतत्वात् परित्यक्तम्।

(१६) **मत्स्यपुराणम्**— "ऋषिभ्यः पितरो जाताः पितृभ्यो देवदानवाः। देवेभ्यश्च जगत्सर्वं चरंस्थाण्वनुपूर्वशः।" इति मनूवतेः मौलिकेभ्यः ऋषिप्राणेभ्यः सृष्ट्युत्पत्तिः स्वीक्रियते ऋषिप्राणाश्च ते ह्यसद्रूपाः भृग्वंगिरोऽत्रिकश्यपदक्षक्रतुमत्स्यवसिष्ठाऽगस्त्यनामानः नवविधाः सन्ति। एतेषु प्रारम्भिकास्त्रयः प्राणाः पार्थिवाः; मध्यमास्त्रय ह्यान्तरिक्ष्यो ह्यन्तिमाश्च त्रयो दिव्याः सन्ति। अन्तिमेषु त्रिषु चं वसिष्ठो प्राणः सौम्योऽस्ति, स सोम प्रधानायामुत्तरस्यान्दिशि तिष्ठति। अगस्त्यप्राणश्चाग्नेयो वर्त्ततेऽतएव सोऽग्निप्रधानायान्दक्षिणायान्दिशि विराजते। याम्यो मत्स्यप्राणश्च मध्ये तिष्ठति। सोऽयम् मत्स्यप्राणो द्विधा विभक्तः विषुवद्वृत्तादुत्तरध्रुवान्तम्प्रथमः, दक्षिणध्रुवान्तञ्च द्वितीयः। तस्य मत्स्यप्राणस्य परिभ्रमणादेव सर्वाः पार्थिवी सृष्टिरुद्भवति। एतस्य निरूपणं मत्स्यपुराणे कृतमस्ति। इत्थमेकादशाल्लिंगपुराणान्मत्स्यपुराणपर्यन्तं प्रतिपादितेषु षट्सु पुराणेषु प्रजापतेरवतारभूतायाः सृष्टेः षण्णामवान्तरकारणानान्तेभ्यो जातायाः सृष्टिप्रक्रियायाश्च निरूपणङ्कृतमस्ति।

श्रीमता भगवता लोमहर्षेण सूतेन वेदव्यासविनिर्मितां सर्वप्रथमां पुराणसंहितामधीत्य तदनुसारिणी स्वयमेव नवीनैका पुराणसंहिता निर्मिता तस्याञ्च—

सर्गश्च प्रतिसर्गश्च वंशो मन्वन्तराणि च ।
वंश्यानुचरितञ्चेति पुराणम्पञ्चलक्षणम् ॥

इति श्लोकोक्तानाम्पञ्चानान्तत्त्वानामधिकः समावेशोऽकारि । लोमहर्षणस्य त्र्य्यारुणिः कश्यपः, सावर्णिः, अकृतव्रणः, शांशपायनः हारीतश्चेत्येते षट्शिष्या आसन् । ते च ताम्पुराण-संहितामधीतवन्तः । तेषु शांशपायनेन सावर्णिना कश्यपेन च स्वीया स्वीया स्वतन्त्रा पुराण-संहिता निर्मिता । तत्र शांशपायनेनाख्यानान्युपाख्यानानि गाथाः कल्पशुद्धिश्चेत्येतेषाञ्चतुर्णां विषयाणां स्वसंहितायामधिकः सन्निवेशो विहितः । सावर्णिश्च दर्शनविद्या कला आगमविषयाः नीतिविषयाश्चेत्येतेषां विषयाणां स्वनिर्मितायां पुराणसंहितायामधिकं सन्निवेशं कृतवान् । कश्तपोऽपि स्वस्याम्पुराणसंहितायां वेदोपबृंहणं पुराणावतरणमित्यादीनां विषयाणामधिकं समावेशञ्चकार । इत्थं लोमहर्षणेन त्रिभिस्तस्य शिष्यैश्च निर्मिताश्चतस्रः पुराणसंहिताः नैमिषक्षेत्रे सूतशौनकसंवादसिद्धानामष्टादशानाम्पुराणानाम्मूलभूताः संहिताः समभूवन् । लोम-हर्षणादिप्रणीतानाम्मूलसंहितानाम्मूलस्रोतस्तु बादरायणप्रणीता पुराणसंहितैवाऽस्ति । इत्थमत्र पुराण-संहितानां तिस्रः श्रेण्यः सञ्जाताः (१) बादरायणकृष्णद्वैपायनेन प्रणीता प्रथमा पुराण-संहिता प्रथमश्रेण्यामायाति । (२) लोमहर्षणेन त्रिभिस्तस्य शिष्यैश्च प्रणीताः चतस्रो मूल-संहिताः द्वितीयश्रेण्यामायोन्ति । (३) नैमिषक्षेत्रे सूतशौनकसंवादरूपेण सिद्धा ह्यष्टादशपुराण-संहिताः सम्पन्नाः ताः यत्र सङ्ख्यायन्ते, साऽस्ति चरमा तृतीया श्रेणी ।

अधुना प्रचलितेष्वष्टादशपुराणेषु— (१) ब्राह्मं, (२) पाद्मं, (३) वैष्णवम् (४) वायवीयम्, (५) भागवतम्, (६) नारदीयम्, (७) मार्कण्डेयम्, (८) आग्नेयं च इत्येतान्यादिमान्यष्टौ पुराणानि बादरायणीयपुराणसंहिताऽऽधारेण लोमहर्षणेन निर्मितानि सन्ति । शेषाणि दश भविष्य, ब्रह्मवैवर्त्तपुराणम्, लिङ्गपुराणम्, वराहपुराणम्, स्कन्दपुराणम्, वामनपुराणम्, कूर्मपुराणम्, 'मत्स्यपुराणम्, गरुडपुराणम्, ब्रह्माण्डपुराणञ्चेति लोमहर्षण-सूनुना उग्रश्रवसा (सौतिना) निर्मितानि सन्ति ।

पुराणानामुद्भवप्रकारः

अनेकेषु पुराणेषु कथानकमिदमुपलभ्यत एव, यद् भगवद्बादरायणव्यासोक्तां वैदिकीं पुराणविद्याम्प्रचारयितुम्परिभ्रमन् लोमहर्षणः सूतः नैमिषारण्यञ्जगाम । यत्र महर्षिः शौनकः सहस्रोऽधिकैः स्वशिष्यैः सह त्रैवार्षिकं सत्रङ्कुर्वन् आसीत् । स हि सृष्टिविद्याप्रतिपादिकायाः पूर्वायाः भगवद्बादरायणकृतायाः पुराणविद्यायाः सुविज्ञातारं लोमहर्षणं सूतमनायासेनैवाऽऽसाद्य तां विद्यामध्येमुत्सुकः समभूत्, प्रार्थयंच्च विद्यान्तामाश्रावयितुम्भगवन्तं सूतम् । सूतेन प्रार्थनायां स्वीकृतायामा-षाढशुक्लायाः पूर्णिमायाः दिने सुमुहूर्ते गुरुवासरे तमभिषिच्य श्रीशौनकः पुराण-

कथा श्रोतुमारेभे। लोमहर्षणस्तद्बादरायणकृतं पुराणरहस्यं यद्यपि श्रावयितुमेव प्रवृत्तस्तथाऽपि मध्ये मध्ये शौनकेन कृतानाम्प्रश्नानामुत्तरणे तस्य क्रमः परिवर्त्तितोऽभूत्। लोमहर्षणस्तु प्रत्यहन्दिनभागे यथा कथामाश्रावयद्, रात्रौ तान्तथैव लिपिबद्धामप्यकरोत्। इत्थं सप्त-पुराणानि श्रावयितुम्नवृत्तः सूतस्तदैव द्वारिकायाः समागतो बलभद्रः सूतजातीयन्तं शूद्रं गुर्वा-सनस्थितमनुचितम्मन्यमानो क्रुद्धस्तम्मुसलेनाऽऽजघान। तेनात्यन्तन्दुःखितः शौनकः "नीचादप्यु-त्तमां विद्याम्" इत्यादिभिः धर्मशास्त्रीयैः सद्वचोभिः सृष्टिप्रतिपादिकायाः पुराणविद्यायाः सर्वथाऽनन्यज्ञातुः सूतात् पुराणश्रवणं समुचितमेवति संसाधयामास। तस्य च वधमनर्थत्वेन प्रतिपादयामास। अथ बलरामः स्वकृते पश्चात्तापङ्कृत्वा सूतपुत्रमुग्रश्रवसन्तदासने स्थापित-वान्। किन्तु शौनकः गुर्वासने स्थापनात्पूर्वं तस्य योग्यतां परीक्षितुं तत्पित्रा श्रावितानि द्वितीय चतुर्थ-षष्ठानि पुराणानि भूयोऽपि शुश्राव। तेन च तस्य योग्यतां सर्वथा साधीयसीन्निश्चित्य शेषाण्यपि पुराणानि शुश्राव शौनकः। एवङ्क्रियमाणे परीक्षार्थं श्रावितेषु त्रिषु पुराणेषु भूयोऽपि प्रश्नोत्तराभ्याङ्क्रमः परिवर्त्तितोऽभूत्। तानि च पुराणानि प्रतिपाद्यविषयदृष्ट्या समानान्यपि सन्दर्भभेदेन भिन्नान्यभूवन्। अतएव द्वितीय-चतुर्थ-षष्ठानि पुराणानि सम्प्रति द्विधा निर्मितानि प्राप्यन्ते, लोमहर्षणकृतानि भिन्नानि, उग्रश्रवसा कृतानि च भिन्नानि। तत्र लोमहर्षणकृतानि त्रीणि पुराणानि क्रमशः पद्मपुराणं वायुपुराणन्नारदपुराणञ्चेति प्रसिध्यन्ति। उग्रश्रवसा कृतानि तु त्रीणि पुराणानि क्रमशः महापद्मपुराण-शिवपुराण-बृहन्नारदपुराणसञ्ज्ञानि सञ्जज्ञिरे। अतएवात्र चतुर्थस्य पुराणस्य क्वचिद्वायुपुराणत्वेन क्वचित्तु शिवपुराणत्वेन व्यवहारः प्राचलत्। इत्थमष्टादशानाम्पुराणानां भगवद्व्यासविरचितपुराणसंहिताऽऽधारेणैव-सूतेन सौतिना च निर्माणमक्रियत। तत्र च "सृष्टिश्च प्रतिसृष्टिश्च" इति पूर्वोक्तानां विष-याणां समावेशश्चापि कृतः।

एतेषामष्टादशानामपि पुराणानां सरलत्वात् सर्वविधशङ्कासमाधानादियुक्तत्वाद् विविध-विषय-सङ्कलितवाच्चाऽत्यधिके प्रचारे जाते सति व्यासशौनकशांशपायन-कश्यप-सावर्णिप्रणीताश्च पुराणसंहिताः स्वीयेन मूलरूपेण विलोपमापुः। अष्टादशस्वेतेषु पुराणेषु "अष्टादशपुराणानां कर्त्ता सत्यवती सुतः" इत्येतादृशीनामुक्तीनां सङ्गतिस्तु व्यासोक्ताया ह्यष्टादशप्रकरणात्मिकायाः पुराणसंहितायाः सर्वेषामपि विषयाणां सूत-सौतिभ्यान्निर्मितेषु ह्यष्टादशसु पुराणेषु सत्वादेव भवतीति निश्चप्रचम्।

पञ्चलक्षणचमत्कारः

पूर्वमुक्तम्— "सृष्टिश्च प्रतिसृष्टिश्च वंशो मन्वन्तराणि च। वंश्यानुचरितञ्चेति पुराणम्पञ्चलक्षणम" इति। अष्टादशसु पुराणेषु एते पञ्चविषयाः सर्वेषु चोपलभ्यन्ते। परम्पराम्भेदस्त्वेषाम्पूर्वोक्तविधया पृथक्पृथक् परिगृहीतविषयप्राधान्यादेव भवतीति विज्ञेयम्। उक्तानि पञ्चलक्षणान्यपि प्रत्येकम्पञ्चलक्षणात्मकानि भवन्तीति महांश्चमत्कारः। तथा हि—

(१७) **गरुड़पुराणम्**—उक्तमादिमेषु षोडशपुराणेषु सञ्चरक्रमस्य सृष्टिप्रक्रियायार्वा निरूपणम्। अथैतस्मिन् सप्तदशे गरुड़पुराणे तु सृष्टिविपरीतायाः प्रतिसृष्टेः सञ्चरक्रमविपरीतस्य प्रतिसञ्चरक्रमस्य वा उत्पत्तिक्रमविपरीतस्य निर्वाणक्रमस्य वा निरूपणमस्ति। अथवा आत्मनो ह्येकत्वविपरीतस्य बहुत्वस्य प्रवृत्तिर्यथा सृष्टिः सम्प्रतिपादिता तथैव बहुत्वविपरीतस्याऽऽत्मकैवल्यस्य प्रवृत्तिः प्रतिसृष्टिरुच्यते। इत्थमेतासामनन्तानाम्प्रतिसृष्टीनान्निरूपणं सप्तदशे गरुड़ पुराणे कृतमस्ति। गरुडोऽयं वेदे सुपर्णशब्देनोक्तः सुपर्णस्तु भुर्भूवः स्वरादिसप्तलोकव्यापी प्राणोऽवरोहक्रमेण पृथिवीमनुपर्येति। पृथिव्याश्चारोहक्रमेण सप्तलोकानुबन्धी सन् नानालोकेष्वितस्ततः परिभ्रमति। पृथिव्यामसौ नानायोनिषु जायते ततो निर्गत्य चोर्ध्वलोकेषु गच्छति। सो ऽयं सुपर्णो प्राण एव कर्मात्मा वर्त्तते। तदुक्तं पञ्चदशयाङ्कर्मात्मा त्वपरो योऽसौ बन्धमोक्षैः संयुज्यत इति। सोऽयं कर्मात्मरूपो दिव्यप्राणः "सुशोभनं यथा स्यात्तथा पतति परिभ्रमतीतस्ततो लोकेषु" इति व्युत्पत्तिमुपादाय सुपर्णरित्युच्यते। तस्यैव सुपर्णरूपस्य कर्मात्मनः कर्मवशान्नानालोकेषुतद्गतीनाञ्च निरूपणङ्गरुड़पुराणे वर्णितमस्ति।

(१८) **ब्रह्माण्डपुराणम्**—पूर्वं सृष्टिप्रतिसृष्टिश्चोक्ते ते तत्र सम्पद्येते। तस्याऽऽयतनस्य नाम ब्रह्माण्डमिति निर्दिश्यते। तस्यायतनस्य सृज्यमानायाः सृष्टेः सीमायाश्च निरूपणं ब्रह्माण्डपुराणे विहितमस्ति।

इत्थमष्टादशपुराणानि षट्[१], चत्वारि, षट्[१], एकम्[१], एकम्[१], इत्येवं पञ्चषु भागेषु विभज्यते, विश्वस्य सृष्टेः प्रतिसृष्टेश्च सम्पूर्णं विज्ञानं तेषु निरूपितमस्ति। अतीव प्राचीनत्वाच्चेदं विधान, पुरा-पूर्वन्नवम्भवति, एतर्हि तु तत् प्राचीनमिति व्युत्पत्त्या पुराणमित्युच्यते। विज्ञानस्यास्य निरूपकाः ग्रन्थाश्चापि पुराणशब्दवाच्या भवन्तीत ते ग्रन्थाः साम्प्रतम्पुराणानीति व्यवह्रियन्ते।

केचित्तु पुरा नवं भवति इत्यस्यार्थं यस्य नवीना द्युतिः सर्वतः प्रथमम्प्रादुरभूत् तन् पुराणमित्येव प्रतिपादयन्ति। कथयन्ति च यदेतेनैवार्थेन भगवानपि पुराणपुरुषः समुदीर्य्यते। नायं पुराणशब्दो जीर्णतावाची ह्यपितु विकासार्थवाची वर्त्तते। गीतायामपि "कविं पुराणमनुशासितारम्" इत्यत्र पुराणशब्दस्य स एवार्थः। अतश्चाऽऽदिसाहित्यम्पुराणमित्येव शब्दस्यास्यार्थः। भगवता व्यासेन तदेवाऽऽदिदेवस्याऽऽदिमं ज्ञानविज्ञानसमूहमिमञ्जगतः कल्याणार्थम्प्राधान्येन पञ्चलक्षणतया प्रभावपूर्णशैल्या विनिबध्य विश्वस्मिन् विश्वे तत्प्रसारो विहितस्तथ्यमिदम्प्रतिपाद्यते।

इदमपि प्रतिपादनं युक्तियुक्तमेवेति न विरुद्धं वस्तुस्थितिदप्रर्शनपरञ्चाप्यस्तीति केवलं शब्दभेदेन प्रदर्शनान्तरमेवेदमिति सर्वथा स्वीकार्यम्। तथ्यमिदं सुनिश्चितमेवास्ति यदिह पुराणमेकं सृष्टिप्रतिसृष्ट्यादिप्रतिपादकं विज्ञानम्। विज्ञानस्यास्य सन्निरूपकाः सर्वे ग्रन्थाश्चापि पुराणशब्दवाच्या भवन्तीति निश्चप्रचम्।

पञ्चविधा सृष्टिः	पञ्चविधा प्रतिसृष्टिः	पञ्चविधो वंशः	पञ्चविध-म्मन्वन्तरम्	पञ्चविधं वंश्यानुचरितम्
१. षट्पर्वा प्रथमा सृष्टिः	१. ज्योतिश्चक्रम्	१. ऋषिवंशः	१. युगः	१. ऋषिचरितम्
२. चतुर्विधा मध्यमा सृष्टिः	२. शास्त्रानुव्यूहः	२. पितृवंशाः	२. दिव्ययुगः	२. दैवयोनिचरितम्
३. षट्पर्वा चोत्तरा सृष्टि	३. भुवनकोषः	३. सूर्यवंशः	३. नित्यकल्पः	३. सूर्यवंशचरितम्
४. सम्पराया सृष्टिः	४. कल्पशुद्धिः	४. चन्द्रवंशः	४. सप्तकल्पाः	४. चन्द्रवंशचरितम्
५. सृष्टेरायतनम्	५. सृष्ट्युपसंहारः	५. अग्निवंशः	५. त्रिंशत्कल्पः	५. अग्निवंशचरितम्

इत्थमत्र पुराणशव्देन तत् परिचयविषये यद् विवेच्यन्तत् सर्वमिहोपस्थापितम् । तत्र भागवतं पञ्चमसङ्ख्यायां समाविशति, इत्यपि सहेतुकमुक्तम् । पुराणविद्यायाः प्रक्रमे क्रमशः समुद्भवन्तीस्वाकाङ्क्षासु तदुत्तरणाय प्रत्येकं पृथक्पृथक् समुन्मिषत्सु पुराणेषु भागवतस्य पञ्चमत्वेनैवोपन्यासः साधितः पूर्वमेवेति शम् ।

भागवतं श्रीमद्भागवतन्देवीभागवतं वा

शीर्षकसूचितोऽयं विषयोऽग्रे वक्तव्यत्वेन प्रतिज्ञात आसीत्, तदिह निरूपयामः । अष्टादशसु पुराणेषु पूर्वमेव पद्मपुराणादीनि षट्पुराणानि ह्याधिदैविकसृष्टि निरूपणकर्तृत्वेन प्रतिपादितानि तत्रैव च भागवतस्य पञ्चमत्वमुपस्थापितम् । तदिदम्भागवतं श्रीमद्भागवतमेव गृहीतुं शक्यम् । देवी-भागवतन्तु आध्यात्मिकसृष्टिप्रतिपादनार्थं विभिन्नानाञ्चतुर्णाम्मतानां मध्यतः प्रकृतिकारणतावादस्य प्रतिपादनाय निर्मितस्य मार्कण्डेयपुराणस्यैव किमपि पूरकम्पुराणान्तरम् । तत्र हि सर्वविधायाः सृष्टेर्जनन्याः प्रकृतेः देवीत्वेन जगदम्बात्वेन च निरूपणं भक्तिभावनाभरितं समुपवर्ण्यते । तस्माद् द्वेधा निरूपितेषु शिवपुराणवायुपुराणादिष्विव देवीभागवतेऽपि श्रद्धातिशयस्य तावदस्थ्येऽप्यष्टादशसंख्यायान्तत्परिगणनन्नैव सम्भवति । श्रीमद्भागवतमेवेह भागवतत्वेन परिगण्यते । ये तु देवीभागवतमेव तत्र सञ्जिघृक्षन्ति न तैः सह कश्चन विवादः । वैज्ञानिकीं प्रक्रियामाश्रित्य यदुक्तमिह तदपि नारुचिकरम् । अपि च श्रीमद्भागवतस्य प्रारम्भिके मङ्गलाचरणश्लोके धीमहि इति गायत्री मन्त्रस्य पदप्रयोगेण तदारम्भस्य गायत्र्या संसूचितत्वाद्-गायत्र्याख्य-ब्रह्मविद्यारूपमेतत्पुराणमिति दर्शितम् । यथोक्तम्मत्स्यपुराणे पुराणदानप्रस्तावे—

यत्राधिकृत्य गायत्रीं वर्ण्यते धर्मविस्तरः ।
वृत्रासुरवधोपेतं तद्भागवतमिष्यते ॥

लिखित्वा तच्च यो दद्याद्धेमसिंहसमन्वितम् ।
प्रौष्ठपद्यां पौर्णमास्यां स याति परमम्पदम् ।।

अष्टादशसहस्राणि पुराणन्तत्प्रकीर्त्तितम् पुराणान्तरे च—

ग्रन्थोऽष्टादशसाहस्रो द्वादशस्कन्धसन्मितः ।
हयग्रीवब्रह्मविद्या यत्र वृत्रवधस्तथा ।।

गायत्र्या समारम्भस्तद् वै भागवतं विदुः । पद्मपुराणेऽम्बरीषम्प्रति गौतमोक्तिश्चापि वर्त्तते । सा चेत्थम्—

अम्बरीष ! शुकप्रोक्तन्नित्यम्भागवतम् शृणु ।
पठस्व स्वमुखेनापि यदीच्छसि भवक्षयम् ।।इति।।

अतोऽत्र भागवतन्नामान्यत्पुराणन्देवीभागवतम् वा गृहीतुं नैव शक्यम् इति सर्वथा सिद्धम् यच्छ्रीश्रीमद्भागवतमेवेह भागवतत्वेन स्वीकर्त्तुं शक्यते । लोकेऽपि सर्वत्र इत्थमेव व्यवह्रियमाणत्वादपि पुराणेषु भागवतत्वेन श्रीमद्भागवतमेव ग्राह्यम्भवतीति शम् ।

—०—

पुराण-काल-निर्णय

ऋग्वेदं भगवोऽध्येमि यजुर्वेदं सामवेदमथर्वणम् ।
चतुर्थमितिहासपुराणम्पञ्चमं वेदानां वेदम् ।।

(छान्दोग्योपनिषदध्यायः सप्तमः खण्डम् प्रथमम् द्वितीयञ्च)

यदा भगवान् नारदो ब्रह्मविद्याजिज्ञासया सनत्कुमारञ्जगाम । तदा भगवता नारदेन भगवन्तं सनत्कुमारम्प्रति पूर्वोपलब्धम् स्वज्ञानम्प्रकाशयता मन्त्रोऽयम्प्रस्तुतीकृतः । नारद-पठितेनानेन मन्त्रेण स्पष्टीभवति यत्तस्मिन् वैदिके कालेऽपि पुराणानामुपस्थितिरासीदिति न केवलमुपस्थितिरेवापि तु पुराणानाम्पठनपाठन-प्रणाल्यप्यासीत् । परन्तु साऽऽसीत्-पुराण-विद्या काचन समासरूपेणैव विराजमाना । तदनन्तरन्तस्याः पुराणेतिहास-विद्यायाः सम्यक्-प्रकारेण व्याकर्त्रा भगवता व्यासेन पुराणानामष्टादशधा निरूपणङ्कृतम् । सः एव समयः साम्प्रतिके युगे पुराण-कालत्वेन परिगण्यते । तत्र भवान् भगवान् व्यासो महाभारताख्यमितिहासं ग्रन्थ-रत्नं व्यरचत्तद्विषये चेह समुदीर्य्यंते यत्—

धर्मे चार्थे च कामे च मोक्षे च भरतर्षभ ।
यदिहास्ति तदन्यत्र यन्नेहाऽस्ति न तत्क्वचित् ।।

एतादृशः सर्वस्व-भूतस्य महाभारतस्य रचना-काल-विषयेऽपि नास्ति विदुषामैकमत्यम् । पाश्चात्याः सन्ति केचन विद्वांसो, ये ख्रिस्ताब्दतः पञ्चशताब्दीतश्चतुर्थख्रिष्टपूर्व—शताब्दीं यावन्मन्वते । तेषां केषाञ्चन नामानि तदभिप्रायाभिव्यञ्जकग्रन्थानाञ्च कानिचिन्नामानीह प्रस्तूयन्ते—

१. श्रीहापकिन्समहोदयाः—"कैम्ब्रिज हिस्ट्री ऑफ इण्डिया"

२. श्रीविन्टरनीजमहोदयाः—"हिस्ट्री ऑफ इण्डियन लिटरेचर"

३. श्रीमेकाडनलमहोदयाः—"संस्कृत-लिटरेचर"

४. श्रीविन्सण्टस्मिथमहोदयाः—"आक्षफोर्ट, हिस्ट्री ऑफ इण्डिया"

५. श्रीमोनपरविलियम्समहोदयाः—"दी महाभारत"

परमेतेषां विदुषाम्मान्यतान्नानुमोदन्ते भारतीयाः विशिष्टाः शास्त्रिणः । श्रीवैद्यमहाभागैः पाश्चात्यानामेतेषां सर्वाश्चापि कल्पनाः सङ्खण्ड्य महाभारतस्य रचना-कालो द्विधा निर्धारितः । तेषाम् मतमस्ति [illegible]—महाभारतस्य रचनासमयस्तु ख्रिस्ताब्दतस्त्रिसहस्राब्दपूर्वकोऽस्ति; तथा चोपलभ्यमानस्वरूपात्मकस्य महाभारतस्य रचनावेला ईशवीय-संवतसर-समारम्भतः पूर्वं द्विशतवर्षपूर्वा चतुःशतवर्षपूर्वा चेति ।

परमेतेषामपि मतन्नास्ति भारतीयैः समैश्चापि विद्वद्भिः समनुमोदितम् । यतस्तत्र नास्ति किमपि मौलिकन्दृढतरञ्च प्रमाणम् । मैगस्थनीजेन "इण्डिया" नामके पुस्तके ग्रन्थ-

रत्नस्यास्य नामापि नैव लिखितमिति तदानीम्महाभारतमासीदित्यभिधातुन्नैव शक्यते कथञ्चिदपि। सम्भाव्यते यदिह सत्यपि ग्रन्थरत्नेऽमुष्मिन् तेन नैवकृतन्तत्रावधानमिति। द्वितीयं यदस्ति प्रमाणन्तदपि नास्ति सम्मानार्हम्। तत्र प्रमाणीकुर्वन्ति यूनानदेश-वास्तव्यान् श्रीकाय-सीष्टममहाभागान्, यैः कुत्रचिदपि कैश्चिदपि प्रमाणैः नैतत् साधितम्, यत्—महाभारतस्य रचनासमयः स एवेति।

श्रीवेबरमहोदयाः लिखन्ति—यन्महाभारते यवनशब्दस्योल्लेखो वर्त्ततेऽतोऽस्य समयः समतीतेषु बहुषु ख्रिस्ताब्देषु यवनैः सह समागमे जाते महाभारतस्य रचना समभूदिति वर्त्तते निर्मूलमिवानर्गलञ्च। यतोऽत्र नास्ति किमपि प्रमाणं यद्यवनानां समागमनङ्गतेषु ख्रिस्ताब्देष्वेव समभूदिति। यवनैः सह पूर्वमपि विवादः समभूदिति महाभारतस्यान्तरिकमेवास्ति प्रमाणम्—

"न शशाक वशे कर्त्तुं यं पाण्डुरपि वीर्यवान्।
सोऽर्जुनेन वशन्नीतो राजाऽऽसीद् यवनाधिपः॥

(आदि-वर्ष १३६।२०।२१)

श्लोकेनानेन सिध्यति यत् पूर्वं यवनैः सह पाण्डोश्चापि युद्धमभूत् तथा येन यवनेन सह युद्धमभूत् सोऽपि राजाऽऽसीत्। तथा चैतादृशो नृपोऽयं स्वयम्पाण्डुरपि जेतुन्न शशाक। अतोऽत्र काल-निर्णय-काले नास्ति विचारोऽयमेतेषां शोभावहम् यद्—यवन-पदसमुपलब्धेः महाभारतस्य रचनायाः समयोऽपि साम्प्रतिकयवनाक्रमणतोऽपि पश्चाद्भव इति।

एवमत्र समुपलब्धानि समान्यपि प्रमाणानि पर्यालोच्य वयन्त्वेतदेव निश्चेतुं शक्नुमो यदेतन्महाभारतखयङ्ग्रन्थ-रत्नं महाभारतयुद्धकाल-समकालिकमेवास्तीति। महाभारत-युद्ध-समयश्च ख्रिस्ताब्दसमारम्भणात् प्राक् त्रिसहस्रवर्षाणीति निर्णीतमेवास्ति अर्थाद् ग्रन्थरत्न-स्यास्य महाभारताख्यस्य रचना—समयः ख्रिस्ताब्दतस्त्रिसहस्रवर्षाणि प्रागेवेति।

महाभारतस्य पुराणाष्टादशकस्य च लेखकाः श्रीभगवदंशावतार-भूताः श्रीव्यासचरणा एव सन्तीति तदानीन्तनता सिध्यति। तथाप्यत्र कानिचित् पुराणप्रमाणानि प्रस्तूमः। तानि चेत्थम्—पद्मपुराणस्य षष्ठाध्याये श्रीमद्भागवत-महापुराणस्य कथावाचन-प्रक्रियाप्रसङ्गेन भगवान् श्रीसूतः शौनकादीन् प्रति प्रत्यपादयत्। यत्—

आकृष्णनिर्गमात्त्रिंशद्वर्षाधिकगते कलौ।
नवमीतो नभस्ये च कथारम्भं शुकोऽकरोत्॥

परीक्षिच्छ्रवणान्ते च कलौ वर्षशतद्वये।
शुद्धे शुचौ नवम्याञ्च धेनुजोकथयत् कथाम्॥

तस्मादपि कलौ प्राप्ते त्रिंशद्वर्षगते सति।
ऊर्जे सिते पक्षे नवम्यां ब्रह्मणः सुताः॥

सुश्लोक्यै: श्लोकैरेभि: सिध्यति यद्भागवतमहापुराणम् भगवता श्रीशुकदेवेन पञ्चत्रिंशदुत्तरपञ्चसहस्र वर्षपूर्वमेव परीक्षितम्प्रति श्रावितम्। तदनन्तरद्विशतवर्षातन्रम् भवति पञ्चत्रिंशदुत्तराष्टाताधिकस्तु: सहस्र वर्षपूर्वं श्रीगोकर्णचरणा: श्रीमद्भागवतं धुन्धुमारिण: समुद्धाराय तथा चान्येषामपि सभेषां श्रोतॄणां समुद्धाराय बारद्वयं सप्ताहक्रमेण वाचयामासु: ततपश्चात् त्रिंशद्वर्षान्तरं ब्रह्मपुत्रा: सनक-सनन्दन-सनत्कुमार-सनातना: श्रावकामासु:।

भगवदंशावतारभूतानां भगवतां वेदव्यासानां वचांस्यतिरिच्य नान्येषां केषामपि साम्प्रतिकानाम्पुरातनानां च वचांसि कथञ्चिदपि प्रमाणीभवितुमर्हन्ति। तेषां च सुवचोभि सर्वथा स्पष्टीभवति यदस्य श्रीमद्भागवतमहापुराणस्य रचना द्वापर-युग एव समभूदिति। श्रीमद्भागवत-पुराणस्यास्ति प्रमाणम् यत्--

ततः कलौ सम्प्रववृते सम्मोहाय सुरद्विषाम्
वृद्धो नाम्नाजनसुतः कीटटेषु भविष्यति ॥

श्लोकेऽस्मिन् वुद्धस्य जनिः भविष्यत् कालिकया क्रियया प्रतिपादिता वर्त्तते। इति श्रीमद्भागवत-महापुराणस्य वुद्ध समयादर्वागेवोपस्थितिरासीदिति वर्त्तत इत्यस्ति निश्चप्रचम् श्रीमद्भागवतमहा पुराणस्य प्रथमे स्कन्धे तृतीयेऽध्याये पञ्चचत्वारिंशत्तमः श्लोकोऽस्ति यत्—

कृष्णे स्वधामोपगते धर्मज्ञानादिभिः सह।
कलौ नष्टदृशामेषः पुराणार्कोऽधुनोदितः ॥

तदतिरिक्तं श्रीमद्भागवत-महापुराणस्य प्रथमे स्कन्धे चतुर्थेऽध्याये त्रयोदशतम श्लोकतः समारभ्य प्रथमस्कन्धस्य सप्तमाध्यायस्याष्टमं श्लोकं यावत् तत्र भवान् भगवान् बादरायणिः भगवन्तं नारदं प्रप्रच्छ यन्मे मनसि शान्तिः किमिति नोदेति : मया चेत नैकविध पुराणानि महाभारतञ्च लिखितन्तथापि। तत्र भगवान् नारदः प्रत्युत्तरयामास। यत्— भवता स्वतन्त्र्येण भगवतां गुणानुवादो नाचरति इत्यस्मादेव हेतोः भवताम्मनः शान्तिन्तथा नाधिगच्छति। भगवतो नारदस्य सदुपदेशेन तदनतरम्भगवान् वेदव्यासो श्रीमद्भागवत-महापुराणं व्यरचदिति भगवता वेदव्यासेन पुराणरत्नमिदं सम्याप्रासाख्ये पुण्यक्षेत्रे भगवत्याः सरस्वती नद्यास्तटे भगवन्तन्ध्यायता लिखितम्। तथा सोऽत्र व्यासस्तत्रैव स्थितः श्रीमन्तं शुकदेवं पाठयामास।

भगवान् श्रीकृष्णः स्वयमेव सर्वतः प्राक् श्रीमद्भागवतं सनत्कुमाराय समुपदिदेश। तत्पश्चात् सनत्कुमारः साङ्ख्यायनाय प्रोवाच, साङ्ख्यायनः पराशराय समुपदिदेश। सोऽत्र पुलस्त्येनोक्तः मैत्रेयाय प्रोवाच। तदेतत्सर्वं श्रीमद्भागवतमहापुराणे तृतीय-स्कन्धस्याष्टमेऽध्याये द्वितीयश्लोकः समारभ्य नवमं श्लोकं यावत् प्रतिपादितमस्ति। तद्यथा—

सोऽहन्नृणां क्षुल्लसुखाय महद्गतानां विरमाय तस्य।
प्रवर्तये भागवतम्पुराणम् यदाह साक्षाद् भगवानृषिभ्यः ॥

आसीनमुर्व्यां भगवन्तमाद्यं संकर्षणं देवमकुण्ठसत्त्वम्।
विवित्सवस्तत्त्वमतः परस्य कुमारमुख्या मुनयोऽन्वपृच्छन् ॥

स्वमेव धिष्ण्यं बहुमानयन्तं यं वासुदेवाभिधमामनन्ति ।
प्रत्यग्धृताक्षाम्बुज कोशमीषदुन्मीलयन्तं विबुधोदयाय ॥

स्वर्धुन्युदार्द्रैः स्वजटाकलापैः उपस्पृशन्तश्चरणोपधानम् ।
पद्मं यदर्चन्त्यहिराजकन्याः सप्रेम नानाबलिभिर्वरार्थाः ।

मुहुर्गृणन्तो वचसानुरागः स्खलत्पदेनास्य कृतानि तज्ज्ञाः ।
किरीटसाहस्रमणिप्रवेक प्रद्योतितोद्दामफणा सहस्रम् ॥

प्रोक्तं किलैतद् भगवत्तमेन विवृत्तिधर्माभिरताय तेन ।
सनत्कुमाराय सचाह पृष्टः साङ्ख्यायनायाङ्ग धृतव्रताय ॥

साङ्ख्यायनः पारमहंस्यमुख्यो विवक्षमाणो भगवद् विभूतिः ।
जगाद सोऽस्मद् गुरवेऽन्विताय-पराशरायाथ बृहस्पतेश्च ॥

प्रोवाच मह्यं स दयालुरुक्तो मुनिः पुलस्त्येन पुराणमाद्यम् ।
सोऽहं तवैतत् कथयामि वत्स श्रद्धालवे नित्यमनुव्रताय ॥

पुराण-विद्यान्तु सर्वद्रष्टा ब्रह्मा स्वयं सर्वेभ्यो स्वमुखेभ्यो व्यरचत् । लिखितमस्ति, यत्—

इतिहास-पुराणानि पञ्चमं वेदमीश्वरः ।
सर्वेभ्य एव वक्त्रेभ्यः ससृजे सर्वदर्शनः ॥

स्कन्दपुराणे व्याससमयोऽपि प्रतिपादितोऽस्ति । तद्यथा—

द्वापरे समनुप्राप्ते तृतीये युगपर्यये ।
जातः पराशराद् योगी वासव्यां कलया हरेः ॥

—०—

श्रीमद्भागवतस्य पुराणेषु स्थानम्

पुराणेषु श्रीमद्भागवतस्य किं स्थानमस्तीति ज्ञानाय सर्वतः प्रागस्माभिः विचारणीयं यत् कियन्ति पुराणानि कीदृशी च तेषां मान्यता सा च भागवतम्प्रति कीदृशीति ।

अष्टादशपुराणान्यष्टादशैवोपपुराणान्यष्टादशैवोपुराणानि च सन्ति, तथा तत्र तत्र तानि सर्वाण्यपि यथारुचि सर्वेऽपि सनातनधर्मानुयायिनः पठन्ति शृण्वन्ति च । तथा तत्तन्मतावलम्बिनस्तत्तत्पुराणमेव सर्वोत्कृष्टत्वेन मन्वते । किन्तु यादृशी प्रसिद्धिः श्रीमद्भागवतस्याऽस्ति, यावती रुचिश्च श्रीमद्भागवतशुश्रूषायां समवलोक्यते, तादृशी प्रसिद्धिः तावती रुचिश्च नान्यस्य कस्यचिदपि पुराणस्योपपुराणस्य वा श्रवणे वर्त्तते । किम्पुराणान्तरेभ्यः श्रीमद्भागवतं सरलसंस्कृतमयं वर्त्तते, उत स्वल्पकायं वर्त्तते, अथवा समुपलभ्यं वर्त्तत इति लोकस्तदेव सर्वाधिकं शृणोति पठत्यनुमोदते ।

न हि श्रीमद्भागवते महापुराणे प्रयुक्तं संस्कृतं सर्वेभ्य; पुराणेभ्यः सरलं वर्त्तत इति वक्तुं शक्यते यतः "विद्यावतां भागवते परीक्षा" भणितिरियं सर्वत्र विद्वत्समाजे समुपलभ्यते, सा चेह सर्वथा साधयति यत्-श्रीमद्भागवतमहापुराणस्य संस्कृतं सारगर्भितम्महत्त्वपूर्णञ्च वर्त्तत इति ।

अष्टादशसहस्रश्लोकात्मकमेतदस्ति महापुराणं बहूनि पुराणानि च इतोऽपि स्वल्पतमश्लोकात्मकानि सन्ति । तद् यथा— (१) चतुर्दशसहस्रश्लोकात्मकं मत्स्यपुराणम्, (२) नवसहस्रश्लोकात्मकम्मार्कण्डेयपुराणम्, (३) सार्धचतुर्दशसहस्रश्लोकात्मकम्भविष्यपुराणम्, (४) दशसहस्र श्लोकात्मकं ब्रह्मपुराणम्, (५) शतोत्तरद्वादशसहस्रश्लोकात्मकं-वामनपुराणम्, (६) षट्शतोत्तरद्शसहस्रश्लोकात्मकं वायुपुराणम्, (७) त्रयोविंशतिसहस्रश्लोकात्मकं विष्णुपुराणम्, (८) षोडशसहस्रश्लोकात्मकमग्निपुराणम्, (९) एकादशसहस्रश्लोकात्मकं लिङ्गपुराणम्, सप्तदशसहस्रश्लोकात्मकं कूर्मपुराणम्, एतानि महापुराणानि श्रीमद्भागवतमहापुराणादपि सर्वथा न्यूनश्लोकात्मकानीति सिध्यति यदिह नास्त्यस्य शुश्रूषायामभिरुचौ वा स्वल्पतमश्लोत्मकताकारणम् । समुपलभ्यानि च साम्प्रतन्तु वर्त्तन्ते ऽष्टादशैव पुराणानि यत्नवता । बहूनि च सन्ति सर्वसुलभान्यतः सुलभत्वमपि नास्त्स्य श्रीमद्भागवतमहापुराणस्य सार्वभौमाभिरुचेर्हेतुः । तर्हि किमस्ति श्रीमद्भागवतमहापुराणस्य महत्त्वं, महत्त्वहेतुश्च कोऽस्तीति प्रकाशयितुं पद्मपुराणाऽन्तर्गतात् श्रीमद्भागवतस्य माहात्म्यात्कानिचित् महत्त्वपूर्णानि स्थलानि समुद्ध्रियन्ते ।

श्रीपद्मपुराणस्योत्तरखण्डे प्रथमेऽध्याये नवमदशमश्लोकयोः प्रतिपादितं यत्— श्रीमद्भागवतं सर्वसिद्धान्तनिष्पन्नमस्ति इत्यस्माद्धेतोः श्रीमद्भागवतपठनशीलानां श्रीमद्-

भागवतं श्रोतृणान्तथा चेह श्रीमद्भागवतोद्दिष्टधर्माचरणशीलानां जनानां सर्वथा संसारभयं विनश्यतीति श्रीमद्भागवतं संसारभयनाशनमस्ति। भगवत्स्वरूपं तथात्र सुस्पष्टं समाकर्णकञ्च विहितं येन नृणां पारमार्थिकी श्रद्धा भगवच्चरणारविन्दयोः स्यादिति भवत्यभिवर्धनमिति भागवताय लिखितम्। तथा श्रीमद्भागवतमहापुराणे तत्र तत्र तादृश्यः स्तुतयः सन्ति याभिरभिष्टुतो भगवान् श्रीकृष्णः सम्यक्प्रकारेण तुष्टो भवतीति कृष्ण सन्तोषकारकत्वं श्रीमद्भागवते प्रतिपादितम्। तद् यथा नवमश्लोकस्योत्तरार्धः दशमश्लोकस्य पूर्वार्धश्च।

सर्वसिद्धान्तनिष्पन्नं संसारभयनाशनम् ।। ९ ।।
भक्त्योघवर्धनं यच्च कृष्णसन्तोषहेतुकम्। इति।

कलियुगे श्रीमद्भागवतस्य किम्प्रयोजनमिति प्रतिपिपादिषया पद्मपुराणस्योत्तरखण्डे प्रथमाध्यायस्यैकादशे श्लोके कालएव व्याल इति कालव्यालस्तस्य मुखमिति कालव्यालमुखं तस्य ग्रास इति कालव्यालमुखग्रास तस्य ज्ञातम्भयमिति तस्य निःशेषेण नाशे हेतुः तस्मै कालखस्वरूपिणः सर्पस्यवदनगमनभयस्य निःशेषेण नाशत्वहेतुत्वसिद्धये अर्थात् मृत्युभयात् सर्वथा मुक्त्यर्थं श्रीशुकः श्रीमद्भागवताख्यं शास्त्रं प्रोवाचेत्यर्थः।

यद्यपि सन्ति बहूनि शास्त्राणि मृत्युभयनाशकानि सावधिकामरत्वदायकानि परमिह सर्वथा मुक्तिसाधकानि तानि नैव मुक्तिसाधकन्तु केवलम्भागवतमेव यतोऽत्र कर्हिचिदपि जनिङ् गृहीत्वा मृत्युभयं श्रीमद्भागवतस्य पठन-मननश्रवणनिदिध्यासनसमुपदिष्ट-समाचरणशीलेषु भक्तेषु नैव भवतीति प्रतिपादितमस्ति तद्यथा—

कालव्याल मुखग्रास-त्रासनिर्नाशहेतवे ।
श्रीमद्भागवतं शास्त्रङ्क, कलौ कीरेण भाषितम्।

सर्वथा मुक्तिसाधकत्वम्परममस्ति वैशिष्ट्यं श्रीमद्भागवतमहापुराणस्य महत्त्वम्।

श्रीमद्भागवतमहापुराणे भक्तिज्ञानवैराग्याणामनेके प्रसङ्गाः सन्ति येषाम्पठन-मनन-निदिध्यासनैः सुनिश्चितरूपेण मनसः शुद्धिर्भवति; तथा चोक्तमेव यत् 'मन एव मनुष्याणाङ्कारणम्बन्धमोक्षयोः'।

अर्थात् मनसि सति शुद्धे संसार-बन्धनेभ्यो जन्ममरणादिभ्यः सर्वथा मोक्षः स्यात्। सैव चास्ति सर्वेषामपि परमलक्ष्यभूताऽऽत्यान्तिकी दुःखनिवृत्तिः। अतएव श्रीमद्भागवतमहापुराणमाहात्म्ये पद्मपुराणोत्तरखण्डस्य प्रथमाध्याये द्वादशः श्लोकः —

एतस्मादपरं किञ्चित्, मनःशुद्ध्यै न विद्यते ।
जन्मान्तरे भवेत्पुण्यं, तदा भागवतं लभेत् ।।

श्रीमद्भागवतादुत्कृष्टङ्किमपि शास्त्रान्तरं नास्ति यस्य पठनमननादिभिः सर्वथा मनःशुद्धिः संभवेत् । अतः श्रीमद्भागवतं समाश्रित्येह नराः स्वमनसांशुद्धिपूर्वकं सद्भक्ताः सम्पद्यन्त एवेति श्रीमद्भागवतमहापुराणस्यास्य वरीवर्ति महन्महत्त्वमित्यस्ति निश्चप्रचम् ।

तर्हि किं समेऽपि मानवाः श्रीमद्भागवतं समाश्रयितुमर्हन्ति नवेति विचारणायामायाति; न सर्वेऽपि । चेदिह सर्वेऽपि श्रीमद्भागवतमाश्रित्य मुक्ताः स्युस्तर्हि सृष्टिप्रक्रियेयङ्केन प्रकारेण प्रचलेत् । इत्येतस्माद्धेतोः प्रतिपादितं यदिह जन्मान्तरार्जितपुण्यप्रकर्षेणैव श्रीमद्भागवतं लभ्यते । चेदुच्यते, न हि बन्धो ! नास्तीह श्रीमद्भागवतग्रन्थस्य प्राप्तिरसुलभा । भागवतपुस्तकानि तु स्वल्पतममूल्येनैव पण्येषु पुस्तकविक्रेतृभ्यः सानन्दङ्क्रेतुं शक्यन्ते । तत्र जन्मान्तरपुण्यप्रकर्षस्य काऽस्त्यावश्यकतेति चेन्न, यतोऽत्र लभेदित्यस्य पदस्य केवलं स्थूलकर्गलोपरिलिखिताक्षरसमुदायस्य शरीरेण प्राप्तिरेव लक्ष्यं नास्ति चेदित्थं स्यात्तदा तु न कोऽपि पुस्तकविक्रेता कथञ्चिदपि दुर्गतिभाग्भवेत् । परन्तु नैषः सिद्धान्तः सिद्धान्तस्तु एषोऽस्ति यत् सत्कर्मा ज्ञानवान् सद्गतिं लभते दुष्कर्मा अविद्यान्धकारावृत-ज्ञानचक्षुः दुर्गतिमेव लभते । अर्थादिह श्रीमद्भागवतादिपुस्तकयुक्तोऽपि चेत् सत्कर्माचरणङ्करोति तर्हि सद्गतिमाप्नोति दुष्कर्माचरणञ्चेत् करोति, तदा सोऽपि दुर्गतिमेवाऽऽप्नोतीति निश्चप्रचम् ।

तर्हि लभेदित्यस्य को ऽस्त्याशय इति चेच्छ्रूयताम्—लभ् प्रापणे इत्यस्य धातोः विधिलिङ् लकारस्य प्रथमपुरुषैकवचने लभेदिति रूपं वर्त्तते भगवत्सम्बन्धि यत् किञ्चिज्ज्ञानजातं श्रीमद्भागवतमहापुराणे प्रोक्तं तत्सर्वं सर्वथा विजानीयादथ च श्रीमद्भागवतोदीरितं सर्वमपि तात्त्विकं वृत्तं याथातथ्येन तत्त्वतो विजानीयात्तदा वक्तुं शक्यते यत्तेन श्रीमद्भागवतं लब्धमिति । विद्यते ज्ञायते सर्वमपि वस्तु याथातथ्येन सा भवति विद्या, "विद्ययाऽमृतमश्नुते" विद्या ददाति विनयम्" "सा विद्या या विमुक्तये" इत्यादिकेषु वाक्येषु तत्त्वज्ञानमेव विद्यापदबोध्यमस्ति तद्वतामपि च श्रीमद्भागवते परीक्षा भवतीति श्रीमद्भागवतम्परमज्ञानपुञ्जमेवास्ति । तदुक्तं, "विद्यावतां भागवते परीक्षा"—अर्थात् ज्ञानिनां ज्ञानस्याऽपि श्रीमद्भागवते परित ईक्षणम्भवति, ज्ञानिनश्चेत्सन्ति तत्त्वज्ञानिनस्तर्हि नूनमेव ते श्रीमद्भागवतं याथातथ्येन लब्धुं तत्त्वतो ज्ञातुमर्हन्तीति । श्रीमद्भागवतप्राप्तौ वर्तत एव परमावश्यकता जन्मान्तरार्जितस्य पुण्यप्रकर्षस्य । तत्त्वज्ञानसमुच्चयात्मकतैवास्ति श्रीमद्भागवतस्य परममहत्त्वाधायिकतेति सुनिश्चितम् ।

सुधाऽपेक्षया श्रीमद्भागवतस्य कृपासुधायाः वर्त्तते परमम्महत्त्वमिति श्रीपद्म-

पुराणस्योत्तरखण्डे प्रथमेऽध्याये श्रीमद्भागवतमाहात्म्यस्य त्रयोदशश्लोकतः षोडश श्लोकं यावल्लिखितमस्ति । यत्—

परीक्षिते कथां वक्तुं सभायां संस्थिते शुके ।
सुधाकुम्भं गृहीत्वैव देवास्तत्र समागमन् ।।
शुकं गत्वाऽवदन्सर्वे स्वकार्यकुशलाः सुराः ।
कथासुधां प्रयच्छस्व गृहीत्वैव सुधामिमाम् ।।
एवं विनिमये जाते, सुधा राज्ञा प्रपीयताम् ।
प्रपास्यामो वयं सर्वे श्रीमद्भागवतामृतम् ।।
क्व कथा क्व सुधा लोके, क्व काचः क्व मणिर्महान् ।
ब्रह्मरातो विचार्येति, तदा देवान् जहास ह ।।

देवाः सुधाकुम्भङ्गृहीत्वा सभायां सुधाकुम्भेन श्रीमद्भागवतकथासुधायाः सुविनिमयमीहमानाः शुकं प्रति प्रोचुर्यदियं सुधा राज्ञा गृहीतव्या येनासौ तक्षकदष्टोऽपि न मृत्युमेष्यति तथा चाऽमरो भविष्यति एवं वयं च तद्विनिमयेन तस्य स्थाने समुपविश्य कथासुधां लप्स्याम इति । देवानामीदृशं वचनं समाकर्ण्य तेषामाहङ्कारिकीं स्थितिमवगत्य केवलममरत्वाऽऽधायकममृतं दत्वा सर्वथा मुक्तिप्रदायकं श्रीमद्भागवतकथाऽमृतं जिघृक्षन्तीति वर्त्तते हास्यास्पदमिति विचार्य श्रीशुकस्तान् देवान् जहास ।

क्षीणे पुण्ये मर्त्यलोकं विशन्ति अर्थात् सञ्चितपुण्यफलत्वेन स्वर्ग-मधिगत्य सुधां पिबन्तोऽपि सञ्चित-पुण्यप्रचय-फल-पूर्तौ-मृत्युलोकं समायान्ति । किन्तु चेत्केनाऽपि पुंसा श्रीमद्भागवतकथामृतम्पीयते तर्ह्यनन्तङ्कालं यावत्तेनमुक्तिसुखमनुभूयते । अतएवात्र स्वर्गसुधायाः काचसादृश्यं वर्त्तते श्रीमद्भागवतकथासुधायाः श्रीमहामणिसादृश्यमिति प्रतिपादितम्—

सन्ति मुक्तिसाधनानि बहूनि किन्तु श्रीमद्भागवतकथानिभमेकमपि साधनन्नास्तीति तत्रैव वर्णितमस्ति यत्—

श्रीमद्भागवती वार्ता, देवानामपि दुर्लभा ।
सत्यलोके तुलां बद्ध्वाऽतोलयत्साधनान्यज. ।।
लघून्यन्यानि जातानि, गौरवेण इदं महत् ।
तदा ऋषिगणाः सर्वे विस्मयं परमं ययुः ।।
मेनिरे भगवद्रूपं, शास्त्रं भागवतङ्कलौ ।
पटनाच्छ्रवणात्सद्यो वैकुण्ठफलदायकम् ।।
सप्ताहेन श्रुतं चैतत् सर्वथा मुक्तिदायकम् ।।

श्रीमद्भागवतकथा देवानामपि दुर्लभा वर्तते। मुक्तिविधायकसाधनानि सर्वाण्यपि चेतराणि साधनानि भगवता ब्रह्मणा तुलनात्मकदृशा विचारितानि तत्र सर्वाण्यपि साधनान्तराणि लघूनि जातानि, श्रीमद्भागवतमहापुराणमेव गुरुत्वयुक्तमभवत् कथनास्यास्य तात्पर्यमिदमस्ति यत्-मुक्तिसिद्ध्यै यादृशं समुत्कृष्टं साधनं श्रीमद्भागवतं वर्तते तादृशङ्किंच्यन्यत्साधनं सुकरं महत्त्वपूर्णञ्च नास्तीति समवलोक्य ऋषिगणै-र्विचारितं यदिदं श्रीमद्भागवतन्तु साक्षाद्भगवत्स्वरूपं वर्त्तते यथा श्रीमद्-भागवतस्याऽऽन्तिरिकैः प्रमाणैश्चापि प्रतिपादितमस्ति। यत्—सत्यधामप्रस्थानावसरे भगवता स्वयं समुदीरितं यदहं—कलावपि श्रीमद्भागवतस्वरूपेण भुवि स्थास्यामीति।

भगवत्स्वरूपसान्निध्यतः सर्वथा मुक्तिर्भवत्येवेति प्रोक्तं पठनात् स्वयंपाठ-करणेन श्रवणद्वारा वा श्रीमद्भागवतं सद्यः मुक्तिप्रदायकं वर्त्तते। इत्येतस्मादेव कारणात् साधनमिदं साधनान्तराऽपेक्षया महत्त्वपूर्णमस्ति; यदिदं सद्यः वैकुण्ठफल-दायकं वर्त्तते, अन्यानि साधनानि तु केवलम्मुक्तिप्रदान्येव सन्त्यर्थात् तेषाम् सेवनेन तत्कालमेव मुक्तिर्भवितुन्नार्हत्यपितु कालान्तरेण प्रकारान्तरेण वा। तत्रापि भवतीति निश्चितं श्रीमद्भागवतमहापुराणस्य मुक्तिप्रापकतायां चेत्सप्ताहश्रवणं नियमपूर्वकं ङ् क्रियेत तर्हि कियन्त्यपि पापानि स्युः काचिदपि भवेत्परिस्थितिस्तथापि भवति सर्वथा मुक्तिरिति लिखित ''सर्वथा मुक्तिदायकं'' अर्थात् श्रीमद्भागवमहापुराणं सप्ताहेन विधिपूर्वकं श्रुत्वा कीदृशोऽपि प्राणी सर्वथा मुक्तिभाग्भवितुमर्हति इदमस्ति परमं वैशिष्ट्यम्। परन्तु लेखस्यास्य नैतदस्ति मन्तव्यं यदिह नानाप्रकारकाणि दुष्कर्माणि कृत्वा, कुर्वन् वा जनः सप्ताहश्रवणङ्कृत्वा मुक्तो भवेदर्थात् पापी जानाति यदहं कर्म करोमि तत्कर्म नूनमेव दुष्कर्म वर्त्तते, तथापि करोत्येव यतोऽत्र भागवतं श्रुत्वा नूनमेवाह म्मुक्तो भविष्यामि, तर्हि किमिति दुष्कर्मभिश्चापि सांसारिक्यः स्वकामनाः कथन्न पूरयेय मिति। ''अशास्त्रविहितङ्कर्मं कुर्वन्नाप्नोति किल्बिषमिति स्मृत्या सर्वथा शास्त्र-विहितान्येव कर्माणि कर्त्तव्यानि तदनु पूर्वार्जितानि पापान्यपोहितुं श्रीमद्भागवत-सप्ताहश्रवणं विधेयमिति मुक्ता भविष्यन्त्येव। केवलं ये केचन दैववशात् दुष्कर्मसु प्रवृत्ता तथा पूर्वजननसंस्कारवशाच्च पुनः सौभाग्यसूर्योदयवशात्सप्ताहश्रवण-सौभाग्यम्प्राप्तास्ते त्वश्यमेव मुक्तिभाजो भवन्तीति निश्चप्रचम्। यथा धुन्धुमारी-नामक आसीद्दुराचारी प्रेतत्वञ्चाधिगतः तदनन्तरञ्च गोकर्णकृपया सूर्योपदेशतः सप्ताहश्रवणेन मुक्तिं समधिगत इति। किन्तु तत्रापि नियमपूर्वकं श्रवणं वर्त्तते परमावश्यकम्। केवलं वाचको वाचनं करोति श्रोतारश्च सालसाः कुड्यः समाश्रित्य तन्द्रावन्तः हस्तपादप्रसारण- सङ्कोचनादीनि कुर्वन्तः केनापि प्रकारेण श्रीमद्भागवतं श्रुत्वा समीहन्ते वयमिह सप्ताहश्रवणङ्कृत्वाऽपि न मुक्ताः स्यामः सद्यो मुक्तिप्रदत्वेऽपि श्रीमद्भागवतश्रवणात् कथन्नास्माकं सद्यः मुक्तिः समभूत्? किं भागवते सद्यः मुक्ति-प्रदायकत्वं तथा सर्वथा मुक्तिदायकत्वन्तुव्यर्थमेव प्रतिपादितम्। नो चेत् कथन्नास्माकं

मुक्तिः कथञ्चन वयं तत्कालमेव मुक्तारिति प्रश्नपरम्परां समुपस्थापयेयुः । यतः नियमपूर्वकतायाः ह्यकाग्रतायाः रात्रिन्दिवं श्रवण-मनन-निदिध्यासनातिरिक्तकर्म-विरतेश्च वर्त्तते तत्र परमावश्यकता । कथनस्यास्य भावोऽयमस्ति यदिह श्रीमद्भागवतश्रवणस्य सम्पूर्णफलभाक् स एव पुमान् तदेव नपुंसकत्वभाक् सैव वा स्त्री भवितुमर्हति येन ययावा श्रीमद्भागवतस्य सम्पूर्णस्य सावधानतया श्रवणङ्कृतम् स्यात् । अर्थात् यदस्ति श्रीमद् भागवते ज्ञानं तज्ज्ञानं सम्यक् प्रकारेण समधिगत्य सर्वथा मुक्तो भवत्येव तादृशस्यैव सद्यो मुक्तिर्भवति । "ऋते ज्ञानान्न मुक्तिः" भावोऽयमस्ति यदिह श्रीमद्भागवतश्रवणेन ज्ञाने जाते सति नूनमेव मुक्तिर्भवत्येवेति निश्चप्रचमस्ति । श्रीमद्भागवतमहापुराणश्रवणेन च पूर्णञ्ज्ञानं जायेत एव, ज्ञाने जाते सति कर्माशयवासना विलुप्येत्, विलुप्तायाञ्च कर्माशयवासनायाः सुनिश्चितरूपेण मुक्तिश्चापि भवत्येवेति शोभनमेव लिखितं यदिदं साधनं सद्यः सर्वथा च मुक्तिप्रदायक- मस्तीति शम् ।

'सर्वथा' शब्दप्रयोगस्यैषोऽप्यस्त्यत्राशयो यदत्र मानवः 'अनेकजन्मसंसिद्धस्ततो याति पराङ्गतिम्' अर्थात् भगवच्चरणारविन्दसरणिं समाश्रितः शक्त्यनुसारेण शनैः शनैः कर्माशयान् क्षयीकुर्वन् सम्यक् ज्ञानञ्चाधिगच्छन्नन्ततोगत्वा ऽवश्यमेव मुक्तिभाग्भवति । लेखनस्यास्य तात्पर्य्यमिदमस्ति यदिह ये ह्युपर्युक्ताः सन्ति सालसाः तन्द्रालवोऽपि श्रीमद्भागवतमहापुराणश्रोतारस्तेषामपि तन्मार्गसमाश्रयवशाच्छनैः शनैः जन्मान्तरेष्वपि मुक्तिर्भवत्यवश्यमेवेति श्रीमद्भागवतमहापुराणस्य सर्वथा मुक्तिविधायकत्वं प्रतिपादितम् । तच्च सर्वथा युक्तियुक्तमेव ।

'न हि कल्याणकृत्कश्चिद्दुर्गतिन्तात गच्छति ।'

वचनमेनत्समाश्रित्य कल्याणकृत्कीदृशोऽपि स्यात् सोऽवश्यमेव प्राप्ते समये मुक्तिभाग्भवतीति सर्वथा सङ्गच्छते सर्वथा पदयोजनाऽपि युक्तियुक्तैवेति ।

पद्मपुराणस्योत्तरखण्डे द्वितीयेऽध्याये श्रीनारदकुमारसंवादे श्रीमद्भागवतस्य महन्महत्त्वं कथमिति प्रश्नस्य सोदाहरणन्निरूपणं वर्त्तते । सर्वेभ्योऽपि यज्ञेभ्यो ज्ञानयज्ञस्य परममस्ति महत्त्वमिति लिखितम्—यत्—

'द्रव्ययज्ञास्तपो यज्ञाः, योगयज्ञास्तथापरे ।
स्वाध्यायज्ञानयज्ञाश्च, ते तु कर्मविसूचकाः ।।
सत्कर्मसूचको नूनं, ज्ञानयज्ञःस्मृतो बुधैः ।

द्रव्यैः सम्पादयितुं शक्यन्ते ये यज्ञास्ते द्रव्ययज्ञाः प्रोच्यन्ते द्रव्याभावे नास्ति प्रवृत्तिः, न च भवितुमप्यर्हति यतोऽत्र सति द्रव्ये चापि बहुदानादिकनृं स्वाहङ्कारः

समुदेति, सोऽपि चेद्भवेत्संयमितस्तथापि तेषान्द्रव्यसाधितानां यज्ञानां सत्फलानि त्ववश्यमेव भावतव्यानि भवन्तीति न सम्भवेन्मुक्तिः। यतोऽत्र "अवश्यमेव भोक्तव्यं कृतङ्कर्म शुभाऽशुभम्", इत्यादिभिर्वचनैःसंसाधितमस्ति यत् कर्मणां समेषामपि फलं भोक्तव्यमेव भवतीति सत्फलभोगायापि स्वर्गादिलोकावाप्तिर्भवे सा भवेद् योनिप्राप्ति र्वा स्यात् किन्तु तत्कृते मोक्षप्राप्तिस्तुसुदुर्लभैवास्तीति सुनिश्चितरूपेणैतद्वक्तुम् शक्यते, यदिह द्रव्ययज्ञाः कथमपि ज्ञानयज्ञसमतमधिग न्तुभप्रभवन्ति।

चेदुच्येत ज्ञानसिद्धावपि द्रव्यस्य सत्कर्मणि प्रयोगो विधेय इति विचार्य सर्वथा निरहङ्कारः सन् निसंङ्कल्पकं वा कैवल्यमात्रप्राप्तीहया ज्ञानपूर्वक-ञ्चेत्क्रियन्ते द्रव्ययज्ञास्तर्हि स ज्ञानी किमिति न भवेन्मुक्त इति वाच्यम्। यतस्त-स्य मुक्तिफलकं ज्ञानमेवास्ति न द्रव्ययज्ञात्मकङ् कर्मेति सुनिश्चितम् इत्थमित तस्यापि मुक्तिः ज्ञानित्वादेव भवति न द्रव्ययज्ञेनेति सुनिश्चितम।

एवमेव पंचाग्नितपःकृच्छ्रचान्द्रायणादिव्रतजातं मौनित्वादिकञ्च स्थितिजात मित्यादिकाः वानप्रस्थावस्थासु क्रियमाणाः केवलं शरीरसाध्याः तपोयज्ञाः प्रोक्ताः तेऽपि सर्वे स्थूलशरीरसाध्याः सयत्नञ्चेह सर्वेहापूर्त्तये क्रियमाणास्तत्तत्फलमापादयन्त्ये फलाधायकत्वाद् भोगप्राप्तिः भोगप्राप्तये लोकप्राप्तिश्च भवत्येवेति ते ऽपि नैव सन्ति केवलम्मुक्तिप्रदाः सर्वथामुक्तिप्रदावा ऽपि तपोयज्ञाः ज्ञानयुक्ताः निष्कामभावसाध्याः सन्ति। केवलं कर्त्तव्यबुद्ध्यैव निःस्पृहतया घटेऽवतारितेऽपि संस्कारवशात्कुम्भकारस्य चक्रभ्रमिमिव प्राप्तेऽपि ज्ञाने केवलं तपश्चर्याः संस्कारवशादेव विधीयन्ते। तर्हि सोऽयन्तपस्वी सुनिश्चितरूपेण जीवन्मुक्तो ज्ञेयः। त्यक्ते शरीरेऽपि निश्चितरूपेण परमां मोक्षाख्यां सद्गतिं समधिगच्छत्येवेति निश्चितम्। तस्य मुक्त्याधायकं वर्तते ज्ञानमेव न तपोयज्ञाः सस्पृहत्वे सति कर्मभोगफलाद्यवाप्त्यापत्तेः।

योगसूत्रोऽस्ति "योगश्चित्तवृत्तिनिरोधः" चित्तवृत्तिसंसाध्यत्वाद् योगसाधने संयमस्यफलेष्वासक्ते ह्याशङ्कायुक्तत्वात् तथा योगप्रक्रियायां सति व्यत्यासे शारीरिकमानसिकादिरोगोत्पत्तिभययुक्तत्वाद् योगप्रक्रियायाः कर्मसाध्यत्वाच्च कर्मसूचकत्वमस्ति योगी परम्परया मुक्तिभाग्भवति। अर्थात् योगप्रक्रियायाः (धारणा, ध्यान-समाधि-साधनेन) सप्रम्ज्ञातसमाधिः संप्रज्ञातसमाधेरसम्प्रज्ञात-समाधिः सिद्धायांञ्चासम्प्रज्ञातसमाधौ विवेकख्यातिः, विवेकख्यातेश्च परम-तत्त्वज्ञानं परमतत्व-ज्ञानेन मुक्तिचेह सम्पद्यतेतरामि-त्येषावर्त्तते परम्परा।

योगी स्वयं साक्षाद्योगेन मुक्तो नैव भवति, किन्तु योगद्वारा ज्ञानं समधिगत्य

मुक्तो भवतीति ज्ञानमेव योगयज्ञाद् वर्त्तते विशिष्टमिति ज्ञेयम्। ज्ञान एवास्ति मुक्तिकारणता साक्षात्, परम्परयैवेतरेषाम्।

स्वाध्यायज्ञानयज्ञाश्चापि केवलङ्कर्मविसूचकाः सन्ति। यतः स्वाध्याये संयमस्य विषयान्तरेभ्यश्चित्तवृत्तिरोधस्यैकाग्र्यस्य पठनस्य मननस्य निदिध्यासनस्याचास्ति परमावश्यकता। स्वाध्यायसमुपलभ्यं ज्ञानं पठन-मनन-निदिध्यासनैर्विना नार्हति दृढीभवितुम्। तत्राऽस्ति सोपक्रमता आयासबाहुल्यञ्च। सावधानातायाश्चापि वर्त्तते परमावश्यकता अर्थात् स्वाध्यायमपि सावधानतया समनुष्ठीयते तर्हि तदुद्भवं ज्ञानमपि याथातथ्यावबोधकं ज्ञानं परमलक्ष्यभूतं ज्ञानं भवितुन्नार्हति। सम्भाव्यते यत्-कृते श्रमे कर्हिचित् तत्तच्छब्दार्थविषयकं ज्ञानं समुद्भवेत्, किन्तु तत्त्व ज्ञानं तद्भिन्नमेव भवतीति "ऋते ज्ञानान्न मुक्तिः" 'इत्यत्र ज्ञानं शब्दस्य प्रयोगः केवलं व्याकरणकोशाद्युद्दिष्टशब्दार्थमात्रगोचरत्वन्नास्त्यपि तु तत्त्वज्ञानमेवास्ति। अर्थात् किं सत् किमसदित्यवबोधकम्पाण्डित्यपूर्णमात्मज्ञानमेवाऽस्ति परमञ्ज्ञानं तस्मादेव च भवति मुक्तिरिति तदेवात्र निर्दिष्टमस्तीति ज्ञेयम्। चेदुच्येत, यत् स्वाध्यायेनाऽपि तदेव ज्ञानं लप्स्यत इति तथापि केवलज्ञानस्यैवाऽस्ति ततोऽपि गरीयस्त्वम्। यतः स्वाध्यायसमुद्भवज्ज्ञानम्परम्परया भवति मोक्षाधायकङ्केवलञ्ज्ञानञ्च भवति साक्षान्मोक्षाधायकमिति स्वाध्यायज्ञानयज्ञेभ्योऽपि केवलञ्ज्ञानयज्ञं वर्त्तते महन्महत्त्वशाली तज्जञ्च ज्ञानमेव परञ्ज्ञानम्। अतएवात्र मुक्त्याधायकाखिलयज्ञापेक्षया ज्ञानयज्ञस्यैवास्ति सत्कर्मता। इत्येतस्मादेव हेतोः श्रीमद्भागवतमाहात्म्ये लिखितमस्ति यत्--"सत्कर्मसूचको नूनं ज्ञानयज्ञः स्मृतो बुधः" बुधा ज्ञानिनि ज्ञानयज्ञमेव सत्कर्मसूचकत्वेनोररीकुर्वन्ति। अर्थात् सज्ज्ञानापेक्षायां चेत्कोऽपि तत्त्वज्ञानाय यतते, तज्ज्ञानप्राप्त्याधायिनी प्रक्रियैव च तैस्तत्र ज्ञानयज्ञत्वेनोररीक्रियते। वस्तुतोऽन्यानि कर्माणि तत्त्वज्ञानाधायककर्मापेक्षया केवलङ्कर्माण्येव भवन्ति, तत्त्वज्ञानाधायकङ्कर्मैव भवति सत्कर्म।

किन्तर्हि द्रव्ययज्ञास्तपोयज्ञाः, योगयज्ञाः स्वाध्यायज्ञानयज्ञाश्च सन्ति असत् कर्माणि? किन्तानि नैव सन्ति सत्कर्माणि? किं चेह तानि सन्ति दुष्कर्माणि? नैवेत्थं वक्तव्यम्। यतोऽत्र वस्तुतस्तु तान्यपि सर्वाणि वर्त्तन्ते सत्कर्माणि किन्तु तत्त्वज्ञानयज्ञापेक्षया वर्त्तन्ते केवलङ्कर्माण्येव आपेक्षिकसत्त्वस्य प्रतिपादनेहयैवाऽत्र ज्ञानयज्ञस्य सत्कर्मता सूचकत्वं द्योतितम्। वस्तुतस्तु सर्वाण्युपर्युक्तानि कर्माणि सत्कर्माणि सन्ति; किन्तु सत्कर्मसु सर्वश्रेष्ठताद्योतनायेवैत्थमत्र वर्णितमिति बोध्यम्।

श्रीमद्भागवतमहापुराणं भक्ति-ज्ञान-विरागाणां समुद्दीपकं वर्त्तते, तदर्थमेव च प्रकाशितमस्ति। भक्तिज्ञानविरागैश्चावश्यमेव भवेन्मुक्तिरिति परमोत्कृष्टमस्ति पुराणमेतत्।

पद्मपुराणस्योत्तरखण्डे द्वितीय एवाध्याये लिखितमस्ति यत्—

'भक्तिज्ञान विरागाणान्तद्घोषेण बलम्महत् ।
व्रजिष्यति द्वयोः कष्टं, सुखं भक्तेर्भविष्यति ।।
प्रलयं हि गमिष्यन्ति श्रीमद्भागवतध्वनेः ।
कलेर्दोषा इमे सर्वे सिंहशब्दाद् वृका इव ।।

कलिदोषैः समाक्रान्ताः भक्तिज्ञानविरागाः शक्तिहीनाः समजायन्त । तत्र ज्ञान-वैराग्ये तु वृद्धताङ्गतौ भक्तिश्च तरुणीव सञ्जाता । वस्तुतश्च भक्तिसमुद्भवेन ज्ञानवैराग्ये जायेते, भक्तिर्ज्ञानवैराग्ययोर्माता वर्त्तते तथ्यमिदमिति प्रतिपादितम् । अर्थाच्छ्रीमद्भागवतश्रवणेन भक्तेरभिवृद्धिस्तु भवत्येव परमिह कलावपि स्वल्पतमेनै-वाऽऽयासेन ज्ञानवैराग्येऽपि समधिवृद्धे भवत इति । श्रीमद्भागवतमहापुराणस्य पठन-मननिदिध्यासनैः श्रवण-मनननिदिध्यासनैर्वा सुनिश्चितरूपेण भक्तिज्ञानवैराग्याः समभिजायन्ते, कलिकाल-प्रभावजाः सर्वेदोषाश्च सर्वथा प्रलयं यान्ति । यथा वृकाश्चापि सगौरवं किमपि किमपि समाचरन्ति; तथा स्त्रीयं महत्त्वं स्वीयम्प्रभावञ्च जनयन्ति, परं सिंहगर्जनं श्रुत्वा तत्कालमेव तमनवलोक्यैव भयाक्रान्ताः सन्तः पलायन्ते तथैव श्रीमद्भागवतकथाशब्दश्रवणमात्रेणैव कलिदोषाः प्रकृष्टतया लयं यान्ति अर्थाद् भागवतश्रवणेन कलिदोषाः सर्वथा व्यपगच्छन्तीति श्रीमद्भागवतमहापुराणमेव कलौ कलिदोषापनुत्तये भक्ति-ज्ञानवैराग्याऽवाप्तये च परमोत्कृष्टमस्ति साधनमिति प्रतिपादितम् ।

वेदाः सन्ति, सन्ति चोपनिषदस्तर्हि किमिति श्रीमद्भागवतमहापुराणं प्रशस्यते इति चेत्, सोहादरणं भागवतस्य महत्त्वं प्रतिपाद्यते । यद्यपि श्रीमद्भागवतमपि वेदाना-मुपनिषदाञ्च सारात्समुत्पन्नं महापुराणमस्ति, किन्तु तथापि वेदेभ्य उपनिषद्भ्यश्चा-प्युत्कृष्टताङ्गतमस्ति । कथमिति चेदुपपाद्यते, तद् यथा —

'वेदोपनिषदां साराज्जाता भागवती कथा ।
अत्युत्तमा ततो भाति, पृथग्भूता फलाकृतिः ।।
आमूलाग्रं रसस्तिष्ठन्नास्ते, न स्वाद्यते यथा ।
संभूय स पृथग्भूतः, फले विश्वमनोहरः ।।
यथा दुग्धे स्थितं सर्पिः, न स्वादायोपपद्यते ।
पृथग्भूतं हि तद्गव्यं, देवानां रसवर्धनम् ।।
इक्षूणामपि मध्यान्तं, शर्करा व्याप्य तिष्ठति ।
पृथग्भूता च सा मिष्टा, तथा भागवती कथा ।।

श्रीमद्भागवतमहापुराणं वेदानामुपनिषदाञ्च सारभूतमस्ति । इत्येतस्मादेव कारणात् तस्य महत्त्वन्तज्जन्यपरमानन्दसन्दोहञ्चवेदोपनिषद्भ्योऽप्यधिकतममस्तीति सोदाहरणं प्रतिपादितम्—यत्—सर्वेष्वपि वनस्पतिवर्गेषु मूलतोऽग्रपर्यन्तं रसास्तिष्ठन्ति तैः संभूयफलरूपेण परिणतैः तादृशन्तादृशं फलं स्वादायोपकल्पते । आम्रफलजन्या रसानुभूतिस्तस्य मूलेन मध्येन शाखाभिस्तत् पत्रैः कुसुमैश्चाधिगन्तुन्नैव शक्यते तथैव वेदोपनिषत्स्वरूपेषु वृक्षशाखोपशाखादिषु फलत्वेन परिणतस्य श्रीमद्भागवतमहापुराणस्य कथया समुपलभ्यः परमानन्दसन्दोहो न केनापि कथञ्चिदपि वेदोपनिषद्भ्यः प्राप्तुं शक्यते ।

इत्थमेव यथा दुग्धस्थे घृते कानिचिदपि वस्तूनि पचितुन्नैव शक्यन्ते तथा च घृतजन्यास्वादोऽपि दुग्धस्थे घृते प्राप्तुन्नैव शक्यते । किन्तु दुग्धाद्दधि दध्नश्च मन्थनेन नवनीतन्नवनीते च प्रतप्ते सति घृतं समुपलभ्यते । तज्जन्यो ह्यानन्दसन्दोहो दुग्धादेव कथञ्चिदपि केनापि कर्हिचिदपि प्राप्तुन्नैव शक्यते । तथैव वेदोपनिषद्भ्योऽपि सोऽयं-परमानन्दसन्दोहः समुपलब्धुन्नैव शक्यते योऽत्र तेषां फलत्वेन परिणतात्-साररूपेण समुद्भूताद् भागवतमहापुराणात् समुपलब्धुं शक्यते । तद्घृतन्न केवलन्नृणामेवोपकारकङ्किन्तु ह्यमृतभुजां देवानामपि रसवर्द्धनमानन्दाभिवृद्धिकारकम्भवति, अर्थात् घृतेन यज्ञाः सम्पाद्यन्ते यज्ञैश्च देवास्तृप्ताः भवन्तीति तेषामपि रसवर्धकता घृते वर्तते । कथनस्यास्य तात्पर्यमिदमस्ति यदिह वेदोपनिषद्भ्योऽपि श्रीमद्भागवतकथाऽमृतस्योत्तमत्वं सर्वथा संसिध्यतीति निश्चप्रचमिति ।

तृतीयमुदाहरणम्प्रस्तूयते यत्—समेषामपीक्षूणां मध्ये शर्करा तिष्ठति किन्तु तेष्वेवेक्षुषु शर्कराजन्यं मिष्टत्वं समुपलब्धुन्नैव शक्यते तानीक्षुदण्डानि निष्पीड्य तेषां रसम्प्रतप्य प्रतप्य तत्रस्थञ्जलञ्च संशोष्य शर्करात्वेन परिणतङ्कुर्वन्ति तदा क्रमशः शर्करास्वरूपको भवतीक्षुरसः। इत्थमेव वेदोपनिषद्भ्यः गृहीते सारे तस्मिन् श्रीमद्भागवताऽऽकृतौ ग्रन्थरत्नत्वेन परिणते च इक्षुरसापेक्षया यथा शर्करायाः मिष्टत्वं-सन्दोहमधिकतमं समधिगम्यते सारभूताद्भागवतादपीति बोध्यम् ।

सम्पूर्णस्य कथनस्यास्य वर्त्ततेऽयमाशयो यदिदं श्रीमद्भागवतमहापुराणं वेदोपनिषदां सारांशम्प्रद्योतयतीति वेदोपनिषदान्तत्त्वज्ञानं श्रीमद्भागवतात् सम्यक्-प्रकारेण सौकर्य्येण चाधिगन्तुं शक्यते तथा ये तत्राप्यस्पष्टस्वरूपेणावस्थितास्तत्त्वार्थाः श्रीमद्भागवते विराजन्ते, यथा कारणावस्थात्वेन विद्यमाने बीजे समग्रो वृक्षो फलान्यपिच भवन्त्येव किन्तु फलास्वादजन्यो ह्यानन्दस्तत्र समुपलब्धुन्नैव शक्यते; किन्तु बीजस्थस्य-वृक्षस्य वृक्षस्वरूपेण परिणते सति छायादिकं फलस्वरूपत्वेन निष्पन्न एव च फलास्वादादिकं समुपलभ्यते; तथैवेह श्रीमद्भागवतमहापुराणस्य वेदोपनिषत्सु कारणावस्थायां

स्थितावपि कार्यावस्थापन्नत्वेन लभ्यं सुखमुपलब्धुन्नैव शक्यते। तदानन्दसन्दोहन्तु भागवतस्वरूपत एवाधिगन्तुं शक्यत इति।

श्रीमद्भागवतकथाश्रवणेन तत्कालमेव जनेषु भक्ति-ज्ञान-वैराग्यत्रिकं समुल्लसतीति श्रीपद्मपुराणस्योत्तरखण्डे सनकसनन्दनसनत्कुमारसनातनैः श्रीमन्तन्नारदंप्रति तृतीयेऽध्याये प्रतिपादितम्—यत्

यत्र भागवती वार्ता तत्र भक्त्यादिकं व्रजेत्।
कथाशब्दं समाकर्ण्य, तत्त्रिकं तरुणायते॥

श्रीमद्भागवतस्य पठन-श्रवण-मनन-निदिध्यासन-कर्तॄणाञ्जनानां सुनिश्चितरूपेण मुक्तिर्भवतीति लिखितम्। यत्—

यस्य श्रवणमात्रेण, मुक्तिः करतले स्थिता।

श्रीमद्भागवतश्रवणमात्रेण कथं मुक्तिर्भवतीति चेत्? प्रोच्यते ---

यस्याः श्रवणमात्रेण, हरिश्चित्तं समाश्रयेत्।

अर्थात् भागवतश्रोतॄणां चेतसि तत्कालमेव भगवत्स्वरूपं स्फुरति येषाञ्च चेतसि साक्षान्नारायणो विराजतेतरान्तेषां मुक्तिप्राप्तौ काऽस्ति शङ्का। अर्थात् श्रीमद्भागवतश्रोतॄणां चेतांसि सर्वथा निर्मलानि भवन्ति भूयो भूयश्च भगवद्ध्यान-स्तवनादीनि श्रुत्वा श्रुत्वा भगवद्भक्तिपरापरायणाः जायन्ते। भगवद्भक्तिपरायणत्वे च भगवदनुग्रहेण विवेकख्यातिः परमञ्ज्ञानन्ततो मुक्तिश्चेति क्रमशः जायन्ते। अथ भगवदनुग्रहप्रभावतः सर्वथा भवति गोलोकप्राप्तिश्चापीति निश्चप्रचम्।

श्रीमद्भागवतमहापुराणस्य श्रवणेनैव तत्र वर्णितं नैकधा प्रतिपादितञ्च तत्त्वज्ञानमपि जायते। जाते च तत्त्वज्ञाने सुनिश्चितरूपेण मुक्तिर्भवतीति लिखितम्—यत्—

तावत्संसारचक्रेऽस्मिन्, भ्रमतेऽज्ञानतः पुमान्।
यावत् कर्णगता नास्ति, शुकशास्त्रकथा क्षणम्॥

अर्थाच्छ्रीमद्भागवतमहापुराणस्य श्रवणं यावत्तदेवाज्ञानतो जनानां जन्ममरणादीनि जायन्ते किन्तु विद्यायाः परमे निधाने श्रीमद्भागवते श्रुते सर्वमप्यविद्याजनितम-

ज्ञानान्धकारजातं विनिवर्तते । ज्ञानसूर्योदयश्च जायते जाते हि ज्ञानप्रकाशे 'विद्ययाऽमृतमश्नुत' इति सर्वथा भवति मुक्तिभाक् । सर्वेभ्यः शास्त्रेभ्यः सर्वेभ्यो यागेभ्यः सर्वेभ्यस्तीर्थेभ्यश्च बृहत्तरमस्ति श्रीमद्भागवतमहापुराणस्य महत्त्वमिति द्योतयता श्रीपद्मपुराणस्योत्तरखण्डे तृतीयेऽध्याये लिखितमस्ति—यत्—

किं श्रुतैर्बहुभिः शास्त्रैः, पुराणैश्च भ्रमावहैः ।
एकम्भागवतं शास्त्रं, मुक्तिदानेन गर्जति ।।
कथा भागवतस्यापि, नित्यं भवति यद् गृहे ।
तद्गृहन्तीर्थरूपं हि, वसतां पापनाशनम् ।।
अश्वमेधसहस्राणि, वाजपेयशतानि च ।
शुकशास्त्रकथायाश्च, कलान्नार्हन्ति षोडशीम् ।।
तावत् पापानि देहेऽस्मिन् निवसन्ति तपोधनाः ।।
यावन्न श्रूयते सम्यक्, श्रीमद्भागवतन्नरैः ।।
न गंगा न गया काशी, पुष्करन्न प्रयागकम् ।
शुकशास्त्रकथायाश्च, फलेन समतान्नयेत् ।।
श्लोकार्धं श्लोकपादं वा, पठेद् भागवतञ्च, यः ।
नित्यम्पुण्यमवाप्नोति, राजसूयाश्वमेधयोः ।।

श्रीमद्भागवतस्योपर्युक्तप्रकारेणपरमोपकारकत्वे सत्यपि यो मूढ़स्तन्महत्त्वन्नैव मनुते न चात्रावदधाति, तस्य जीवनन्तु चाण्डालवत्खरवच्च व्यर्थीभूतमस्ति । तेन मनुष्यत्वमधिगत्य किमपि स्वात्मनः नोपकृतमिति महामूढोऽयं जीवन्नपि शवतामेति तस्य जीवनन्तु पशुजीवननिभमस्तीति पद्मपुराणस्योत्तरखण्डस्थे तृतीयेऽध्याये लिखितमस्ति यत्—

आजन्ममात्रमपि येन शठेन किंचित् ।
चित्तं विधाय शुकशास्त्रकथा न पीता ।।
चाण्डालवच्च खरवद्बत तेन नीतम् ।
मिथ्या-स्वजन्मजननीजनिदुःखभाजा ।।
जीवच्छवो निगदितः स तु पापकर्मा ।
येन श्रुतं शुककथावचनन्न किञ्चित् ।।
धिक् तन्नरम्पशुसमम्भुविभाररूपम् ।
एवं वदन्ति दिवि देवसमाजमुख्याः ।।

श्रीमद्भागवतमहापुराणस्य तत्त्वोपदेशसहितं सम्यक्प्रकारेण क्रियमाणा कथा परमदुर्लभा भवति तादृशं श्रीमद्भागवतस्य सम्यक् श्रवणसौभाग्यन्तु कैश्चिदेव महानुभावैः कोटिशः जन्मभिः समर्जितस्य पुण्यस्य प्रभावेणैव कदाचिदेव समधिगम्यते। एतदेवास्ति प्रतिपादितम् यत्—

दुर्लभैव कथा लोके, श्रीमद्भागवतोद्भवा।
कोटिजन्मसमुत्थेन, पुण्येनैव तु लभ्यते॥

श्रीउद्धवस्यानुरोध आसीद् यद् भो भगवन्! यदि भवान् भुवं विहाय गोलोकं गमिष्यति, तर्हि भक्तानां का गतिर्भविता। भक्तास्त्वद् भक्तिपरायणाः सन्ति तेषां न्निर्गुणोपासनायान्नास्त्यभिरुचिः। वर्तते चेह निर्गुणोपासनायाम्महत्काठिन्यमपि, गामिमाञ्चत्वदन्यस्त्राता नास्तीति भवता। विषयेऽमुष्मिन् विचारणीयमिति। तदनुरोधेन भगवता स्वकीयं धाम श्रीमद्भागवते निधाय भुवि वासः श्रीमद्भागवतस्वरूपेणैव स्वीकृतः। श्रीमद्भागवतमहापुराणं साक्षाद्भगवत्स्वरूपं वर्तते। अतएव महापुराणमिदं सेवनात् श्रवणात्, पाठात्, दर्शनादपि च पापविनाशि वर्त्तते। इत्येव प्रतिपादितम् यत्—

त्वद्वियोगेन ते भक्ताः, कथं स्थास्यन्ति भूतले।
निर्गुणोपासने कष्टं, अतःकिञ्चिद्विचारय॥
इत्युद्धववचः श्रुत्वा, प्रभासेऽचिन्तयद्धरिः।
भक्तावलम्बनार्थाय, किं विधेयम्मयेति च॥
स्वीकयं यद्भवेत्तेजस्तच्च भागवतेऽधात्।
तिरोधाय प्रविष्टोऽयं श्रीमद्भागवतार्णवम्॥
तेनेयं वाङ्मयी मूर्तिः प्रत्यक्षा वर्त्तते हरेः।
सेवनाच्छ्रवणात्पाठाद्दर्शनात्पापनाशिनी॥

उपर्युक्तश्लोक श्लोकितसुश्लोक्यमाहात्म्यशालिनः श्रीमद्भागवतग्रन्थस्य सम्यक्प्रकारेणसमाश्रयणाद् वक्तुः श्रोतुश्च भगवत्सादृश्यञ्जायते। अतः परङ्किम्भवेद्भागवतस्य माहात्म्यं यदिदं भागवतमहापुराणं स्वयमेव ब्रह्मात्मकमस्तीति तदग्रे लिखित मस्ति, यत्—

ब्रूमोऽद्य ते किमधिकं महिमानमेवं,।
ब्रह्मात्मकस्य भुवि भागवताभिधस्य॥
यत्संश्रयान्निगदिते लभते सुवक्ता।
श्रोताऽपि कृष्णसमतामलमन्यधर्मैः॥

श्रीमद्भागवतमहापुराणम्भक्ति-ज्ञान-वैराग्य-मुक्तिदायकमस्ति । तथा सर्वतीर्थं सर्वयज्ञ-सर्वशास्त्र-सर्वपुराणेभ्यश्चास्ति श्रेष्ठतरम् । श्रीमद्भागवतं साक्षाद्भगवत्स्वरूपमस्ति । अतःसद्यःमुक्तिफलप्रदमथ च सुनिश्चितरूपेण मोक्षदायकञ्चास्तीति वर्त्तते श्रीमद्भागवतमहापुराणम्पुराणेषु सुप्रतिष्ठितममिति ज्ञेयम् ।

श्रीमद्भागवतस्य कथायाःश्रवणेन सर्वाण्यपि पापानि सर्वथा विलयम्प्रयान्तीति द्योतयितुम्पद्मपुराणस्योत्तरखण्डे चतुर्थेऽध्याये लिखितमस्ति, नारदेन तत् प्रतिपादितम् । यत्—

अलौकिकोऽयम्महिमा मुनीश्वराः
सप्ताहजन्योऽद्य विलोकितो मया ।
मूढाः शठा ये पशुपक्षिणोऽत्र
सर्वेऽपि निष्पापतमा भवन्ति ।।
अतो नृलोके ननु नास्ति किञ्चित्,
चित्तस्य शोधाय कलौ पवित्रम् ।
अघौघविध्वंसकरन्तथैव
कथासमानम्भुवि नास्ति चान्यत्
सत्येन हीनाः पितृमातृदूषकाः
तृष्णाऽऽकुलाश्चाश्रमधर्मवर्जिताः ।
ये दाम्भिकाः मत्सरिणोऽपि हिंसकाः
सप्ताहयज्ञेन कलौ पुनन्ति ते
पञ्चोग्रपापाश्छलछद्मकारिणः
क्रूराः पिशाचा इव निर्दयाश्च ये,
ब्रह्मस्वपुष्टाः व्यभिचारकारिणः
सप्ताहयज्ञेन कलौ पुनन्ति ते ।
कायेन वाचा मनसाऽपि पातकं,
नित्यम्प्रकुर्वन्ति शठा हठेन ये ।
परस्वपुष्टाः मलिनाः दुराशयाः,
सप्ताहयज्ञेन कलौ पुनन्ति ते ।।

इत्थमत्र नैकधा महापातककारिणो घोरपापिनः दुर्जनाश्चापि किमिति सद्गतिम्प्रयान्तीत्याशङ्कायाम्प्रत्युत्तरमस्ति; यत्—ये ये सन्ति महापातकिनस्तेषां पापानि सर्वथा सम्यक्प्रकारेण सप्ताहपर्यन्तं सावधानतया सर्वेषामपि नियमानाम्परि-

परिपालनपूर्वकं श्रवणाद् विलयम्प्रयान्त्येव । तदनन्तरं श्रीमद्भागवतप्रतिपादितमार्गेण भगवच्चरणारविन्दानुरागपूर्वकं भगवद्भक्तिभावः सम्पद्यते । परमया सर्वथाऽनपायिन्या भक्त्या चाराधितो भगवान् नूनन्तेषां सर्वेषामप्यविद्याजनितमज्ञानान्धकारन्दूरीकृत्य तत्त्वज्ञानात्मकम्प्रकाशमाविर्भावयत्येव । आत्मा त्वयं नित्यशुद्धबुद्धमुक्तस्वभावो ज्ञानी वर्तत एव ह्यज्ञानावरणे च दूरीकृते सति नूनमेव तस्य स्वरूपं प्रकटीभवति; ज्ञाते च स्वस्वरूपे नावशिष्यते किमपि परमेश्वरस्वरूपावबोधे साजात्यत्वात् सर्वथा परमात्मस्वरूपमपि परिचिनोत्येव सर्वेषामपि ज्ञेये परमात्मनि सर्वथा ज्ञाते सति नूनमेव कर्माशयक्षयः संजायते । कर्माशयवासनायाञ्च परिक्षीणायाङ्कथञ्चिदपि जन्ममृत्यू भवितुं नैव शक्नुतः । जन्ममृत्योरभावोऽयमेव मुक्तिशब्देन प्रतिपाद्यते । अर्थात् नात्र शङ्कनीयं यदेतादृशो महापातकिनोऽपि कथम्मुक्ताः भवन्तीति । श्रीमद्भागवत-श्रवणेन तेषामपि मुक्तिपन्था भवति समुद्घाटित इति । श्रवण-मनन-निदिध्यासनेषु पूर्णविधानेन शीघ्रमेव सद्गतिर्भवितुमर्हति; किन्तु तेषान्न सम्पद्यते सद्यो मुक्तिः । अतएव सप्ताहयज्ञेन कलौ पुनन्ति ते अर्थात् केवलं पूत एव भवन्ति पवित्रतया च पूतानि कर्माणि कुर्वन्तस्तेऽपि क्रमशः मुक्ताश्चापि भवितुं शक्नुवन्तीति प्रतिपादितस्य तथ्यस्यास्याशयोऽवगम्यते ।

एवमुपर्युक्तप्रकारेण श्रीमद्भागवतकथाश्रवणेन महापातकिनोऽपि सम्यक्प्रकारेण पूताः भवितुमर्हन्तीति प्रतिपाद्य ये जनाः श्रीमद्भागवतकथाश्रवणं नैव कुर्वन्ति तेषाञ्जननं व्यर्थीभवति जलबुद्बुदवत् मशकादिवच्च तेषाञ्जननन्न किमपि महत्वपूर्णं लक्ष्यं बिभर्ति; ते तु सम्भाव्यते मरणमेव लक्ष्यीकृत्य जायन्त इति । अन्यथाऽत्राखिल सांसारिकजन्ममरणात्मकबन्धकर्दमक्षालनसामर्थ्यमति श्रीमद्भागतकथातीर्थे समधिगते सति सुनिश्चित रूपेण मुक्तिर्भवतीति बुधैः प्रतिपादितमस्ति । अन्यत्तु किं बत श्रीमद् भागवतमहापुराणश्रवणेन प्राणिनस्तदुत्कृष्टतमम्परमन्धाम समधिगच्छन्ति; यन्महान्तस्तपस्विनः महायोगिनश्चापि समधिगन्तुन्नैवार्हन्तीति प्रतिपादितम् । लिखितमस्ति यत्—

अकथाश्राविणां पुंसां, निष्फलञ्जन्मकीर्त्तितम् ।
अस्थिरेण स्थिरङ्कर्म, कुतोऽयं साधयन्नहि
बुद्बुदा इव तोयेषु, मशका इव जन्तुषु ।
जायन्ते मरणायैव कथाश्रवणवर्जिताः ।।
संसारकर्दमालेव प्रक्षालनपटीयसि ।
कथातीर्थे स्थिते चित्ते मुक्तिरेव बुधैः स्मृता ।।

वाताम्बुपर्णाशनदेहशोषणै,
स्तोयोभिरुग्रैश्चिरकालसञ्चितैः ।
योगैश्च संयान्ति न ताङ्गतिं वै,
सप्ताहगाथाश्रवणेन यान्ति याम् ।।

अर्थाच्छ्रीमद्भागवतकथायाः सावधानतया सप्ताहं यावत्पूर्णविधितः श्रवणं कृत्वा सर्वोत्कृष्टां सद्गतिं समधिगच्छन्तीति समुदीरितप्रसंगेन स्पष्टीभूतमेवेति निश्चप्रचम् । यदिदम्भागवतमहापुराणमस्ति परमोपकारकं समैश्चापि सर्वदा सर्वथा सोत्साहं समुपास्यमिति ।

श्रीमद्भागवतमहापुराणस्वरूपेण साक्षाद्भगवान् स्वयमेवात्र विराजत इति श्रीपद्मपुराणस्योत्तरखण्डे षष्ठेऽध्याये श्रीमद्भागवतमाहात्म्ये लिखितमेवास्ति यत्

श्रीमद्भागवताख्योऽयं प्रत्यक्षः कृष्ण एव हि ।

यस्मिन् भागवते कृष्णः स्वयं विराजते तस्य कथायाः श्रवणफलविषये किमस्ति वक्तव्यम्! यत् —

अत्युत्तमा कथा दिव्या कोटियज्ञफलप्रदा ।। इति ।।

श्रीमद्भागवतश्रवण-पठन-मनन-निदिध्यासनैः संसारे यावद्देहपातं यथेप्सिताः भोगाः समधिगम्यन्ते, तथा चेह देहपाते सति मुक्तिश्चापिभवत्येवेति प्रतिपादितम् यत्—

- श्रीमद्भागवतेनैव, भुक्तिमुक्ती करे स्थिते

शास्त्रकल्पवृक्षपतितं फलमिव श्रीमद्भागवतमहापुराणमस्ति । यथा शुकचञ्चु चुम्बितानि फलानि स्वादूनि जायन्ते तथैव श्रीशुकदेवमुखारविन्दस्पृष्टत्वाद्भागवताख्यं निगमकल्पतरुफलमपि परमकथारसमाधुर्यमावहतीति रसिकैः श्रीमद्भागवतकथा-श्रवणरसः सर्वथा समास्वादनीय इति । तदग्रे लिखितमस्ति । यत्—

निगमकल्पतरोर्गलितं फलं,
शुकमुखादमृतद्रवसंयुतम् ।
पिबत भागवतं रसमालयं,
मुहुरहो रसिकाः भुवि भावुकाः ।। इति ।।

श्रीमद्भागवतमहापुराणस्य महान् महिमा गीयते तत्र किमस्ति बीजम् । किमस्ति श्रीमद्भागवते वैशिष्ट्यं यस्य प्रभावेण तस्य गुणगौरवं सर्वत्र गीयते? मनोहारिता कल्याणकारिता भुक्तिमुक्तिप्रदायिकता दिव्यता च समुपलभ्यत इति जिज्ञासोपशान्तये श्रीमद्भागवतवर्णितविषय एव परमश्रैष्ठ्यस्य हेतुः ।

श्रीमद्भागवतमहापुराणे मुक्तिं यावत्फलाकाङ्क्षा विरहितः छद्मादिशून्यश्च सर्वथा शून्यः सद्धर्मोऽत्र निरूपितोऽस्ति । मात्सर्यशून्यानां शुद्धान्तःकरणानां सत्पुरुषाणाञ्ज्ञेयं शुद्धं वस्तु परमात्मतत्त्वन्निरूपितमस्ति यद्दुःखानामात्यन्तिकीन्निवृत्तिङ्करोति । त्रिविधानि सन्ति दुःखानि तानि चेहाध्यात्मिकान्याधिभौतिकान्याधिदैविकानीति च । तानि सर्वाण्यपि सर्वथा परमात्मतत्त्वचिन्तनेन दूरीभवन्तीति तत्परमोत्कृष्टमत्र वस्तु वर्ण्यत्वेनोररीकृतमस्ति; वर्णितञ्च । तत्परमात्मवर्णनं तापत्रयोन्मूलकं सहैव शिवमप्यस्ति; सर्वथा वर्त्तते कल्याणकृत् । एतादृशसमुत्कृष्टसाधनातिरिक्तस्य साधनान्तरस्य नास्त्यावश्यकता । यतः श्रीमद्भागवतमहापुराणश्रवणेहायां सत्यामेव तत्कालमीश्वरः स्वान्तमनुगृह्णाति श्रोतॄणां स्वपदार्पणेन । इत्थं सर्वथा भगवत्प्राप्तिकारकम्भुक्तिमुक्तिभ्यां सर्वेषामपि दुःखानामात्यन्तिकीन्निवृत्तिङ्करोतीति सर्वोत्कृष्टधर्मस्य परमोत्कृष्टतत्त्वस्य च वर्णनमेवैनदुत्कृष्टकोटिकमिति प्रकटीकरोति । तदेव श्रीमत्पद्मपुराणस्योत्तरखण्डे षष्ठेऽध्याये तथा श्रीमद्भागवतमहापुराणस्य प्रथमे स्कन्धे प्रथमेऽध्याये मङ्गलाचरणानन्तरमेव लिखितमस्ति । यत्—

धर्मः प्रोज्झितकैतवोऽत्र परमो निर्मत्सराणां सतां,
वेद्यं वास्तवमत्र वस्तु शिवदन्तापत्रयोन्मूलनम् ।
श्रीमद्भागवते महामुनिकृते किं वा परैरीश्वरः
सद्यो हृद्यवरुध्यतेऽत्र कृतिभिः शुश्रूषुभिस्तत्क्षणात् । इति ।

इत्थमस्ति पुराणस्यास्योपर्युक्त-प्रकारेण वर्णनपरत्वात्परमं महत्त्वमिति प्रतिपाद्य सर्वेष्वपि पुराणेषु श्रेष्ठतममस्तीति सबीजम्प्रतिपादितमस्ति—यत्—

श्रीमद्भागवतमहापुराणम्पुराणेषु तिलकायमानमस्ति । अतएव वैष्णवानाम्परमाश्रयत्वात्सर्वस्वम्परमन्द्रव्यमस्ति । अस्मिन् महापुराणे परमहंसवृत्तिभिः समधिगम्यञ्चरमञ्ज्ञानम्परमा विद्या विशुद्धतमञ्ज्ञानमस्ति वर्णितम् । तथा चात्रज्ञान-वैराग्य-भक्तिपूर्वकं निवृत्तिमार्गस्य प्रतिपादनमस्ति । ये जनाः पुराणस्यास्य भक्तिपूर्वकं श्रवण-पठन-मनन-निदिध्यासनानि कुर्वन्ति । ते सुनिश्चितरूपेण मुक्ताः भवन्तीति श्रीपद्मपुराणस्योत्तरखण्डे षष्ठेऽध्याये लिखितमस्ति यत्—

श्रीमद्भागवतं पुराणतिलकं, यद् वैष्णवानां धनम्,
यस्मिन् पारमहंस्यमेवममलं ज्ञानम्परङ्गीयते ।
यत्र ज्ञान-विराग-भक्तिसहितं नैष्कर्म्यमाविष्कृतम्
यच्छृण्वन् प्रपठन् विचारणपरो भक्त्या विमुच्येन्नरः ॥

एवं श्रीमद्भागवतमहापुराणं सर्वोत्कृष्टं पुराणं वर्त्तते । अस्मिन् ज्ञानकर्मयोगयोः स्पष्टीकरणमस्ति । अतएव पुराणमेतच्छृण्वन् प्रपठन् विचारयंश्च भक्तिं समधिगम्य सर्वथा मुक्तिभाग्भवतीति—पुराणस्यास्य चरमलक्ष्यपूरकत्वात्सुगममार्गनिर्देशकत्वात्परमोपकारकत्वाच्च वर्त्तते सर्वोत्कृष्टपुराणतेति स्पष्टीभूतं श्रीमद्भागवतमहापुराणस्य पुराणेषु किं स्थानमस्तीत्यलमतिविस्तरेण ।

—०—

साङ्ख्यशब्दविचारः

ओङ्कारश्चाथ शब्दश्च द्वावेतौ ब्रह्मणः पुरा ।
कण्ठम्भित्त्वा विनिर्यातौ तेन माङ्गलिकावुभौ ।।

सांख्य-शब्दार्थः—सांख्यशास्त्रस्य तस्य तत्त्वानां च विचारतः प्रागस्माभिः सुनिश्चितरूपेण निर्धारणीयो यत् सांख्यशब्दस्य शाब्दिकोऽर्थो कोऽस्ति तथा तस्य प्रतिपाद्यं किङ्किमिति च तस्य नाम सांख्यमित्यस्ति निर्धारितमिति । विषयेऽमुष्मिन् परमावश्यकत्वेन विचारणीयम्भवतीति सर्वतः प्रागेतदेव विचार्यते ।—सम्यक्प्रकारेण ख्यानं संख्या सा यत्र विचार्यते वर्त्तते वेति सांख्यम् । चक्षिङ्ख्याञ्धातोः संख्याशब्दस्योपपत्तिरिति तस्य प्रतिपाद्यो भवति विषयः तत्त्वग्राम-विनिर्णयः, तस्य याथातथ्येन गणना-निरूपणं साङ्गोपाङ्गञ्च मूलभूतानां सृष्टि-स्थिति-लय-निरूपक-तत्त्वानान्निरूपणमित्येषः । इत्थं सांख्यशब्दस्य मुख्यरूपेण भवत्यर्थो यत्—सर्व-प्रकारकं तत्त्वज्ञानं सांख्यम् । द्वितीयश्चार्थो संगृह्यते यत्—महामुनि-कपिलमहर्षि-प्रवर्तितं सांख्यशास्त्रम् । श्रीमद्भगवद्गीता---महाभारत---श्रीमद्भागवतादिषु ग्रन्थेषु यत्र सांख्यनिष्ठः, सांख्ययोगः, सांख्यमिति च प्रयोगः समुपलभ्यते । तत्र तत्र सर्वत्र सांख्य-शब्दस्यार्थः तत्त्वज्ञानस्वरूपक एव गृह्यते । अनयैव निष्ठया ज्ञानिनोऽपि सांख्याः समभिधीयन्त एव ।

चरकादिष्वपि च "सांख्यैः संख्यातसंख्येयैः" "चरक १-१" । सांख्यः सम्पद्यते यथा "च० शा० ५-१७" । इत्यादिषु स्थलेषु सांख्यशब्दस्यार्थः केवलं कापिलस्य सांख्य शास्त्रमतस्यानुयायि सांख्यमेव न, परमत्र तु आत्मानात्मविचारपुरःसरं सर्वकर्म संन्यासिनां ब्रह्मज्ञान-निमग्नानां वेदान्तिमहोदयानामपि समावेशोऽस्ति । परन्तु प्रकृतेऽस्माभिः सांख्यस्यार्थान्तरमेव ग्राह्यमस्ति । कापिलसांख्यशास्त्रस्य मूलतत्त्वानि संख्यातानि पंचविंशतिसंख्याकानि सन्ति, तथा च भगवान् कपिलस्तान्येव समाश्रित्य परमेश्वरविभूतिं समस्तमपि चराचरात्मकं जगत् सम्यक्तया वर्णयति । इत्यस्मादेव हेतोः शास्त्रस्यास्य नाम सांख्यमिति । महाभारतेऽपि लिखितमस्ति यत्—

संख्यां प्रकुर्वते चैव प्रकृतिं च प्रचक्षते ।
चतुर्विंशतितत्त्वानि ते हि सांख्याः प्रकीर्तिताः ।।

अत्र सांख्यशब्दो योगरूढो वर्तते । यश्चात्र विवेकेन तत्त्वसंख्यावर्णयित्रे भगवते कपिलाय

तन्निरूपिताय सांख्याय प्रयुक्तोऽस्ति। अस्मिन्नर्थे तत्त्वज्ञानस्य प्रतिपादकानामन्येषान्दर्शनानामग्रहण एतदेवास्ति वैशिष्ट्यम्—तानि भक्तियोगादिभिः विभिन्नसाधनैस्तत्त्वज्ञानस्यात्र प्रतिपादकानि सन्ति, तेन तत्त्वज्ञानेन च मुक्तिपरम्परयाः प्रतिपादकानि सन्ति। परन्तु सांख्यशास्त्रं दुःखत्रयनिवृत्तिरूपस्य मोक्षस्य साक्षात् प्रयोजकस्य तत्त्वज्ञानस्य प्रतिपादकमस्ति।

विभिन्नैः ग्रन्थकृद्भिः सांख्यशब्दस्यार्थो वर्णितादित्यस्माद्भिन्नोऽभिन्नश्च कृतः। तत्र भवन्तः १—जगद्गुरुशंकराचार्याः श्रीमद्भगवद्गीतायाः भाष्ये लिखन्ति यत्—सांख्यन्नाम इमे सत्त्वरजस्तमांसीतिगुणाः मम दृश्याः अहं तेभ्योऽन्यः तद्व्यापारसाक्षिभूतो नित्यो गुणविलक्षण आत्मा इति चिन्तनम्। अर्थात् सत्त्वरजस्तमांसीति त्रयोऽपि गुणाः दृश्याः सन्ति मेऽहं चात्मैतेषां द्रष्टा सर्वथैतेभ्यो पृथग्भूतो वर्त्ते। समेषामप्येतेषां गुणानामहमात्मा क्रियमाणव्यापाराणां साक्षी नित्यः शुद्धो गुणविलक्षणश्चास्मीति चिन्तनमेव सांख्यमस्तीति।

विष्णुसहस्रनामभाष्ये लिखितमस्ति यत्—महर्षिः कपिलाचार्यः श्लोकस्यास्य सांख्यस्य—शुद्धात्मतत्त्वविज्ञानस्याचार्यः अर्थात् शुद्धात्मतत्त्वविज्ञानमेव सांख्यमिति।

२—व्यासस्मृतावपि शुद्धात्मतत्त्वविज्ञानं सांख्यमित्यभिधीयते।

३—सांख्यप्रवचनभाष्य—निर्मातुः श्रीमद्विज्ञानभिक्षोः कथनमस्ति यत्—सम्यक् प्रकारेणात्मकथनमर्थाद् विवेकेनात्मकथनम्, प्रकृत्यादिविवेकेनात्मनो याथातथ्येन निरूपणं सङ्ख्येति समभिधीयते। इत्थंभूता संख्या यत्र शास्त्रे विराजते तच्छास्त्रजातं सांख्यम्भवतीति।

४—चक्रपाणिः—चरक-संहितायाः शा० ५-१७ टीकायां चक्रपाणिर्लिखति यत्—संख्या-तत्त्वज्ञानं यत्र वर्तत इति सांख्यः, अर्थात् तत्त्वज्ञानरूपसंख्यया व्यवहरणशीलम्भवति सांख्यमिति।

५—दोषाणां च गुणानां च प्रमाणं प्रविभागतः।
कञ्चिदर्थमभिप्रेत्य सा संख्येत्युपधार्यताम्॥

श्लोकेनानेन ज्ञायते यत्—कस्मिंश्चिदपि विषये प्रमाण-परिष्कृतया सरण्या विचारणं संख्या भवति, अर्थात् दार्शनिकविचारव्यूहस्यैव नामान्तरमस्ति संख्या अनेनैव संख्याशब्देन निष्पन्नं सांख्यमस्ति।

६—श्रीरघुनाथतर्कवागीशभट्टाचार्यैः सांख्यतत्त्वविलासे लिखितमस्ति यत्—पंचविंशतितत्त्वानां विचारः संख्याग्रन्थः। अर्थात् पंचविंशतितत्त्वानां विचार एव संख्येत्यभिधीयते। तत्त्वविचारव्यूहं समाश्रित्य कृतं शास्त्रं सांख्यमिति।

७—श्रीदेवतीर्थस्वामिनः सांख्यतरंगे लिखन्ति यत्—सम्यक् क्रमपूर्वकं ख्यानं कथनं संख्या, संख्या यस्यां वर्त्तते सा संख्या—क्रमानुगा विचारणा, तामधिकृत्य कृतं तस्मात्सांख्यमित्युच्यते शास्त्रम्। अर्थात् कस्यचिदपि पारमार्थिकस्य वस्तुनः क्रमानुगो विचारव्यूह एव संख्यानाम्ना समभिधीयते। तया रचितं शास्त्रं सांख्यमिति कथयन्ति।

८—जैनविद्वान् श्रीचरित्रसिंहमहोदयो हरिभद्रसूरिकृतस्य षड्दर्शनसमुच्चयस्य टीकायां लिखति यत्—सांख्यमिति कापिलदर्शनम्, आदिपुरुषनिर्मितेयं संज्ञा संखस्येमे सांख्याः तालव्यो वा शकारः। शंखनामाऽऽदिपुरुषः अर्थात् शंखो वा संखो इति नामकेन केनाप्यादिपुरुषेणेदं शास्त्रमादौ सर्वतः प्राग्दर्शनं प्रवर्तितमित्येतत्सांख्यमिति कथयन्ति।

पद्मपुराणेऽपि पाखण्डोत्पत्तिप्रकरणे लिखितमस्ति यत्—तामसो कपिलः संखश्चेति समानावास्ताम्। एषापि वार्त्ता सांख्यनाम्नः कस्यापि पुरुषस्य संबन्धं सूचयति।

उपर्युक्तोद्धरणानीव बहून्यन्यान्यपि सदुद्धरणानि समुपलभ्यन्ते। एतेषां समेषामपि विहिते विमर्शने फलति तदेव तात्पर्यत्वेन यदस्माभिः पूर्वमेव प्रतिपादितम्।

सर्वथा कापिलदर्शनस्य नाम सांख्यमिति इत्यस्माद्धेतोः संजातं यत्—तस्मिन् सृष्टेः मूलतत्त्वानि सङ्ख्याय आत्मत्तत्वस्यावबोधः कारितोऽस्ति। प्रकृतिपुरुषयोः पारस्परिकभेदविषयकतात्त्विकज्ञानस्याभाव एवास्य दुःखमयस्यास्य जगतः सत्ता वर्तत इति।

प्रकृतिपुरुषयोः पारमार्थिकतया ज्ञानप्राप्तौ सत्वरमेव प्रकृतिरेषा—पुरुषोऽयमिति पूर्वं तात्त्विकज्ञाने जाते सत्येव दुःखस्यात्यन्तिकी निवृत्तिर्भवति। एतद्विवेकज्ञानमेव सत्त्वपुरुषान्यताख्यातिः, प्रकृति-पुरुष-विवेकः, समभिधीयते। अस्यैवैकं नाम संख्या सम्यक् ख्यातिः, सम्यग्ज्ञानं वेत्यभिधीयते। सांख्यशास्त्रे ज्ञानमेतदेव मूलसिद्धान्तरूपेण विराजते। अतएव दर्शनस्यास्य नाम सांख्यमिति जातम्।

वस्तुतः सांख्यशब्दः कदाचित् तत्त्वज्ञानसामान्यावबोधक आसीत्। तथा तस्मिन् जीव-जगदीश्वराणां सर्वथा प्रतिपादनन्तत्रासीत्। साम्प्रतन्तु वैदिकावैदिकेषु दर्शनेषु नैकधैतेषाम्प्रतिपादनं समुपलभ्यते। सांख्यापरनामकन्तज्ज्ञानं वेदानां तेषामेव भेदरूपेण परिगण्यमानानां ब्राह्मणानामारण्यकानामुपनिषदां च प्रवचनेषु प्रवहमानं जगत्सु शान्ति-समृद्धि-सुव्यवस्थादीनि समनुप्राणयति स्म। परमोपकारकाः सुगृहीतनामानः ऋषयो मुनयश्च महापुरुषास्तत्त्वज्ञानस्यास्यैवाविष्कर्तारः समधिगन्तारः प्रचारकाश्चाभूवन्।

यदा यदा जगता तत्त्वज्ञानमेतन्निराकृत्य निरादृत्य वा स्वेच्छाचारित्वमुररीकृतन्तदा तदा सुव्यवस्था-सदाचार-शान्ति-समृद्धीनां तेन सर्वथा ह्रासः समनुभूतः। जाते चैतेषां वस्तूनां लोपे जगत्सु नास्तिकानां, असुरदानवरक्षसां समुपद्रवैः हाहाकाराः समजायन्त। यदा चैतादृशी दुरवस्था दुर्व्यवस्था च दुर्व्यवस्थायाः सीमानमतिलिलङ्घयिषति तदा सुनिश्चितरूपेण भगवान् नारायणः प्रादुर्भूय दुरवस्थान्दूरीकृत्य सुव्यवस्थां विदधाति। महाभारत-कालेऽपि समुत्पन्नैतादृश्येव परिस्थितिः तदा तामेवाधिकृत्य भगवान् श्रीकृष्णस्वरूपेण समवततार तस्य नेतृत्वे भगवतः श्रीकृष्णद्वैपायनस्य च नेतृत्वे तत्त्वज्ञानस्यास्य पुनरुद्धारः समभूत्। सौविध्य-सौकर्य-सुव्यवस्थादृशा तद्व्यापकं सांख्यं प्रचलितानेक दर्शनरूपेण विभक्तम्। अस्मत्सम्मतौ तु महाभारतीयस्य श्लोकांशस्यास्याशयः सर्वथा समुदीरितप्रकारक एव भवितुमर्हति। श्लोकांशश्चैषः—

ज्ञानं च लोके यदिहास्ति किंचित्, सांख्यागतं तद्धि महन्महात्मन्।
श्लोकस्यास्य चैष एवाशयो भवितुं सर्वथार्हत्येवेति निश्चयप्रचम्।

यदा तत्त्वज्ञानस्य विभिन्नानामंगानां क्रमशः क्रमिकासु श्रेणीसु नैकानि दर्शनानि जातानि। तदा मूलसांख्यमथ च तत्त्वज्ञानं केषांचित् संख्यापरिमितानां तत्त्वानां विवेचने, तथा च सत्त्वपुरुषान्यताख्यातिप्राप्तव्यमोक्षप्रतिपादनावधिमत् संजातम्। योगमर्यादयाऽखिलतत्त्वज्ञानस्य वाचकः सांख्यशब्दो यो पूर्वमासीत्, स एव साम्प्रतम् "सांख्यं वेदत एव विश्व-विवृतिः संख्यायते संख्यया" एकदेशीयया चानया व्युत्पत्त्या योगरूढोऽजायत। बहुभ्योऽब्देभ्यः समारभ्य सांख्यशब्दोऽयमस्मिन्नेवार्थे प्रयुज्यते।

वार्तैषाऽऽश्चर्योत्पादिका वर्तते यत्—शास्त्रीयायाम्भाषायां सांख्यशब्दे योगरूढार्थेऽथ च संकुचितार्थे प्रयुज्यमानेऽपि काव्यादीनां व्यावहारिके संस्कृते राष्ट्रियासु प्रान्तीयासु च भाषासु यत्र तत्र अद्यापि तस्मिन्नेव व्यापकेऽर्थेऽर्थाज्ञान-सामान्यार्थके सांख्यशब्दः सम्प्रयुज्यमानः समवलोक्यते बहुत्र। कानिचिदुदाहरणानि तत्र भवताम्पुरस्तात् प्रस्तूयन्ते। यानि चास्य मूलधातुनिष्पन्नस्वरूपाणि वर्त्तन्ते पर्यायभूतधातुनिष्पन्नानि च। शब्दस्यास्य मूलधातुः समुपपदको ख्या धातुः समानार्थकश्चास्ति गण् संख्याने धातुः सदुदाहरणानि—

१. चर्चा संख्या विचारणा। अमरकोशः
२. संख्यावान् पण्डितः कविः। अमरकोशः

३. प्रसंख्यानेऽप्यकुसीदस्य सर्वथा विवेकख्यातेः धर्ममेधः समाधिः। योगसूत्रम्। इत्यादिकेषु स्थलेषु समुपपदकस्य ख्या धातोः प्रयोगोऽस्ति—विचारार्थकः, विवेकार्थकः, ज्ञानसामान्यार्थकश्चेति।

४. मनस्वी कार्यार्थी न गणयति दुःखं न च सुखम्।

५. अयं निजः परो वेति गणना लघुचेतसाम् ।

इत्यादिकेषु स्थलेषु गण् धातुप्रयोग एक-द्वि-त्रि-चतुरादिगणनापरको नास्त्यपि तु ज्ञानकरणमनुभावनं चेति तस्यार्थः ।

एतावदेव न ह्यपितु भाषायामपि अर्थात् हिन्द्यामपि नूनमेतादृशाः प्रयोगाः समुपलभ्यन्ते । तद्यथा—

६. उसकी क्या गिनती है ।
७. उसे कौन गिनता है ।
८. ज्ञान गिनती ।

इत्यादिकेषु स्थलेषु सुनिश्चितरूपेण ज्ञानसामान्यार्थको प्रयोगोऽस्ति प्रचलितः । परमत्र तत्त्वज्ञानप्रतिपादकानामन्यान्यदर्शनानां स्थितिरप्यस्त्येव । तर्ह्यस्य सामान्यार्थग्रहणं व्यवहरणं च काठिन्योपेतमिति सांख्यकारिका सांख्यदर्शनादिषु ग्रन्थेषु वर्णितं वा न्यौनाधिक्येन तत्सदृशस्य तत्त्वज्ञानस्य तथा चास्य प्रतिपादकस्य शास्त्रस्यार्थे सांख्यशब्दोऽत्र व्यवह्रियते ।

सांख्यशास्त्रेण सह सम्बध्यमानानि, 'कापिलम्', 'कपिलकृत्', 'कपिलोक्तम्', इत्यादीनि विशेषणान्यपि पूर्वप्रतिपादितन्यायार्हाणि सन्ति । अर्थात् समेषामपि दर्शनानां तत्त्वज्ञानं कपिल-प्रोक्तं कपिलोद्धृतमेवास्तीति । अतएव तत्सर्वमपि कापिलमेवेति निश्चप्रचम् ।

"एष आत्मपथो व्यक्तो नष्टः कालेन भूयसा ।"
"प्रोवाचासुरये सांख्यं तत्त्वग्राम-विनिर्णयम् ।"
"प्रणेष्ये तत्त्वसंहिताम् ।"

इत्यादिषु स्थलेषु "आत्मपथः", तत्त्वग्रामविनिर्णयः, तत्त्वसंहिता इत्यादिभिः शब्दैः समेषामपि दर्शन-पदवाच्यानां शास्त्रनिचयानां तत्त्वज्ञानमेवास्त्यभिप्रेतम् ।

एवं समान्यपि दर्शनानि मूलतस्तु सर्वथा सन्त्यनन्यानि परस्परमेकरूपाणि च । मध्यकालेनाना श्रेणीषु वर्तमानानामधिकारीणामर्थात् तत्त्वज्ञान-बुभुत्सूनां सौविध्यापेक्षया सत्यपि वस्तुतः पारमार्थिके सर्वथैक्ये भेदमिव कल्पितः समभूदिति मन्महे ।

—०—

साङ्ख्य-पुराणयोः सम्बन्धः

अष्टादशष्वपि महापुराणेषु नैकमपि महापुराणमेतादृशं समवलोक्यते यत्र सृष्टि-स्थिति-लयानां विषयो न भवेत् सुस्पष्टरूपेण विपुलतया च लिखितः। एतावदेव नैवापितु वर्तते समेषामप्युपपुराणानामौपपुराणानामपि च स्थितिः ह्ये तादृश्येव। सांख्य-दर्शनेऽपि सृष्टि-स्थिति-लयानामेवास्ति चर्चा। इति वर्तते सर्वथा प्रतिपाद्यसाम्यम्।

प्रमाणान्तराणां समपेक्षा नास्ति यतोऽत्र विषये पुराणलक्षणम् यदस्ति सुप्रथितम्, तदेव प्रमाणतामेति—

"सर्गश्च प्रतिसर्गश्च तथा मन्वन्तराणि च।
वंश्यानुचरितं चेति पुराणं पञ्चलक्षणम्॥

लक्षणमेतदनुसृत्य सृष्टि-स्थिति-लयानां वर्णनाभावे पुराणस्य पुराणत्वमेवावहीयेत। तया च भगवता श्रीईश्वरकृष्णेन स्वसांख्यकारिकासु कारिकैका लिखितास्ति समुपसंहरणावसरे ग्रन्थस्य। तैः लिखितम् यत्—

"पुरुषार्थज्ञानयिदं गुह्यं परमर्षिणा समाख्यातम्।
स्थित्युत्पत्ति-प्रलयाश्चिन्त्यन्ते यत्र भूतानाम्॥

कारिकामेनां समनुसृत्य वक्तुम्पार्य्यते यदत्र सांख्यदर्शनेऽपि सृष्टि-स्थिति-लयानां वर्णनमस्तीति तदतिरिक्तं सांख्यं साम्प्रतं सांख्यनाम्ना प्रथितं सांख्यन्नैव भवेत्। अतोऽत्र सांख्य-पुराणयोः सर्वथा वर्तते प्रतिपाद्यविषयस्य साम्यम्।

चेदत्र विषये समवधीयेत तर्हि स्पष्टीभवति सत्यपि सृष्टि-स्थिति-लयवर्णने वर्तते सर्वथा सृष्टिवर्णनस्यैव प्राधान्यम्, पुराणेषु सांख्यदर्शनेऽपि च। सृष्टिप्रक्रियैव प्रधानरूपेण प्रतिपादिता वर्तते तथा च तन्मुखतयैव स्थितिलयावपि प्रतिपादितौ स्तः। इत्थमत्र सांख्ययोगयोः प्रतिपादनशैल्यां वर्तते सर्वथा साम्यसम्बन्धः, इति सुनिश्चितरूपेण वक्तुं शक्यते। इत्थमत्र सांख्य-पुराणयोः प्रतिपाद्य-प्रतिपादन-साम्यमूलकः सम्बन्धो वर्त्तते, इत्येतस्मादेव कारणात् सर्वेष्वपि पुराणेषु सांख्यतत्त्वानि समुपलभ्यन्ते।

यद्यपि मन्वन्तराणि वंश्यानुचरितं च सांख्यदर्शने नैव प्रतिपादिते स्तः स्पष्टतस्तु

किन्तु तेषाम्मूलकारणानि तत्त्वानि सन्ति सर्वथाऽत्र प्रतिपादितानि ।

तथा चैतत् सुस्पष्टतया वक्तुं शक्यते यदत्र सृष्टि-प्रक्रियाविषये सर्वेष्वपि दर्शनेषु शास्त्रान्तरेषु च वर्णनमस्ति किन्तु तादृशं सुविशदं तात्त्विकदृशा विचारितञ्च नास्ति । तत्र तत्र परमसूक्ष्मरूपेण प्रक्रियैषा सांख्यशास्त्रे वैशेषिकदर्शने पुराणनिचये चास्ति । शास्त्रान्तरेषु पुरुषतत्त्वस्य निरूपणन्तु यत्र-तत्र वर्त्तत एव बाहुल्येन, किन्तु प्रकृतेस्तद् विकाराणाम्महत्तत्त्वतः समारभ्य भूतानि यावत्तत्त्वानां नास्ति निरूपणमस्त्यपि चेत् स्वल्पतममिति नास्तीति साम्यमेव भजते । इति पुरुषातिरिक्ततत्त्वानां सुविशदवर्णनात्मको वर्त्तते सांख्यपुराणयोः सम्बन्धः ।

उपर्युक्तेन प्रकारेण नैकधा वर्त्तते सांख्यपुराणयोः सम्बन्धः विशेषतश्च पुरुषातिरिक्तानामपि तत्त्वानां सुविशदं सुपर्य्याप्ते निरूपणे चास्ति नित्यः सम्बन्धः इति शम् ।

—०—

श्रीमद्भागवतमहापुराणे नैकेषु स्थलेषु नैकधा प्रतिपादितं साङ्ख्यम्

(१)

ब्रह्मकारणतावादि साङ्ख्यन्निसर्गाऽमृषावादि सांख्यञ्च

इह हि साङ्ख्यन्नाम सम्यक्ख्यानं सम्यग्ज्ञानं विश्वकारणानि संङ्ख्याय तैः स्वतन्त्रतया सृष्टेरुत्पत्तिज्ञापकं दर्शनं वा ज्ञानविशेषो वा साङ्ख्यमिति सिद्धान्तो निर्णीतः ।[१]

ततश्च श्रीमद्भागवतस्य प्रारम्भिकेऽस्मिन् मङ्गलाचरणश्लोके ह्येस्माद्ब्रह्मण एव विविधात्मकस्यास्य जगतः सृष्टि-स्थिति-संहारा भवन्तीति दर्शितम् । तदेव च ब्रह्म ह्येकमेव परिसङ्ख्याय विनिबद्धम् । प्रमाणतया चाऽत्र सर्वत्रादृतावन्वयव्यतिरेकावेत्र विनिर्दिष्टौ । तन्मूलञ्च द्विविधमनुमानमिह सूचितम् ।

"स च पूर्वेषामपि गुरुः कालेनानवच्छेदात्" इति योगसूत्रानुसारेण ब्रह्मणोऽपि वेदोपदेशकत्वम् । अपि च विलक्षणेयं तन्निर्मिता सृष्टिः । अन्यत्र तु समवाय्यसमवायिनिमित्तेति कारणत्रयस्य-व्यपेक्षा भवति, परमिह तु-सा तेजो वारिमृदामन्यस्यान्यत्र भ्रमवन्मृषा भवन्त्यप्यमृषैवेति सदसद्भावाभ्यामनिर्वचनीया । अथ चैतादृशसृष्ट्यादिकारकस्य तस्य भगवतो यदा स्वकीयन्धाम प्रचाकसीति; तदा समस्तमपि कुहकं विलीयत इति विलक्षणमेवेदम्प्रथमं साङ्ख्यम् ।

---

१. जन्माद्यस्य यतोऽन्वयादितरतश्चार्थेष्वभिज्ञः स्वराट्,
तेने ब्रह्म हृदा य आदिकवये मुह्यन्ति यत्सूरयः ।
तेजो वारिमृदां यथा विनिमयो यत्र त्रिसर्गोऽमृषा,
धाम्ना स्वेन सदा निरस्तकुहकं सत्यम्परन्धीमहि ।।
(प्रथमस्कन्धे प्रथमाध्याये प्रथमःश्लोकः)
(१, १, १,)

(२)

(त्रिगुण-पुरुष-कारणता-वादि-साङ्ख्यम्)

भगवद्भक्तेर्माहात्म्यं वर्णयता श्रीसूतेन शौनकादिभ्यः समुपदिष्टमेतत्साङ्ख्यं श्रीमद्भागवतस्य-प्रथमे स्कन्धे द्वितीयेऽध्याये त्रयोविंशतितमचतुर्विंशतितमयोः श्लोकयोः[1] वर्त्तते—

तद्यथा—प्रकृतेः सत्त्वरजस्तमांसीति सन्ति त्रयोऽपि गुणाः, परमपुरुषः परमात्माऽपि तान्समाश्रित्य स्वरूपत्रिकमादधाति। अर्थात् सत्त्वगुणं समाश्रित्य विष्णुस्वरूपं, रजोगुणं समाश्रित्य ब्रह्मस्वरूपं तथा च तमोगुणं समाश्रित्य रुद्रस्वरूपन्धारयति। स एव परमात्मा स्वसाक्ष्येण समग्रमपि सृष्टिचक्रञ्चालयति सर्जन-पालन-संहरण-रूपाभिः प्रक्रियाभिः।

गुणेषु सत्त्वगुणस्य प्राधान्यमस्तीति-प्रतिपादयता दारु-धूम्र-वह्नीनां क्रमशो वैशिष्ट्यम् इत्युदाहृत्य तमोगुणापेक्षया रजोगुणस्याऽस्ति वैशिष्ट्यं, रजोगुणापेक्षया च वर्त्तते सत्त्वगुणस्य परमं वैशिष्ट्यमिति सत्त्वोपासना विधेयेति प्रतिपादितम्। यतोऽत्र क्रमशः सत्त्वगुणसिद्धावेव मुक्तिप्राप्तये प्रयतितुं शक्यते। मुक्तिप्राप्तिश्चास्ति परमं लक्ष्यमिति।

अनेन प्रकारेण त्रयो गुणाः पुरुषस्याधिष्ठातृत्वं समधिगत्य कुर्बन्ति सर्जन-पालन-संहरणानि। सृष्टेः कारणतायाञ्च वर्त्तते पुरुषस्यापि परमावश्यकता। अतएवाऽत्र त्रिगुण-पुरुष-कारणता-वादि-साङ्ख्यमस्ति।

---

१. सत्त्वं रजस्तम इति प्रकृतेर्गुणास्तैर्युक्तः परः पुरुष एक इहास्य धत्ते
स्थित्यादये हरिविरिञ्चिहरेति संज्ञाः श्रेयांसि तत्र खलु सत्त्वतनोर्नृणांस्युः॥
पार्थिवाद्दारुणो धूमस्तस्मादग्निस्त्रयीमयः।
तमसस्तु रजस्तस्मात्सत्त्वं यद् ब्रह्मदर्शनम्॥ (१।२।२३-२४)

(३)

(मायाकारणतावादिसाङ्ख्यम्)

शौनकादिभ्यो भगवद्भक्तिमाहात्म्यं वर्णयता श्रीसूतेन श्रीमद्भागवतस्य प्रथमे स्कन्धे द्वितीयेऽध्याये त्रिंशत्तमश्लोकतश्चतुस्त्रिंशत्तमश्लोकं यावत्[1] मायाकारणतावादि साङ्ख्यम्प्रतिपादितमस्ति । तद्यथा—

भगवान् यद्यपि प्रकृतेस्तद्गुणेभ्यश्च परो वर्त्तते, तथापि स्वमायया समग्रायाः सृष्टेरभिव्यक्तिङ्करोति । माया चैषा सदसद्रूपा गुणमयी च वर्त्तते । अर्थात् गुणानां साम्यावस्था प्रकृतिशब्देन व्यवह्रियते, तथा सैव लीलावेलायाम्मायाशब्देन व्यवह्रियते । "मायान्तु प्रकृतिं विद्यान् मायिनं तु महेश्वरम्" इति प्रतिपादितमेवास्ति । मायैव सर्वेषामपि गुणानां विलसनङ्करोति । विभुत्वात् परमेश्वरः स्वयन्निर्गुणः सन्नपि गुणेष्वपि विराजत एव, तस्माद् गुणवानिव प्रतीयते । वस्तुतस्तु सोऽयं सर्वेश्वरः सर्वथा विज्ञानानन्दघनस्वरूपो वर्त्तते । यथा—वह्निः स्वयमेकः सन्नपि नैकविधदारुषु प्रकटीभूय नैकविधः स्यात्तथा प्रतीयते परन्तु वह्नित्व—सामान्यात्तु स एक एव भवति । तथैव सर्वेष्वपि भूतेषु पुमान्नेकः सन्नपि तेषु तेषु भूतेष्वधिष्ठानभेदेन तथा तथा प्रतीयमानः नानेव भाति । एक एव भगवान् परमपुरुषो भूत-तन्मात्रेन्द्रियान्तःकरणादिभिः गुणानां विकारैः नैकविधशरीरेषु नैकधा भोगलीलाङ्कुर्वन्निव तत्तच्छरीराद्युपभोगेन नैकः पुरुष इति प्रतीयते । परन्तु वस्तुतस्तु स एव परमपुरुषः स्वयं नानापुरुषरूपेण सृष्टौ नानाविधानि गुणमिश्रणानि अथ च गुणविकारान् समाश्रित्य नैकविधाः लीलाः करोति । सत्त्वगुणप्रधानस्वरूपेण च भूयो भूयोऽवतरन् सृष्टेः पालन-पोषणात्मिकां व्यवस्थां व्यवस्थापयति । सः परमपुरुषः न केवलं देवयोनौ मनुष्ययोनौ वा विशिष्टं स्वरूपम्प्रकटीकरोत्यपि तु पशु-पक्ष्यादियोनिष्वपि प्रकटीभवत्येव । एषोऽस्ति महामायाया

---

१. स एवेदं ससर्जाग्रे भगवानात्ममायया ।
सदसद्रूपया चासौ गुणमय्यागुणो विभुः ॥
तया विलसितेष्वेषु गुणेषु गुणवानिव ।
अन्तःप्रविष्ट आभाति विज्ञानेन विजृम्भितः ॥
यथा ह्यवहितो वह्निर्दारुष्वेकः स्वयोनिषु ।
नानेव भाति विश्वात्मा भूतेषु च तथा पुमान् ॥
असौ गुणमयैर्भावैर्भूतसूक्ष्मेन्द्रियात्मभिः ।
स्वनिर्मितेषु निर्विष्टो भुङ्क्ते भूतेषु तद्गुणान् ॥
भावयत्येष सत्त्वेन लोकान् वै लोकभावनः ।
लीलावतारानुरतो देवतिर्यङ्नरादिषु ॥　(१/२/३०-३४)

महिमापूरितः सुविशिष्टतमश्चकास्तितराम्, यत्सा परमेश्वरस्य परमपुरुषस्य साक्ष्येण सर्वमपि करोति विकरोति च ।

अनेनोपर्युक्तेन सन्दर्भेण स्पष्टीभवति यत् भगवान् परमपुरुषः स्वयन्निर्गुणः सन्नपि गुणमय्या मायया स्वसाक्ष्येण सृष्टि-स्थितिलयात्मिकाः सर्वाः क्रियाः सञ्चालयति, करोति च सर्वमपि मायैवेति वक्तुं शक्यते, यदत्र वर्त्तते मायाकारणतावादि-साङ्ख्यमिति ।

(४)

षोडश-कला-वादि-साङ्ख्यम्, पाद्मसृष्टि-वादि-साङ्ख्यञ्च

श्रीमद्भागवतमहापुराणस्य प्रथमे स्कन्धे तृतीयेऽध्याये प्रथमश्लोकतः समारभ्य पञ्चमश्लोकं यावद् भगवदवताराणां वर्णनङ्कुर्वता श्रीसूतेन शौनकादिभ्यः समुपदिष्टं साङ्ख्यमेतदुपर्युक्तं वर्तते[1] । तद्यथा—

सृष्ट्यादौ भगवान् लोकान् स्रष्टुमियेष । तदनन्तरन्तेन महदादितत्त्वनिष्पन्नं पौरुषं रूपङ्गृहीतम् । तस्मिन् पौरुषे रूपे दशेन्द्रियाणि, एकम्मनः, पञ्चभूतानि च भवन्ति, तान्येव च तत्त्वानि षोडशकलाः सन्तीति प्रतिपादितमस्ति । तथा तेन भगवता कारणजले शयनङ्कुर्वता यदा योगनिद्रायाः विस्तरो विहितस्तदा तस्य नाभिसरसि पद्ममेकम् प्रकटीबभूव । तस्मिंश्च प्रजापतीनामधिपतिः ब्रह्मा प्रकटीबभूव । तेन भगवतस्तेषु विराट्स्वरूपावयवेष्वेव समग्राणामपि लोकानाङ्कल्पना कृता । तद्विराट्स्वरूपमेव भगवतः श्रेष्ठं विशुद्धं सत्त्वमयञ्च स्वरूपं वर्त्तते । योगिनस्तत्त्वदृशा तदेव स्वरूपं पश्यन्ति । भगवतस्तत्स्वरूपं सहस्रपादोरू बाहुमुखे परमवैलक्षण्योपेतम्भवति । तस्मिन् सहस्रशः पादाः, सहस्रशो बाहवः, सहस्रशो नासिकाः, सहस्रशो नेत्राणि, सहस्रशः श्रोत्राणि, सहस्रशः शिरांसि, सहस्रशश्च मुकुटकटककुण्डलादिभिः परिशोभमानमस्ति ।

भगवतस्तदेव स्वरुपम्पौरुषमस्ति । यस्य लोके व्यावहारिकी संज्ञा 'नारायणः' इत्येषा वर्त्तते । भगवतस्तत्स्वरूपमेव च समग्राणामपि भगवदवताराणां कोशोऽस्ति । अस्मादेव श्रीविग्रहात्सर्वेऽप्यवताराः समवतरन्ति । अस्यैव नारायणाख्यस्य पौरुषस्वरूपस्य स्वल्पतमादंशादेव देव-मनुष्य-पशु-पक्ष्यादीनां सृष्टिर्भवति ।

---

1. जगृहे पौरुषं रूपं भगवान् महदादिभिः ।
सम्भूतं षोडशकलमादौ लोकसिसृक्षया ।।
यस्याम्भसि शयानस्य योगनिद्रां वितन्वतः ।
नाभिह्रदाम्बुजादासीद् ब्रह्मा विश्वसृजां पतिः ।।

उपर्युक्तेन वर्णनेन स्पष्टीभवति यदत्र भगवतः षोडशकलाभ्यस्तथा नाभि-सरसः समुद्भूतात् पद्माच्च परम्परया सृष्टिर्भवतीत्यस्त्यत्र षोडशकला-वादि-पाद्म-सृष्टि-वादि च साङ्ख्यम् ।

(५)

अध्यास-वादि-साङ्ख्यम्

भगवतोऽवतारान् वर्णयता सूतेन शौनकादिभ्यः समुपदिष्टमध्यासवादिसाङ्ख्य-मस्ति श्रीमद्भागवतस्य प्रथमे स्कन्धे तृतीयाध्यायस्य त्रिंशत्तमश्लोकतः समारभ्य चतुस्त्रिंशत्तमं श्लोकं यावदस्ति[1] तच्चेत्थम—

प्राकृतरूप-रहितस्य चिन्मयस्य भगवतो यदेतत् स्थूलञ्जगदाकारकं रूपमस्ति । एतत्तस्य मायायाः महत्तत्वादिगुणेभ्यः भगवत्येव कल्पितमस्ति ।

यथा वारिदह्य वाताऽऽश्रिताः सम्भवन्ति धूसरत्वञ्च रेणौ भवति, तत्र स्वल्प-मतयः मेघान् आकाशे धूसरत्वञ्च वायावारोपयन्ति तथैवाऽविवेकिनः सर्वसाक्षिण्यात्मनि स्थूलन्दृश्यस्वरूपञ्जगदारोपयन्ति ।

यस्यावयवसंस्थानैः कल्पितो लोकविस्तरः ।
तद् वै भगवतो रूपं विशुद्धं सत्त्वमूर्जितम् ।।
पश्यन्त्यदो रूपमदभ्रचक्षुषा सहस्रपादोरु भुजाननाद्भुतम् ।
सहस्रमूर्धश्रवणाक्षिनासिकं सहस्रमौल्यम्बर कुण्डलोल्लसत् ।।
एतन्नानावताराणां निधानं बीजमव्ययम् ।
यस्यांशांशेन सृज्यन्ते देवतिर्यङ्नरादयः ।। (१, ३, १-५)

१. एतद्रूपं भगवतो ह्यरूपस्य चिदात्मनः ।
मायागुणैर्विरचितं महदादिभिरात्मनि
यथा नभसि मेघौघो रेणुर्वा पार्थिवोऽनिले ।
एवं द्रष्टरि दृश्यत्वमारोपितमबुद्धिभिः ।।
अतः परं यदव्यक्तमव्यूढगुणव्यूहितम् ।
अदृष्टाश्रुतवस्तुत्वात् स जीवो यत्पुनर्भवः ।।
यत्रेमे सदसद्रूपे प्रतिषिद्धे स्वसंविदा ।
अविद्ययाऽऽत्मनि कृते इति तद्ब्रह्मदर्शनम् ।।
यद्येषोपरता देवी माया वैशारदी मतिः ।
सम्पन्न एवेति विदुर्महिम्नि स्वे महीयते ।।
(श्लोक १, अ. ३, श्लोकाः ३०-३४)

अस्मात् स्थूलस्वरूपात्परम्भगवतः सूक्ष्ममव्यक्तञ्च रूपमस्ति यत्स्थूलवदाकारादिगुणवन्न भवति, न च द्रष्टुं श्रोतुं वा शक्यते तदेवास्ति सूक्ष्मशरीरम्। आत्मनोह्यारोपात् प्रवेशाद् वा एतदेव जीवसञ्ज्ञाँल्लभते। अस्यैव भूयो भूयः जनिर्भवति।

उपर्युक्ते सूक्ष्म-स्थूल-शरीरेऽत्राविद्ययैवाऽऽत्मन्यारोपिते स्तः। यदा च स्वात्मस्वरूपस्य ज्ञानादेष आरोपो दूरीभवति तदैव ब्रह्मणः साक्षात्कारोऽपि सम्पद्यते।

विदन्त्येव तत्त्वविदो यत्-यदैषा बुद्धि-स्वरूपिणी परमेश्वरस्य माया व्यपगच्छति, तदा जीवो परमानन्दमयो जायते, स्व-स्वरूप-महिम्नि च सर्वथा सुप्रतिष्ठितो भवति।

वस्तुतोऽत्र यस्य जन्म-कर्माणि नैव सन्ति,तस्य हृदयेश्वरस्य भगवतो प्राकृतानि जन्मानि कर्माणि च तत्त्वज्ञानिनो ह्येवमेव वर्णयन्ति। यतस्तस्य जन्मानि कर्माणि च वेदैरप्यपरिचितानि रहस्यमयानि च सन्ति।

वस्तुतस्तु परमात्मनि सर्वथाऽसन्त्यपि जन्मानि कर्माणि चाध्यस्यन्त इति प्रतिपादनादत्र वर्तते अध्यास-वादि-साङ्ख्यम्।

(६)

षड्वर्ग-वादि-सांख्यम्

श्रीमद्भागवतमहापुराणस्य तृतीये स्कन्धे तृतीयेऽध्याये षट्त्रिंशत्तमश्लोकतः समारभ्यैकोनचत्वारिंशत्तमं श्लोकं यावत्, भगवतोऽवतारान् वर्णयता श्रीसूतेन शौनकादिभ्यः षड्वर्गवादिसाङ्ख्यम्[1] समुपदिष्टमस्ति तच्चेत्थमवबोद्धव्यम्। यत्—

---

१. स वा इदं विश्वममोघलीलः सृजत्यवत्यत्ति न सज्जतेऽस्मिन्।
भूतेषु चान्तर्हित आत्मतन्त्रः षाड्वर्गिकं जिघ्रति षड्गुणेशः॥
न चास्य कश्चिन्निपुणेन धातुरवैति जन्तुः कुमनीष ऊतीः।
नामानि रूपाणि मनोवचोभिः सन्तन्वतो नटचर्यामिवाज्ञः।
स वेद धातुः पदवीं परस्य दुरन्तवीर्यस्य रथाङ्गपाणेः॥
योऽमायया सन्ततयानुवृत्त्या भजेत तत्पादसरोजगन्धम्॥
अथेह धन्या भगवन्त इत्थं यद्वासुदेवेऽखिललोकनाथे।
कुर्वन्ति सर्वात्मकमात्मभावं न यत्र भूयः परिवर्त उग्रः॥

(स्क० १, अ० ३, श्लोक ३६-३९)

श्रीभगवान् ह्यमोघलीलो वर्त्तते । सः लीलयैव सर्जन-पालन संहरणानि करोति परन्तानि भगवन्तमनुबद्धु-न्नैव शक्नुवन्ति। अर्थात् सर्वाण्यपि कार्याणि स्वसाक्ष्येण कारयन् कुर्वन्निव वर्त्तमानोऽपि तदनुसक्तो नैव भवतीति प्राणिनामन्तःकरणेषु छन्नः सन् ज्ञानेन्द्रियाणां मनसश्च नियन्तृरूपेण तद्विषयान् गृह्णन्नपि तेभ्यः सर्वदा पृथगेव तिष्ठति । सोऽयम्परम-स्वतन्त्रोऽस्ति । ह्येते विषयास्तमनुलेपयितुन्नार्हन्ति । अज्ञो जनः ऐन्द्रजालिक-सङ्कल्पेभ्यो नटसङ्कल्पेभ्यो तयोर्वचोभिर्वा क्रियमाणाश्चमत्कारकारिण्यः इव प्रतीयमानाः क्रियाः याथातथ्येनाववोद्धुन्नैव शक्नोति, तथैव स्वसङ्कल्पाद्वेदवाचा वा भगवता प्रकटीकृतानि नानानामानि नानारूपाणि च नैकधा क्रियमाणाः लीलाश्चाऽपि स्वल्प-मतिः जीवो बह्वीभिस्तर्कयुक्तिभिश्चापि नार्हति याथातथ्येन परिचेतुम् । चक्रपाणिनो भगवतः शक्ति-पराक्रमावनन्तौ स्तः। नार्हति वराको जीवस्तद्गाम्भीर्यमवगाढुम् । स सर्वस्य जगतो निर्माता सन्नपि तस्मात्सर्वथा परो वर्त्तते । तस्य स्वरूपं तस्य लीलायाः सुरहस्यञ्च स एव ज्ञातुम्प्रभवति यः प्रत्यहमनवरतन्निश्च्छद्मभावेन तस्य चरणकमलयोः दिव्यङ्गन्धं सेवते, तथा सेवाभावेन तच्चरणे च चिन्तयति ।

पञ्चज्ञानेन्द्रियाणि मनश्चेति षड्वर्गद्वारा भगवान् नैकविधाः लीलाः विदधातीत्यस्य विषयस्य प्रतिपादकत्वादत्र षड्वर्गवादिसाङ्ख्यमस्तीति निश्चप्रचम् ।

(७)

पुरुषाद्यता-वादि-साङ्ख्यम्

श्रीमद्भागवतस्य प्रथमे स्कन्धेऽष्टमेऽध्यायेऽष्टादशैकोनविंशतितमयोः श्लोकयो[1] र्भगवता श्रीकृष्णेन गर्भस्थस्य परीक्षितः सुरक्षा विहिता तदुद्दिश्य कुन्त्या च श्रीकृष्णस्य स्तुतौ पुरुषाद्यता-वादि-साङ्ख्यम्प्रतिपादितम् । तद्यथा—

भगवान् समेषामपि प्राणिनामन्तर्बहिश्च विराजमानः सर्वदा ह्येकरसस्तिष्ठति, एवं सर्वदा सर्वथा सर्वकालेषु सर्वत्र स्थितोऽपि सामान्यैरिन्द्रियैस्तेषां वृत्तिभिश्च द्रष्टुन्नैव

---

१. नमस्ये पुरुषं त्वाऽऽद्यमीश्वरं प्रकृतेः परम् ।
अलक्ष्यं सर्वभूतानामन्तर्बहिरवस्थितम् ।।
मायाजवनिकाच्छन्नमज्ञाधोक्षजमव्ययम् ।
न लक्ष्यसे मूढदृशा नटो नाट्यधरो यथा ।।

शक्यते। यतो भगवान् प्रकृतेः परो ह्यादिपुरुषः साक्षात्परमपिता परमेश्वरो वर्त्तते। इन्द्रियैर्यत्किञ्चित् ज्ञायते तस्यान्तः स्वयं भगवान् विराजमानोऽपि स्वमायया स्वमात्मानमावृत्य वर्तमानत्वान्नैव प्रत्यक्षीभवति। साधारणोऽयं जीवः सर्वथाऽविद्याऽन्धकार-विलुप्तदृक्कथञ्चिदपि तम्परमात्मानम्प्रत्यक्षीकर्त्तुन्नैव प्रभवति। अविनाशिनम्पुरुषोत्तमञ्ज्ञातुमपि कथं शक्नुयात् यथा साधारणाः जनाः वेषान्तरपरिधान-मात्रेणापि नटं प्रत्यक्षस्थमपि याथातथ्येन परिचेतुन्नैव शक्नुवन्ति, तथैव सर्वत्र वर्तमानमपि परमात्मानम्परिचेतुन्नैव शक्नुवन्तीति नाश्चर्यम्।

सोऽयं सर्वेश्वरः सर्वादिः सर्वकर्त्ता सर्वभर्त्ता सर्वान्तर्यामी च वर्त्तते।

उपर्युक्तेन प्रसंगेन स्पष्टीकृतमस्ति यत्-आद्योऽयं पुरुषः प्रकृतेः परः सर्वान्तर्यामी सन्नप्यनक्षिगोचरो भवति स एव चाऽस्ति सर्वाऽऽदिरिति वर्त्ततेऽत्र पुरुषाद्यता-वादि-साङ्ख्यमिति।

(८)

स्वसुख-कारणतावादि-साङ्ख्यम्

भगवन्तं श्रीकृष्णचन्द्रं स्तुवता श्रीभीष्मपितामहेन श्रीमद्भागवतमहापुराणस्य प्रथमे स्कन्धे नवमेऽध्याये द्वात्रिंशत्तमे श्लोके स्व-सुख-कारणता- वादि-साङ्ख्यम् प्रतिपादितम्[1]। तद्यथा –

सम्प्रति प्रयाणवेलायां भीष्मोऽहं स्वीयां नैकविध-साधनाऽनुष्ठानैः सर्वथा विशुद्धान्निष्कामाम्मतिं यदुशिरोमणेः श्रीकृष्णचन्द्रस्य चरणारविन्दयोः समर्पये। यः सर्वदा सर्वथा स्वीये ह्यानन्दमये स्वरूपे स्थितः सन्नपि कदाचिद् विहरणेहया लीलेहला च प्रकृतिं स्वीकरोति। ययैषा सृष्टि-परम्परा प्रचलति।

श्लोकेऽस्मिन् सृष्टेः कारणत्वेन भगवतः लीला-विहारावेव प्रतिपादितौ स्तः अर्थात् भगवान् प्रकृतिङ्केवलं स्वान्तःसुखायैवो ररीकरोति। अतः परमात्मनः स्व-सुखातिरिक्तङ्किमपि सर्जन-पालन-संहरण-क्रियाणाङ्कारणन्नास्ति। अतएव वक्तुं शक्यते यदत्र स्वसुख-कारणता-वादि-साङ्ख्यमस्तीति।

---

१. इति मतिरूपकल्पिता वितृष्णा भगवति सात्वतपुङ्गवे विभून्मि।
स्वसुखमुपगते क्वचिद्विहर्तुं प्रकृतिमुपेयुषि यद्भवप्रवाहः॥
(स्क. १, अ. ९, श्लोक. ३२)

(६)

अविशेषात्म-वादि-साङ्ख्यम्

श्रीकृष्णस्य द्वारिका-गमन-प्रसङ्गे श्रीकृष्णानुरक्तचित्तानाङ् कौरवेन्द्रस्त्रीणा-परस्पराऽऽलापे श्रीमद्भागवतमहापुराणस्य प्रथमे स्कन्धे दशमेऽध्याये ह्येकविंशत्तम-श्लोकतः समारभ्य त्रयोविंशत्तमं श्लोकं यावत् अविशेषात्मवादि-साङ्ख्यमस्ति[1]। तच्चेत्थम्'''

अयं स एव सनातनः परम-पुरुषोऽस्ति यः प्रलय-वेलायां स्वीयेऽद्वितीयेऽनिर्विशेष स्वरूपे तिष्ठति, तदा सृष्टेः मूलभूतास्त्रयोऽपि गुणाः परमात्मन्येव तिष्ठति, जगदात्मनि तस्मिन् परे ब्रह्मणि जीवाश्चापि विलीयन्ते स्थूल-भूतानि समारभ्य महत्तत्त्वं यावन्ति तत्त्वानि स्वे-स्वे कारणे लीनानि भवन्ति । तस्यां वेलायां सर्वत्र सर्वमपि प्रसुप्तमिव भवति ।

स एव परमपुरुषः स्वीये नामरूपरहिते स्वरूपे लीलया नामरूपे कल्पयितुमियेष तथा स्व-काल-शक्ति-प्रेरिताप्रकृतिमनुसार । या हि प्रकृतिः परमपुरूषांशभूतान् जीवान् मोहयन्ती सर्जने प्रवृत्ताऽभवत् । तदनन्तरं व्यवहाराय वेदानरचयत् ।

अस्मिन् जगति यस्य स्वरूपं जितेन्द्रियाः योगिनः स्वप्राणान् वशीकृत्य भगवद् भक्ति-प्रफुल्लिते विशुद्धे स्वान्ते साक्षात्कुर्वन्ति । असौ श्रीकृष्णः साक्षात्परमम्ब्रह्म वर्त्तते । वस्तुतोऽस्य परमात्मनः परमया भक्त्यैवान्तःकरणस्य शुद्धिः सर्वथा भवितु-मर्हति । इत्यादिकेन कथनेन स्पष्टीभवति यदस्य जगतः मूलकारणं स्वीये निर्विशेषस्वरूपे स्थितः परमात्मा श्रीकृष्ण एवेति वक्तुं शक्यते यदत्र मूलकारणत्वेन निर्विशेषोऽयमा-त्मैव गृहीतरित्यतोऽत्र निर्विशेषाऽऽत्मवादि साङ्ख्यमस्तीति शम् ।

---

१. स वै किलायं पुरुषः पुरातनो य एक आसीदविशेष आत्मनि ।
अग्रे गुणेभ्यो जगदात्मनीश्वरे निमीलितात्मन्निशि सुप्तशक्तिषु ।।
स एव भूयो निजवीर्य चोदितां स्वजीवमायां प्रकृतिं सिसृक्षतीम् ।
अनामरूपात्मनि रूपनामनी विधित्समानोऽनुससार शास्त्रकृत् ।।
स वा अयं यत्पदमत्र सूरयो जितेन्द्रिया निर्जितमातरिश्वनः ।
पश्यन्ति भक्त्युत्कलितामलात्मना नन्वेष सत्त्वं परिमार्ष्टुमर्हति ।।
(स्क. १, अ. १०, श्लोक. २१-२३)

(१०)

षोडशिपुरुषकारणतावादि साङ्ख्यम्

राज्ञा परीक्षिता सृष्टिविषयके प्रश्ने कृते सति तत्समाधानङ्कुर्वता शुकेन श्रीमद्भागवतस्य द्वितीये स्कन्धे चतुर्थेऽध्याये त्रयोविंशतितमे श्लोके षोडशपुरुषकारणतावादि साङ्ख्यम्प्रतिपादितम्[1] । तद्यथा—

भगवानेव-पञ्चमहाभूतैः शरीराण्येतानि सर्वाण्यपि निर्माय सर्वेष्वप्येतेषु जीवरूपेण स्वपिति, तथा चेह पञ्च ज्ञानेन्द्रियाणि पञ्च कर्मेन्द्रियाणि, पञ्च प्राणाः मनश्चैकमित्येताभिः षोडशकलाभिर्युक्तः सन् ह्येभिरेव षोड़शविषयानुपभुङ्क्ते। सोऽयं सर्वभूतमयो भगवान् मम वाचं स्वगुणैरलङ्करोतु।

श्लोकेऽमुष्मिन् पुरुषः ज्ञानेन्द्रिय-कर्मेन्द्रिय प्राणमनांसीति षोड़शकलाः समाश्रित्य समग्रानपि विषयानुपभुङ्क्त इति वर्णनाद् वयन्निश्चिनुमो यदत्र षोड़शि-पुरूषवादिसाङ्ख्यमस्तीति सुनिश्चितमेवेति स्वीकार्यम्।

(११)

षण्मूलोपकरणसहितं ब्रह्मकारणतावादि साङ्ख्यम्

सृष्टिवर्णनप्रसङ्गे श्रीनारदस्य प्रश्ने श्रीमद्भागवतस्य द्वितीये स्कन्धे पञ्चमेऽध्यायेचतुर्थपंचमश्लोकयोः षण्मूलोपकरणसहितम्ब्रह्मकारणतावादिसाङ्ख्यम्प्रतिपादितम् तद्यथा[2] ब्रह्मैकाक्येव स्वमायया पञ्चमहाभूतैः प्राणिनां सृष्टिंङ्करोति, यथोर्णनाभिविनैवाऽऽसेनस्वमुखाज्जालं निःसार्य तस्मिन् क्रीडति, तथा स्वस्मात्[2] शरीरात् तन्तुः निःसार्य तदेव समालम्ब्य यथेच्छङ्क्रीडति पुनःश्च स्वस्मिन् तन्तुन्तं लीनयति, तथैव

---

1. भूतैर्महद्भिर्य इमाः पुरो विभुर्निर्माय शेते यदमूषुः पूरुषः।
भुङ्क्ते गुणान् षोडश षोडशात्मकः सोऽलङ्कृषीष्ट भगवान् वचांसि मे ।।
(स्क.२ अ.४ श्लोक २३)

२. यद् विज्ञानो यदाधारो यत्परस्त्वं यदात्मकः।
एकः सृजसि भूतानि भूतैरेवात्ममायया ।।
आत्मन् भावयसे तानि न पराभावयन् स्वयम्।
आत्मशक्तिमवष्टम्य ऊर्णनाभिरिवाक्लमः ।।
(स्क. अ. ५ श्लो. क,४-५)

ब्रह्माऽपि स्वशक्तिमाश्रित्य जीवान् स्वास्मिन्नेवोत्पादयति, तथापि न कोऽपि विकार स्तस्मिन् दृश्यते । इत्येतस्मिन् प्रसङ्गे ब्रह्मैव मूलकारणन्तथा माया, पञ्चमहाभूतानीति षडन्यानि मूलोपादानानि सन्ति, इति प्रतिपादितम् एतेन सिध्यति यदिह षण्मूलोपादान सहितम्ब्रह्मकारणतावादि साङ्ख्यमत्रास्तीति शम् ।

(१२)

द्रव्यादिपञ्चकस्य भगवत्यन्तर्भावंवादि साङ्ख्यम्:

सृष्टिवर्णनप्रसङ्गे श्रीमद्भागवतस्य द्वितीयस्कन्धे पंचमेऽध्याये चतुर्दशे श्लोके श्रीब्रह्मणा द्रव्यादिपञ्चकस्य भगवत्यन्तर्भाववादि साङ्ख्यं समुपदिष्टम्[1] । तद्यथा—

द्रव्यङ्कर्म, काल:, स्वभाव,: जीवश्चेति पञ्चाऽपि वस्तुतो भगवत: न कथञ्चिदपि भिद्यन्ते । यतोऽत्र तत्त्वतो भगवदतिरिक्तङ्किमपि वस्तु क्वाऽपि नैव वर्त्तते इत्यादिप्रसङ्गेन स्फुटितम्भवति तथ्यमिदँ यदिह नारायणाऽतिरिक्तन्नास्ति किमपि वस्तु इत्येतस्माद्धेतो: वक्तुं शक्यते यदत्र केचन द्रव्यकारणवादिनो, वर्त्तन्ते तदितरे केचन कर्मकारणवादिनः सन्ति तदतिरिक्ताश्च केचन कालकारणवादिनो भवन्ति केचन चेह स्वभावकारणवादिनः केचन चेह जीवकारणवादिनः सन्ति किन्तु ते समेऽपि नामान्तरेण तत्तत्स्वरूपे विद्यमानं भगवन्तमेव कारणम्मन्वते । यतोऽत्र भगवदतिरिक्तन्नास्ति द्रव्यादिकङ्किमपीत्यतो वक्तुं शक्यते यदत्र द्रव्यादिपञ्चकम्भगवत्यन्तभर्वतीत्यन्न द्रव्यादिपञ्चकस्य भगवत्यन्तर्भाववादि साङ्ख्यमस्तीति सुनिश्चितरूपेण वक्तुं शक्यते एवेति शम् ।

(१३)

काल-कारणकं साङ्ख्यम्

सृष्टि-वर्णन-प्रसङ्गे विराट्स्वरूपस्य विभूतिवर्णनप्रसङ्गेन श्रीमद्भागवतस्य द्वितीये स्कन्धे पचमाऽध्यायस्य सप्तदशश्लोकतः समारभ्य षष्ठाध्यायस्य द्वात्रिशत्तमंश्लोकं यावत् श्रीब्रह्मा नारदम्प्रति सर्वविलक्षणङ्काल-कारणकं साङ्ख्यम्प्रतिपादयामास ।

---

१. द्रव्यं कर्म च कालश्च स्वभावो जीव एव च ।
वासुदेवात्परो ब्रह्मन्न चाऽन्योऽस्ति तत्त्वतः ।।
(स्क. २अ: ५, श्लो. क.१४)

तद्दथा[१]—

सोऽयङ्केवलन्द्रष्टा सन्नपि वर्त्तते ईश्वरः। स्वयं सर्वथा निर्विकारः सन्नपि सर्वस्वरूपो वर्त्तते। स एव ब्रह्माणमसृजत्। तस्य दृशैव प्रेरितस्तस्येहामनुसरन्नेव ब्रह्माऽपि सृजति। भगवान् मायागुणैः सर्वथा विहीनोऽनन्तश्च वर्त्तते। सृष्टि-स्थिति-लयेभ्यश्चेह सत्त्वरजस्तमांसीति त्रयोऽपिगुणास्तस्मिन् परमात्मनि मायया स्वीक्रियन्ते। एते त्रयोऽपिगुणा एव द्रव्य-ज्ञान-क्रियाः समाश्रित्य मायातीतन्नित्यमुक्तमपि पुरुषम्मायायां स्थितङ्कार्य कारण-कर्तृत्वेन तथा चेह तदभिमानेन बध्नन्ति। इन्द्रिया-तीतोऽयम्भगवान् गुणरूपैस्त्रिभिरावरणैश्च स्व-स्वरूपं सम्यक्प्रकारेण छन्नङ्करोति। अतएव जनास्तम्परमात्मानंतत्त्वतो ज्ञातुन्नैव शक्नुवन्ति। समग्रस्यापि जगतः स एक एव स्वामी वर्त्तते।

मायापतिः भगवान् एक एवैकस्माद्रूपादेवानेकस्वरूपाणि धारयितुमीहया बहुबुभूषायां मायया स्व-स्वरूपे स्वयमेव प्राप्तान् काल-कर्म-स्वभावान् स्वीचकार। भगवच्छक्त्यैव कालस्त्रीनपि गुणान् क्षोभयामास। स्वभावस्तान् रूपान्तरिताञ्चकार तथा कर्ममहत्तत्त्वञ्च प्रकटीचकार। रजोगुणस्य तमोगुणस्य च वृद्धौ महत्तत्त्वस्य यो विकारः समजायत-तस्माज्ज्ञान-क्रिया-द्रव्य-रूपात्मकस्तमः प्रधानो विकारो बभूव।

---

१. तस्यापि द्रष्टुरीशस्य कूटस्थस्याखिलात्मनः।
सृज्यं सृजामि सृष्टोऽहमीक्षयेवाभिचोदितः॥
सत्त्वं रजस्तम इति निर्गुणस्य गुणास्त्रयः।
स्थिति-सर्ग-निरोधेषु गृहीता मायया विभोः॥
कार्यकारणकर्त्तृत्वे द्रव्यज्ञानक्रियाश्रया।
बध्नन्ति नित्यदा मुक्तं मायिनं पुरुषं गुणाः॥
स एष भगवाँल्लिङ्गैस्त्रिभिरेभिरधोक्षजः।
स्वलक्षितगतिर्ब्रह्मन् सर्वेषां मम चेश्वरः॥
कालं कर्म स्वभावं च मायेशो मायया स्वया।
आत्मन् यदृच्छया प्राप्तं विबुभूषुरुपाददे॥
कालाद् गुणव्यतिकरः परिणामः स्वभावतः।
कर्मणो जन्म महतः पुरुषाधिष्ठितादभूत्॥
महतस्तु विकुर्वाणाद्रजः सत्त्वोपबृंहितात्।
तमःप्रधानस्त्वभवद् द्रव्यज्ञानक्रियात्मकः॥
सोऽहंकार इति प्रोक्तो विकुर्वन् समभूत्त्रिधा।
वैकारिकस्तैजसश्च तामसश्चेति यद्भिदा॥
द्रव्यशक्तिः क्रियाशक्तिर्ज्ञानशक्तिरिति प्रभो॥

स एव 'अहङ्कारः' इति निगद्यते । तथाऽसौ विकृतिमधिगत्य वैकारिकः, तैजसः, तामसश्चेति त्रिधा सम्बभूव । वैकारिके ज्ञानशक्तिः तैजसे क्रियाशक्तिः, तामसे च द्रव्य-शक्तिः प्राधान्येनावतिष्ठते । यदा पञ्चमहाभूतानाङ्कारणभूते तामसेऽहङ्कार विकारः समजायत[1] तदा तस्मादाकाशः समुद्बभूव, आकाशस्य तन्मात्रङ्गुणश्च शब्दोऽस्ति, शब्देनैव द्रष्टृदृश्ययोः समवरोधो भवति । यदाकाशे विकारः समभूत् तदा तस्माद् वायुरूद्बभूव । यस्य गुणः स्पर्शोऽस्ति तथा स्वकारणभूतस्याऽऽकाशस्य गुणः शब्दोऽपि सहैव भवति, इत्थं वायौ शब्दस्पर्शौ भवतः । प्राणौजः बलानीति वायोः स्वरूपाणि सन्ति । कालकर्म-स्वभावैः वायावपि विकारः समभूत् तस्मात्तेजः समुद्बभूव, यस्य प्रधानो गुणः स्वरूपमस्ति तथा चाऽस्मिन् स्वकारण-कारणभूतस्याऽऽकाशस्य गुणः शब्दो भवति, एवमेव स्वकारणभूतस्य वायोः गुणः स्पर्शोऽपि भवतीति तेजसि शब्द-स्पर्श-रूपाणीति त्रयो गुणाः भवन्ति । तेजसो विकाराज्जलमजायत, यस्य प्राधान्येन तु गुण रसो भवति, किन्तु कारण-पारम्परिकाः गुणाश्चापि भवन्त्येवेति जले शब्दस्पर्श-रूप-रसाः भवन्ति, जले जातायां विकृतौ जलात् पृथिवी समुद्बभूव । पृथिव्याः गुणो गन्धो भवति, परन्तु तेन सहैव पूर्वोक्तानां साक्षात्परम्परया च कारणभूतानां भूतानामपि गुणाः समुल्लसन्तीति पृथिव्यां शब्द-स्पर्शरूप-रस गन्धाः भवन्ति ।

वैकारिकादहङ्कारात् मनसः ज्ञानेन्द्रिय-कर्मेन्द्रियाधिष्ठातृ-देवतानामप्युत्पत्तिः सम्बभूव । तेषामूरू वैश्याः पादौ च शूद्राः सन्ति । पद्भ्यां समारभ्य कटिपर्य्यन्तं सप्त-पाताल-लोकाः सन्ति, तथाभूलोकश्च कल्पितोऽस्ति, नाभौ भुवर्लोकः, हृदये स्वर्गलोकः, वक्षःस्थले महर्लोकः, कण्ठे जनलोकः, उभयोः स्तनयोस्तपोलोकः, मस्तके च ब्रह्मणो नित्य-निवास-भूः सत्यलोकोऽस्ति । तस्य विराट्पुरुषस्य कट्यामतललोकः, उर्वोः वितललोकः, जान्वोः परमपूतः सुतललोकः, जंघयोस्तलातललोकः, पादतलयोश्च पाताललोकोऽस्ति प्रकारेणानेन विराट्-पुरुषः सर्वलोकमयो वर्त्तते ।

तामसादपि भूतादेर्विकुर्वाणादभून्नभः ।
तस्य मात्रा गुणः शब्दो लिङ्गं यद्द्रष्टृदृश्ययोः ।।
नभसोऽथ विकुर्वाणादभूत्स्पर्शगुणोऽनिलः ।
परान्वयाच्छब्दवाँश्च प्राण ओजः सहो बलम् ।।
वायोरपि विकुर्वाणात्कालकर्म स्वभावतः ।
उदपद्यत तेजो वै रूपवत्स्पर्शशब्दवत् ।।
तेजसस्तु विकुर्वाणादासीदम्भो रसात्मकम् ।
रूपवत्स्पर्शवच्चाम्भो घोषवच्च परान्वयात् ।।
विशेषस्तु विकुर्वाणादम्भसो गन्धवानभूत् ।
परान्वयाद्रसस्पर्शशब्दरूपगुणान्वितः ।।

नामानि-दिग्वायुः सूर्यो, वरुणोऽश्विनीकुमारावग्निरिन्द्रो विष्णुर्मित्रः प्रजापतिश्चेति सन्ति ।

तैजसादहङ्कारात् विकृताच्छोत्रत्वङ्नेत्रजिह्वाघ्राणश्चेति पञ्चज्ञानेन्द्रियाणि तथा वाक्पाणिपादपायूपस्थेति पञ्चकर्मेन्द्रियाणि जज्ञिरे । सहैव ज्ञानशक्तिस्वरूपिणी बुद्धिः क्रियाशक्तिस्वरूपी प्राणश्चाजायत ।

यदेतानि पञ्चमहाभूतानि दशेन्द्रियाणि, मनः, सत्त्वादयस्त्रयोगुणाश्च परस्परं सङ्गठिताः नासन् तथा स्वनिवासाय भोगानां साधनरूपाणि शरीराणि च रचयितु न्नैव शेकुः, तथा च यदा भगवान् स्वशक्त्या महाभूतादीनि प्रैरयत्, तदा तानि तत्त्वानि परस्परम्मिश्रितान्यभूवन्, तथा तान्यन्योऽन्यकार्यकारणभावान् व्यष्टि-समष्टि-रूपेण पिण्ड-ब्रह्माण्डाववासृजन् । तद् ब्रह्माण्डं सहस्रवर्षपर्य्यन्तं निर्जीवरूपेण जलेऽतिष्ठत् तत्पश्चात् काल-कर्म स्वभावान् स्वीकुर्वता भगवता तत् सजीवतां नीतम् । तदण्ड-निर्माय साक्षात् विराट्पुरुषः स्वयमेव निःससार यस्योरुवाक्पाणिपादचक्षुःश्रोत्रवदन

वैकारिकान्मनो जज्ञे देवा वैकारिका दश ।
दिग्वातार्क प्रचेतोऽश्विवह्नीन्द्रोपेन्द्रमित्रकाः ।।
तैजसात्तु विकुर्वाणादिन्द्रियाणि दशाभवन् ।
ज्ञानशक्तिः क्रियाशक्ति बुद्धिः प्राणश्च तैजसौ ।।
श्रोत्रं त्वग्घ्राणदृग्जिह्वावाग्दोर्मेढ्राङ्घ्रिपायवः ।।
यदैतेऽसङ्गता भावा भूतेन्द्रियमनोगुणाः ।
यदायतननिर्माणे न शेकुर्ब्रह्मवित्तमः ।।
तदा संहत्य चान्योऽन्यं भगवच्छक्तिचोदिताः ।
सदसत्त्वमुपादाय चोभयं ससृजुर्ह्यदः ।।
वर्षपूगसहस्रान्ते तदण्डमुदकेशयम् ।
कालकर्मस्वभावस्थो जीवोऽजीवमजीवयत् ।।
स एव पुरुषस्तस्मादण्डं निर्भिद्य निर्गतः ।
सहस्रोर्वङ्घ्रिबाह्वक्षः सहस्राननशीर्षवान् ।।
यस्येहावयवैर्लोकान् कल्पयन्ति मनीषिणः ।
कट्यादिभिरधः सप्त सप्तोर्ध्वं जघनादिभिः ।।
पुरुषस्य मुखं ब्रह्म क्षत्रमेतस्य बाहवः ।
ऊर्वोर्वैश्यो भगवतः पद्भ्यां शूद्रोऽभ्यजायत ।।
भूर्लोकः कल्पितः पद्भ्यां भुवर्लोकोऽस्य नाभितः ।
हृदा स्वर्लोक उरसा महर्लोको महात्मनः ।।

शिरांसि सङ्ख्यायां सहस्रशः सन्ति । मनीषिणस्तस्याङ्गेष्वेवोपासनार्थं समग्रान् लोकान् वस्तूनि च कल्पयन्ति । तस्य कटेरधोभागे स्वर्गेष्वतल-वितल-सुतल-तलातल-महातल-रसातल-पाताललोकाः सन्ति । तथा चोर्ध्वं भूर्लोक-भुवर्लोक-स्वर्लोक-महर्लोक-जनोलोक-तपोलोक-सत्यलोकाः सन्ति । तदिदम्ब्रह्मणो विराट्स्वरूपमस्ति । ब्राह्मणा स्तस्य मुखानि सन्ति, क्षत्रियास्तस्य बाहवः सन्ति । तस्योरू वैश्याः सन्ति, पादौ च शूद्राः सन्ति । पद्भ्यां समारभ्य कटिप्रदेशं यावत् सप्तपाताल-लोकाः सन्ति । तथा भूलोकश्च कल्पितोऽस्ति । नाभौ भुवर्लोकः, हृदये स्वर्गलोकः,वक्षःस्थले महर्लोकः, कण्ठे जनोलोकः, उभयोस्स्तनयोस्तपोलोकः, मस्तके च ब्रह्मणो नित्य-निवास-भूः सत्यलोकोऽस्ति । तस्य विराट्पुरुषस्यः कट्यांमतललोकः, उर्वोः वितललोकः, जान्वोः परमपूतः सुतललोकः, जङ्घयोः तलातललोकः, पादतलयोश्च पाताललोको वर्त्तते । प्रकारेणानेन विराट्पुरुषः सर्वलोकमयो वर्त्तते ।

ग्रीवायां जनलोकश्च तपोलोकः स्तनद्वयात् ।
मूर्धभिः सत्यलोकस्तु ब्रह्मलोकः सनातनः ।।
तत्कट्यां चातलं क्लृप्तमूरुभ्यां वितलं विभोः ।
जानुभ्यां सुतलं शुद्धं जङ्घाभ्यां तु तलातलम् ।।
महातलं तु गुल्फाभ्यां प्रपदाभ्यां रसातलम् ।
पातालं पादतलत इति लोकमयः पुमान् ।।
भूर्लोकः कल्पितः पद्भ्यां भुवर्लोकोऽस्य नाभितः ।
स्वर्लोकः कल्पितो मूर्ध्ना इति वा लोककल्पना ।।

(स्क.2, अ. 5,श्लोकाः 17-42)

वाचां वह्नेर्मुखं क्षेत्रं छन्दसां सप्तधातवः ।
हव्यकव्यामृतान्नानां जिह्वासर्वरसस्य च ।।
सर्वासूनां च वायोश्च तन्नासे परमायने ।
अश्विनोरोषधीनां च घ्राणो मोदप्रमोदयोः ।।
रूपाणां तेजसां चक्षुर्दिवः सूर्यस्य चाक्षिणी ।
कर्णौ दिशां च तीर्थानां श्रोत्रमाकाशशब्दयोः ।।
तद्गात्रं वस्तुसाराणां सौभगस्य च भाजनम् ।।
त्वगस्य स्पर्शवायोश्च सर्वमेधस्य चैव हि ।
रोमाण्युद्भिज्जजातीनां यैर्वा यज्ञस्तु सम्भृतः ।।
केशश्मश्रुनखान्यस्य शिलालोहाभ्रविद्युताम् ।
बाहवो लोकपालानां प्रायशः क्षेमकर्मणाम् ।
विक्रमो भूर्भुवः स्वश्च क्षेमस्य शरणस्य च ।

विराट्पुरुषस्याङ्गेष्वेवमपि, लोक-कल्पना क्रियते यत्—तस्यचरणयोः पृथिवी वर्त्तते। नाभौ भुवर्लोकोऽस्ति, शिरसि च स्वर्गलोको विराजते।

तस्यैव विराट्पुरुषस्य मुखाद्वाणी तस्याधिष्ठातृदेवताऽग्निश्चाजायत। गायत्री, त्रिष्टुप्, अनुष्टुप्, उष्णिक् बृहती, पङ्क्तिः; जगतीति सप्त छन्दांसि विराट् पुरुषस्य सप्तधातुभ्यो जायन्ते। मनुष्यपितृदेवानां भोजनार्हममृतमयमन्नं सर्वप्रकारकाः रसाः, रसनेन्द्रियाणि तेषामधिष्ठातृदेवता वरुणश्चेति सर्वे विराट् पुरुषस्य रसनायाः समजायन्त। विराट्पुरुषस्य नासारन्ध्रेभ्यश्च प्राणापानव्यानोदानसमानाख्याः पञ्चवायवः समजायन्त। घ्राणेन्द्रियादश्विनीकुमारौ समस्तारोषधयः साधारणाः सुविशिष्टाश्च गन्धाः समजायन्त। विराट्पुरुषस्य चक्षुरिन्द्रियाद्रूपतेजसी चाजायताम्। नेत्रगोलकाभ्याञ्च स्वर्ग-सूर्यावजायताम्। श्रोत्रेन्द्रियादाकाशस्तद्गुणः शब्दश्चाजायताम, दिशः सर्वथा पावनानि तीर्थस्थानानि चपि कर्णकुहरेभ्योऽजायन्त, विराट्-पुरुषस्य शरीरमेतत् सर्वेष्वपि लोकेषु वर्त्तमानानां सर्वसामपि वस्तूनां तत्त्वस्य मनोज्ञतायाश्च परमन्निधानमस्ति। यज्ञाः, स्पर्शाः, वायवश्च, विराट्पुरुषस्य त्वग्भ्यो विनिःसृताः सन्ति। तस्य समेषामपि पृथिवीमुद्भिद्यजायमानानां पदार्थानां जनन-स्थानानि सन्ति। विराट्पुरुषस्य लोम-श्मश्रु-नखेभ्यश्च मेघाः विद्युतः शिलायसादिधातवश्च समजायन्त। भगवतः श्रीविराट्पुरुषस्य बाहुभ्यः जगतां रक्षितारः सर्वेऽपि लोकपालाः प्रादुर्बभूवुः। विराट्पुरुषस्य चलनानि चक्रङ्‌मणानि च भूर्भुवःस्वरामाश्रयभूतानि वर्त्तन्ते। भगवच्चरणारविन्दानुग्रहाः शरणागतानसर्वान् सर्वथा संरक्षन्ति, समेषामपि भक्तानाम्भयान्यपाकुर्वन्ति। तथा च सर्वाः कामनाः परिपूरयन्ति। विराट्पुरुषस्य लिङ्गन्जल-वीर्यमेघ-सृष्टि-प्रजापतीनामाधारोऽस्ति। तथा चास्य जननेन्द्रियं मैथुनजनितानन्दस्योद्गतिरस्ति। विराट्पुरुषस्य पाय्विन्द्रियं यम्।

सर्वकामवरस्यापि हरेश्चरण आस्पदम्॥
अपां वीर्यस्य सर्गस्य पर्जन्यस्य प्रजापतेः।
पुंसः शिश्न उपस्थस्तु प्रजात्यानन्दनिर्वृतेः॥
पायुर्यमस्य मित्रस्य परिमोक्षस्य नारद।
हिंसाया निर्ऋतेर्मृत्योर्निरयस्य गुदः स्मृतः॥
पराभूतेरधर्मस्य तमसश्चापि पश्चिमः।
नाड्यो नदनदीनां तु गोत्राणामस्थिसंहतिः॥
अव्यक्तरससिन्धूनां भूतानां निधनस्य च।
उदरं विदितं पुंसो हृदयं मनसः पदम्॥

यम-मित्रयोश्चोत्पत्तिस्थानमस्ति मलत्यागस्य चापि चोत्पत्तिस्थानमस्ति। विराट् पुरुषस्य पृष्ठतः पराजयाधर्माज्ञानानि नाडिभ्यश्च नद्यो नदाश्चाजायन्त अस्थिभ्यो पर्वताश्चाप्यजायन्त। यस्य महापुरुषस्योदरे मूलप्रकृतिः, रसाख्यो धातुः, समुद्रं सर्वेऽपिप्राणिनः, प्राणिनां मृत्यवश्चा पिच व्याप्ताः सन्ति। तदन्तःकरणमेव मनसः जननभूः वर्त्तते। ब्रह्मा, नारदो, धर्मः, सनकादयः, शङ्करः, विज्ञानमन्तःकरणञ्चेति, सर्वेऽपि-तस्य चेतांसि समाश्रयन्ते। देवताः, दैत्याः, मानवाः, नागाः, पक्षिण, मृगाः, सरीसृपाः, गन्धर्वाः, सदप्सरसो, यक्षाः, राक्षसाः, प्रेताः, सर्पाः, पशवः, पितरः, सिद्धाः, विद्याधराः, चारणाः, वृक्षास्तथान्येऽपि बहवः नैकधा नैकविधासु योनिषु वर्त्तमानाः जीवाः येऽन्ता-ऽऽकाशे जले स्थले वा निवसन्ति ते सर्वेऽपि विराट्पुरुष एवान्तर्भवन्तीति। ग्रहनक्षत्र-केतुताराविद्युन्मेघादयोऽपि विराट् पुरुष एव विराजन्ते। समग्रमेतज्जगद्यथाऽऽसीद्वर्त्तते भविष्यति वा तत् सर्वं विराट्पुरुषेणावृत्तमस्ति। तस्मिन्नेतद्विश्वन्दशाङ्गुल-मात्रके तिष्ठति। अर्थात् तस्य स्वल्पीयसि स्थाने वर्त्तते इति। यथा सूर्यः स्वयं-मण्डलम्प्रकाशयन्नेव बहिः प्रकाशते, तथैव पुराणपुरुषः परमात्माऽपि समग्रं विराड्विग्रह-म्प्रकाशयन्नेव तदन्तर्बहिश्च सर्वत्र प्रकाशते। यत्किंचिन्मानवस्य क्रियाभिः संकल्पैश्च कर्तुं शक्यते, ततोऽपि सः परो वर्त्तते। अमृतमोक्षयोः स्वामी च स एव परमात्मा वर्त्तते। सर्वे प्राणिनः श्रीमतः परमपितुः परमेश्वरस्यांशमात्रभूताः सन्ति। अंशिनि तस्मिन् सर्वे प्राणिनः सर्वथैकदेश एव विराजन्ते। भूर्भुवः स्वर्लोकानामूर्ध्वम्महर्लो-कोऽस्ति, ततोऽप्यूर्ध्वं जनस्तपः सत्यलोकानां भुवि क्रमशोऽमृतस्य क्षेमस्याऽभयस्य च

धर्मस्यः मम तुभ्यं च कुमाराणां भवस्य च।
विज्ञानस्य च तत्त्वस्य परस्यात्मा परायणम्॥
अहं भगवान् भवश्चैव त इमे मुनयोऽग्रजाः।
सुरासुरनरानागाः खगा मृगसरीसृपाः॥
गन्धर्वाप्सरसो यक्षा रक्षोभूतगणोरगाः।
पशवः पितरः सिद्धा विद्याध्राश्चारणा द्रुमाः॥
अन्ये च विविधा जीवा जलस्थलनभौकसः।
ग्रहर्क्षकेतवस्तारास्ताडितः स्तनयित्नवः॥
सर्वं पुरुष एवेदं भूतं भव्यं भवच्च यत्।
तेनेदमावृतं विश्वं वितस्तिमधितिष्ठति॥
स्वधिष्ण्यं प्रतपन् प्राणो बहिश्च प्रतपत्यसौ।
एवं विराजं प्रतपंस्तपत्यन्तर्बहिः पुमान्॥
सोऽमृतस्याभयस्येशो मर्त्यमन्नं यदत्यगात्।
महिमैष ततो ब्रह्मन् पूरुषस्य दुरत्ययः॥

नित्यनिवासो वर्त्तते। जनस्तपः सत्यलोकेषु ब्रह्मचारिणः, वानप्रस्थाः, संन्यासिनश्च वसन्ति। ब्रह्मचर्यात् पृथग्भूताः गृहस्थाः भूर्भुवःस्वराख्येष्वेव लोकेषु, वसन्ति।

शास्त्रेषु सद्गति-प्रापकौ द्वौ पन्थानौ निर्दिष्टौ वर्त्तेते तयोः सकामपुरुषेभ्यः समुपदिष्टो कर्मपन्था वर्त्तते ह्येकतरो, अन्यतरश्चास्ति निष्कामेभ्यः सदुपासकेभ्यः समुपदिष्टो विद्यापन्था ज्ञानमार्गः। मानवश्चानयोः मार्गयोः कञ्चिदाश्रित्य स्वेष्टं साधयितुं शक्नोति भोगप्रदायकाद् दक्षिणात् पथः, मोक्षप्रदायकादुत्तरस्मात् पथो वा प्राणिनो निर्गच्छन्ति। भगवान् परमपुरुषः पुरुषोत्तमस्तूभयोश्चापि मार्गयोराधारभूतो विराजते। यथा सूर्यः स्वकिरणेभ्यः सर्वान् प्रकाशयन्नपि सर्वेभ्यः पृथग्विराजते। तथैव यस्मात् परमात्मनोऽण्डस्यास्य, पञ्चभूतानामेकादशेन्द्रियाणाङ् गुणमयस्य विराट्पुरुषस्य चोद्भूतिः समभूत्। प्रभुः सः सर्वेषु वस्तुषु वर्तमानो वस्तुस्वरूपी सन्नपि सर्वेभ्यो वस्तुभ्योऽतीतो भवति।

यदा विराट् पुरुषस्य नाभिकमलात् स्रष्टुर्ब्रह्मणः समुद्भूतिः समजायत, तदा विराट्पुरुषस्याङ्गानि विहाय केऽपि यज्ञ-सम्भाराः नाधिगताः। तदा ब्रह्मा विराट्पुरुषस्य विग्रहे यज्ञान्, पशून्, यूपान् कुशाः, यज्ञभूमीर्यज्ञार्थोत्तमकालांश्च कल्पयामास। यज्ञार्थमावश्यकानि पात्रादीनि यव-तण्डुल-घृतादीन् पदार्थान् षड्रसान्, आंयसि,

---

पादेषु सर्वभूतानि पुंसः स्थितिपदो विदुः।
अमृतं क्षेममभयं त्रिमूर्ध्नोऽधायि मूर्धसु॥
पादास्त्रयो बहिश्चासन्न प्रजानां य आश्रमाः।
अन्तस्त्रिलोक्यास्त्वपरो ग्रहमेधोऽबृहद्व्रतः॥
सृती विचक्रमे विष्वङ् साशनानशने उभे।
यदविद्या च विद्या च पुरुषस्तूभयाश्रयः।
यस्मादण्डं विराड् जज्ञे भूतेन्द्रियगुणात्मकः।
तद्द्रव्यमत्यगाद्विश्वं गोभिः सूर्य इवातपन्॥
यदास्य नाभ्यान्नलिनादहमासं महात्मनः।
नाविदं यज्ञसम्भारान् पुरुषावयवादृते॥
तेषु यज्ञस्य पशवः सवनस्पतयः कुशाः।
इदं च देवयजनं कालश्चोरुगुणान्वितः॥
वस्तून्योषधयः स्नेहा रसलोहमृदो जलम्।
ऋचो यजूंषि सामानि चातुर्होत्रं च सत्तम॥
नामधेयानि मन्त्राश्च दक्षिणाश्च व्रतानि च।
देवतानुक्रमः कल्पः संकल्पस्तन्त्रमेव च॥

मृदोऽग: ऋचो, यजूंषि, सामानि, चातुर्होत्रञ्चेति यज्ञानान्नामानि, मन्त्रान्, दक्षिणाः, व्रतानि, देवतानान्नामानि, पद्धतिग्रन्थान्, संकल्पतन्त्राणि, गतीः, मतीः, श्रद्धाः प्रायश्चित्तानि समर्पणानि चेति सर्वाणि ब्रह्मा विराट्पुरुषस्याङ्गेभ्य एव सङ्कल्पयामास, तदनन्तरन्तैः सङ्कलितैः यज्ञसम्भारैस्तमेव यज्ञपुरुषं ययाज ।

काले काले मन्वृषिपितृदेवदैत्यमनुष्याः यज्ञैः परमात्मानं यज्ञस्वरूपिणं समाराधयामासुः । समग्रं विश्वन्नारायणे स्थितमस्ति । नारायणः प्राकृतैर्गुणैर्विरहितः सन्नपि सृष्ट्यादौ मायया बहून् गुणान् स्वीकरोति । तस्य प्रेरणयैव चायम्ब्रह्मा सृजति, सोऽत्र स्वयं पुरुषोत्तमो विष्णुस्वरूपेण चेह सर्वम्पालयति, रुद्रस्वरूपेण संहरति च । सत्त्वरजस्तमःस्वरूपाः तिस्रः शक्तयश्चापि तेनोररीक्रियन्ते । भावाभावयोः, कार्य-कारणयोः, नैतादृशङ्किमपि वस्तु वर्त्तते, यद्भगवदतिरिक्तं भवेत्, अर्थात् जगत्सु यत्किञ्चिदपि दृश्यमदृश्यञ्चास्ति, तत् सर्वम्भगवतस्तथाविधतया प्रतीयमानं स्वरूपमेवाऽस्ति । स च भगवान् स्वकालशक्त्यैव सर्वमपि तथा तथा करोति विकरोति च इत्थमत्र कालस्यैव प्राधान्येन सर्वञ्जगदुत्पत्त्यादिकम्प्रतिपादितमस्ति, अतएवैतद् वक्तुं शक्यते यदत्र कालकारणिकं साङ्ख्यमस्तीति ।

गतयो मतयः श्रद्धा प्रायश्चित्तं समर्पणम् ।
पुरुषावयवैरेते सम्भाराः सम्भृता मया ।।
इति सम्भृतसम्भारः पुरुषावयवैरहम् ।
तमेव पुरुषं यज्ञं तेनैवायजमीश्वरम् ।।
ततस्ते भ्रातर इमे प्रजानां पतयो नव ।
अयजन् व्यक्तमव्यक्तं पुरुषं सुसमाहिताः ।।
ततश्च मनवः काले ईजिरे ऋषयोऽपरे ।
पितरो विबुधा दैत्या मनुष्याः क्रतुभिर्विभुम् ।।
नारायणे भगवति तदिदं विश्वमाहितम् ।
गृहीतमायोरुगुणः सर्गादावगुणः स्वतः ।।
सृजामि तन्नियुक्तोऽहं हरो हरति तद्वशः ।
विश्वं पुरुषरूपेण परिपाति त्रिशक्तिधृक् ।।
इति तेऽभिहितं तात यथेदमनुपृच्छसि ।
नान्यद्भगवतः किंचिद् भाव्यं सदसदात्मकम् ।।
(स्क. २, अ. ६ श्लो. १-३२)

(१४)

अवतार-वादि-साङ्ख्यम्

विराट्स्वरूपस्य विभूतीन् वर्णयता ब्रह्मणा श्रीमद्भागवतस्य द्वितीये स्कन्धे षष्ठेऽध्याये सप्तत्रिंशत्तमश्लोकतः समारभ्य पञ्चचत्वारिंशत्तमश्लोकं यावत् 'अवतार-वादि-साङ्ख्यम् प्रतिपादितमस्ति।

तद्यथा—

यस्य परमात्मनोऽवतारलीलाः सर्वत्र गीयन्ते परन्न केऽपि तत्तत्त्वतोऽवगच्छन्ति। भगवानसौ पुरुषोत्तमः सन्नप्यजः प्रत्येकस्मिन् कल्पे स्वयं स्वस्मिन्नेव स्वमेव सृजति, पालयति, संहरति च। सोऽयम्मायायाः सर्वथा निर्लिप्तः केवलञ्ज्ञानस्वरूपी वर्त्तते। तथान्तरात्मस्वरूपेण सर्वदैकरसस्तिष्ठति। पुरुषोत्तमोऽयं त्रिष्वपि लोकेषु त्रिष्वपि कालेषु च सत्यः परिपूर्णश्चाऽस्ति। न तस्यादिर्न चास्यान्तोऽपि, स गुणातीतः सनातनोऽद्वितीयश्च वर्त्तते।

महात्मानो यदा स्वस्वशरीराणि संशोध्य स्वानि सर्वाण्यपीन्द्रियाणि सर्वथा संयम्य, स्वान्तःकरणानि च सर्वथा निर्मलानि विधाय, सर्वदा सर्वथा सर्वेष्वपि कालेषु तन्निष्ठाः सन्तः समाराधयन्ति तथा तम्परमात्मानं साक्षात्कर्त्तुम्प्रभवन्ति। परं यदा सत्पुरुषाणां संगर्गतः सर्वथा दूरङ्गताः नीचजन—कुतर्क—जालैः हृतज्ञानाः समपहत-ज्ञानाः वा भवन्ति तदा कथञ्चिदपि तत्परमात्मानं साक्षात्कर्त्तुन्नैव प्रभवन्ति। कुतर्क-जातैः सर्वथा तिरोहिते भगवत्तत्त्वज्ञाने जाते तस्य दर्शनानि कर्त्तुन्नैव शक्यन्ते।

---

१. यस्यावतारकर्माणि गायन्ति ह्यस्मदादयः।
न यं विदन्ति तत्त्वेन तस्मै भगवते नमः॥
स एष आद्यः पुरुषः कल्पे कल्पे सृजत्यजः।
आत्माऽऽत्मन्यात्मनाऽऽत्मानं संयच्छति च पाति च॥
विशुद्धं केवलं ज्ञानं प्रत्यक्सम्यगवस्थितम्।
सत्यं पूर्णमनाद्यन्तं निर्गुणं नित्यमद्वयम्॥
ऋषे विदन्ति मुनयः प्रशान्तात्मेन्द्रियाशयाः।
यदा तदेवासत्तर्कैस्तिरोधीयेत विप्लुतम्॥
आद्योऽवतारः पुरुषः परस्य कालः स्वभावः सदसन्मनश्च।
द्रव्यं विकारो गुण इन्द्रियाणि विराट् स्वराट् स्थास्नु चरिष्णु भूम्नः॥
अहं भवो यज्ञ इमे प्रजेशा दक्षादयो ये भवदादयश्च।
स्वर्लोकपालाः खगलोकपालाः नृलोकपालास्तललोकपालाः॥

परमात्मा काले काले समवतरति, परमात्मनः प्रथमोऽवतारः श्री विराट् पुषात्मको वर्त्तते। तदतिरिक्तङ्कालः स्वभावः, कार्यम्, कारणम्, मनः पञ्चमहाभूतानि, अहङ्कारः, त्रयो गुणाः, खानि, ब्रह्माण्ड-शरीरम् ब्रह्माण्डशरीराभिमानी, स्थावराः, जङ्गमाः जीवाश्चेति सर्वेऽपि तस्यैवानन्तस्य भगवतः स्वरूपाणि सन्ति। ब्रह्म-विष्णु-महेश्वराः दक्षादयः प्रजापतयः नारदः नारदनिभाः भवतजनाः, स्वर्लोकपालाः, खगलोकपालाः, नरलोकपालाः, अधोलोकपालाः गन्धर्वाः, यक्षाः, रक्षांसि, सर्पाः, सर्पाऽधिपाः, महर्षयो पितृपतयो, दैत्येन्द्राः,सिद्धेश्वराः, दानवपाः, प्रेताः, पिशाचाः; भूताः,कूष्पाण्डकाः जलजन्तुपाः, मृगपाः, जग द्वस्तूनि, ऐश्वर्याणि, तेजांसि इन्द्रियबलम्, मनोबलम्, शरीरबलं, विशिष्ट सौन्दर्यं, ह्री, वैभवम्, अद्भुतवर्णमयानि यावन्त्यपि विभूतिमन्ति वस्तूनि सन्तिरूपवन्ति तथा तथारूपाणि च यावन्ति सन्ति, तावन्ति सर्वाण्यपि भगवत्स्वरूपाण्येव वर्त्तन्ते। एतान्यतिरिच्य परमपुरुषस्य परमात्मनः परमपवित्राणि तथा प्रधानानि लीलावतारस्वरूपाण्यपि शास्त्रेषु वर्णितानि सन्ति। तेषाञ्चरित्राणि श्रुतिमधुराणि श्रवणे-न्द्रिय-दोषापनोदकानि वर्तन्ते।

परमपुरुषः नैकविधानि लीलाविग्रहाणि धारयति। तदतिरिक्तः न कोऽपि, अर्थात् तेषु तेषु स्वरूपेषु तैस्तैरवतारविग्रहैः स्वयम्परमपुरुषो नैकविधाः स्वावतारलीलाः करोति। इत्येतदेवास्ति प्रतिपादितमिति वक्तुं शक्यते यदत्र अवतार-वादि-साङ्ख्य मस्तीतिशम्।

(१५)

तपः-कारणत्व-वादि-साङ्ख्यम्

श्रीमद्भागवतमहापुराणस्य द्वितीये स्कन्धे नवमेऽध्याये प्रथमश्लोकप्रभृति तत्राष्टमं श्लोकं यावद्ब्रह्मणभगवद्धाम-दर्शन-प्रसङ्गवशाच्छ्रीशुकेन प्रतिपादितन्तपःकारणत्व-वादि-साङ्ख्यम्[1]

---

१. गन्धर्वविद्यारधचारणेशा ये यक्ष रक्षोरग नागना थाः।
ये वा ऋषीणामृषभाः पितृणां दैत्येन्द्रसिद्धेश्वरदानवेन्द्राः॥
अन्ये च ये प्रेतपिशाचभूतकूष्माण्डयादोमृगपक्ष्यधीशाः॥
यत्किं च लोके भगवन्महस्वदोजः सहस्वद्बलवत्क्षभावत्।
श्रीह्रीविभूत्यात्मवदद्भुतार्णं तत्त्व परं रूपवदस्वरूपम्॥
प्राधान्यतो यानृष आमनन्ति लीलावतारान् पुरूषस्य भूम्नः।
आपीयतां वर्णकषायशोषाननुक्रमिष्ये त इमान् सुपेशान्॥
(स्क. 2 अ. ६ श्लो. ३७—४५)

स्वप्नावलोकितपदार्थैः सह स्वप्नद्रष्टुः कोऽपिसाक्षात् सम्बन्धो भवितुन्नार्हति: तथैव देहादिव्यतिरिक्तस्यानुभवैकगम्यस्यस्वात्मगोचरस्यात्मनो मायां विना दृश्य-पदार्थैः सह न कोऽपि सम्बन्धो भवितुर्म्हति। विविधरूपमयीम्मायामधिगत्य नैव रूपवान् प्रतीयते, तथा यदा तद्गुणेषु रमते तदा असावहमस्मि इदंममास्ति इत्यादिकम्मनुते। परं यदा गुणक्षोभ्कर्त्तुः कालात् तथा मोहोत्पादिकायाः मायायाः परत्वमधिगत्य स्वीये मोहरहितेऽनन्तस्वरूपे रमते, तदा आत्मारामो "भवति, तथा" अहं" "मम" इत्यादिकं भावं विहाय गुणातीतताम्भजते।

ब्रह्मणः निश्छद्ममयेन तपसा प्रसादमधिगत्य भगवता स्वीयं स्वरूपं दर्शितम्। तथा चात्मतत्त्वावबोधाय परम-सत्यं परमार्थभूतं वस्तुतत्त्वज्ञानं समुपदिष्टम्।

त्रयाणामपि लोकानां परमो गुरुः सर्वादिदेवो ब्रह्मा स्वीये जनन-स्थाने पद्मासने समुपविश्य सृष्टि-प्रवर्त्तनेहया चिन्तयामास भूयो भूयो विचारयन्नपि सृष्टि-व्यापृतये पूर्णाञ्ज्ञानदृशं नाध्यगच्छत्। अस्यां चिन्तायामेव चेह वर्तमानेन ब्रह्मणा कदाचित् त स्मिन् प्रलय-पाथोधौ व्यंजनेषु षोडशस्तकारस्तथैकविंशतमं पकासे वारद्वयं यन्महात्मन-स्त्यागिनां यत् परमं धनमामनन्ति तत्तपः सृष्टि-सामर्थ्यायाऽपि सर्वथा हितकारी भवितेति विचार्य्य कोऽस्त्राह वक्तेति जिज्ञासायां परितो ददर्श किन्तु कञ्चन तद् वक्तारन्नाध्यगच्छत्। तदनन्तरं प्रत्यक्षमेवाहं विभुना परब्रह्मणातपश्चर्यार्थं समादिष्टा स्मीति सुविचार्य्य तपसि प्रववृते। ब्रह्मा सर्वेष्वपि तपस्विषु महान् तपस्वी वर्तते तस्य ज्ञानमयोयमस्ति, सोऽत्र सहस्रादिव्यवर्षाणि यावत् सर्वथैकाग्र- मनसा प्राण-मनः-कर्मेन्द्रिय-ज्ञानेन्द्रिया-दिकञ्च सर्वथा वशीकृत्य तत्तपस्तप्तवान् यस्य प्रकृष्टतमेन प्रभावेण समग्रानपि लोकान् प्रकाशयितुं (स्रष्टुं) शशाक।

आत्ममायामृते राजन् परस्यानुभवात्मनः।
न घटेतार्थ सम्बन्धः स्वप्नद्रष्टुरिवाञ्जसा॥
बहुरूप इवाभाति मायया बहुरूपया।
रममाणो गुणेष्वस्या ममाहमिति मन्यते॥
यर्हि वाव महिम्नि स्वे परस्मिन् कालमाययोः।
रमेत गतसम्मोहस्त्यक्त्वोदास्ते तदभयोम्।
आत्मतत्त्वविशुद्धयर्थं यदाह भगवानृतम्।
ब्रह्मणे दर्शयन् रूपमव्यलीकव्रतादृतः॥
स आदिदेवो जगतां परो गुरूः स्वधिष्ण्यमास्थाय सिसृक्षयैषत।
तां नाध्यगच्छद् दृशमत्र सम्मतां प्रपञ्चनिर्माणविधिर्यथा भवेत्॥
स चिन्तयन् न्दयक्षरमेकदाम्भस्युयाश्रृणोद् द्विर्गदितं व चो विभुः।

उपर्युक्ते प्रसंगे सोपक्रमम्ब्रह्मणा तपस्तप्तं तत्तप एव चेह सृष्टि-कारणमिति प्रतिपादितमस्तीति वक्तुं शक्यते यदत्र तपःकारणत्ववादि-साङ्ख्यं वर्त्तत इति ।

(१६)

तपःकारणत्व-वादि-साङ्ख्यम्

ब्रह्मणो भगवद्धाम-दर्शनप्रसंगेन श्रीमद्भागवतमहापुराणे द्वितीये स्कन्धे नवमेऽध्याये त्रयोविंशत्तमे श्लोकेऽपि तपःकारणता-प्रतिपादकं साङ्ख्यमस्ति समुपदिष्टम् ।

तदित्थमवबोद्धव्यम्—

तपसा सर्वं सृज्यते, तपसैव सर्वस्यापि पालनं विधीयते, तपसैव पोषणादिकमपि भवति, तपसैव च सर्वमपि चराचरात्मकमेतज्जगत् परमकारणे परमात्मनि भगवत्यन्तर्भवति, तस्मिन्नेव परमात्मनि लयमेति च । तपः परमोत्कृष्टा दुल्लङ्घ्या सर्वथाद्वितीया च शक्तिर्वर्त्त या स्वयमेव सर्वाण्यपि कार्याणि यथाकालं याथातथ्येन सम्पादयति । तपसैव सर्वङ्कार्यम्प्रचलति ।

उपर्युक्ते प्रघट्टके तपसां भूयांसः प्रभावाः समुपवर्णिताः सन्ति । तपांस्येव सृष्टि-स्थिति-लयात्मकानिकर्माणि सर्वथा प्रकुर्वन्तीति तान्येव कारणताम्भजन्त एवेति वक्तुं शक्यते यदत्र तपःकारणता-प्रतिपादकं साङ्ख्यमस्तीति ।

स्पर्शेषु यत्षोडशमेकविंशं निष्किंचनानां नृप यद् धनं विदुः ।।
निशम्य तद्वक्तृदिदृक्षया दिशो विलोक्य तत्रान्यदपश्यमानः ।
स्वधिष्ण्यमास्थाय विमृश्य तद्धितं तपस्युपादिष्ट इवादधे मनः ।।
दिव्यंसहस्राब्दममोघदर्शनो जितानिलात्मा बिजितोभयेन्द्रियः ।
अतप्यत स्माखिवललोकतापनं तपस्तयीयांस्तपतां समाहितः ।।

१. सृजामि तपसैवेदं ग्रसामि तपसा पुनः ।
विभर्मि तपसा विश्वं वीर्यं मे दुश्चरं तपः ।। (21 91 23)

(१७)

क्रीडा-कारणता-वादि-सांङ्ख्यम्

श्रीमद्भागवतमहापुराणे द्वितीये स्कन्धे नवमेऽध्याये षड्विंशत्तम-सप्तविंशत्तमयोः श्लोकयोः ब्रह्मणा भगवद्दर्शन-प्रसङ्गेन क्रीडा-कारणता-वादि-साङ्ख्यं प्रतिपादितमस्ति।

तच्चेत्थमवगन्तव्यम्—

भगवान् विष्णुः सर्वथा मायागतिर्वर्तते, तस्य सङ्कल्पो न कदाचिदपि व्यर्थीभवति। लोके यथोर्णनाभिः स्वमुखाज्जालमुद्गीर्य्य तस्मिन्नेव साऽऽनन्दं चिक्रीडते, तदनन्तरन्तदेव जालं स्वस्मिन्नन्तर्लीनयति, तथैव भगवानपि स्वीयाम्मायामाश्रित्यैतन्नैकधा वर्त्तमानञ्जगदुत्पादयति, पालयति, संहरति च एवं स्वात्मानमेव नैकधा नैकेषु स्वरूपेषु विभज्य नैकविधाः लीलाः विदधन् क्रीडति। एतन्मर्मज्ञानमेवेहाऽस्ति। परमन्तत्त्वज्ञातम् भगवान् मायां समाश्रित्य केवलङ्क्रीडार्थमेव सर्जन-पालन-संहरणात्मिकाः सर्वाः लीलाः करोति, प्रघट्टकेऽमुष्मिन् ह्येतदेवाऽस्ति प्रतिपादितमिति वक्तुं शक्यते यदत्र क्रीडा-कारणता-वादि-साङ्ख्यमस्तीति शम्।

(१८)

सर्ग-विसर्गादि-वादि-साङ्ख्यम्

श्रीमद्भागवत-महापुराणे द्वितीये स्कन्धे दशमेऽध्याये भागवतस्य दशलक्षणानि प्रतिपादयता श्रीशुकदेवेन परीक्षितम्प्रति तृतीयश्लोकतः समारभ्य षट्चत्वा-

---

१. यथात्ममायायोगेन नानाशक्त्युपबृंहितम्।
विलुम्पन् विसृजन् गृह्णन् बिभ्रदात्मानमात्मना॥
क्रीडस्यमोघसंकल्प ऊर्णनाभिर्यथोर्णुते।
तथा तद्विषयां धेहि मनीषां मयि माधव॥
(स्कन्ध २, अ. ९, श्लोक २६-२७)

रिंशत्तमश्लोकं यावत्[1] सर्ग-विसर्गादि-प्रतिपादकं साङ्ख्यम् समुपदिष्टमस्ति। तच्चेत्थमवगन्तव्यम्—

ईश्वर-प्रेरणया गुणेषु क्षोभे जाते सति रूपान्तरितेषु च तेषु सत्सु तेभ्यो गुणेभ्यः खादीनि पञ्चमहाभूतानि, शब्दादीनि पञ्चतन्मात्राणि, एकादशेन्द्रियाणि, अहङ्कारः, महत्तत्वञ्चेति यत्रोत्पद्यन्ते तत्र सर्ग इति व्यपदेशो भवति। विराट् पुरुषादुत्पन्नेन ब्रह्मणा यन्नैकविधं स्थावर-जङ्गमात्मकञ्जगत् सृज्यते तस्य नाम 'विसर्ग' इति निगद्यते। पदे पदे नाशोन्मुखीं सृष्टिम्मर्यादिताङ्कुर्वता भगवता विष्णुना यच्छ्रैष्ठ्यमधिगम्यते तन्नाम 'स्थानम्' इति भवति। स्वसुरक्षितायां सृष्टौ भक्तेषु या भगवतस्तस्य कृपा भवति, सा भगवत्कृपा 'पोषणम्' इति नाम्ना व्यपदिश्यते। मन्वन्तराणामधिपतयः याम्भगवद्भक्तिम्प्रजापालनात्मिकां विशुद्धं धर्मञ्चानुतिष्ठन्ति, तस्य नाम 'मन्वन्तरम्' इति निगद्यते। कर्मभिः बन्धनशीलाः जीवानां वासनाः 'ऊतिः" इत्यभिधीयन्ते। भगवतोऽवताराणाङ्गाथाः भगवदनुरागिभक्तानामाख्यानानि च 'ईशकथा' नाम्ना समभिधीयन्ते। यदा भगवान् योगनिद्रां, स्वीकृत्य स्वपिति तदा जीवस्य स्वोपाधिभिः साकं भगवति लयो भवति, सा स्थितिरेवेह निरोधरिति नाम्ना व्यपदिश्यते। अज्ञानकल्पितङ्कतृत्वभोक्तृत्वादिकमनात्मभावम्परित्यज्य स्ववस्तुस्वरूपे परमात्मनि स्थितिरेव 'मुक्ति' रित्यनेन नाम्ना व्यपदिश्यते। समस्तस्याऽस्य चराचरात्मकस्य जगतः समुत्पत्तिप्रलयौ यस्मात्तत्वात् भवतः तत् परमम्ब्रह्म, "आश्रयः," इत्यनेन नाम्ना व्यपदिश्यते। शास्त्रेषु ऋषयो ह्याश्रयमेव परमात्मत्वेन प्रतिपादयामासुः य नेत्रादीनामिन्द्रियाणां समभिमानी द्रष्टा जीवोऽस्ति' स एवेहेन्द्रियाणामधिष्ठातृणांसूर्यादीनां स्वरूपेष्वपि

---

1. भूतमात्रेन्द्रियधियां जन्म सर्ग उदाहृतः।
ब्रह्मणो गुणवैषम्याद् विसर्गः पौरुषः स्मृतः॥
स्थितिर्वैकुण्ठविजयः पोषणं तदनुग्रहः।
मन्वन्तराणि सद्धर्म ऊतयः कर्मवासनाः॥
अवतारानुचरितं हरेश्चास्यानुवर्तिनाम्।
सतामीशकथाः प्रोक्ता नानाख्यानोपबृंहिताः॥
निरोधोऽस्यानुशयनमात्मनः सहशक्तिभिः।
मुक्तिर्हित्वान्यथारूपं स्वरूपेण व्यवस्थितिः॥
आभासश्च निरोधश्चयतश्चाध्यवसीयते।
स आश्रयः परं ब्रह्म परमात्मेति शब्द्यते॥

विराजते, तथा यदेतद्दृश्यं नेत्रादि-गोलकोपेतं स्थूलं शरीरमस्ति तदेव तौ पृथक्पृथक् करोति। एतेषु त्रिष्वपि जीवेन्द्रियाधिष्ठातृखगोलकेषु प्रत्येकस्याऽस्ति परमम्महनीयम्महत्त्वम् तदिह प्रत्यक्षतोऽवलोकयितुं शक्यते। यतो ह्येतेभ्यो ह्येकस्यापि यदि भवेदभावः तर्हि तदतिरिक्तयोः द्वयोश्चापि समुपलद्धिः भवितुं नैव शक्नोति। अतोऽत्रयस्त्रीण्यपि तत्त्वानि वेद, सः स्वयं परमात्मैव भवति। सर्वेषामपि तत्त्वानामधिष्ठानं आश्रयाख्यं तत्त्वमस्ति। तस्याश्रयः स एवास्ति नान्यः कश्चन।

यदा विराट्पुरुषः ब्रह्माण्डं निर्भिद्य निःससार, तदा सः स्वस्मै वासभुवं समन्वेषयाभास। तदनुपलभ्य स्थानेहया शुद्धसंकल्पः परमं पवित्रं वारि सृष्टवान्। विराट् पुरुषरूपात् निष्पन्नत्वात् नरादुत्पन्नत्वाच्च जलं नारनाम्ना व्यवह्रियते। सः पुरुषः सहस्रवर्षाणि यावज्जले वासञ्चकार। इत्यस्मादेव हेतोः नारायणः इति तस्य नाम समभूत्। नारायणस्य कृपयैव द्रव्य-कर्म-काल-स्वभाव-जीवानां सत्ता वर्त्तते तदुपेक्षायां न कस्याप्यस्तित्वमस्ति। सोऽयं नारायणः योगनिद्रायाः प्रबुध्य स्वात्मानं नैकधा समैच्छत्, तथा स्वमाययाऽखिलस्य ब्रह्माण्डस्य परिपुष्ट बीजभूतं हिरण्मयं वीर्यमधि-

---

योऽध्यात्मिकोऽयं पुरुषः सोऽसावेवाधिदैविकः।
यस्तत्रोभयविच्छेद पुरुषो ह्याधिभौतिकः।।
एकमेकतराभावे यदा नोपलभामहे।
त्रितयं तत्र यो वेद स आत्मा स्वाश्रयाश्रयः।।
पुरुषोऽण्डं विनिर्भिद्य यदासौ स विनिर्गतः।
आत्मनोऽयनमन्विच्छन्नपोऽस्राक्षीच्छुचिः शुचीः।।
तास्ववात्सीत् स्वसृष्टासु सहस्रपरिवत्सरान्।
तेन नारायणो नाम यदापः पुरुषोद्भवाः।।
द्रव्यं कर्म च कालश्च स्वभावो जीव एव च।
यदनुग्रहतः सन्ति न सन्ति यदुपेक्षया।।
एको नानात्वमन्विच्छन् योगतल्पात् समुत्थितः।
वीर्यं हिरण्मयं देवो मायया व्यसृजत् त्रिधा।।
अधिदैवमथाध्यात्भमधिभूतमिति प्रभुः।
अथैकं पौरुषं वीर्यं त्रिधाभिद्यत तच्छृणु।।
अन्तःशरीर आकाशात् पुरुषस्यं विचेष्टितः।

विभक्तुं दैवमध्यात्ममधिभूतमिति त्रिषु भागेषु व्यभजत् । विराट्पुरुषस्य तद्वीर्यं त्रिषु भागेषु केन प्रकारेण विभक्तं समभूदिति चेत् ? विराट्पुरुषस्य विचेष्टतः शरीरबलात् मनोबलं; इन्द्रियबलं, शरीरबलञ्चेति जज्ञिरे । तेभ्यो प्राणाः समजायन्त; यथा सेवकाः स्वं राजानमनुगच्छन्ति, तथैव सर्वाणीन्द्रियाणि प्राणमनुगच्छन्ति प्राणस्य प्रबलावस्थायां इन्द्रियाण्यपि प्रबलानि भवन्ति, मन्दे च मन्दानि जायन्ते ।

यदा प्राणस्य सञ्चरणं समभूत् तदा क्षुत्तृषेऽ जायताम् । बुभुक्षापिपित्सयोः समुत्पत्तौ सर्वतः प्राक् तस्य मुखमजायत । मुखात्तालुः, तस्माच्च रसनेन्द्रियमजायत । तदनन्तरं सर्वे रसाः मधुराम्ललवणकटुकषायतिक्ताः समजायन्त । तान् तेषां मिश्रणांश्च रसनेन्द्रियं समास्वादयति ।

यदा तस्य विवक्षा समजायत, तदा तस्य वागिन्द्रियं तथा तदधिष्ठातृ-देवताग्निश्च समजायत । तद् विषयभूता वाणी च समभवत् । चिरकालं यावद् वागिन्द्रियं-तदधिष्ठातृदैवततत्त्वमग्निश्च तयोः व्याहृतञ्चेति त्रयोऽपि जले न्यवसन् । श्वास-

---

ओजः सहो बलं जज्ञे ततः प्राणो महानसुः ।।
अनुप्राणन्ति यं प्राणाः प्राणन्तं सर्वजन्तुषु ।
अपानन्तमपानन्ति नरदेवमिवानुगाः ।।
प्राणेन क्षिपता क्षुत्तृडन्तरा जायते प्रभोः ।
पिपासतो जक्षतश्च प्राङ्मुखं निरभिद्यत ।।
मुखतस्तालु निर्भिन्नं जिह्वा तत्रोपजायते ।
ततो नानारसो जज्ञे जिह्वया योऽधिगम्यते ।।
विवक्षोर्मुखतो भूम्नो वह्निर्वाग्व्याहृतं तयोः ।
जले वै तस्य सुचिरं निरोधः समजायत ।।
नासिके निरभिद्येतां दोधूयति नभस्वति ।
तत्र वायुर्गन्धवहो घ्राणो नसि जिघृक्षतः ।।
यदात्मनि निरालोकमात्मानं च दिदृक्षतः ।
निर्भिन्ने ह्यक्षिणी तस्य ज्योतिश्चक्षुर्गुणग्रहः ।।
बोध्यमानस्य ऋषिभिरात्मनस्तज्जिघृक्षतः ।
कर्णौ च निरभिद्येतां दिशः श्रोत्रं गुणग्रहः ।।

वेगतः नासारन्ध्रावजायताम्. जिघृक्षायां सत्यां घ्राणेन्द्रियन्तदधिष्ठातृ-देवता-वायुश्च सहैवाजायताम् । तद् विषयो गन्धश्चापि तयोः सहैव समजायत । दिदृक्षायां समुदिता-यान्नेत्रेन्द्रियन्तद्गोलके तदधिष्ठातृदेवता सूर्यश्चेति समजायन्त । तेन नेत्रेन्द्रियेण रूपङ्-गृह्यते । यदा वेदरूपा ऋषयस्तं विराट्पुरुषं स्तुतिभिः समवबोधयामासुस्तदा शुश्रूषायां सत्यां श्रोत्रेन्द्रियन्तदधिष्ठातृदेवता दिशः तदधिष्ठानौ कर्णौ चेति निर्भिद्यन्त । यैः शब्दः श्रूयते । मार्दव-काठिन्य-लघुत्व-गुरुत्व-उष्णत्व-शीतत्वादीनां जिज्ञासायां शरीरे त्वक्प्रकटीबभूव, पृथिव्याः यथा वृक्षाः समुद्भवन्ति तथैव त्वचोऽपि रोमाण्य-जायन्त, तदन्तर्बहिश्च सञ्चरन् वायुरपि स्पर्शनार्हः समभूत्[१] त्वगिन्द्रियमपि सहैव समजनि । येन स्पर्शनमनुभूयते । यदा विविध-कर्म-चिकीर्षा समजायत तत्संयोगाश्रितं ग्रहणकर्मापि प्रकटीबभूव, याभ्याम्मानवः गृह्णाति । यदा स्वेष्टं स्थानं प्रति जिगमिषा समभवत्, तदा शरीरे पादादुद्बभूवतुः ताभ्यां सहैव चरणेन्द्रियं तदधिष्ठातृदेवतारूपेण

वस्तुनो मृदुकाठिन्य लघुगुर्वोष्णशीतताम् ।
जिघृक्षतस्त्वङ्निर्भिन्ना तस्यां रोममहीरुहाः ।।
तत्र चान्तर्बहिर्वातिस्त्वचा लब्धगुणो वृतः ।।
हस्तौ रुरुहतुस्तस्य नानाकर्मचिकीर्षया ।
तयोस्तु बलमिन्द्रश्च आदानमुभयाश्रयम् ।।
गतिं जिगीषतः पादौ रुरुहातेऽभिकामिकाम् ।
पद्भ्यां यज्ञः स्वयं हव्यं कर्मभिः क्रियते नृभिः ।।
निरभिद्यत शिश्नो वै प्रजानन्दामृतार्थिनः ।
उपस्थ आसीत् कामानां प्रियं तदुभयाश्रयम् ।।
उत्सिसृक्षोर्धातुमलं निरभिद्यत वै गुदम् ।
ततः पायुस्ततो मित्र उत्सर्ग उभयाश्रयः ।।
आसिसृप्सोः पुरः पुर्या नाभिद्वारमपानतः ।
तत्रापानस्ततो मृत्युः पृथक्त्वमुभयाश्रयम् ।।
आदित्सोरन्नपानानामासन् कुक्ष्यन्त्रनाडयः ।
नद्यः समुद्राश्च तयोस्तुष्टिः पुष्टिस्तदाश्रये ।।
निदिध्यासोरात्ममायां हृदयं निरभिद्यत ।
ततो मनस्ततश्चन्द्रः संकल्पः काम एव च ।।
त्वक्चर्ममांसरुधिरमेदोमज्जास्थिधातवः ।

च यज्ञपुरुषो भगवान् स्वयं विष्णुः स्थितोऽभवत् । तयोः चलनरूपङ्कर्म चाजायत । मनुष्यश्चरणेन्द्रियेणैव चलित्वा यज्ञसम्भारान्नेकत्रीकरोति । सन्तति-रति-स्वर्भोगेहया च विराट् पुरुषस्य शरीरे लिंगमजायत । तस्मिन् उपस्थेन्द्रियं, तदधिष्ठातृ प्रजापतिश्चेति समजायताम् । यदा च तितिक्षामकरोत्तदा गुदद्वारं प्रकटीबभूव सहैव पाय्विन्द्रियन्तदधिष्ठातृत्वेन मित्र-दैवतञ्च सम्बभूव । तद्द्वारा चेह मलत्यागक्रिया सम्पद्यते । अपानमार्गेणएकस्माच्छ-रीरान्तरम्प्रति जिगमिषायां नाभिद्वारं समजायत । तस्मादपानं मृत्युदैवतश्ञ्चेति प्रकटी-बभूवतुः । एताभ्यामाश्रयेणैव प्राणापानयोर्वियोगोऽर्थात् मृत्युर्भवति । यदा विराट्पुरुषो-ऽन्नजले गृहीतुमियेष तदा कुक्ष्यन्त्रनाडिकाः समुद्भवन् सहैव कुक्षिदैवतं पयोधिः नाडिका दैवतानि नद्यस्तथा तुष्टिपुष्टी तदाश्रिताः विषयाश्च समजायन्त । यदा सः स्वमायाविषये विचारयितुमियेष, तदा हृदयमजायत तस्मात् मनः गनसश्च तदधिष्ठा-तृदैवतं चन्द्रमा विषयवासनाः संकल्पाश्च प्रकटीबभूवुः । विराट्पुरुषस्य शरीरे पृथिवी-जल-तेजोभिः त्वक्, चर्म, मांसम् शोणितम्, मेदांसि, मज्जा अस्थीनीति ह्येते सप्तधातवः जज्ञिरे । इत्थमेवाऽऽकाशज लवायुभिः प्राणिनां समुत्पत्तिः समजायत । श्रोत्रादीनीन्द्रियाणि शब्दादीन् यान् विषंयान् गृह्णन्ति, ते सर्वेऽपि विषयाः सन्त्यहङ्कारजाः[1] मनः समेषामपि विकाराणामुत्पत्तिस्थानमस्ति । बुद्धिश्च समग्राणामपि पदार्थानां बोधयित्री वर्त्तते । भगवतो ह्येतत्स्थूलं स्वरूपं बहिर्भागे पृथिव्यप्तेजोराय्वाकाशाहङ्कारमहत्तत्त्व-प्रकृतिभिरष्टभि समावरणैः समावृत्तमस्ति । विराट्स्वरूपत; परं भगवतः सूक्ष्मतमं रूपमस्ति । तद्रूपमव्यक्तं निर्विशेषमादिमध्यान्तरहितं नित्यञ्च वर्त्तते । तदयधिकाचेह नास्ति गतिः वाङ्मनसोः ।

भूम्यप्तेजोमयाः सप्त प्राणो व्योमाम्बुवायुभिः ।।
गुणात्मकानीन्द्रियाणि भूतादिप्रभवा गुणाः ।
मनः सर्वविकारात्मा बुद्धिर्विज्ञानरूपिणी ।।
एतद्भगवतो रूपं स्थलं ते व्याहृतं मया ।
मह्यादिभिश्चावरणैरष्टभिर्बहिरावृतम् ।।
अतः परं सूक्ष्मतममव्यक्तं निर्विशेषणम् ।
अनादिमध्यनिधनं नित्यं वाङ्मनसः परम् ।।
स वाच्यवाचकतया भगवान् ब्रह्मरूपधृक् ।
नामरूपक्रिया धत्ते सकर्माकर्मकः परः ।।
प्रजापतीन् मनून् देवानृषीन्पितृगणान् पृथक् ।
सिद्धचारणगन्धर्वान् विद्याध्रासुरगुह्यकान् ।।

भगवतः स्थूल-सूक्ष्मे व्यक्ताव्यक्ते स्वरूपे भगवन्मायया रचिते स्तः । इति कृत्वैव विपश्चितोऽत्र नोभेऽपि रूपे गृह्णन्ति । वस्तुतोऽयं भगवान् निष्क्रियोऽस्ति, तथापि स्वशक्त्या सक्रियत्वमेति । तदनन्तरन्तु ब्रह्मस्वरूपं विराट्स्वरूपं वा धारयन् वाच्यवाचकतां शब्दार्थताञ्चाधिगच्छति तथा बहूनि नामानि बहूनि रूपाणि बह्व्यः क्रियाश्च स्वीकरोति प्रजापतयः, मानवाः, देवताः, ऋषयः, पितरः, सिद्धाः, चारणाः, गन्धर्वाः, विद्याधरा असुराः, यक्षाः, किन्नराः, अप्सरसः, नागाः, सर्पाः, किम्पुरुषाः, उरगाः, मातृकाः, राक्षसाः पिशाचाः, प्रेताः, भूतानि, विनायकाः, कूष्माण्डाः, उन्मादाः, वेतालाः, यातुधानानि, ग्रहाः, पक्षिणः, मृगाः, पशवः, वृक्षाः, गिरयः, सरीसृपाश्चेत्यादीनि यावन्ति जगत्यां नामानि रूपाणि च सन्ति, तानि सर्वाण्यपि भगवत एव सन्ति । जगति चराचर

किन्नराप्सरसो नागान् सर्पान् किम्पुरुषोरगान् ।
मातृृ रक्षः पिशाचांश्च प्रेतभूतविनायकान् ।।
कूष्माण्डोन्मादवेतालान् यातुधानान् ग्रहानपि ।
खगान् मृगान् पशून् वृक्षान् गिरीन्नृप सरीसृपान् ।।
द्विविधाश्चतुर्विधा येऽन्ये जलस्थलनभौकसः ।
कुशलाकुशला मिश्राः कर्मणां गतयस्त्विमाः ।।
सत्त्वं रजस्तम इति तिस्रः सुरनृनारकाः ।
तत्राप्येकैकशो राजन् भिद्यन्ते गतयस्त्रिधा ।।
यदैकैकतरोऽन्याभ्यां स्वभाव उपहन्यते ।।
स एवेदं जगद्धाता भगवान् धर्मरूपधृक् ।
पुष्णाति स्थापयन् विश्वं तिर्यङ्नरसुरात्मभिः ।
ततः कालाग्नि रुद्रात्मा यत्सृष्टमिदमात्मनः ।
सन्नियच्छति कालेन घनानीकमिवानिलः ।।
इत्थंभावेन कथितो भगवान् भगवत्तमः ।
नेत्थंभावेन हि परं द्रष्टुमर्हन्ति सूरयः ।।
नास्य कर्माणि जन्मादौ परस्यानुविधीयते ।
कर्तृत्वप्रतिषेधार्थं माययाऽऽरोपितं हि तत् ।।
अयं तु ब्रह्मणः कल्पः सविकल्प उदाहृतः ।
विधिः साधारणो यत्र सर्गाः प्राकृतवैकृताः ।।

(स्क. २, अ. १०, श्लो. क. ३-४६)

रभिदा जरायुजाण्डज़स्वदजोद्भिज्जा वा यावन्तः जलस्थलनभचारिणः प्राणिनः सन्ति ते सर्वे शुभाशुभमिश्रितकर्मणां फलानि सन्ति । सत्त्वस्य प्राधान्याद् देवताः रजसः प्राधान्यान्मनुष्याः तमसः प्राधान्याच्चाधो योनयः प्राप्यन्ते । एतेषु गुणेष्वपि यदैको गुणः तदितराभ्यां गुणाभ्यामतिरिच्यते तदा प्रत्येकस्याः गतेस्त्रीणि त्रीणि रूपाणि जायन्ते । सोऽयं भगवान् जगतो पोषणाय च धर्ममयं विष्णुस्वरूपं स्वीकृत्य देवनृपशुपक्ष्यादिरूपेषु जगदिदं पालयति पोषयति च ।

समुपस्थिते प्रलयसमये च स एव भगवान् स्वसृष्टमपीदञ्जगत् कालाग्निस्वरूपं रुद्रसूपं सन्धार्येह वायुः मेघमालाभिव स्वस्मिन् तथैव लीनयति। महात्मानोऽत्राचिन्त्यैश्वर्यमपि भगवन्तमित्थमेव वर्णयन्ति, किन्तु तत्त्वज्ञानिभिर्न केवलं सर्जन-पालन-संहरण-कर्तृ-स्वरूपमेव द्रष्टव्यम्भवत्यपि तु सः परमेश्वरः स्वरूपादस्मादपि परो वर्त्तते । सृष्टि-सर्जनात्मकादिकर्मनिरूपणेन पूर्णस्य परमात्मनः कर्मभिः सहसम्बन्धो नैव योजितः; सोऽत्र मायाद्वारेणाऽऽरोपितत्वादिह केवलङ कर्तृत्वस्य निषेधायैव वर्त्तते । इत्थं ब्रह्मणो महाकल्पानामवान्तरकल्पानाञ्च वर्णनञ्जातम् । यतःसर्वेष्वपि कल्पेषु सृष्टिक्रमः सदृश एव वर्त्तते । केवलं वर्त्तते भिदैतावत्येव यत् तत्र महाकल्पस्य प्रारम्भे प्रकृतेः क्रमशः महत्तत्वादीनां समुत्पत्तिर्जायते तथा कल्पानाम्प्रारम्भे प्राकृती सृष्टिस्तु यथावत्तिष्ठत्येव। परं केवलञ्चराचराणां प्राणिनां वैकृती सृष्टिस्तु नूतनरूपेण पुनरपि भवति ।

सर्ग-विसर्ग-स्थान-पोषण-ऊति-मन्वन्तर-ईशानुकथा-निरोध-मुक्ति-आश्रयाख्यानां दश-लक्षणानां स्पष्टीकरणादत्रसर्ग-विसर्गादिप्रतिपादनपरं साङ्ख्यमस्तीति निश्चप्रचम् ।

(19)

भगवति लोकादि-कल्पकत्व-वादि सांख्यं क्लृप्तिवादि साङ्ख्यं वा

श्रीमद्भागवत-महापुराणस्य तृतीये स्कन्धे पंचमेऽध्याये कृते च सृष्टिजिज्ञासोप शान्तये श्रीविदुरेण मैत्रेयम्प्रति प्रश्नेऽष्टमनवमयोः श्लोकयोः भगवति लोकादि-कल्पकत्व-वादिसाङ्ख्यम्प्रतिपादितमस्ति ।[1]

तद्यथा—

श्रीहरिः लोकान् लोकपालान् लोकालोकपर्वत-बाह्यभागान्, येषु समग्राणामपि प्राणिनां भेदाः सर्वे यथाधिकारं पृथक् पृथक् प्रतीयन्ते । कैः कैः तत्त्वैः तानचीक्लृपत् सोऽयं विश्व-कर्त्ता स्वयम्भूः स्वयं नारायणः स्वप्रजायाः स्वभावानां, कर्मणां, रूपाणां, नाम्नां भेदांश्च केन प्रकारेणाचीक्लृपत् ।

प्रसंगेऽस्मिन् श्रीहरिणैव लोका लोकपालाः लोकालोकपर्वताः तद्बाह्यभागाः स्वभावाः कर्मरूपकर्मादीनि च क्लृप्तानीति प्रतिपादनादत्र श्रीभगवति क्लृप्तित्व-वादि सांख्यमस्ति ।

---

1. करोति कर्माणि कृतावतारो यान्यात्मतन्त्रो भगवांस्त्र्यधीशः ।
यथा ससर्जाग्र इदं निरीहः संस्थाप्य वृत्तिं जगतो वियत्ते ।।
यथा पुनः स्वे ख इदं निवेश्य शेते गुहायां स निवृत्तवृत्तिः ।
योगेश्वराधीश्वर एक एतदनुप्रविष्टो बहुधा यथाऽऽसीत् ।।
क्रीडन् विधत्ते द्विजगोसुराणां क्षेमाय कर्माण्यवतारभेदैः ।
मनो न तृप्यत्यपि श्रृण्वतां न सुश्लोकमौलेश्चरितामृतानि ।।
यैस्तत्त्वभेदैरधिलोकनाथो लोकानलोकान् सहलोकपालान् ।
अचीक्लृपद्यत्र हि सर्वसत्त्व निकायभेदोऽधिकृतः प्रतीतः ।।
(स्क. ३ अ. ५ श्लो. ८ ९)

(२०)

द्रष्टृ-दृश्य-वादि-सांख्यम्

श्रीमद्भागवतस्य तृतीये स्कन्धे पञ्चमेऽध्याये त्रयोविंशत्तमश्लोकतः सप्तत्रिंशत्तमं श्लोकं यावद्योगमायया विस्तारितभगवल्लीला-कारणत्व-प्रतिपादकम् द्रष्टृदृश्यवादि सांख्यमस्ति तद्यथा, सृष्टि-रचनायाः प्राक् समग्राणामप्यात्मनामात्मा पूर्णो परमात्मा स्वयमेकाकी आसीत्। तदानीं द्रष्टृ-दृश्ययोः सर्वथा स्व-स्वरूपाभाव आसीत्। सृष्टि-समये नानावृत्ति-भेदेभ्यः यन्नानात्वं साम्प्रतमवलोक्यते तदपि सर्वं तदन्तर्गतमेवाऽऽसीत्। स एव द्रष्टृत्वं स्वीकृत्य द्रष्टुमारेभे; किन्तु न किमपि दृष्टिपथमगात्। यतस्तदानीं व्यक्तावस्थापन्नं तदतिरिक्तं नासीत् किञ्चिदपि। केवलं स एव स्वयमद्वितीयरूपेण प्रकाशितोऽभूत्। एतादृश्यामवस्थायां स स्वमेवाव्यक्तावस्थापन्नं सर्वमसदिति मनुते स्म। परन्तु वस्तुतः सोऽसन्नासीत्। केवलं तस्य शक्तय एव प्रसुप्ता आसन्। तस्य ज्ञानं लुप्तं नाभवत्। एषा द्रष्टृ-दृश्यानुसन्धान-कर्त्री शक्तिरेव कारण-कार्य-रूपा

---

1. भगवानेक आसेदमग्र आत्माऽऽत्मनां विभुः।
   आत्मेच्छानुगतावात्मा नानामत्युपलक्षणः॥
   स वा एष तदा द्रष्टा नापश्यद् दृश्यमेकराट्।
   मेनेऽसन्तमिवात्मानं सुप्तशक्तिरसुप्तदृक्॥
   सा वा एतस्य संद्रष्टुः शक्तिः सदसदात्मिका।
   माया नाम महाभाग ययेदं निर्ममे विभुः॥
   कालवृत्त्या तु मायायां गुणमय्यामधोक्षजः।
   पुरुषेणात्मभूतेन वीर्यमाधत्त वीर्यवान्॥
   ततोऽभवन्महत्तत्त्वमव्यक्तात्कालचोदितात्।
   विज्ञानात्माऽऽत्मदेहस्थं विश्वं व्यञ्जंस्तमोनुदः॥
   सोऽप्यंश गुणकालात्मा भगवद्दृष्टिगोचरः।
   आत्मानं व्यकरोदात्मा विश्वस्यास्य सिसृक्षया॥

माया वर्त्तते । अनया भावाभावरूपयैव सर्वथाऽनिर्वचनीयया मायया भगवान् स्वसाक्ष्येण विश्वस्यास्य सृजनमकरोत् । कालशक्त्या यदैषा त्रिगुणमयी माया विक्षुब्धाभवत्, तदा तेनेन्द्रियातीतेन चिन्मयेन परमात्मना पुरुषरूपेण स्वांशेन तस्यां चिदाभास-रूपं बीजं स्थापितम्, तदा कालशक्ति-प्रेरणया तस्याः स्वयमव्यक्तायाः मायायाः महत्तत्वं प्रकटीबभूव। तच्च मिथ्याज्ञान-नाशकत्वाद् विज्ञान-स्वरूपं स्वस्मिन् सूक्ष्म-स्वरूपेण स्थितस्य प्रपञ्चस्याभिव्यञ्जकमासीत् । तदनन्तरं चिदाभासगुण-कालानामधीनस्थेन महत्तत्त्वेन भगवद्दृष्टिपाते विम्बस्यास्य सर्जनाय स्वीयं रूपान्तरङ्कृतम् । विकृतान्महत्तत्वादहंकारोऽजायत । यः कारण-कार्य-कर्तृत्वादर्थादधिभूताध्यात्माधिदैवत्वात् तेषां भूतेन्द्रिय-मनसाङ्कारणभूतोऽस्ति । सोऽहंकारः वैकारिकस्तैजसस्तामसश्चेति त्रिधा भवति। वैकारिकतैजसौ सात्त्विक-राजसावपि कथ्येते। अहंकार-तत्त्वे विकृते सति वैकारिकादहंकारान्मनः समजायत, सहैव च तेन मनसा विषय-ज्ञानकारिण्यः स्वेन्द्रियाधिष्ठातृदेवताश्चाजायन्त । तैजसादहंकाराज्ज्ञानेन्द्रियाणि कर्मेन्द्रियाणि च प्रकटीबभूवुः।

महत्तत्त्वाद्विकुर्वाणादहंतत्त्वं व्यजायत ।
कार्यकारण कर्त्रात्मा भूतेन्द्रियमनोमयः ।।
वैकारिकस्तैजसश्च तामसश्चेत्यहं त्रिधा ।
अहं तत्त्वाद्विकुर्वाणान्मनो वैकारिकादभूत् ।।
वैकारिकाश्च ये देवा अर्थाभिव्यञ्जनं यतः ।
तैजसानीन्द्रियाण्येव ज्ञानकर्ममयानि च ।।
तामसो भूतसूक्ष्मादिर्यतः खं लिङ्गमात्मनः ।
कालमायांशयोगेन भगवद्वीक्षितं नभः ।।
नभसोऽनुसृतं स्पर्शं विकुर्वन्निर्ममेऽनिलम् ।
अनिलोऽपि विकुर्वाणो नभसोरुबलान्वितः ।।
ससर्ज रूपतन्मात्रं ज्योतिर्लोकस्य लोचनम् ।
अनिलेनान्वितं ज्योतिर्विकुर्वत्परवीक्षितम् ।।
आधत्ताम्भो रसमयं कालमायांशयोगतः ।

तामसादहंकारात् सूक्ष्मभूतानां कारणं शब्दतन्मात्रं तस्माच्च द्रष्टान्त-रूपेणात्मावबोधकमाकाशमुद्‌बभूव। भगवद्दृष्टिर्यदाऽऽकाशे पपात, तदा तस्मात् कालमाया-चिदाभा संयोगेन स्पर्श-तन्मात्रमजायत। तस्मिन् विकृते सति तस्माद्वायुः समजायत। अत्यन्तं बलवता वायुना तथाकाशेन सहितं विकृतीभूय रूपतन्मात्रं निर्मितम्, तस्माच्च जगत् प्रकाशकं तेज उद्‌बभूव। तत्पश्चात् परमात्मनो दृष्टिपाते सति वायुयुक्तेन तेजसा कालमायान्विन्दंशानां योगेन विकृतेन सता रसतन्मात्र-कार्यभूतं जलमुत्पादितम्। तनन्तरं तेजसा युक्तेन जलेन ब्रह्मणो दृष्टिपातेन कालमायाचिदंशानां संयोगेन गन्धमयी पृथिवी समुत्पादिता। एतेष्वाकाशादिषु भूतेषु यानि-यानि महाभूतानि क्रमशः पश्चात् पश्चात् समजायन्त, तेषु सर्वेष्वपि स्वपूर्वपूर्व-समुत्पन्नाः गुणाश्चापि समनुगताः भवन्ति महत्तत्वादीनामभिमानिनो विकारा विक्षेपाश् चेतनांश-विशिष्टाश्च देवगणाः भगवतामंशा एव वर्तन्ते।

उपर्युक्ते प्रसंगे द्रष्टृ-दृश्ययोः भगवद्योगमाययोः सृष्ट्युपक्रमे हेतुत्वं प्रतिपादितमिति वक्तुं शक्यते यदत्र दृष्टृ-दृश्यवादि-सांख्यमस्तीति। एतदेव च सांख्यं योगमायया विस्तारित भगवल्लीला-कारणता-वादि-सांख्यमपि भवतीति शम्।

ज्योतिषाम्भोऽनुसंसृष्टं विकुर्वद् ब्रह्मवीक्षितम् ॥
महीं गन्धगुणामाधात् कालमायांशयोगतः।
भूतानां नभ आदीनां यद्यद्भव्यावरावरम् ॥
तेषां परानुसंसर्गाद् यथासंख्यं गुणान् विदुः।
एते देवाः कला विष्णो कालमायांशलिङ्गिनः ॥
नानात्वात् स्वक्रियानीशा प्रोचुः प्राञ्जलयो विभुम्।
(स्क.३, अ. ५, श्लो. २३-३७)

(२१)

काल-शक्तिवादि साङ्ख्यम्

श्रीमद्भागवतमहापुराणस्य तृतीये स्कन्धे षष्ठेऽध्याये द्वितीयश्लोकतः समारभ्य द्वात्रिंशत्तमं श्लोकं यावद् ईश-शक्ति-प्रवेशेन स्थूलभूतानां जगन्निर्माण-शक्तित्व-प्रदर्शनपूर्वकं विराड्विग्रहोत्पत्ति-कथने काल-शक्ति-वादि-सांख्यं प्रतिपादितमस्ति।

तच्चेत्थम्—

सर्वशक्तिमान् भगवान् यदा-यदा ददर्श यदिमाः महत्तत्वाद्या शक्तयः परस्परमसंगठितत्वात् विश्व-सर्जन-कर्मण्यसमर्थाः सन्तीति। तदनन्तरं परमात्माऽसौ स्वयं स्वीयां कालाशक्तिं स्वीकृत्य महत्तत्वेऽहंकारे पंचभूतेषु पंचतन्मात्रेषु 'मनसि, ज्ञानेन्द्रियेषु, कर्मेन्द्रियेषु चेति त्रयोविंशतितत्त्वेषु सहैव प्राविशत्।

तस्मिन् तत्त्वग्रामे प्रविश्य सः प्रसुप्तं जीवानामदृष्टं प्रबोधयामास, तथा पृथक्पृथग्भूतं तत्त्वग्रामं स्वीयया क्रियया क्रिया-शक्त्या च संगठितं चकार। इत्थं यदा भगवता अदृष्टः स्वकार्योन्मुखीकृतः तदा तत्त्वानां त्रयोविंशसंख्याको गणः भगवत्प्रेरणया

१. कालसंज्ञां तदा देवीं बिभ्रच्छक्तिमुरुक्रमः।
त्रयोविंशतितत्त्वानां गुणं युगपदाविशत्॥
सोऽनुप्रविष्टो भगवांश्चेष्टारूपेण तं गणम्।
भिन्नं संयोजयामास सुप्तं कर्म प्रबोधयन्॥
प्रबुद्धकर्मा दैवेन त्रयोविंशतिको गणः।
प्रेरितोऽजनयत् स्वाभिर्मात्राभिरधिपूरुषम्॥
परेण विशता स्वस्मिन् मात्रया विश्वसृग्गणः।
चुक्षोभान्योन्यमासाद्य यस्मिंल्लोकाश्चराचराः॥
हिरण्मयः स पुरुषः सहस्रपरिवत्सरान्।
आण्डकोश उवासाप्सु सर्वसत्त्वोपबृंहितः॥

स्वांशैरधिपुरुषं विराजमुत्पादयामास, अर्थात् यदा भगवानंशरूपेण स्वीये तस्मिन् शरीरे प्रविवेश, तदा सोऽयं जगत्स्रष्टा महतत्त्वादीनां गणः परस्परं सम्मूय परिणमते स्म। एतत्तत्त्वानां परिणमनमेव विराट्पुरुष-संज्ञामधिगच्छति। यस्मिन् सर्वमपि जगदिदं चराचरं विद्यमानं तिष्ठति। अप्सु यदण्डरूपमाश्रयस्थानमासीत् तस्मिंश्च स हिरण्मयः पुरुषः विराट्पुरुषः समग्रानपि जीवान् सह कृत्वा सहस्र-दिव्यवर्ष-पर्य्यन्तं तत्रोवास। सोऽयं विश्वसृष्टि-तत्त्वानां गर्भं ज्ञान-क्रिया-शक्ति-सम्पन्न आसीत्। एताभिशक्तिभिः स स्वयमेव स्वात्मानं हृदयरूपेणैकधा, प्राणरूपेण दशधा, आध्यात्मिकाधिभौतिकाधिदैविकरूपेण त्रिधा च व्यभजत्। असौ विराट्पुरुष एव सर्वप्रथमो जीवः समेषामपि जीवाऽऽत्मभूतोऽस्ति। जीव-रूपत्वात् परमात्मनोऽश प्रथमाभिव्यक्तत्वाच्च भगवतामाद्योऽवतारोऽस्ति। असावध्यात्माधिभूताधिदैवरूपेण त्रिधा, प्राणरूपेण दशधा हृदय-रूपेणैकधा, च विराजते।

स वै विश्वसृजां गर्भो देवकर्मात्मशक्तिमान्।
विबभाजात्मनाऽऽत्मानमेकधा दशधा त्रिधा॥
एष ह्यशेष सत्त्वानामात्मांशः परमात्मनः।
आद्योऽवतारो यत्रासौ भूतग्रामो विभाव्यते॥
साध्यात्मा साधिदैवश्च साधिभूत इति त्रिधा।
विराट् प्राणो दशविध एकधा हृदयेन च॥
स्मरन् विश्वसृजामीशो विज्ञापितमधोक्षजः।
विराजमतपत् स्वेन तेजसैषां विवृत्तये॥
अथ तस्याभिप्तस्य कति चायतनानि ह।
निरभिद्यन्त देवानां तानि मे गदतः श्रृणु॥
तस्याग्निरास्यं निर्भिन्नं लोकपालोऽविशत् पदम्।
वाचा स्वांशेन वक्तव्यं ययासौ प्रतिपद्यते॥
निर्भिन्न तालु वरुणो लोकपालोऽविशद्धरेः।
जिह्वयांशेन च रसं ययासौ प्रतिपद्यते॥
निर्भिन्ने अश्विनौ नासे विष्णोराविशतां पदम्।
घ्राणेनांशेन गन्धस्य प्रतिपत्तिर्यतो भवेत्॥
निर्भिन्नान्यस्य चर्माणि लोकपोलोऽनिलोऽविशत्।
प्राणेनांशेन संस्पर्श येनासौ प्रतिपद्यते॥

विश्व-सर्जन-कर्तृणां महदादि-तत्त्वानां स्वराट्भगवान् तेषां प्रार्थनां संस्मरन् तेषां वृत्तीरवबोधनाय स्वीयेन चेतन-रूपेण तेजसा तं विराट्पुरुषं प्रकाशयामास तमवबोधयामास। तस्मिन् जागृते देवतायतनानि प्रकटीबभूवुः। विराट्पुरुषस्य सर्वत प्राङ्मुखं प्रकटीबभूव। तस्मिन् लोकपालोऽग्निः स्वांशेन वागिन्द्रियेण सह प्राविशत्। येनासौ जीवो वक्ति। तदनन्तरं विराट्पुरुषस्य तालुरजायत। तस्मिन् लोकपालो वरुण स्वांशेन रसनेन्द्रियेण सह स्थितिमकरोत्। येन जीवोऽयं रसान् ग्रहीतुमर्हति रसान् गृह्णाति च।

तदनन्तरं विराट् पुरुषस्य नासारन्ध्रेऽजायताम् तयोरश्विनीकुमारौ स्वांशेन-घ्राणेन्द्रियेण सह प्राविशताम् येन जीवो जिघ्रति, इत्थमेव यदा विराट् पुरुषे क्षिण्वजायताम् तदा तयोः स्वनेत्रेन्द्रियेण सह लोकपतिः सूर्यः प्रविवेश। येन नेत्रेन्द्रियेऽण विविध-रूपाणि, जानाति। तदनन्तरं तस्मिन् विराट्पुरुषस्य विग्रहे त्वगुत्पद्यते स्म तस्यां स्वांशेन त्वगिन्द्रियेण सहितो मातरिश्वा प्राविशत्। इन्द्रियेण चानेन जीवः स्पर्शमनुभवति। यदा चास्य कर्णौ विनिर्भिन्नां तदा तयोः स्वांशेन श्रवणेन्द्रियेणसाकं दिशः प्राविशन्। येन श्रवणेन्द्रियेण जीवः शब्दस्य, ज्ञानं करोति। ततो विराट् पुरुषणस्य शरीरे चर्मोत्पत्तिः समजायत। तस्मिन् चर्मणि स्वांशैः लोमभिः सहितारोषधयः स्थिताः समभवन्। यैः लोमभिर्ना कण्डूयनादिकमनुभवति। यदा तस्य मेढं विनिर्भिन्नं तदा स्वांशेन वीर्येण सार्धं प्रजापतिः प्राविशत्। येन जीव आनन्दमनुभवति। ततः विरा-

---

कर्णावस्य विनिर्भिन्नौ धिष्ण्यं स्वं विविशुर्दिशः।
श्रोत्रेणांशेन शब्दस्य सिद्धिं येन प्रपद्यते॥
त्वचमस्य विनिर्भिन्नां विविशुर्धिष्ण्यमोषधीः।
अंशेन रोमभिः कण्डूं यैरसौ प्रतिपद्यते॥
मेढ्रं तस्य विनिर्भिन्नं स्वधिष्ण्यं क उपाविशत्।
रेतसांशेन येनासावानन्दं प्रतिपद्यते॥
गुदं पुंसो विनिर्भिन्नं मित्रो लोकेश आविशत्
पायुनांशेन येनासौ विसर्गं प्रतिपद्यते॥
हस्तावस्य विनिर्भिन्नौ लोकेशो विष्णुराविशत्।
गत्या स्वांशेन पुरुषो यया प्राप्यं [प्रपद्यते॥
बुद्धिं चास्य विनिर्भिन्नां वागीशो धिष्ण्यमाविशत्।
बोधेनांशेन बोद्धव्यप्रतिपत्तिर्यतो भवेत्॥

ट्पुरुषस्य शरीरे गुदा समजायत। तस्यां स्वांशेन पाय्विन्द्रियेण सह लोकपालो मित्रः प्रविवेश 'येन जीवो मलानुत्सृजति। तत्पश्चात् तस्य हस्तौ प्रकटीबभूवतुः। तयोः स्वीययाऽऽदानप्रदानात्मिकया प्रक्रियया सहितः सुरपतिरिन्द्रः प्रविवेश। शक्त्या चानया जीवः स्वीयां जीविकां प्राप्नोति। यदा चास्य चरणौ विनिर्भिद्येतां तदा तयोः स्वीयया शक्त्या गत्या सहितो लोकेश्वरो विष्णुः प्राविशत्। अनया च गति-शक्त्या जीवः स्वीयं गन्तव्य-स्थानमधिगच्छति। ततो बुद्धिरजायत। स्वांशभूतया बुद्धि-शक्त्या सहितो वाक्पतिः ब्रह्मा प्राविशत्। अनया बुद्धि-शक्त्या जीवो ज्ञातव्यान् विषयानधिगच्छति। तत्पश्चात्तस्य हृदयमजायत। तस्मिन् स्वांशेन मनसा सहितो चन्द्रमा स्थितिमकरोत्। अनया चेह मनः शक्त्या जीवः संकल्पविकल्पात्मकान् विकारान् प्राप्नोति।

हृदयं चास्य निर्भिन्नं चन्द्रमा धिष्ण्यमाविशत्।
मनशांशेन येनासौ विक्रियां प्रतिपद्यते।।
सत्त्वं चास्य विनिर्भिन्नं महान् धिष्ण्यमुपाविशत्।
चित्तेनांशेन येनासौ विज्ञानं प्रतिपद्यते।।
शीर्ष्णोऽस्य द्यौर्धरा पदभ्यां खंनाभेरुदपद्यत।
गुणानां वृत्तयो येषु प्रतीयन्ते सुरादयः।।
आत्यन्तिकेन सत्त्वेन दिवं देवाः प्रपेदिरे।
धरां रजः स्वभावेन पणयो ये च तानन्नु।।
तार्तीयेन स्वभावेन भगवन्नाभिमाश्रिताः।
उभयोरन्तरं व्योम ये रुद्रपार्षदां गणाः।।
मखतोऽवर्तत ब्रह्म पुरुषस्य कुरुद्वह।
यस्तून्सुखत्वाद् वर्णानां मुख्योऽभूद् ब्राह्मणो गुरुः।।
बाहुभ्यो वर्तत क्षत्रं क्षत्रियस्तदनुव्रतः।
यो जातस्त्रायते वर्णान् पौरुषः कण्टकक्षतात्।।
विशोऽवर्तन्त तस्योर्वोर्लोकवृत्तिकरीर्विभोः।
वैश्यस्तदुद्भवो वार्ता नृणां यः समवर्तयत्।।

(स्क. ३, अ.६ श्लो. २—३२).

तत्पश्चात् विराट्पुरुषेऽहङ्कारः समजायत। आश्रयेऽमुष्मिन् क्रियाशक्तिभिः सहितोऽभिमान : रुद्रः प्राविशत्। एनेन जीवः स्वीयङ्कर्त्तव्यं स्वीकरोति। अस्मिन् यदा चित्तमजायत। तदा चित्तशक्त्या सहिते महत्तत्वे ब्रह्मा प्राविशत्। अनया चित-शक्त्या जीवो विज्ञानं चेतनाञ्च समुपलभते। अस्य विराट्पुरुषस्य शिरसः स्वर्लोकः. पद्भ्यां पृथिवी नाभेरन्तरिक्षञ्चोत्पद्यते स्म। एतेषु क्रमशः सत्व-रजस्तमसां त्रया-णामपि गुणानां परिणामरूपेण देवताः मनुष्याः प्रेतादयश्च दृश्यन्ते।

एतेषु देवताः सत्त्वगुणस्याधिक्यात् स्वर्गे, मनुष्यास्तेषामुपयोगिनः गवादयो जीवाश्चेति सर्वे रजसः प्राधान्यात् पृथिव्यां तथा तमसः प्राधान्याद्रुद्रस्य पार्षदगणाः भूतप्रेतादयः स्वर्ग-पृथिव्यन्तरिक्षेषु निवसन्ति।

वेदाः ब्राह्मणाश्च भगवतः मुखाज्जज्ञिरे। मुगात्प्रादुभूतत्वात् तेऽमी ब्रा-ह्मणाः सर्वेष्वपि वर्णेषु श्रेष्ठाः सर्वेषां गुरुश्च वर्त्तन्ते। तस्य बाहुभ्यां क्षत्रियवृतिस्तदव-लम्बिनो क्षत्रियाश्च समाजयन्त। ये विराट्पुरुषस्यांशाज्जनिल्लब्ध्वा सर्वेषां वर्णाना-ञ्चौरादिभ्य उपद्रवेभ्यो रक्षाङ्कुर्वन्ति। भगवत उभाभ्यामप्युरुभ्यां सर्वेषामपि निर्वाहकर्त्री वैश्य-वृत्तिस्तदवलम्बिनो वैश्याश्च प्रादुरासन्, वर्णोऽसौ स्ववृत्तिना जीवा-नाञ्जीविकाञ्चालयति। तत्पश्चात् सर्वेषामपि धर्माणां सिद्धये भगवतश्चरणयोः सेवा-वृत्तिः समजायत, तस्याधिकारी शूद्र-वर्णश्च सम्बभूव। यस्य सेवा-वृत्या श्रीहरिः सम्प्रसीदति।

श्रीभगवान् काल-शक्तिं समाश्रित्यैव मायाम्महदादीनि चोद्बोध्य क्रमशः सम्पूर्णां सृष्टि-प्रक्रियाङ्करोतीति प्रतिपादनात् सुनिश्चितरूपेण वक्तुं शक्यते यदत्र काल-शक्ति-वादि-साङ्ख्यमस्तीति।

(२२)

महादादि-निरूपकं साङ्ख्यम्

निर्गुणस्यापि भगवतो गुण-क्रियादिभिः सङ्गो कथमिति प्रश्नस्य समाधाने श्रीमै-

त्रेयेण श्रीमद्भागवत-महापुराणस्य तृतीये स्कन्धे सप्तमेऽध्याये चतुर्विंशत्तमश्लोकतः समारभ्य सप्तविंशत्तमं श्लोकं यावत् महदादि-तत्त्व-निरूपकं साङ्ख्यमस्ति ।

तच्चेत्थमवगन्तव्यम्—

सृष्ट्यादौ भगवान् क्रमशः महदादीनि तत्त्वानि तेषां विकाराणि वापि विरच्य तत्पश्चातेषामंशैरेव विराट्पुरुषं समुत्पादयामास, तदनन्तरञ्च सः स्वयमपि विराट्स्वरूपे प्राविशत्[1] तस्यविराट्पुरुषस्य सहस्रशः पादोरुबाहवः सन्ति । तमेव विराट्पुरुषं वेदाः शास्त्राणि चेह ह्यादिपुरुष इति प्रतिपादयन्ति । तस्मिन्नेव समग्राश्चापि लोकाः सुप्रतिष्ठिताः सन्ति । तस्मिन्नेव चादिपुरुषे सर्वाणीन्द्रियाणि तेषां सर्वे विषयाः इन्द्रियाभिमानिनो देवाः; दशविधो प्राणः श्चेति सन्ति । यो प्राणः सुनिश्चितरूपेणेह इन्द्रिय-बलंमनोबलं-शारीरिकंबलञ्चेति त्रिप्रकारकोऽपि गण्यते । विराट्पुरुषादेव ब्राह्मणादयो वर्णाः समुद्बभूवुः । ब्रह्मादयो विभूतयोऽपि सर्वाः तस्यैव सन्ति । ब्रह्माक्रमशः दिभ्यश्च पुत्र-पौत्र-दौहित्रादयो बहवः कुटुम्बिनो विविधाः प्रजाश्चाजायन्त । इत्थमेव शनैः शनैः समग्रमपि ब्रह्माण्डमपूरयत् ।

सोऽयं विराट्पुरुषः ब्रह्मादीनां प्रजापतीनामपि प्रभुः समजायत, सर्गानुसर्गमन्वन्तराणामधिपतयो मनवोऽपि तत्सृष्टावेव वर्त्तन्ते ।

उपर्युक्ते प्रसंगे सर्वतः प्राक् भगवता महदादीनि तत्त्वानि विरच्यन्ते । तदनन्तरं विराडादयः समजायन्त, इति प्रतिपादनादत्र महदादि-महत्त्व-निरूपकं साङ्ख्यमस्तीति निश्चप्रचम् ।

सृष्ट्वाग्रे महदादीनि सविकाराण्यनुक्रमात् ।
तेभ्यो विराजमुद्धृत्य तमनुप्र.विशद् विभूः ।।
यमाहुराद्यं पुरुषं सहस्राङ्घ्यूरुबाहुकम् ।
यत्र विश्व इमे लोकाः सविकासं समासते ।।
यस्मिन् दशविधः प्राणः सेन्द्रियार्थेन्द्रियस्त्रिवृत् ।
त्वयेरितो यतो वर्णास्तद्विभूतीर्वदस्व नः ।।
यत्र पुत्रैश्च नप्तृभिः सह गौत्रजैः ।
प्रजा पौत्रैश्च विचित्राकृतय आसंन् याभिरिदं ततम् ।
प्रजापतीनां स पतिश्चक्लृपे कान् प्रजापतीन् ।
सर्गांश्चैवानुसर्गांश्च मनून् मन्वन्तराधिपान् ।।

(२३)

पाद्म-भुवन-कोश-वादि-साङ्ख्यम्

श्रीमद्भागवत-महापुराणे तृतीये स्कन्धेऽष्टमेऽध्याये दशम-श्लोकतः समारभ्य चतुर्विंशतितमं श्लोकं यावत् विष्णोर्नाभिकमलाद् ब्रह्मणो ह्युत्पत्तिप्रसंगे विदुर-प्रश्नान् समादधता मैत्रेयेण पाद्मभुवन-कोश-वादि-साङ्ख्यम् प्रतिपादितं वर्त्तते ।

तच्चेत्थमवबोद्धव्यम्—

सृष्टेः प्राक् सम्पूर्णमेतद्विश्वञ्जले निमग्नमासीत् तदानीङ्केवलं नारायणः शेषशय्यायां आसीत् सुप्तः । सः स्वीयां ज्ञानशक्तिं सर्वथा अक्षुण्णां रक्षन्नेव योगनिद्रां

एतेषामपि वंशांश्च वंशानुचरितानि च ।
उपर्यधश्च ये लोका भूमेर्मित्रात्मजासते ।।
(स्क. ३, अ. ७, श्लो. २१—२६)

१. उदाप्लुतं विश्वमिदं तदासीद्यन्निद्रयामीलितदृङ्न्यमीलयत् ।
अहीन्द्रतल्पेऽधिशयान एकः कृतक्षणः स्वात्मरतौ निरीहः ।।
सोऽन्तः शरीरेऽर्पितभूतसूक्ष्मः कालात्मिकां शक्तिमुदीरयाणः ।
उवास तस्मिन् सलिले पदे स्वे यथानलो दारुणि रुद्धवीर्यः ।।
चतुर्युगानां च सहस्रमप्सु स्वपन् स्वयोदीरितया स्वशक्त्या ।
कालाख्ययाऽऽसादितकर्मतन्त्रो लोकानपीतान् ददृशे स्वदेहे ।।
तस्यार्थसूक्ष्माभिनिविष्टदृष्टेरन्तर्गतोऽर्थो रजसा तनीयान् ।
गुणेन कालानुगतेन विद्धः सूष्यंस्तदाभिद्यत नाभिदेशात् ।।
स पद्मकोशः सहसोदतिष्ठत् कालेन कर्मप्रतिबोधनेन ।
स्वरोचिषा तत्सलिलं विशालं विद्योतयन्नर्क इवात्मयोनिः ।।
तल्लोकपद्मं स उ एव विष्णुः प्रावीविशत् सर्वगुणावभासम् ।
तस्मिन्स्वयं वेदमयो विधाता स्वयंभुवं यं स्म वदन्ति सोऽभूत् ।।

समाश्रित्य स्वीये नेत्रे न्यमीलयत्, सृष्टिकर्मणोऽवकाशं गृहीत्वा स्वात्मानन्देच निमग्न आसीत् । ततस्तास्मिन् परमात्मनि कस्याश्चिदपि क्रियाया: सर्वथोन्मेषाभाव आसीत् । यथाग्नि: स्वीया: दाहकत्वादिका: शक्ती: संगोप्य काष्ठान्यभिव्याप्नोति; तथैव भगवान् समग्राणामपि प्राणिवर्गाणां सूक्ष्मशरीराणि स्वीये शरीरेऽन्तर्लीनानि कृत्वा स्वाधारभूते पयसि सुप्त: । तदानीं तत्र भगवान् स्वीयां काल-शक्तिमेव । जीवानां सूक्ष्मशरीराणि प्राप्त: सृष्टिसमये समवबोधनाय जागृतामरक्षत् । इत्थं स्वरूपभूतया चिच्छक्त्या सह सहस्रचतुर्युगपर्य्यन्तम्परिव्याप्ते शयने शयनानन्तरं च यदा तेनैव परमात्मना कर्मण्य स्मिन् विनियोजिता कालशक्तिस्तमेव परमेश्वरं जीवकर्मणां प्रवृत्तये प्रेरयामास, तदा स: स्व-शरीरान्तर्लीनान् बहून् लोकान् समपश्यत् । यदा भगवतोऽदृष्ट: स्वात्मनि निहितेषु सूक्ष्मशरीरादितत्त्वेषु पपात, तदा तत्तत्वजातं कालाश्रितेन रजसा । क्षुभ्य सृष्टि-सर्जनाय नारायणस्य नादेशत: बहि: नि:ससार कर्मशक्त्यवबोधकेनकालेन प्राप्ते वसरे तन्नाभे: नि:सृतं तत्त्वं सद्य: पद्मकोशरूपेण समुपचितो बभूव । तदा च तत् तत्त्वं पद्मकोशरूपापन्नं परमविस्तृतेन स्वीयेन महामहसा समग्रामपि जलराशिं देदीप्यमानामकरोत् । सर्वेषामपि गणानां प्रकाशके सर्वलोकमये तस्मिन् पद्मे सोऽयंभगवान् विष्णु: स्वयमन्तर्यामित्वेन प्राविशत् । तदा तस्मात् पद्मात् समुपदेशं विनैव सर्ववेदवित् साक्षात् वेदमूर्ति: श्रीब्रह्मा प्रादुरभूद् यस्य नामान्तरं स्वयम्भूरित्यपि वर्त्तते ।

तस्यां स चाम्भोरुहकर्णिकायामवस्थितो लोकमपश्यमान: ।
परिक्रमन्व्योम्नि विवृत्तनेत्रश्चत्वारि लेभेऽनुदिशं मुखानि ।।
तस्माद्युगान्तश्वसनावघूर्णजलोर्मिचक्रात् सलिलाद् विरूढम् ।
उपाश्रित: कञ्ज़मु लोकतत्त्वं नात्मानगद्धाविददादिदेव: ।।
क एष योऽसावहमब्जपृष्ठ एतत्कुतो वाब्जमनन्यदप्सु ।
अस्ति ह्यधस्तादिह किञ्चनैतदधिष्ठितं यत्र सता नु भाव्यम् ।।
स इत्थमुद्वीक्ष्य तदब्जनाल नाडीभिरन्त र्जलमाविवेश ।
नार्वाग्गतस्तत्खरनालनालनाभि विचिन्वंस्तदविन्दताज: ।।
तमस्यपारे विदुरात्मसर्गं विचिन्वतोऽभूत् सुमहांस्त्रिणेमि: ।
यो देहभाजां भयमीरयाण: परिक्षिणोत्यायुरजस्य हेति: ।
ततो निवृत्तोऽप्रतिलब्धकाम: स्वधिष्ण्यमासाद्य पुन: स देव: ।
शनैर्जितश्वासनिवृत्तचित्तो न्यषीददारूढसमाधियोग: ।।
कालेन सोऽज: पुरुषायुषाभिप्रवृत्तयोगेन विरुढबोध: ।।

तस्यां कमल-कर्णिकायां समुपविष्टो ब्रह्मा यदा कंचन लोकं न ददर्श, तदा सः स्वीये नेत्रे प्रसार्य गगने सर्वतोऽवलोकयामास तदानीमेव च तस्य चतुर्ष्वपि दिक्षु चत्वारो मुखाः समजायन्त। तस्यां वेलायां प्रलयकालीन वातेरितानां तरंग-मालानां सत्तायां जलराशेः ऊर्ध्वस्थे कमले स्थितो ह्यादिदेवो ब्रह्मा स्व-विषयकं लोक-तत्त्वरूपकं कमल-विषयकं च किमपि रहस्यं नाज्ञासीत्। सोऽचिन्तयद् यदस्यां कमल-कर्णिकायां स्थितोऽहं कोऽस्मि, कमलमप्येतच्च कुतः समुद्बभूव, निराऽऽधारमेतत् कमलं च कथमर्हति स्थातुम्। कमलस्यास्य नीचैः किमप्याधारभूतं वस्त्वन्तरमवश्यमेव स्यात् कथमन्यथास्य स्थितिरिति। विचार्यैतद् ब्रह्मा कमलस्य सूक्ष्मेषु छिद्रेषु प्राविशत्। तदाऽऽधारभूतं नाभिदेशं यावद्गत्वापि तदाप्तुं न प्राभवत्। तत्राऽधारे घोरे तमसि स्वीयमुत्पत्ति-स्थानमन्वेशयन् भगवान् ब्रह्मा बहुतरं कालमनैषीत्। काल एव भगवच्चालितं चक्रमस्ति। यत् काल-चक्रं प्राणिनो विभीषयन् तेषामायुष्यं क्षपयति। चिरकाल-पर्यन्तमन्विष्यापि स्वीयमुत्पत्ति-स्थानमनुपलभन् परावर्वृते। तदनन्तरं स्वाधारभुवि कमले समुपविश्य शनैः शनैः प्राण-वायुं विजित्य, चेतसं निःसंकल्पं विधाय समाधौ स्थितः समभूत्। इत्थं दिव्यवर्ष-शतं यावद् विहिते सम्यक्प्रकारेण योगाभ्यासकर्मणि ब्रह्मणा ज्ञानं समधिगतम्। तदा तेन ब्रह्मणा स्वीयमुत्पत्ति स्थानंतपःबलेन स्वयमेव हृदि स्फुरन्तं दृष्टम्। सोऽपश्यद् यदत्र प्रलय-पयसि शेषस्य कमलनिभायां शेषस्वरूपिण्यां शुभ्र-वर्णायामायतायां विग्रह-शय्यायां भगवान् पुरुषोत्तम एकाक्येव सुप्तोऽस्ति। शेषस्य दशसहस्रफणाः छत्रमिवायताः सन्ति। तस्य मस्तकेषु किरीटाः शोभन्ते। तेषु मणयः जटिताः सन्ति। मणीनां कान्तिभिः परितोऽन्धकारमगच्छत्। सः स्वीयया श्यामया शरीरकान्त्या मरकत-पर्वत-शोभामपि ह्रेपयति। तस्य कटि-प्रदेशे पीतं वस्त्रं पर्वतस्य प्रान्तभुवि व्याप्तानां पीत-वर्णानां सायं कालीनानां मेघानां श्रियम्मलीनयति। शिरसि सुशोभितं सौवर्णं किरीटं सुवर्णनानां शिखराणां मानमर्दनं करोति। तस्य वनमाला गिरिरत्नानां, जल-प्रपातानां, ओषधीनां च शोभां पराभवति। तस्य भुज-दण्डे वेणुदण्डं चरणौ चेह वृक्षांश्चापि तिरस्कुरुतः।

स्वयं तदन्तर्हृदयेऽवभातमपश्यतापश्यत यन्न पूर्वम्॥
मृणालगौरायतशेषभोग पर्यङ्क एकं पुरुषं शयानम्।
फणातपत्रायुतमूर्धरत्नद्युभिर्हतध्वान्तयुगान्ततोये॥
प्रेक्षां क्षिपन्तं हरितोपलाद्रेः सन्ध्याभ्रनीवेरुरुरुक्ममूर्ध्नः।
रत्नोदधारौषधिसौमनस्यवनस्रजो वेणुभुजाङ्घ्रिपाङ्घ्रेः॥

(स्क. ३, अ. ८' श्लोकाः १०—२४)

उपर्युक्ते प्रसङ्गे सृष्ट्युद्भवे सर्वतः प्राक् पद्मकोशः समुद्भवति क्रमशः तस्मादेव ब्रह्मा, ब्रह्मणश्चाखिलस्य भुवनस्य सृष्टिर्भवतीति प्रतिपादनादत्रपाद्मभुवन-कोश-वादि-सांख्यं विराजततरामिति वक्तुं सुशकम्।

(२४)

कर्म-बीजरूपेण सृष्टि-कारण-रूपेण पञ्च-पदार्थ-वादि-साङ्ख्यम्

विष्णोर्नाभि-कमलात् तत्र भवतः श्रीब्रह्मणः समुत्पत्ति-वर्णनप्रसङ्गे श्रीमैत्रेयेण विदुरम्प्रति प्रतिपादितम् कर्मबीजरूपेणार्थात् सृष्टिकारणरूपेण पञ्चपदार्थवादि साङ्ख्यं श्रीमद्भागवतमहापुराणस्य तृतीये स्कन्धेऽष्टमेऽध्याये द्वात्रिंशत्तम-त्रयस्त्रिंशत्तमयोः श्लोकयोः वर्त्तते कर्मबीजरूपेण सृष्टिकारणरूपेण पञ्चपदार्थवादिसाङ्ख्यम्।

तच्चेत्थमवगन्तव्यम्—

ब्रह्मणा भगवतः श्रीनारायणस्य नाभि-सरसः समुद्भूतङ्कमलञ्जलन्नभः, वायुः स्वशरीरञ्चेति पञ्चपदार्थाः दृष्टाः। पञ्च-पदार्थातिरिक्तन्न किमपि द्रष्टुं प्राभवत्। रजोगुण-परिपूर्णोऽयं ब्रह्मा प्रजाः सिसृक्षति स्म, किन्तु द्रष्टुं स्रष्टुं स्वीयं सामर्थ्यमप्यजानन् भगवन्तन्नारायणमचिन्त्यगतिकं ध्यायतिस्म, तस्य स्तुतिञ्चापि-चकार। तदनन्तरन्तस्यैव परमात्मनः परमेणानुग्रहेण कमलजलगगनवातादि-भिः शरीरेण च जगन्ति स्रष्टुं प्राभवत्।

प्रसङ्गेनानेन सिध्यति यज्जगतामुत्पत्तौ ब्रह्मणा पञ्चपदार्थानामेवापादनं कृतं त एव च सृष्टि-कारणत्वं कर्मबीजत्वं च भजन्त इत्यस्माद्धेतोः वक्तुं शक्यते यदत्र कर्मबीजरूपेण सृष्टि-कारणत्वेन च पञ्च-पदार्थानां प्रतिपादकं सांख्यमस्तीति।

---

१. सूर्येन्दु वाय्वग्न्यगमं त्रिधामभिः परिक्रमत्प्राधनिकैर्दुरासदम्॥
तर्ह्येव तन्नाभिसरःसरोजमात्मानमम्भः श्वसनं वियच्च।
ददर्श देवो जगतो विधाता नातः परं लोकविसर्गदृष्टिः॥
(स्क. ३, अ. ८, श्लो. ३१— ३२)

(२५)

प्राग्लीन-लोक-कल्पना-वादि-साङ्ख्यम्

श्रीमद्भागवत-महापुराणस्य तृतीये स्कन्धे दशमेऽध्याये सप्तमश्लोकतः समारभ्य नवमश्लोकं यावत् श्रीमता मैत्रेयेण श्रीमन्तं विदुरं प्रति प्राग्लीन-लोक-कल्पना-वादि साङ्ख्यम्प्रतिपादितमस्ति[1] ।

---

१. मा वेदगर्भ गास्तन्द्री सर्ग उद्यममावह ।
तन्मयापादितं ह्यग्रे यन्मां प्रार्थयते भवान् ।।
भूयस्त्वं तप आतिष्ठ विद्याञ्चैव मदाश्रयाम् ।
ताभ्यामन्तर्हृदि ब्रह्मन् लोकान् द्रक्ष्यस्यपावृतान् ।।
तत आत्मनि लोके च भक्तियुक्तः समाहितः ।
द्रष्टासि मां ततं ब्रह्मन्मयि लोकांस्त्वमात्मनः ।।
यदा तु सर्वभूतेषु दारुष्वग्निमिव स्थितम् ।
प्रतिचक्षीत मां लोको जह्यात्तर्ह्येव कश्मलम् ।।
यदा रहितमात्मानं भूतेन्द्रियगुणाशयैः ।
स्वरूपेण मयोपेतं पश्यन् स्वाराज्यमृच्छति ।।
नानाकर्मवितानेन प्रजा बह्वीः सिसृक्षतः ।।
नात्मावसीदत्यस्मिंस्ते वर्षीयान्मदनुग्रहः ।।
ऋषिमाद्यं न बध्नाति पापीयाँस्त्वां रजोगुणः ।
यन्मनो मयि निर्बद्धं प्रजाः संसृजतोऽपि ते ।
ज्ञातोऽहं भवता त्वद्य दुर्विज्ञेयोऽपि देहिनाम् ।
यन्मां त्वं मन्यसेऽयुक्तं भूतेन्द्रियगुणात्मभिः ।
तुभ्यं मद्विचिकित्सायामात्मा मे दर्शितोऽबहिः ।
नालेन सलिले मूलं पुष्करस्य विचिन्वतः ।।
(स्क. ३,अ . ९, श्लो. २९-३७)

तच्चेत्थम्—

पद्मासने समासीनेन ब्रह्मणा गगनव्याप्तिमत् कमलं दृष्ट्वा तद्विषये व्यचिन्त्य तस्मिनन्नेव प्राग्लीनान् लोकान् ददर्श । तदनन्तरं अनेनैव सृष्टिं स्रक्ष्यामीति व्यचारयत् । तदनन्तरं भगवता परब्रह्मणा सृष्टि-कर्मणि नियोजितेन ब्रह्मणा तस्मिन् कमल-कोशे प्रवेशो विहितः । तदन्तःप्रविश्य च तस्यैकस्यैव त्रयो विभागाः कृताः । यद्यपि तत्पद्मं एतावद् विस्तृतं आसीद् यत्तस्मिन् चतुर्दश-भुवनानि तेभ्योऽपि समधिका वा विभागाः कर्त्तुं शक्यन्तेस्म । जीवानां भोग-स्थानत्वेन तु शास्त्रेषु भूर्भुवः स्वरामेव वर्णनमस्ति । तथा चैते सन्ति चतुर्दश-लोकाः—अतल-वितल सुतल-तलातल-महातल-रसातल-पातालाख्यारधोलोकाः भूर्लोक-भुवलोक-महर्लोक-जनलोक-तपोलोक-सत्यलोकाख्याः सन्त्यूर्ध्वं लोकाः । महः-जनः-तपः-सत्य लोकान्निष्काम-कर्म कर्त्तारः समधिगच्छन्ति । भूर्लोक-भुवर्लोक-स्वर्लोकांश्च सकाम-कर्म-कर्ता समधिगच्छति । नीच-कर्म-कर्त्तारश्चाधिगच्छन्ति अतलादीन् अधोलोकान् ।

सर्वाण्यपि चैतानि भुवनानि संहरण-वेलायां लीनानि भवन्ति तथा च तदनन्तरं ब्रह्मणा भूयोऽपि कल्प्यन्ते । अतएवात्र वक्तुं शक्यते यद्-ब्रह्मणा प्राग्लीनानामेव लोकानां कल्पना विधीयते न तु नूतनाङ् केषांचिदपि । प्रसाङ्गे ऽमुष्मिन् विषयस्यास्य प्रतिपादनमस्तीति वक्तुं शक्नुमो यदत्र प्राग्लीन-लोक-कल्पना-वादि-साङ्ख्यमस्तीति ।

तद्विलोक्य वियद्व्यापि पुष्करं यदधिष्ठितम् ।
अनेन लोकान् प्राग्लीनान् कल्पितास्मीत्यचिन्तयत् ।।
पद्मकोशं तदाविश्य भगवत्कर्मचोदितः ।
एकं व्यभाङ्क्षीदुरुधा त्रिधा भाव्यं द्विसप्तधा ।।
एतावाञ्जीवलोकस्य संस्थाभेदः समाहृतः ।
धर्मस्य ह्यनिमित्तस्य विपाकः परमेष्ठ्यसौ ।।
(स्क. ३, अ. १०, श्लो. ७—९)

(२६)

पुरुषोपादान-वादि-सांख्यम्

श्रीमद्भागवत-महापुराणस्य तृतीये स्कन्धे दशमेऽध्याये दशैकसंख्याकः श्लोकतः समारभ्यैकोनत्रिंशत्तमं श्लोकं यावत् तत्रभवता मैत्रेयेण श्रीमन्तं विदुरं प्रति प्रतिपादितं पुरुषोपादान-वादि-साङ्ख्यमस्ति[1]।

तच्चेत्थमवगन्तव्यम्

विषयाणां रूपान्तरणङ्कालस्य स्वभावोऽस्ति कालस्याऽऽकारोस्ति कालः। स्वयन्तु निर्विशेषोऽनादिरनन्तश्चास्ति। तमेव निमित्तीकृत्य भगवान् लीलयैव स्वात्मानं स्वयमेव सृष्टिरूपेण प्रकटीकरोति। पूर्वमेतद्विश्वं भगवन्माययान्तर्लीनब्रह्मरूपेण स्थितमासीत्। तदेवाव्यक्त-मूर्त्तिना कालेन भगवान् स्वयं भूयः पृथग्रूपेण प्रकटीचकार। जगदेतत् यादृशं साम्प्रतं स्थिति-वेलायां वर्त्तते, तादृशमेव पूर्वमप्यासीत् कालान्तरेऽपि चेदृशमेव भविष्यति। विश्वस्यास्य सृष्टिर्नवधा जायते। तथा च प्राकृती वैकृतीति

---

1. गुणव्यतिकराकारो निर्विशेषोऽप्रतिष्ठितः।
पुरुषस्तदुपादानमात्मानं लीलयासृजत्॥
विश्वं वै ब्रह्मतन्मात्रं संस्थितं विष्णुमायया।
ईश्वरेण परिच्छिन्नं कालेनाव्यक्तमूर्तिना॥
यथेदानी तथाग्रे च पश्चादप्येतदीदृशम्।
सर्गो नवविधस्तस्य प्राकृतो वैकृतस्तु यः॥
कालद्रव्यगुणैरस्य त्रिविधः प्रतिसंक्रमः।
आद्यस्तु महतः सर्गो गुणवैषम्यमात्मनः॥
द्वितीयस्त्वहमो यत्र द्रव्यज्ञानक्रियोदयः।
भूतसर्गस्तृतीयस्तु तन्मात्रो द्रव्यशक्तिमान्॥
चतुर्थ ऐन्द्रियः सर्गो यस्तु ज्ञानक्रियात्मकः।
वैकारिको देवसर्गः पञ्चमो मन्मयम्मनः॥

दशम्यपि भवति सृष्टिः। तया चास्य लयः काल-द्रव्य-गुणैः त्रिधा भवति। प्रथमा-सृष्टिः महत्तत्त्वस्य वर्त्तते भगवत्प्रेरणया सत्त्वादिषु गुणेषु जायमानं वैषम्यमेव वर्त्ततेऽस्याः स्वरूपम्। भवति च द्वितीया सृष्टिराहङ्कारिकी यस्याः पृथिव्यादीनां पंचभूतानां समग्राणामपिचेन्द्रियाणां समुत्पत्तिः सञ्जायते। तृतीया सृष्टिः भूत-सर्गनाम्ना व्यवह्रियते अस्यां तृतीयायां सृष्टौ पंच-महाभूतानां कारणं पंचतन्मात्रकं जायते। चतुर्थी सृष्टिः वर्त्तते चेन्द्रियाणां या ज्ञानक्रियाशक्तिरूपेण सम्पद्यते। पंचमी सृष्टिः सात्त्विकादहंकारादुत्पन्नानां इन्द्रियाधिष्ठातृ-देवतानां वर्त्तते। मनोऽपि पंचम्यामेव सृष्टावजायत। षष्ठी सृष्टिः वर्त्तते तत्राविद्यायाः। यस्यामविद्यायां तामिस्रान्धतामिस्रतममोहमहामोहाख्याः पंच-ग्रन्थयो भवन्ति। अविद्या चैषा जीवानां बुद्धिषु नैकधा विदधात्यावरणानि। यः भगवान् स्वीयानां चिन्तकानां समग्राण्यपि दुखान्यपहरति। तस्यैव श्रीहरेः एषा समग्रापि स्थितिः लीलैव वर्त्तते। स एव रजोगुणं स्वीकृत्य जगतां सृष्टिं विदधाति। षड्विध प्राकृतसृष्ट्यन्तरं षड्-विधानां स्थावराणां वृक्षाणां सप्तमी प्रधाना वैकृती सृष्टिर्भवति। वृक्षाणां च सन्ति षट्प्रकाराः निम्नाङ्किताः—

वनस्पतयः, ओषधयः, लताः, त्वक्साराः, वीरुधः, द्रुमाश्चेति।

एतेषां संचरणमूर्ध्वम्भ भवति। एतेषु प्रायः ज्ञान-शक्तिः नैव प्रकटीभवति। एते अन्तरेव केवलां स्पर्शानुभूतिं कुर्वन्ति।

षष्ठस्तु तमसः सर्गो यस्त्वबुद्धिकृतः प्रभो।
पडिमे प्राकृताः सर्गा वैकृतानपि मे श्रृणु॥
रजोभावो भगवतो लीलेयं हरिमेधसः।
सप्तमो मुख्यसर्गस्तु षड्विधस्तस्थुषां च यः॥
वनस्पत्योषधिलतात्वक्सारा वीरुधो द्रुमाः।
उत्स्रोतसस्तमः प्राया अन्तः स्पर्शा विशेषिणः॥
तिरश्चामष्टमः सर्गः सोऽष्टाविंशद्विधो मतः।
अविदो भूरितमसो घ्राणज्ञाहृद्यवेदि नः॥
गौरजो महिषः कृष्णः सूकरो गवयो रुरुः।
द्विशफाः पशवश्चेमे अविरुष्ट्रश्च सत्तम॥
खरोऽश्वोऽश्वतरो गौरः शरभश्चमरी तथा।

तथा चैतेषु प्रत्येकस्मिन्, कोऽपि विशिष्टो गुणो भवति। अष्टमी सृष्टिस्तिर्यग्योनीनामस्ति। साष्टाविंशतिधा गण्यते। तिर्यग्योनिजाः जीवाः कालं नानुभवन्ति तमोगुणस्याधिक्यत्वाद् ह्येते भक्षण-पान-मैथुन-शयनादीन्येव जानन्ति। एते गन्धमात्रेण वस्तूनि जानन्ति। एतेषां हृदये विचारशक्तिर्दूरदर्शिता वा न भवति। एतेषु केचनैकशफाः, केचन द्विशफाः, केचन पंचनखाः, केचन च पक्षिणो भवन्ति। नवमी सृष्टिः नृणां वर्त्तते, सा च भवति एकविधैव। अस्याहरणक्रिया च भवत्यूर्ध्वंतः। अर्थात् तेषां नृणां सर्वमशितादिकमुदरम्प्रति मुखमार्गेणैव गच्छतीति। मनुष्यः रजो गुणप्रधानः कर्म-निरतःदुःख रूपेषु विषयेषु चापि सुखमेवेति मन्यमानो भवति। स्थावराः पशु-पक्षिणः, मनुष्याश्चेति त्रिधा प्रतिपादिताः सृष्टयः सन्ति, एताभिः सह देवसर्गोऽपि भवतीति वैकृती सृष्टिर्विज्ञेया। महत्तत्वादिकस्य वैकृतस्य देवसर्गस्य गणना प्राकृत्यां सृष्टौ विधीयते। तदतिरिक्तः सनत्कुमारादीनां यः सर्गो भवति सः सर्गः कौमारसर्गनाम्नाऽभिधीयते। कौमार-सर्गश्चायं प्राकृत-वैकृतो वर्त्तते।

एते चैकशफाः क्षत्तः शृणु पञ्चनखान् पशून्॥
श्वा शृगालो वृको व्याघ्रो मार्जारः शशशल्लकौ।
सिंहः कपिर्गजः कूर्मो गोधा च मकरादयः॥
कङ्कगृध्रवटश्येनभासभल्लूकबर्हिणः।
हंससारस चक्राह्वकाकोलूकादयः खगाः॥
अर्वाक्स्रोतस्तु नवमः क्षत्तरेकविधो नृणाम्।
रजोऽधिकाः कर्मपरा दुःखे च सुखमानिनः॥
वैकृतास्त्रय एवैते देवसर्गश्च सत्तम।
वैकारिकस्तु यः प्रोक्तः कौमारस्तूभयात्मकः॥
देवसर्गश्चाष्टविधो विबुधाः पितरोऽसुराः।
गन्धर्वाप्सरसः सिद्धा यक्षरक्षांसि चारणाः॥
भूतप्रेतपिशाचाश्च विद्याध्राः किन्नरादयः।
दशैते विदुराख्याताः सर्गास्ते विश्वसृक्कृताः॥
अतः परं प्रवक्ष्यामि वंशान्मन्वन्तराणि च।
एवं रजःप्लुतः स्रष्टा कल्पादिष्वात्मभूर्हरिः॥
सृजत्यमोघसङ्कल्प आत्मैवात्मानमात्मना॥
(स्क० ३ अ०१० श्लो० ११– २९)

देवसर्गश्च देवपितृ-गन्धर्वासुराप्सरसो यक्ष-राक्षस-सिद्ध-चारण-विद्याधर-भूत-प्रेत-पिशाच-किन्नर-किम्पुरुषाश्वमुखाश्चेत्यष्टविधः प्रतिपाद्यन्ते। इत्थं जगतां कर्त्रा ब्रह्मणा सृष्टोऽयं सर्गः दशविधो वर्त्तते।

उपर्युक्ते प्रसङ्गे पुरुषोपादानेन दशविधः सर्गः सृज्यत इति प्रतिपादितमस्ति तस्मादत्र पुरुषोपादान-वादि-साङ्ख्यमस्ति।

(२७)

परमाणु-वादि-कालपरिमाण-वादि च साङ्ख्यम्

श्रीमद्भागवत-महापुराणे तृतीये स्कन्धे दशैकतमेऽध्याये श्रीमन्वन्तरादीनां काल परिमाण-निरूपण-प्रसङ्गे श्रीमता मैत्रेयेण श्रीमन्तं विदुरम्प्रति समुपदिष्टं परमाणु-वादिकाल-परिमाण-वादि च साङ्ख्यमस्ति[1]।

तच्चेत्थमवगन्तव्यम्

पृथिव्यादीनां समग्राणामपि कार्याणां यः सूक्ष्मतमो भागो भवति यस्य च विभागः कर्त्तुन्नैव शक्यते तथा च यस्य पृथक्परमाणुभिः सह संयोगोऽपि नाभवत् सः

1· चरमः सद्विशेषाणामनेकोऽसंयुतः सदा।
परमाणुः स विज्ञेयो नृणामैक्यभ्रमो यतः॥
सत एव पदार्थस्य स्वरूपावस्थितस्य यत्।
कैवल्यं परममहानविशेषो निरन्तरः॥
एवं कालः परमाणुर्वै यो भुङ्क्ते परमाणुताम्।
सतोऽविशेषभुग् यस्तु स कालः परमो महान्॥
अणुर्द्वौ परमाणू स्यात्त्रसरेणुस्त्रयः स्मृतः।
जालार्करश्म्यवगतः खमेवानुपतन्नगात्॥
त्रसरेणु त्रिकं भुङ्क्ते यः कालः स त्रुटिः स्मृतः।
शतभागस्तु वेधः स्यात्तैस्त्रिभिस्तु लवः स्मृतः

परमाणुरित्यभिधीयते । नैकेषां परमाणूनां परस्परं सम्मेलनेन एव मानवाः भ्रान्त्या तेषां समुदाय-स्वरूपमवयविनं मन्वते । परमाणुरसौ यस्य सूक्ष्मतमो भागो भवति तस्य स्वसामान्य-स्वरूपे स्थितस्य पृथिव्यादि-समुदायस्य नाम परममहान् वर्त्तते। परममहद्दशायां तस्मिन् प्रलयादिदशाभेदोऽपि न स्फुरति । न च नूतन-प्राचीनादिकाल भेदोऽपि प्रतीयते तथा घटपटादीनां वस्तूनां पार्थक्येन कल्पनापि नैव भवति । इत्थ वस्तुनः सूक्ष्मतम-महत्तमे स्वरूपे स्तः । वस्तूनां स्वरूपमिव परमाण्वाद्यवस्थासु व्याप्य व्यक्तानां पदार्थानामुपभोक्तुः सृष्ट्यादौ समर्थस्याव्यक्तस्वरुपिणो भगवतः कालस्यापि सूक्ष्मत्वं स्थूलत्वञ्चानुमातुं शक्येते ।

यः कालः प्रपञ्चस्य परमाणुनिभां सूक्ष्मतमामवस्थां व्याप्नोति सो त्वन्तं सूक्ष्मो वर्त्तते । तथा च यः कालः सृष्टेः समारभ्य प्रलयपर्यन्तं प्रपञ्चस्यास्य सर्वस्यापि समग्रापि थ चावस्थाः भुङ्क्ते सः परम-महान् वर्त्तते । द्वौ परमाणू सम्मिल्य अणुः इत्यभिधीयते त्रयाणामणूनां संयोगेन त्रभरेणुः सम्पद्यते । त्रसरेणुः वातायनैः प्रविष्टासु सूर्यरश्मिषु वातेरितः परितः सदनाभ्यन्तरे परिभ्रमन् समवलोकयितुं शक्यते । यस्मिन् काले त्रसरेणु-त्रिकं भोग्यते सः कालस्त्रुटिः समभिधीयते । त्रुटि-कालतः शतगु-णाधिकः समयः वेध-संज्ञां लभते । त्रिभिः वेधैः लवः संजायते । त्रिभिर्लवैः निमि संजायते । त्रयः निमेषाः क्षण-संज्ञां समधिगच्छन्ति । क्षणानां पंचकं काष्ठ संज्ञां प्राप्नोति पंचदशभिः काष्ठठाभिः लघुः संजायते । पंचदश-लघूनां संयोगेन तेषां नाडिकेति संज्ञा संजायते । द्वाभ्यां नाडिकाभ्यां संयोगे मुहूर्त्त-सँज्ञा भवति । षड्भिः सप्तभिर्वा मुहूर्त्तै यामः मानवीय अहोरात्रस्य-भवत्यष्टमो भागः । प्रस्थ-जलाश्रया दृषट्पलमिनं ताम्रपात्रं भवेत्, चतुरंगुला चतुर्माषस्वर्ण-निर्मिता शलाकैका निर्माय तथा तस्मिन् पात्रे नीचैः छिद्रङ्कृत्वा तां शलाकां तस्मिन् निक्षिपेत् । यावद् प्रस्थैकं वारि तस्मिन् पूरितं भवेत् । तावत् नाडिका सञ्जायते ।

निमेषस्त्रिलवो ज्ञेय आम्नातस्ते त्रयः क्षणः ।
क्षणान् पञ्च विदुः काष्ठां लघु ता दश पञ्च च ।।
लघूनि वै समाम्नाता दश पञ्च च नाडिका ।
ते द्वे मुहूर्त्तः प्रहरः षड्यामः सप्त वा नृणाम् ।।
द्वादशार्ध पलोन्मानं चतुर्भि चतुरङ्गुलैः ।
स्वर्णमाषैः कृतच्छिद्रं यावत्प्रस्थजल प्लुतम् ।।

मर्त्याहि्न चत्वारो यामाः भवन्ति, चत्वार एव यामाः। रात्रावपि भवन्ति एतादृग्भिरहोरात्रैः पंचदशभिः पक्षः सम्पद्यते। यस्य कृष्णपक्षः शुक्लपक्षश्चेति द्वौ भेदौ जायेते। द्वावपि पक्षै सम्भूय मास-संज्ञां प्राप्नुतः। द्वौ मासौसम्भूयर्तुमेकं निर्मीतः त्र्यर्तवः सम्भूयायनं निर्मान्ति। एकस्मिन् वर्षे द्वेऽयने भवतः। दक्षिणायनमुतरायणं' चेति। मानवानां सम्वत्सरमेकं देवानामहोरात्रं भवति। वर्षाणामेकं शतकं मानवानां परमायुः भवति।

चन्द्रादीनां ग्रहाणामश्विन्यादीनां नक्षत्राणां समग्रस्यापि तारामण्डलस्य चाधिष्ठातृदैवतं भगवान् सूर्यः परमाणुतः समारभ्य संवत्सर-पर्य्यन्तके समये द्वादशराशि-स्वरूपिणं समग्रं भुवनकोशं परिक्रमते। सौरः बार्हस्पत्यः, सावनः, चान्द्रः, नाक्षत्रश्चेति मासानां भेदमनुसृत्य संवत्सरः, परिवत्सरः, इडावत्सरः, अनुवत्सरः, वत्सरश्चेति वर्षस्यसंज्ञाः जायन्ते। एतेषां पंचाधिवर्षाणां प्रवर्तको भगवान् सूर्यः समेषामपि समुपास्यो वर्त्तते। सूर्यः पञ्चष्वपि भूतेषु तेजः स्वरूपं समुज्जवलमद्भुतं चास्ति। एष एव स्वकालशक्त्या बीजादीनां पदार्थानामङ्कुरोत्पादिकां शक्तिं कार्योन्मुखीं विदधाति। असौ पुरुषाणां मोह-निवृत्तये तेषामायुष्यं क्षपयन् गगने विचरति, असावेव च सकामकर्म-निरतेभ्यः यज्ञादीनां फलानि स्वर्गादि-लोक प्राप्तिरूपाणि प्रयच्छति। सूर्यस्य परिक्रान्त्यैव क्रमशः सत्य-त्रेता-द्वापर-कलि-संज्ञकाः युगाः, सन्ध्याः, सन्ध्यांशाश्च जायन्ते। द्वादशसहस्र

यामाश्चत्वारश्चत्वारो मर्त्यानामहनी उभे।
पक्षः पञ्चदशाहानि शुक्लः कृष्णश्च मानद ॥
तयोः समुच्चयो मासः पितॄणां तदहर्निशम्।
द्वौ तावृतुः षडयनं दक्षिणं चोत्तरं दिवि ॥
अयने चाहनी प्राहुर्वत्सरो द्वादशः स्मृतः।
संवत्सरशतं नृणां परमायुर्निरूपितम् ॥
ग्रहर्क्षताराचक्रस्थः परमाण्वादिना जगत्।
संवत्सरावसानेन पर्येत्यनिमिषो विभुः ॥
संवत्सरः परिवत्सर इडावत्सर एवच।
अनुवत्सरो वत्सरश्च विदुरैवं प्रभाष्यते ॥
यः सृज्यशक्तिमुरूधोच्छ्वसयन् स्वशक्त्या,
पुंसोऽभ्रमाय दिवि धावति भूतभेदः ॥

दिव्यवर्षैः चतुर्युगी सम्पद्यते । सत्यादिषु युगेषु क्रमशश्चतुस्त्रिंश-द्वयेकसहस्र-दिव्य-वर्षाणि भवन्ति ।

प्रत्येकस्मिन् युगे यावत्संख्याकानि सहस्र-वर्षाणि भवन्ति तावत्याः संख्यायाः द्विगुणित-शत-संख्याकानि वर्षाणि सन्ध्यासु सन्ध्यांशेषु च भवन्ति । युगस्यादौ सन्ध्या भवति, युगस्यान्ते च सन्ध्यांशः। एतेषां मध्यस्थो कालः कालविद्भिः युगशब्देन व्यवह्रियते । प्रत्येकस्मिन् युगे समधिगम्यत एकैको धर्मो विशिष्ट-धर्मत्वेन । सत्य-युगे-धर्मश्चतुष्पाद् भवति, त्रेतायां त्रिपाद् भवति, द्वापरे द्विपाद्भवति, भवति च कलावेक-पाद्धर्मः। अधर्मश्च क्रमशो वर्धते। तद्यथा-सत्ययुगैकपात्, त्रेतायां द्विपात्, द्वापरे त्रिपात्तथा च कलौ युगे भवति चतुष्पादधर्मः ।

त्रिलोक्याः बहिः महर्लोकतो ब्रह्मलोकं यावदत्रत्या सहस्र-चतुर्युगी दिनत्वेन परिकल्प्यते, तावान्नेव कालश्च रात्रित्वेन निर्धार्यते । यस्यां रात्रौ ब्रह्मा स्वपिति । व्यपगतायां रात्रौ समग्रस्यापि लोकस्यास्य कल्पः प्रारभ्यते । कल्पो ह्ययं सामान्य-सहस्र-चतुर्युगी पर्य्यन्तं प्रचलति कल्पे चैकस्मिन् चतुर्दशमनवो भवन्ति । प्रत्येकम्मनुः एकसप्तति-चतुर्युग्याः किंचिद्-अधिक ङ्कालं यावत् स्वं अधिकारं भुङ्क्ते । प्रत्येकस्मिन् मन्वन्तरे पृथक्-पृथङ्मनुवंशिनो राजानः, सप्तर्षयः,देवगणाः, इन्द्रस्तदनुयायिनो

त्रिलोक्यां दह्यमानायां शक्त्या सङ्कर्षणाग्निना ।
यान्त्यूष्मणा महर्लोकाज्जनं भृग्वादयोऽर्दिताः ।
तावत्त्रिभुवनं सद्यः कल्पान्तैधितसिन्धवः ।
प्लावयन्त्युत्कटाटोप चण्डवातेरितोर्मयः ।।
अन्तः स तस्मिन् सलिल आस्तेऽनन्तासनो हरिः ।
योगनिद्रा निमीलाक्षः स्तूयमानो जनालयैः ।।
एवंविधैरहोरात्रैः कालगत्योपलक्षितैः ।
अपक्षितमिवास्यापि परमायुर्वयः शतम् ।।
यदर्धमायुषस्तस्य परार्धमभिधीयते ।
पूर्वः परार्धोऽपक्रान्तो ह्यपरोऽद्य प्रवर्त्तते ।।
पूर्वस्यादौ परार्धस्य ब्राह्मो नाम महानभूत् ।
कल्पो यत्राभवद् ब्रह्मा शब्दब्रह्मेतियं विदुः ।।

गन्धर्वादयश्च सहैव स्वीयं स्वीयमधिकारमधितिष्ठन्ति । एषा ब्रह्मणो दैनन्दिनी सृष्टिः वर्त्तते । यस्यां त्रयाणामपि लोकानां सृष्टिर्भवति । तस्यां स्वं स्वं कर्म समनुसृत्य पशु-पक्षि-नृपितृ-देवानां चोत्पत्तिर्भवति। मन्वन्तरेष्वेतेषु भगवान् सत्त्व-गुणमाश्रित्य स्वीयया मन्वादि-मूर्त्त्या पौरुषमभिव्यञ्जन् जगदेतत्पालयति । कालक्रममनुसृत्ययदा ब्रह्मणो दिनं व्यत्येति । तदा सः तमो गुणस्य सम्पर्कं स्वीकृत्य स्वसर्जनात्मकं पौरुषं स्थिरीकृत्य निश्चेष्टभावेन तिष्ठति । तदा समग्रमपि जगत्तस्मिन् लीयते ।

सूर्य-चन्द्रादिभ्यो व्यतिरिक्ता सा रात्रिः प्रलय-रात्रित्वेन समागच्छति । तदा भूर्भुवःस्वराख्याः लोकास्तस्य ब्रह्मणः शरीर एवान्तर्लीनाः भवन्ति । तदा त्रयोऽपि च लोकाः शेषमुखान्निःसृत-वह्नि्नरूपया भगवच्छक्त्या ज्वलन्ति ।

अतस्तस्याः तापेन व्याकुलीभूय भृग्वादयो मुनीश्वराः महर्लोकतः जनलोकं गच्छन्ति । प्रलयवेलायां सप्तसमुद्राः प्रलयकालीनेन प्रचण्डेन पवनेनोच्छलन्तः स्वीयैरुत्तालैस्तरङ्गैः सर्वथा सर्वामपि त्रिलोकीं निमज्जयन्ति । तदा शेष-शायी भगवान् विष्णुः स्वे नेत्रे निमील्य योगनिद्रां समाश्रित्य स्वपिति । तदा जनलोकवास्तव्याः मुनिजनास्तं बह्वीभिः स्तुतिभिः स्तुवन्ति। इत्थं कालगत्या सहस्रचतुर्युग-रूपेण प्रतीयमाने ब्रह्मणो

तस्यैव चान्ते कल्पोऽभूद् यं पाद्ममभिचक्षते ।
यद्धरेर्नाभिसरस आसील्लोक सरोरुहम् ।।
अयं तु कथितः कल्पो द्वितीयस्यापि भारत ।
वाराह इति विख्यातो यत्रासीत्सूकरो हरिः ।।
कालोऽयं द्विपरार्धाख्यो निमेष उपचर्यते ।
नैवेशितुं प्रभुर्भूम्न ईश्वरो धाममानिनाम् ।।
विकारैः सहितो युक्तैर्विशेषादिभिरावृतः ।
आण्डकोशो बहिरयं पञ्चाशत्कोटि विस्तृतः ।।
दशोत्तराधिकैर्यत्र प्रविष्टः परमाणुवत् ।
लक्ष्यतेऽन्तर्गताश्चान्ये कोटिशो ह्यण्डराशयः ।।
तदाहुरक्षरं ब्रह्म सर्वकारणकारणम् ।
विष्णोर्धाम परं साक्षात्पुरुषस्य महात्मनः ।।

(स्क, ३. अ, ११. श्लो,२५—४१)

ऽहोरात्रे क्रमशः परिवर्त्तमाने तादृगहोरात्रैः सङ्ख्यातमपि ब्रह्मणः शतवर्ष-परिमितमायुष्यमपि व्यत्येति । ब्रह्मण आयुषोऽर्धांशः परार्ध-नाम्ना व्यवह्रियते। अद्यावधि-प्रथमोऽयं परार्धो व्यतिक्रान्तः । साम्प्रतं च द्वितीयो परार्धः प्रचलति । पूर्व-परार्धस्य प्रारम्भे ब्रह्मनामको महान् कल्पः सम्बभूव । तस्मिन्नेव च ब्रह्मणः समुत्पत्तिः समजायत । विद्वांस एनमेव शब्द-ब्रह्मेति कथयन्ति । तस्य परार्धस्यान्ते यः कल्पः समभूत्तं पद्मकल्पनाम्ना व्यवहरन्ति। तस्मिन् कल्पे भगवतः नाभि-सरोजतः पद्मम्प्रकटीबभूव। तत्पद्मं सर्वलोकमयमासीत् । साम्प्रतं यः कल्पः प्रचरति सः द्वितीयस्य परार्धस्य प्रारम्भको द्योत्यते । कल्पोऽयं साम्प्रतं वर्त्तमानो वाराह-कल्प-नाम्ना व्याह्रियते । कल्पपस्यास्य प्रारम्भे भगवता श्रीविष्णुना शूकर-स्वरूपं धृतमासीत् । एषो द्विपरार्धाख्यो कालोऽव्ययस्यानन्तस्यानादेः विश्वात्मनः श्रीविष्णोः निमेषः गण्यते ।

परमाणुतः समारभ्य द्विपरार्धपर्य्यन्तं विस्तृतः कालः सर्वसमर्थत्वे सत्यपि सर्वात्मनि हरौ न कामपि प्रभुतां भजते । एषस्तु देहादिष्वपि स्वाभिमानवत्सु जीवेष्वेव शाशनङ् कर्तुं प्रभवति । प्रकृतिः महत्तत्वं,अहंकारः, पंचतन्मात्रं चेति अष्टाभिः प्रकृतिभिः सह दशेन्द्रियाणि, मनः, पञ्चमहाभूतानि, एभिः षोडशभिः विकारैः निर्मितोऽयं ब्रह्मा-

---

कालाख्यया गुणमयं क्रतुभिर्वितन्वं ।
स्तस्मै बलिं हरत ईतसरपञ्चकाय ।।
(स्क,3. अ.11. श्लो. 1—15)

एष दैनन्दिनः सर्गो ब्राह्मस्त्रैलोक्यवर्धन ।
तिर्यङ्पितृदेवानां संभवो यत्र कर्मभिः ।।
मन्वन्तरेषु भगवान् बिभ्रत्सत्त्वं स्वमूर्त्तिभिः ।
मन्वादिभिरिदं विश्वमवत्युदितपौरुषः ।।
तमोमात्रामुपादाय प्रतिसंरुद्धविक्रमः ।
कालेनानुगताशेष आस्ते तूष्णीं दिनात्यये ।।
तमेवान्वपिधीयन्ते लोकाः भूरादयस्त्रयः ।
निशायामनुवृत्तायां निर्मुक्तशशिभास्करम् ।।
ससर्जाग्रेऽन्धतामिस्रमथ तामिस्रमादिकृत् ।
महामोहं च मोहं च तमश्चाज्ञानवृत्तयः ।।

ण्डकोशोऽन्तः पञ्चाशत् कोटि-योजन-विस्तृतोऽस्ति । तथास्य परित उत्तरोतरं दश-दश-गुणिताः सप्ताऽवरणाः सन्ति । तैः सहैषो यस्मिन् परमाणुनिभो प्रतीयते । तथा च यस्मिन् एतादृश्यः कोटिशः ब्रह्माण्ड-राशयः सन्ति, स ह्यं तेषां प्रधानादीनां समेषामपि कारणानां कारणं ब्रह्मे त्यभिधीयते एष एव पुराणपुरुषस्य परमात्मनः श्रीविष्णोर्भगवतः श्रेष्ठन्धामाऽस्ति ।

उपर्युक्ते प्रसङ्गेऽन्धतामिस्रादिपापसृष्टिनिरूपणादिहान्धतामिस्रादिप्रतिपादकं साङ्ख्यमस्तीति निश्चप्रचम्

(२८)

अन्धतामिस्रादिवादि साङ्ख्यम्

श्रीमद्भागवतस्य तृतीये स्कन्धे द्वादशेऽध्याये सनकादे रुद्रस्य मरीच्यादीनां सरस्वत्याः वेदादीनाञ्चोत्पत्तिवर्णनप्रसङ्गे द्वितीयश्लोकतः सप्तमश्लोकपर्यन्तं मैत्रेयोक्तमन्धतामिस्रादिवादि साङ्ख्यम् ।

सर्वतः प्राक् स ब्रह्माऽज्ञानस्य पञ्चवृत्तयः तमः, (अविद्या) मोहः, (अस्मिता) महामोहः, (रागः), तामिस्रम् (द्वेषः) अन्धतामिस्रम् (अभिनिवेशः) इत्याख्याः सृष्टवान् । परमेतामत्यन्तपापमयीं सृष्टिं विलोक्य स प्रसन्नतां नाध्यगच्छत् । तदा सः स्वं मनः भगवद्ध्यानेन पवित्रीकृत्य विशुद्धेन मनसा द्वितीयां सृष्टिमकरोत्, तत्र सनकसनन्दनसनातनसनत्कुमारान् निवृत्तिपरायणानूर्ध्वरेतसः मुनीनुत्पादयामास । मोक्षमार्गानुगामिभिः भगवद्ध्यानतत्परैश्चतैः सृष्टिक्रमो नाद्रितः । एतादृश्यां स्थितौ ब्रह्मा क्रुद्धो बभूव स क्रोधश्च ब्रह्मणः भ्रुवोर्मध्यतो नीललोहितवर्णो बालरूपेण प्रकटीबभूव, सोऽत्र रुद्रसंज्ञाँल्लेभे ।

उपर्युक्तप्रसङ्गेऽन्धतामिस्रादिपापसृष्टिनिरूणादत्राऽन्धतामिस्राऽऽदिप्रतिपादकं-साङ्ख्यमस्तीति शम् ।

(२९)

वेदादि-सृष्टि-वादि-साङ्ख्यम्

श्रीमद्भागवतमहापुराणे तृतीये स्कन्धे द्वादशेऽध्याये सप्तत्रिंशत्तमश्लोकतः

दृष्ट्वा पापीयसीं सृष्टिं नात्मानं बह्वमन्यत ।
भगवद्ध्यानपूतेन मनसाऽन्यां ततोऽसृजत् ।।
सनकं च सनन्दं च सनातनमथात्मभूः ।
सनत्कुमारं च मुनीन्निष्क्रियानूर्ध्वरेतसः ।।
तान् बभाषे स्वभूः पुत्रान् प्रजाः सृजत पुत्रकाः ।

समारम्य षट्चत्वारिंशत्तमं श्लोकं यावच्छ्रीमता मैत्रेयेण प्रतिपादितं वेदादिसृष्टि-वादि साङ्ख्यमस्ति।

तच्चेत्थमवगन्तव्यम्—

ब्रह्मा स्वीयेन पूर्वमुखेन यजुर्वेदं, पश्चिममुखेन सामवेदं, उदङ्मुखेन चाथर्ववेदं-व्यरचत्। तथैव शास्त्रेज्यास्तुतिस्तोमप्रायश्चित्तान्यरचयत्। इत्थमेव भगवता ब्रह्मणैव समग्राणामप्युपवेदानां सृष्टिर्विहिता। सा चेत्थम्पूर्वमुखाद् आयुवेदं दक्षिणमुखाद्-धनुर्वेदं पश्चिममुखाद्गन्धर्ववेदमुदङ्मुखाच्च स्थापत्यवेदं रचयामास। स्वयमेव भगवान् ब्रह्मैव स्वीयैश्चतुर्भिश्चापि वदनारविन्दैरेवैतिह्यपुराणस्वरूपात्मकं पञ्चमं वेदमपि सृष्टवान्। तदनन्तरन्तस्यैव ब्रह्मणो मुखेभ्यः षोडश्युक्थौ चयनाग्निष्टोमौ आप्तोर्यामातिरात्रौ वाजपेयगोसवौ चेतियागाश्चापि समजायन्त। विद्यादानतपः सत्याख्यान् धर्मस्य चतुरोऽपि पादांश्चापिब्रह्मा स्वयमेव प्रकटीचकार। इत्थमेव सवृत्तिकान् ब्रह्मचर्यगृहस्थवानप्रस्थसंन्यस्ताख्यान् चतुरोऽप्याश्रमांश्चापि जनयामास सावित्र-प्राजापत्य-ब्रह्मा-बृहदिति चतस्रोऽपि वृत्तयो ब्रह्मचारिणो भवन्ति, वार्तासञ्चय शालीनत्वशिलोञ्छाख्याश्चतस्रो वृत्तयो गृहस्थस्य भवन्ति, ताश्चापि सर्वाः ब्रह्मणः

तन्नैच्छन्मोक्षधर्माणो वासुदेवपरायणाः॥
सोऽवध्यातः सुतैरेवं प्रत्याख्यातानुशासनैः॥
क्रोधं दुर्विषहं जातं नियन्तुमुपचक्रमे॥
धिया निगृह्यमाणोऽपि भ्रुवोर्मध्यात्प्रजापतेः।
सद्योऽजायत तन्मन्युः कुमारो नीललोहितः॥

(स्क. ३, अ. १२, श्लो. २—७)

१. ऋग्यजुःसमाथर्वाख्यान् वेदान् पूर्वादिभिर्मुखैः।
शास्त्रमिज्यां स्तुतिस्तोमं प्रायश्चित्तं व्यधात् क्रमात्॥
आयुर्वेदं धनुर्वेदं गान्धर्वं वेदमात्मनः।
स्थापत्यं चासृजद् वेदं क्रमात् पूर्वादिभिर्मुखैः॥
इतिहासपुराणानि पञ्चमं वेदमीश्वरः।
सर्वेभ्य एव वक्त्रेभ्यः ससृजे सर्वदर्शनः।
षोडश्युक्थौ पूर्ववक्त्रात् पुरीष्यग्निष्टुतावथ।
आप्तोयामतिरात्रौ च वाजपेयं सगोसवम्॥
विद्या दानं तपः सत्यं धर्मस्येति पदानि च।
आश्रमांश्च यथासंख्यमसृजत्सह वृत्तिभिः॥
सावित्रं प्राजापत्यं च ब्राह्मं चाथ बृहत्तथा।
वार्त्ता सञ्चयशालीनशिलोञ्छ इति वै गृहे॥

समुद्बभूवुः। इत्थमेव वृत्तिभेदाद्वैखानसः बालखिल्यः औदुम्बरो फेनपश्चेति चत्वारो भेदाः वानप्रस्थानां सम्पद्यन्ते। कुटीचकबहूदकहंसनिष्क्रियपरमहंसाख्याः चत्वारो भेदाः संन्यासीनां जायन्ते। ते सर्वेऽपि ब्रह्मणैव निर्निर्मिताः।

आन्विक्षिकीत्रयीवार्तादण्डनीतिश्चेति चतस्रोऽपि विद्याश्चतस्र एवाऽऽहुतय श्चापि ब्रह्मणश्चतुर्भ्योऽपि मुखेभ्यः प्रकटीबभूवुः। ब्रह्मणो हृदयाकाशादेवौङ्कारः प्रकटीबभूव। लोमभ्यः उष्णिक्, त्वचो गायत्री, मांसात् त्रिष्टुप्, स्नायुभ्योऽनुष्टुदं। अस्थिभ्यो जगती, मज्जायाः पङ्क्तिः, प्राणेभ्यश्च वृहतीति छन्दासीमानि समुद्बभूवुः। इत्थमेवैतेषां जीवः, स्पर्शवर्णाः शरीरञ्चेति स्वरवर्णाः कथ्यन्ते। तेषामिन्द्रियाण्यूष्मवर्णाः बलमन्तस्थवर्णाः प्रोच्यन्ते। तेषाङ्क्रीडायाः निषाद-र्षभ-गान्धार-षड्ज-मध्यम-धैवत-पञ्चमाख्याः सप्तस्वराः जज्ञिरे। ब्रह्मा स्वयं शब्दब्रह्मस्वरूपो वर्त्तते स एवेह वैखरीरूपेण व्यक्तो भवति। अथ च स एवौङ्कारस्वरूपेणाव्यक्तोऽपि वर्त्तत एव। तथा चेह ततोऽपि परं सर्वथा परिपूर्णं परं ब्रह्म विराजतेतराम्। तदेव ब्रह्म नानाशक्तिभिः विकासं समधिगत्य सुरेन्द्रादिस्वरूपेषु भासतेतराम्।

प्रसङ्गेऽस्मिन् वेदादिकस्य वाङ्मयस्य सृष्टिप्रतिपादनादिह वेदादिसृष्टिवादि-साङ्ख्यम्प्रतिपादितमस्तीति निश्चप्रचम्।

वैखानसा बालखिल्यौदुम्बराः फेनपा वने।
न्यासे कुटीचकः पूर्वं बह्वोदो हंसनिष्क्रियौ॥
आन्वीक्षिकी त्रयी वार्त्ता दण्डनीतिस्तथैव च।
एवं व्याहृतयश्चासन् प्रणवो ह्यस्य दह्नतः॥
तस्योष्णिगासील्लोमभ्यो गायत्री च त्वचो विभोः।
त्रिष्टुप्मांसात्स्नुतोऽनुष्टुब्जगत्यस्थ्नः प्रजापतेः॥
मज्जायाः पङ्क्तिरुत्पन्ना बृहती प्राणतोऽभवत्।
स्पर्शस्तस्याभवज्जीवः स्वरो देहे उदाहृतः॥

(स्क. ३, अ. १२, श्लो, ३७—४६)

(३०)

जीवप्रारब्ध-पुरुष-काल-भगवत्सान्निध्य-प्रकृतिरिति कारणपञ्चकप्रतिपादकं साङ्ख्यम्

श्रीमद्भागवतमहापुराणे तृतीये स्कन्धे विंशेऽध्याये द्वादशश्लोकतोऽष्टादशश्लोकपर्यन्तं श्रीमैत्रेयेण समुपदिष्टं जीवप्रारब्ध-पुरुष-काल-भगवत्सान्निध्य-प्रकृतिरिति कारणपञ्चकनिरूपकं साङ्ख्यं प्रतिपादितमस्ति।

तच्चेत्थम्

यस्य गतिज्ञानं परमङ्कठिनमस्ति, तस्य जीवात्मनाम्प्रारब्धतः, प्रकृतिनियन्तुः पुरुषस्य, कालस्य, भगवतः सान्निध्याच्च त्रिगुणमय्यां प्रकृतौ

---

१. दैवेन दुर्वितर्क्येण परेणानिमिषेण च।
जातक्षोभाद्भगवतो महानासीत् गुणत्रयात्॥
रजः प्रधानान्महतस्त्रिलिङ्गो दैवचोदितात्।
जातः ससर्ज भूतादिर्वियदादीनि पञ्चशः॥
तानि चैकैकशः स्रष्टुमसमर्थानि भौतिकम्।
संहत्य दैवयोगेन हैममण्डमवासृजन्॥
सोऽशयिष्टाब्धिसलिले आण्डकोशो निरात्मकः।
साग्रं वै वर्षसाहस्रमन्ववात्सीत्तमीश्वरः॥
तस्य नाभेरभूत्पद्मं सहस्रार्कोरुदीधितिः।
सर्वजीवनिकायौको यत्र स्वयमभूत् स्वराट्॥
सोऽनुविष्टो भगवता यः शेते सलिलाशये।
लोकसंस्थां यथापूर्वं निर्ममे संस्थया स्वया॥
ससर्जच्छाययाविद्यां पञ्चपर्वाणमग्रतः।
तामिस्रमन्धतामिस्रं तमो मोहो महातमः॥
(स्क. ३, अ. २०, श्लो. १२—१८)

क्षोभे जाते सति, तस्याः सर्वप्रथमं महत्तत्त्वमजायत । दैवप्रेरणया रजः प्रधानान्महत्तत्त्वतोऽत्र वैकारिको राजसो तामसश्चेति त्रिविधोऽप्यहङ्कारोऽजायत। तस्मादहङ्कारादाकाशादयोऽनेके पञ्च-पञ्चतत्त्वात्मकाः वर्गाः प्रकटीबभूवुः । ते सर्वे पृथक्पृथक् तिष्ठन्तः भूतानाङ्कार्यरूपस्य ब्रह्माण्डस्य सृष्टिङ्कर्त्तुन्न प्रभवन्ति स्म । अतः तानि भगवच्छक्त्या परस्परं सङ्घीभूय सुवर्णमण्डं ससृजुः । तदण्चेऽन्तानाशून्यावस्थायां सहस्राब्दादप्यधिककालपर्यन्तङ् कारणाब्धावतिष्ठत् । तदा तस्मिन् स्वयं भगवान् प्रविवेश । तस्मिन्नधिष्ठिते तस्य नाभेः सहस्रसूर्यसमज्योतिष्मत्कमलमेकं प्रकटीबभूव । तत्कमलं सकल-जीव-निकायस्याश्रयमासीत् । तस्मादेव ब्रह्माप्यजायत । यदा ब्रह्माण्डस्य गर्भरूपे जले शयानः श्रीनारायणः ब्रह्मणोऽन्तःप्राविशत् । तदा स पूर्व-कल्पेषु निश्चित नाममयया रूपमयया च व्यवस्थया लोकान् स्रष्टुमारेभे । सर्वतः प्राक्सः स्वछायया तामिस्रान्धतामिस्रं तमो मोहः महामोहश्चेति पञ्चविधांमोहविद्यां सृष्टवान् । ब्रह्मा ततमोमयं शरीरं न रूचिप्रदमभूत, अतः सतत्त्यक्तवान् । तदा यस्माद्बुभूक्षायाः पिपासायाश्योत्पत्तिर्भवति तद्रात्रिरूपमच्छरीरं तस्मादेवोत्पन्नैः यक्षरक्षोभिः स्वीकृतम् ।

उपर्युक्तेप्रसङ्गे जीवप्रारब्धः, पुरुषः, कालः, भगवत्सान्निध्यम्, प्रकृतिश्चेति सृष्टौ कारणत्वेनोपपादिताः वर्त्तन्ते । इत्यतो वक्तुं शक्यते यदत्र कारणपञ्चकनिरूपकं साङ्ख्यमस्तीति ।

(३१)

भगवता कपिलेन देवहूतिम्प्रति निरूपितं परमपुरूषप्रकृति निरूपणतः सामारभ्य मुक्तिपर्य्यन्तं सर्वतत्त्वविवेचनात्मकं साङ्ख्यम्

श्रीमद्भागवतस्य तृतीये स्कन्धे षड्विंशतितमसप्तविंशतितमयोरध्याययोः

---

१. अथ ते सम्प्रवक्ष्यामि तत्त्वानां लक्षणं पृथक् ।
यद्विदित्वा विमुच्येत पुरुषः प्राकृतैर्गुणैः ।।
ज्ञानं निश्रेयसार्थाय पुरुषस्यात्मदर्शनम् ।
यदाहुर्वर्णये तत्तं हृदयग्रन्थिभेदनम् ।।
अनादिरात्मा पुरुषो निर्गुणः प्रकृतेः परः ।
प्रत्यग्धामा स्वयंज्योतिर्विश्वं येन समन्वितम् ।।

समारभ्य मुक्तिं यावत् सर्वतत्त्वविवेचनात्मकङ्कापिलं साङ्ख्यमस्ति तद्यथा जगदेतद्-यस्माद् व्याप्तं प्रकाशते स आत्मैव पुरुषोऽस्ति। सोऽन्तादिनिर्गुणः प्रकृतेः परोऽन्तः करणे स्फुरणशीलः स्वयंप्रकाशी च वर्त्तते। स सर्वव्यापकः स्वालीविलास-पुरःसरं समागतामव्यक्तां त्रिगुणात्मिकां वैष्णवीं मायां स्वेच्छया स्वीचकार लीलापरायणा प्रकृतिः स्वीयैः सत्वादिभिर्गुणैस्तदनुरूपां प्रजां स्रष्टुमारेभे। दृष्ट्वैतत् पुरुषः ज्ञानेच्छादिकया तस्या आवरण-शक्त्या मुग्धो बभूव, स्व-स्वरूपञ्च विसस्मार। इत्थं स्वाभिन्नां प्रकृतिमेव स्वरूपत्वेन ग्रहणात् पुरुषः प्रकृतिगुणैर्क्रियमाणेषु कर्मसु

सएष प्रकृतिं सूक्ष्मां दैवीं गुणमयीं विभुः।
यदृच्छयैवोपगतामभ्यपद्यत लीयया॥
गुणैर्विचित्राः सृजतीं सरूपाः प्रकृतिं प्रजाः।
विलोक्य मुमुहे सद्यः स इह ज्ञानगूहया॥
एवं पराभिध्यानेन कर्तृत्वं प्रकृतेः पुमान्।
कर्मसु क्रियमाणेषु गुणैर्ह्यात्मनि मन्यते।,
तदस्य संसृतिर्बन्धः पारतन्त्र्यं च तत्कृतम्।
भवत्यकर्तुरीशस्य साक्षिणो निर्वृतात्मनः॥
कार्यकारणकर्तृत्वे कारणं प्रकृतिं विदुः।
भोक्तृत्वे सुखदुःखानां पुरुषं प्रकृतेः परम्।

देवहूतिरुवाच

प्रकृतेः पुरुषस्यापि यक्षणं पुरुषोत्तम।
ब्रूहि कारणयोरस्य सदसच्च यदात्मकम्॥

श्रीभगवानुवाच

यत्तत्त्रिगुणमव्यक्तं नित्यं सदसदात्मकम्.
प्रधानं प्रकृतिं प्राहुरविशेषं विशेषवत्॥
पञ्चभिः पञ्चभिर्ब्रह्म चतुर्भिर्दशभिस्तथा।
एतच्चतुर्विंशतिकं गणं प्राधानिकं विदुः॥
महाभूतानि पञ्चैव भूरापोऽग्निर्मरुन्नभः।
तन्मात्राणि च तावन्ति गन्धादीनि मतानि मे॥
इन्द्रियाणि दश श्रोत्रं त्वग्दृग्रसननासिकाः।

स्वात्मानं कर्तृत्वेन गृह्णाति। अस्मात् कर्तृत्वाभिमानादेवायमकर्ता स्वाधीनः, साक्षी, आनन्दस्वरूपश्च पुरुषः जन्ममृत्यु-बन्धनं पारतन्त्र्यञ्चाधिगच्छति। कार्यरूपे शरीरे, कारणरूपेष्विन्द्रियेषु, कर्तृरूपेष्विन्द्रियाधिष्ठातृदैवतेषु च पुरुषो चत्स्वत्व मारोपयति। विद्वांसः प्रकृतिमेव कारणत्वेनाङ्गीकुर्वन्ति। वस्तुतः प्रकृतेः परः सन्नपि प्रकृतौ तिष्ठति, तमेव पुरुषं सुखदुःखभोगे कारणम्मन्वते।

यत्त्रिगुणात्मकं, अव्यक्तं, नित्यं, कार्यकारणरूपं च वर्तते, तथा स्वयं निर्विशेषं सन्नपि समग्राणामपि विशेषधर्माणामाश्रयमस्ति। तत्प्रधाननामकं तत्त्वमेव प्रकृतिशब्देन व्यवह्रियते। पञ्च महाभूतानि, पञ्च तन्मात्राणि चतुरन्तःकरणानि, दशेन्द्रियाणीति चतुर्विशतितत्वानां समूहं विद्वांसः प्रकृतेः कार्यत्त्वेन गृह्णन्ति। पृथिव्यप्तेजोवायुवा काशाख्यानि पञ्चमहाभूतानि सन्ति गन्धरसरूपस्पर्शशब्दाः च पञ्चतन्मात्रत्वेन गृह्यन्ते। श्रोत्रत्वक्चक्षुरसनानासिकावाक्पाणिपादपायूपस्थेति दशेन्द्रियाणि सन्ति। मनः, बुद्धिः चित्तं, अहङ्कारश्चेति चतुर्णामपि तत्वानां स्वरूपेण विराजमानमेकमेवान्तः-करणं वर्त्तते स्वीयाभिः सङ्कल्प-निश्चय-चिन्ताभिमानाख्याभिः वृत्तिभिः लक्ष्यन्ते। इत्थं तत्त्वज्ञानिनः पुरूषाः सगुणस्य ब्रह्मणः सन्निवेशस्थानानि चतुर्विशतितत्वानि निर्दिशन्ति। स्वतदतिरिक्तं यः कालो वर्त्तते सपंचविशतितमतत्त्वत्वेन गृह्यते। केचन कालं

वाक्करौ चरणौ मेढ्रं पायुर्दशम उच्यते।
मनोबुद्धिरहङ्कारश्चित्तमित्यन्तरात्मकम्।
चतुर्धा लक्ष्यते भेदो वृत्त्या लक्षणरूपया॥
एतावानेव सङ्ख्यातो ब्रह्मणः सगुणस्यह।
सन्निवेशो मया प्रोक्तो यः कालः पञ्चविंशकः॥
प्रभावं पौरूषं प्राहुः कालमेके यतो भयम्।
अहङ्कार विमूढस्य कर्त्तुः प्रकृतिमीयुषः॥
प्रकृतेर्गुणसाम्यास्य निर्विशेषस्य मानवि।
चेष्टा यतः स भगवान् काल इत्युपलक्षितः॥
अन्तः पुरूषरूपेण कालरूपेण यो बहिः।
समन्वेत्येष सत्त्वानां भगवानात्ममायया॥
दैवात्क्षुभितधर्मिण्यां स्वस्यां योनौ परः पुमान्।
आधत्त वीर्यं सासूत महत्तत्त्वं हिरण्मयम्॥

पुरुषातिरिक्तं तत्त्वममन्यमानाः कथयन्ति यत् कालः पुरुषस्यप्रभावोर्थाऽदीश्वरस्य संहरणशीला शक्तिः वर्तत इति । कथयन्ति च यस्याः मायायाः कार्यरूपे देहादावात्मत्वाभि मानं कुर्वन्नहंकारविमोहितो कर्तृत्वाभिमानी जीवः सर्वदा बिभेति । यस्य प्रेरणया गुणानां साम्यावस्थारूपायां निर्विशिष्टायां प्रकृतौ गतिः समुत्पद्यते वस्तुतः सः पुरुषरूपो काल एव भगवच्छब्देन शब्द्यते । इत्थं यः स्वमायया सर्वेषां प्राणीनामन्तः जीवरूपेण बहिश्च कालरूपेण व्याप्तोऽस्ति स भगवानेव पञ्चविंशतितमं तत्त्वमस्ति । यदा परमपुरूषः परमात्मा जीवानामदृष्टमनुसृत्य क्षुवधायामखिलजीवानामुत्पत्ति स्थानभूतायां मायायां चिच्छवितरूपं वीर्यं प्रतिष्ठापयामास, तस्मात्तेजोमयं महतत्त्व मजायत । लयविक्षेपादिरहितेन तथा जगदंकुररूपेण महतत्वेन स्वस्मिन् स्थितं जगत् प्रकटीकर्त्तुं स्वस्वरूपाच्छादकं प्रलयकालीनन्तमः स्वतेजसैव पीतम् । यत्सत्त्वगुणमयं शुद्धं शान्तं भगवदुपलब्धि-स्थानं चित्तमेव महतत्वं वर्त्तते, तदेव वासुदेवनान्मा व्यपदिशन्ति । यथा पृथिव्याद्यन्यपदार्थानां संसर्गात्पूर्वमयः स्वस्वाभाविकावस्थायाः सर्वथा शुद्धं विकारशून्यं शान्तं च भवति । तथैव स्वस्वाभाविकावस्था दृष्ट्या स्वच्छत्व

विश्वमात्मगतं व्यञ्जन् कूटस्थो जगदङ्कुरः ।
स्वतेजसापिबत्तीव्रमात्मप्रस्वापनं तमः ।।
यत्तत्सत्त्वगुणं स्वच्छं शान्तं भगवतः पदम् ।
यदाहुर्वासुदेवाख्यं चित्तं तन्महदात्मकम् ।।
स्वच्छत्वमविकारित्वं शान्तत्वमिति चेतसः ।
वृत्तिभिर्लक्षणं प्रोक्तं यथापां प्रकृतिः परा ।।
महत्तत्त्वाद्विकुर्वाणाद्भगवद्वीर्यसम्भवात् ।
क्रियाशक्तिरहङ्कारस्त्रिविधः समपद्यत ।।
वैकारिकस्तैजसश्च तामसश्च यतो भवः ।
मनसश्चेन्द्रियाणां च भूतानां महतामपि ।।
सहस्त्रशिरसं साक्षाद्यमनन्तं प्रचक्षते ।
सङ्कर्षणाख्यं पुरूषं भूतेन्द्रियमनोमयम् ।
कर्त्तृत्वङ् करणत्वं च कर्मत्वं चेति लक्षणम् ।
शान्तघोरविमूढत्वमिति वा स्यादयङ्कृतेः ।।
वैकारिकाद्विकुर्वाणान्मनस्तत्त्वमजायत ।
यत्सङ्कल्पविकल्पाभ्यां वर्तते कामसम्भवः ।।

विकारित्व शान्तत्वान्येव सवृत्तिकानि चित्तस्य लक्षणत्वेन गण्यन्ते। तदनन्तरं भगवतो वीर्यरूपया चिच्छक्त्योत्पन्नस्य महत्तत्वस्य विकृतौ तस्मात्क्रियाशक्तिविशिष्टोऽहङ्कारो जायत। सोऽत्र वैकारिकस्तैजसस्तामसश्चेति भेदैस्त्रिधा भवति। तस्मादेव क्रमशः मनसः, इन्द्रियाणां पञ्चमहाभूतानाञ्चोत्पत्तिरजायत। एनं भूतेन्द्रियमनसात्मकमहङ्कारमेव विद्वांसः साक्षात्सङ्कर्षणनामकं सहस्रशिरष्कमनन्तदेवर्ष माचक्षते। अहङ्कारस्यास्य देवतारूपेण कर्तृत्वम्, इन्द्रियरूपेण करणत्वम्, पञ्चभूतरूपेण कार्यत्वलक्षणमस्ति, तथा सत्त्वादिभिः गुणैः सम्बन्धत्वात् शान्तत्वघोरत्वमूढत्वान्यप्यस्यैव लक्षणानि सन्ति। उपर्युक्तेभ्यो त्रिविधाऽहङ्कारेभ्यो वैकारिकेऽहङ्कारे विकृतौ सत्यां मनोऽजायत। यस्य सङ्कल्पविकल्पाभ्यङ्कामाः जायन्ते। तन्मनस्तत्वमेवेन्द्रियाधिष्ठातुरनिरुद्धस्य नाम्नाप्रसिद्धमस्ति योगिनः शरत्कालीनन्नीलकमलमिव श्यामवर्णमनिरूद्धं शनैः शनैः समाराधयन्ति। तैजसेऽहङ्कारे विकृतौ तस्माद् बुद्धितत्त्वमुद्बभूव। वस्तुनः स्फुरणरूपं विज्ञानमिन्द्रियव्यापारेषु साहाय्यप्रदानं पदार्थानां विशेष ज्ञानकरणं चेति बुद्धिकार्याणि सन्ति। वृत्तिभेदात्संशयविपर्ययनिश्चयस्मृतिनिद्राख्यान्यपि बुद्धेः लक्षणानि सन्ति। बुद्धितत्त्वमेव प्रद्युम्ननाम्ना निगद्यते। इन्द्रियाण्यपि तैजसाहङ्रस्यैव कार्यभूतानि सन्ति। कर्मज्ञानयोर्विभागेन तेषां कर्मेन्द्रियाणि

यद्विदुर्ह्य निरूद्धाख्यं हृषीकाणामधीश्वरम्।
शारदेन्दीवरश्यामं संराध्यं योगिभिः शनैः॥
तैजसात्तु विकुर्वाणाद् बुद्धितत्त्वमभूत्सति।
द्रव्यस्फुरण विज्ञानमिन्द्रियाणामनुग्रहः॥
संशयोऽथ विपर्यासो निश्चयः स्मृतिरेव च।
स्वाप इत्युच्यते बुद्धेर्लक्षणं वृत्तितः पृथक्॥
तैजसानीन्द्रियाण्येव क्रियाज्ञानविभागशः।
प्राणस्य हि क्रियाशक्तिर्बुद्धेर्विज्ञानशक्तिता॥
तामसाच्च विकुर्वाणाद् भगवद् वीर्यचोदितात्।
शब्दमात्रमभूत्तस्मान्नभः श्रोत्रं तु शब्दगम्॥
अर्थाशयत्वं शब्दस्य द्रष्टुर्लिङ्गत्वमेव च।
तन्मात्रत्वं च नभसो लक्षणं कवयो विदुः॥
भूतानां छिद्रदातृत्वं बहिरन्तरमेव च।
प्राणेन्द्रियात्मधिष्ण्यत्वं नभसो वृत्तिलक्षणम्॥

ज्ञानेन्द्रियाणीति भेदौ वर्तेते । एतयो: कर्मात्मिका शक्तिः प्राणस्य, ज्ञानात्मिका शक्तिश्च बुद्धे वर्त्तते, भगवच्चेतनशक्तिप्रेरणया विकृतात् तामसादहङ्काराच्छब्दतन्मात्रंप्रादुरभूत् शब्दतन्मात्रादाकाशस्य तथा शब्दज्ञानग्राहकं श्रोत्रेन्द्रियमजायत । अर्थप्राकाशकत्वं, अवच्छन्न-वक्तृ-बोधकत्वं, आकाशस्य सूक्ष्म-रूपत्वञ्चेति विदुषाम्मतेन शब्द-लक्षणानि सन्ति । भूतेभ्योऽवकाशप्रदानं, सर्वेषामन्तर्बहिश्च प्रतिष्ठानं, प्राणेन्द्रियमनसामाश्रयत्व ग्रहणं चेत्याकाशस्य वृत्त्यात्मकानि लक्षणानि सन्ति । ततः शब्दतन्मात्रस्य कार्येह्याकाशे कालगत्या सत्यां विकृतौ स्पर्शतन्मात्रमजायत । तस्माद्वायुः स्पर्शवबोधि-वागिन्द्रियमजायत । मार्दवं, काठिन्यं, शैत्यं, औष्ण्यं, वातस्य । प्रौम्यं चेति स्पर्शस्य लक्षणानि सन्ति । वृक्षशाखादीनामाधुननं, तृणादिचयनं, सर्वत्रप्राप्तित्वं, गन्धादिद्रव्याणां, घ्राणादीन्द्रियसान्निकर्षेणनेतृत्वम्, शब्दस्य श्रोत्रेन्द्रियसन्निकर्षेणग्रहीतृत्वं समस्तेभ्य इन्द्रियेभ्यः कार्यशक्तिप्रदायकत्वं चेति वायुवृत्तीनां लक्षणानि सन्ति । ततः देवप्रेरणया स्पर्शतन्मात्र विशिष्टस्य वायोः विकृतौ तस्माद्रूपतन्मात्रमजायत, तथा तस्मात्तेजसो रूपस्य चोपलब्धिकर्तृ नेत्रेन्द्रियं प्रादुरभूत् । वस्तुनो लोकाववोधनं, गौणत्वं, द्रव्यांगत्वेन प्रतीतिः,

---

नभसः शब्दतन्मात्रात्कालगत्या विकुर्वतः ।
स्पर्शोऽभवत्ततो वायुस्त्वक् स्पर्शस्य च संग्रहः ।।
मृदुत्वं कठिनत्वंच शैत्यमुष्णत्वमेव च ।
एतत्स्पर्शस्य स्पर्शत्वं तन्मात्रत्वं नभस्वतः
चालनं व्यूहनं प्राप्तिर्नेतृत्वं द्रव्यशब्दयोः ।
सर्वेन्द्रियाणामात्मत्वं वायोः कर्माभिलक्षणम् ।।
वायोश्च स्पर्शतन्मात्राद्रूपं दैवेरितादभूत् ।
समुत्थितं ततस्तेजश्चक्षू रूपोपलम्भनम् ।।
द्रव्याकृतित्वं गुणता व्यक्तिसंस्थात्वमेव च ।
तेजस्त्वं तेजसः साध्वि रूपमात्रस्य वृत्तयः ।।
द्योतनं पचनं पानमदनं हिममर्दनम् ।
तेजसो वृत्तयस्त्वेताः शोषणं क्षुत्तृडेव च ।
रूपमात्राद्विकुर्वाणात्तेजसोदैव चोदितात् ।
रसमात्रमभूत्तस्मादम्भो जिह्वा रसग्रहः ।।
कषायो मधुरस्तिक्तः कट्वम्ल इति नैकधा ।
भौतिकानां विकारेण रस एको विभिद्यते ।।

द्रव्यनिभाकारप्रकारपरिमाणादीनि स्युः, तस्मिन्नेव रूपे समुपलक्षिततत्वं तथा तेजसः स्वरूपावबोधकत्वञ्चेति रूपतन्मात्रस्य वृत्तयः सन्ति । द्योतनं, पचनं, शैत्यापकर्षणम्, शोषणं, क्षुत्पिपासोत्पादनम्, क्षुत्पिपासोपशान्तये भोजनं पानञ्चेति तेजसो वृत्तयः सन्ति तदनन्तरं दैव-प्रेरणया रूपतन्मात्रमयस्य तेजसो विकृतौ तस्माद्रसतन्मात्रमजायत । तस्माज्जलस्य रसस्य च ग्राहिरसनेन्द्रियमुदबभूव । रसः स्वशुद्धे स्वरूपे ह्येक एव वर्त्तते, परमन्यभौतिकपदार्थानां संयोगान् मधुराम्ल-लवण-कटुकषायतिक्तभेदानुपभेदाँश्य परस्परं संयोगेन समधिगच्छन्ति । क्लेदनं, मृदादिपिण्डीकरणम्, जीवनदानं, पिपासोपशमनम्, पदार्थमृदुकरणम्, तापनिवर्तनम्, कूपादिभ्यो निःसृतावपि तत्र पुनः प्रकटनमिति जलवृत्तयः सन्ति ।

रसस्वरूपस्य जलस्य विकृतौ तस्माद्गन्धतन्मात्रमजायत, तस्माच्च पृथिवी तथा गन्धग्राहकङ्घ्राणेन्द्रियमुद्बभूव। गन्ध, एक एव वर्तते । तथापि परस्परं मिश्रितानां द्रव्यभागानां न्यूनतयाधिक्येन वा सम्मिश्रितो गन्धो दुर्गन्धः, मृदुस्तीव्राम्लाद्यनेकविधः, सञ्जायते । प्रतिमादिरूपेण ब्रह्मणः साकारभावनायाः समाश्रयत्वम्, जलादिभ्यःकारणतत्त्वेभ्यो भिन्नस्य कस्यचिदन्यस्याश्रयस्यापेक्षां विनैव स्थितिकरणम्, जलाद्यन्यपदार्थानां धारणमाकाशादीनामवच्छेकत्वं, तथा परिणामविशेषण समग्रप्राणीनां गुणप्रकटीकरणं चेति पृथिव्याः कार्यरूपाणि लक्षणानि सन्ति । आकाशस्य विशिष्टो गुणः शब्दो वर्त्तते, यस्य विषयः तच्छ्रोत्रेन्द्रियमस्ति । वायोः विशिष्टो गुणः स्पर्शो यस्य विषयोऽस्ति तत्त्वगिन्द्रियम् । तेजसो विशिष्टो गुणो रूपमस्ति तस्य विषयो नेत्रेन्द्रियमस्ति। जलस्य विशिष्टो गुणः रसो वर्त्तते यस्य विषयस्तद्रसनेन्द्रियं-वर्त्तते । पृथिव्याः विशिष्टो गुणः गन्धो, वर्तते यस्य विषयोऽत्रऽघ्राणेन्द्रियमभिधीयते ।

भावनं ब्रह्मणः स्थानं धारणं सद्विशेषणम् ।
सर्वसत्त्वगुणोद्भेदः पृथिवीवृत्तिलक्षणम् ।।
नभो गुण विशेषोऽर्थो यस्य तच्चक्षुरुच्यते ।
अम्भो गुण विशेषोऽर्थो यस्य तद्रसनं विदुः ।।
भूमेर्गुणविशेषोऽर्थो यस्य घ्राण उच्यते ।।
परस्य दृश्यते धर्मो ह्यपरस्मिन् समन्वयात् ।
अतो विशेषो भावानां भूमावेवोपलक्ष्यते ।।
एतान्यसंहत्य यदा महदादीनि सप्त वै ।
कालकर्मगुणोपेतो जगदादिरूपाविशत् ।।

वाय्वादिकार्यतत्त्वेष्वाकाशादि कारणतत्त्वानां स्थितेस्तेषाङ् गुणारप्यनुगताः दृश्यन्तेऽतः समस्तानां महाभूतानाङ् गुणाः शब्दस्पर्श-रूप-रस-गन्धाः केवलं पृथिव्यामेवोपलभ्यन्ते। यदा महतत्त्वं अहङ्कारः पञ्चभूतानीति सप्ततत्त्वानि परस्परं सम्मिलितुं नाशक्नुवन्, तदा पृथक्पृथगेव स्थितिमकुर्वन्। तदाजगतामादिकारणं श्रीनारायणः कालादृष्टसत्त्वादिगुणैः सह तेषु प्राविशत्। तदनन्तरं परमात्मनः प्रवेशतः सङ्क्षुब्धैः परस्परलितैश्च तैस्तत्त्वैरेकं जडम् अण्डमजायत। तस्मादण्डादस्य विराट्पुरुषस्याभिव्यक्तिः समभूत्। अस्याणुरित्यपि नाम विशेषो वर्त्तते, अस्यान्त एव श्रीहरिस्वरूपभूतानाञ्चतुर्दश-

---

ततस्तेनानुविद्धेभ्यो युक्तेभ्योऽण्डमचेतनम्।
उत्थितं पुरुषो यस्मादुदतिष्ठदसौ विराट्॥
एतदण्डं विशेषाख्यं क्रमवृद्धैर्दशोत्तरैः।
तोयादिभिः परिवृतं प्रधानेनावृतैर्बहिः॥
यत्रलोक वितानोऽयं रूपं भगवतो हरेः॥
हिरण्मयादण्डकोशादुत्थाय सलिलेशयात्।
तमाविश्य महादेवो बहुधा निर्बिभेद खम्॥
निरभिद्यतास्य प्रथमं मुखं वाणी ततोऽभवत्।
वाण्या वह्निरथो नासे प्रणोतो घ्राणा एतयोः॥
घ्राणाद्वायुरभिद्येतामक्षिणी चक्षुरेतयोः॥
तस्मात् सूर्यो न्यभिद्येतां कर्णौश्रोत्रं ततो दिशः॥
निर्बिभेद विराजस्त्वग्रोमश्मश्र्वादयस्ततः।
तत ओषधयश्चासन् शिश्नं निर्बिभिदे ततः॥
रेतस्तस्मादाप आसन्निरभिद्यत वै गुदम्।
गुदादपानोऽपानाच्च मृत्युर्लोकभयङ्करः॥
हस्तौ च निरभिद्येतां बलं ताभ्यांततः स्वराट्।
पादौ च निरभिद्येतां गतिस्ताभ्यां ततो हरिः॥
नाड्योऽस्य निरभिद्यन्त ताभ्यो लोहितमाभृतम्।
नद्यस्ततः समभवन्नुदरं निरभिद्यत॥
क्षुत्पिपासे ततः स्यातां समुद्रस्त्वेतयोरभूत्।
अथास्य हृदयं भिन्नं हृदयान्मन उत्थितम्॥

भुवनानां विस्तरो वर्त्तते। एतत्परितः क्रमशः परस्परं दशगुणिते जलाग्निवाय्वाकाशाहङ्कारमहत्तत्त्वात्मकैरावरणैरावृत्तमस्ति। एतेभ्यो बहिः सप्तमावरणं प्रकृतेरस्ति। कारणमये जले स्थितात्तस्मातेजोमयादण्डादुत्थाय स विराट्पुरुषः भूयस्तस्मिन् प्राविशत्। तदनन्तरं तस्मिन् बहूनि छिद्राण्यकरोत्। सर्वतः प्राक् तत्र मुखं प्रकटीबभूव तस्माद् वागिन्द्रियं तदनन्तरं च वागधिष्ठातृदैवतमग्निश्च प्रादुरभूत्। ततः नासाछिद्रे। ऽजायताम्। ताभ्यां प्राणसहितं घ्राणेन्द्रियमजायत, तदनन्तरं तस्याधिष्ठातृदैवतं वायुरजायत। तत्पश्चात् नेत्रगोलके प्रकटीबभूवतुः, ताभ्यां चक्षुरिन्द्रियमजायत, तथा तदनन्तरं तदधिष्ठातृदैवतं सूर्योऽजायत। ततः कर्णरन्ध्रे ऽजायताम्, ताभ्यां तयोरिन्द्रियं श्रोत्रं तदभिमानी दैवतं दिक्प्रादुरभूत्। एतदनन्तरं तस्य विराटपुरुषस्य शरीरे त्वगुद्वभूव। तस्या रोमश्मश्रु कूर्च-शिरो-लोमानि चाजायन्त। ततश्च ततो लिङ्गुद्बभूव। तस्माद्वीर्यं वीर्यस्य पश्चात् लिंगाभिमान्यापो दैवतं प्रकटीबभूव। ततो गुदा समजायत। तस्याः अपानवायुस्तत्पश्चात् तदभिमानी लोकानाङ्कतेभयप्रदायको मृत्युः प्रादुरभूत्। तदनन्तरं हस्तौ प्रकटीबभूवतुः, ताभ्यां बलम्, हस्तेन्द्रियाभिमानीन्द्रो, प्रकटीबभूव। ततः चरणौ प्रकटीबभूवतुः, ताभ्याः गतिः, पादेन्द्रियाभिमानी विष्णुश्च प्रकटीबभूव। इत्थमेव यदा विराट्पुरुषस्य नाडिकारुदबभूवुस्ताभ्यः शोणितम्प्रकटीबभूव। शोणिताच्च नद्यो ऽजायन्त। ततस्तस्योदरं प्रकटीबभूव, तस्मात् क्षुत्पिपासयोः सम भिव्यक्तिः समभूत् मनसोऽभिमानी दैवतं चन्द्रोऽजायत, ततो हृदयादेव बुद्धिस्तदभिमानी ब्रह्मा चाजायत। ततोऽहङ्कारस्तस्याभिमानी रुद्रदेवश्च प्रकटीबभूव। अतः परं चित्तं तदभिमानी क्षेत्रज्ञश्चाजायताम्।

यदैते क्षेत्रज्ञादतिरिक्ताः सर्वे देवाः प्रकटीभूयापि विराट्पुरुषमुद्बोधयितुमसमर्थाः बभूवुस्तदात मुद्बोधयितु क्रमशः स्वे-स्वे समुत्पत्तिस्थाने प्राविशन्। अग्निः

मनसश्चन्द्रमा जातो बुद्धिर्बुद्धेर्गिरां पतिः।
अहङ्कारस्ततो रुद्रश्चित्तं चैत्यस्ततोऽभवत्॥
एते ह्यभ्युत्थिता देवा नैवास्योत्थापनेऽशकन्।
पुनराविविशुः खानि तमुत्थापयितुं क्रमात्॥
वह्निर्वाचा मुखं भेजे नोदतिष्ठत्तदा विराट्॥
घ्राणेन नासिके वायुर्नोदतिष्ठत्तदा विराट्।
अक्षिणी चक्षुषाऽऽदित्यो नोदतिष्ठत्तदा विराट्।
श्रोत्रेण कर्णौ च दिशो नोदतिष्ठत्तदा विराट्॥

वाण्या सह मुखे प्राविशत्, वायुः घ्राणेन्द्रियेण सह नासाछिद्रयोः प्राविशत्, सूर्यश्चक्षुषा सह नेत्रे प्राविशत्, दिशः श्रवणेन्द्रियेण सह कर्णयोः प्राविशन्, ओषधय-श्लोमभिः सह त्वचि प्राविशन्, जलं वीर्येण सह लिंगे प्राविशत्, मृत्युश्चानेन साकं गुदायां प्राविशत्, इन्द्रः बलेन सह हस्तयोः प्राविशत्, विष्णुः गत्या सह चरणयोः प्राविशत्, नद्यः शोणितेन सह नाडिकासु प्राविशन्, पयोधिः क्षुत्पिपासाभ्यां सह उदरे प्राविशत्, चन्द्रमा मनसा सह हृदयं प्राविशत्, ब्रह्मा बुद्ध्या सह हृदये प्राविशत्, रुद्रोऽहङ्कारेण सह तस्मिन्नेव हृदये प्राविशत्। इत्थं सर्वेषाङ्क्रमशः प्रवेशेऽपि यदा विराट्पुरुषः नोदतिष्ठत्। तदा चित्तस्याधिष्ठाता क्षेत्रज्ञश्चित्तेन सह हृदयं प्राविशत्, ततो विराट्पुरुषःस्तत्कालमेव जलादुत्थाय स्थितोऽभवत्। यथालोके प्राणेन्द्रियमनो

त्वचं रोमभिरोषध्यो नोदतिष्ठत्तदा विराट्।
रेतसा शिश्नमापस्तु नोदतिष्ठत्तदा विराट्॥
गुदं मृत्युरपानेन नोदतिष्ठत्तदा विराट्।
हस्ताविन्द्रो बलेनैव नोदतिष्ठत्तदा विराट्॥
विष्णुर्गत्यैव चरणौ नोदतिष्ठत्तदा विराट्।
नाडीर्नद्यो लोहितेन नोदतिष्ठत्तदा विराट्॥
क्षुत्तृड्भ्यामुदरं सिन्धुर्नोदतिष्ठत्तदा विराट्।
हृदयं मनसा चन्द्रो नोदतिष्ठत्तदा विराट्॥
बुद्ध्या ब्रह्मापि हृदयं नोदतिष्ठत्तदा विराट्।
रूद्रोऽभिमत्या हृदयं नोदतिष्ठत्तदा विराट्॥
चित्तेन हृदयं चैत्यः क्षेत्रज्ञः प्राविशद्यदा।
विराट् तदैव पुरुषः सलिलादुदतिष्ठत॥
यथा प्रसुप्तं पुरुषं प्राणेन्द्रिय मनो धियः।
प्रभवन्ति विना येन नोत्थापयितुमोजसा॥
तमस्मिन् प्रत्यगात्मानं धिया योगप्रवृत्तया।
भक्त्या विरक्त्या ज्ञानेन विविच्यात्मनि चिन्तयेत्॥
(स्क. ३, अध्यायः २६, श्लोकाः १-७२)

प्रकृतिस्थोऽपि पुरुषो नाज्यते प्राकृतैर्गुणैः।
अविकारादकर्तृत्वान्निर्गुणत्वाज्जलार्कवत्॥

बुद्ध्यादीनि तत्त्वानि चित्ताधिष्ठातुः क्षेत्रज्ञस्य साहाय्यं विना सुप्तं प्राणिनं स्वबलेनोत्थापयितुं न प्रभवन्ति; तथैव विराट्पुरुषमपि क्षेत्रज्ञम्परमात्मानं विना समुद्बोधयितुं न शेकुः। अतः भक्तिवैराग्यचितैकाग्र्यैः प्रकटीभूतेन ज्ञानेन सोऽन्तरात्मस्वरूपी क्षेत्रज्ञः स्वशरीरस्थ इति मत्वा चिन्तनीयो वर्त्तते।

यथा जले प्रतिबिम्बितेन सूर्येण सह जलस्य शैत्यञ्चलतयोः सम्बन्धो न भवति तथैव प्रकृति-कार्य-स्वरूपे शरीरे वर्तमानोऽप्यात्मा वस्तुतस्तस्य सुखदुःखादिधर्मैर्न, लिप्यते। यतः सह स्वभावत एव निर्विकारो कर्त्ता निर्गुणश्च वर्त्तते, परं यदा स एव प्राकृतैर्गुणैः स्वसम्बन्धं स्थापयति तदाहङ्कार-विमोहितः सन् अहं कर्त्तास्मीति मन्यते। तदभिमानहेतोः सदेहस्य संसर्गतः कृतानाम्पुण्यपापादीनाङ्कर्मणां दोषैः स्वस्वातन्त्र्यंशान्तिञ्च जहाति। तथोत्तममध्यमनीचयोनिषु प्रादुर्भूय संसारचक्रे भ्रमति। यथा स्वप्ने भयशोकादीनां हेतोरभावादपि स्वप्नपदार्थेष्वास्थावत्त्वाद् दुःखमनुभवति, तथैव भयशोकौ, अहं मम, जन्ममरणादिरूपायाः संस्कृतेः वस्तुतोऽसत्तायामप्यविद्यापारवश्याद् विषयाणां चिन्तनेन जीवस्य संसृतिचक्रं न कदापि निवर्त्तते। अतो बुद्धिमते समुचितमस्ति यदसन्मार्गे भ्रान्तं चित्तं प्रकृष्टभक्तियोगेन वैराग्येण च शनैः शनैः वशीकुर्यात्। यमादिभिर्योगसाधनैः श्रद्धापूर्वकाभ्यासेन भूयोभूयः क्रियमाणेन चित्तस्यकाग्र्येण, 'मयिसद्भावरक्षणेने, अद्व-षेण, अनासक्त्या, ब्रह्मचर्येण, मौनव्रतेन, तीव्रेण स्वधर्मेण च येनैतादृशी स्थितिरधिगता यद्यथा प्रलब्धं यत्किञ्चित्प्राप्तावेव सन्तुष्यति, परिमितं भुनक्ति सदैवेकान्ते वसति शान्तस्वभावोऽस्ति, सर्वेषां मित्रमस्ति, दयावान् वर्त्तते, धीरश्चास्ति, प्रकृतिपुरुषयोर्वा-

---

स एष यर्हि प्रकृतेर्गुणेष्वभिविषज्जते।
अहङ्क्रिया विमूढात्मा कर्त्तास्मीत्यभिमन्यते॥
तेन संसारपदवीमवशोऽभ्येत्यनिर्वृतः।
प्रासंगिकैः कर्मदोषैः सदसन्मिश्रयोनिषु॥
अर्थे ह्यविद्यमानेऽपि संसृतिर्न निवर्त्तते।
ध्यायतो विषयानस्य स्वप्नेऽनर्थागमो यथा॥
अत एव शनैश्चित्तं प्रसक्तमसतां पथि।
भक्तियोगेन तीव्रेण विरक्त्या च नयेद् वशम्॥

स्तिविकस्वरूपानुभवेन स्त्रीपुत्रादिभिः सम्बन्धिभिः सह शरीरेऽमुष्मिन् अहं मतिभावस्व मिथ्याभिनिवेशन् न करोति, बुद्धेर्जाग्रदाद्यवस्थाभ्योऽपि पृथग्भूतस्तथा परमात्मातिरिक्तं न किमप्यवलोकयति। सोऽयमात्मदर्शी मुनिः नेत्राभ्यां सूर्यावलोकनमिव स्वशुद्धान्तःकरणेन परमात्मानं साक्षात्कृत्य तदद्वितीयं परमं पदं प्राप्नोति। यद् देहादिसमग्रोपाधिभिर्पृथगहङ्कारादिमिथयावस्तुषु सत्यरूपेण भासमानं जगत्कारणभूतायाः प्रकृतेरधिष्ठानं महदादिकार्यवर्गस्य प्रकाशकं कार्यकारणरूपञ्च सर्वेषु पदार्थेषु व्याप्तमस्ति।

यथा पयसि पतितः सूर्यप्रतिबिम्बो भित्तौ पतितस्वाभाससम्वन्धेनावलोक्यते। जले दृश्यमानेन प्रतिबिम्बेनाकाशस्थः सूर्यो ज्ञायते। तथैव वैकारिकादिभेदैस्त्रिः प्रकारकोऽहङ्कारो देहेन्द्रियमनःसुस्थितः स्वप्रतिविम्बः एव संल्लक्ष्यते। तत्पश्चात् परमात्मनः प्रतिबिम्बयुक्तेनाहङ्कारेण सत्यं ज्ञानस्वरूपं परमात्मनः दर्शनं जायते। यद् ब्रह्म सुषुप्तिवेलायां निद्रया शब्दादीनि भूतसूक्ष्मतन्मात्राणि इन्द्रियाणि, मनः, बुद्धिरित्यादीनामव्याकृतौ लीनतायां स्वयं जागर्ति, सर्वथाहङ्कार शून्यं च वर्तते, स्वोपाधिभूतस्याहङ्कारस्य नाशाद्भ्रमवशगोह्यात्मानमेव नष्टम्मन्यते। यथा द्रव्यनाशे मानवः स्वत्वादत्यन्तं व्याकुलीभवति, तथैव तदाप्यत्यन्तं विवशं सन् स्वात्मानं नष्ट-

---

यमादिभिर्योगपथैरभ्यसञ्श्रद्धयान्वितः।
मयिभावेन सत्येन मत्कथाश्रवणेन च॥
सर्वभूतसमत्वेन निर्वैरेणाप्रसङ्गतः।
ब्रह्मचर्येण मौनेन स्वधर्मेण बलीयसा॥
यदृच्छयोपलब्धेन संतुष्टो मितभुङ्मुनिः।
विविक्तशरणः शान्तो मैत्रः करुण आत्मवान्॥
सानुबन्धे च देहेऽस्मिन्नकुर्वन्नसदाग्रहम्।
ज्ञानेन दृष्टतत्त्वेन प्रकृतेः पुरुषस्य च॥
निवृत्तबुद्ध्यवस्थानो दूरीभूतान्यदर्शनः।

मिवानुभवति। एतद्विचार्य विवेकी पुरुषः स्वात्मानुभूतिङ्करोति, यदहङ्कारेण सह समेषामपि तत्त्वानामधिष्ठानं प्रकाशकश्च वर्त्तत इति।

पुरुषःप्रकृतिश्चेत्युभावपि नित्यावन्योऽन्याश्रितौ च वर्त्तते। अतः प्रकृतिस्तु पुरुषं कदाचिदपि हातुं नार्हति। यथा गन्धस्य पृथिव्याः, रसस्य जलाच्च पृथक् स्थितिर्भवितुन्नार्हति, तथैव प्रकृतिपुरुषावपि अन्योऽन्यं विहाय स्थातुन्न न शक्नुतः, अतो येषामाश्रयेणाकर्तारमपि पुरुषं कर्मबन्धनमेतत्प्राप्तमस्ति तेषां प्रकृतिगुणानां सत्तायां तेन कैवल्यपदं केन प्रकारेण प्राप्तुं शक्यते। यदि तत्त्वविषयकविचारेण कदाचित्संसृतिबन्धनस्य तीव्रं भयमपगच्छेदपि परं तन्निमित्तभूतानां प्राकृतगुणानाम भावाभावे, तद्भयं भूयोऽप्युपस्थातुमर्हति। यथाग्नेः समुत्पत्तिस्थानमरणिः स्वस्मादुत्पन्नादग्निनैव प्रज्वल्य भस्मसाद्भवति, तथैव निष्कामभावेन विहितेन स्व स्वधर्मपालनेनान्तःकरणशुद्धौ बहुकालपर्यन्तं भगवत्कथाश्रवण-परिपुष्टया मम तीव्रभक्त्या तत्त्वसाक्षात्कारकेण ज्ञानेन प्रबलेन, वैराग्येण, व्रत-नियमा- दिभिः सह कृतैर्ध्यानाभ्यासादिभिः, चित्तस्य प्रकृष्टेनैकाग्र्येण, पुरुषस्य प्रकृतिरहर्निशङ्क्षीयमाणा शनैः शनैर्लीयते। ततः प्रत्यहन्दोष-दर्शनेन विभुज्य परित्यक्ता सा प्रकृतिः स्व-स्वरूप-स्थितं

उपलभ्यात्मनाऽऽत्मानं चक्षुषेवार्कमात्मदृक्॥
मुक्तलिङ्गं सदाभासमसति प्रतिपद्यते।
सतो बन्धुमसच्चक्षुः सर्वानुस्यूतमद्वयम्।
यथा जलस्थ आभासः स्थलस्थेनावदृश्यते।
स्वाभासेन तथा सूर्यो जलस्थेन दिवि स्थितः॥
एवं त्रिवृदहङ्कारो भूतेन्द्रियमनोमयैः।
स्वाभासैर्लक्षितोऽनेन सदाभासेन सत्यदृक्॥
भूतसूक्ष्मेन्द्रियमनोबुद्ध्यादिष्विह निद्रया।
लीनेष्वसति यस्तत्र विनिद्रो निरहंक्रियः॥
मन्यमानस्तदात्मानमनष्टो नष्टवन्मृषा।
नष्टेऽहङ्करणे द्रष्टा नष्टवित्त इवातुरः॥
एवं प्रत्यवमृश्यासावात्मानं प्रतिपद्यते।
साहङ्कारस्य द्रव्यस्य योऽवस्थानमनुग्रहः॥

स्वतन्त्रं पुरुषं मनागपि कर्त्तुन्नार्हति। यथा सुप्तः स्वप्ने नैकविधाननर्थाननुभवति, परं जागृतो सः ताभिः स्वप्नानुभूतिभिः केनापि प्रकारेण नासज्यते। तथैव यस्तत्त्वज्ञाना वर्त्तते तथा सततं मय्येव मनः नियुनक्ति तस्यात्मारामस्य मुनेः प्रकृतिः किंचिदप्यपकर्त्तुन्नार्हति। यदा मानवः नैकासु जनिषु चिरकालपर्यन्तमित्थमात्मचिन्तन एव निमग्नो भवति, तदाऽसौ ब्रह्मलोकपर्यन्तैः सर्वविधभोगैः विरक्तो भवति। धीरः स मे भक्तः मयैव महत्या कृपया तत्त्वज्ञानं प्रापय्यत्वा आत्मानुभूत्याखिलसंशयैर्विमुक्तो क्रियते। तथा लिंगदेहविनाशे केवलं मामेवाश्रितः स्व-स्वरूपभूतं कैवल्य-संज्ञकं मङ्गलमयं पदं प्राप्नोति। यत्र गत्वा योगी न पुनरावर्तते। यदि योगिनश्चित्तं योगसाधनाभिवृद्धासु मायामयीष्वणिमादिसिद्धिषु यासां प्राप्तेर्योगातिरिक्तङ् किमपि साधनं नास्ति। तासु नानुमसज्जन्ते, तर्हि ते ममाविनाशिनं परमं पदं प्राप्नुवन्ति, यत्र मृत्युर्न भवति।

इत्थमत्रोपर्युक्ते प्रघट्टके भगवता कपिलेन देवहूतिम्प्रति परमपुरुषप्रकृतिनिरूपणतः समारभ्य परमार्थसिद्धिपर्यन्तमर्थान्मुक्ति यावत्प्रतिपादनं कृतमिति वक्तुं शक्यते, यदत्र देवहूतिम्प्रति कपिलेन प्रतिपादितं साङ्ख्यमस्तीति।

(३२)

प्रकृतिपुरुषविवेकनिरूपकं साङ्ख्यमस्ति

श्रीमद्भागवतस्य तृतीये स्कन्धेऽष्टाविंशतितमेऽध्याये चत्वारिंशत्तमश्लोकतः समारभ्य चतुश्चत्वारिंशत्तमश्लोकपर्यन्तं सगुणस्य भगवतः पृथगवयव-ध्यान-

---

पुरुषं प्रकृतिर्ब्रह्मन्न विमुञ्चति कर्हिचित्।
अन्योऽन्यापाश्रयत्वाच्च नित्यत्वादनयोः प्रभो॥

यथा गन्धस्य भूमेश्च न भावो व्यतिरेकतः।
अपां रसस्य च यथा तथा बुद्धेः परस्य च॥

अकर्तुः कर्मबन्धोऽयं पुरुषस्य यदाश्रयः।
गुणेषु सत्सु प्रकृतेः कैवल्यन्तेष्वतः कथम्॥

क्वचित्तत्त्वावमर्शेन निवृत्तं भयमुल्वणम्।
अनिवृत्तनिमित्तत्वात् पुनः प्रत्यवतिष्ठते॥

वर्णन प्रसङ्गे भगवता कपिलेन देवहूतिम्प्रति समुपदिष्टं प्रकृतिपुरुष-विवेकनि-रूपकं साङ्ख्यमस्ति। तद् यथा—

यथा ज्वलत्काष्ठात्, उल्मुकात्, स्वयमग्नेः, प्रकटितादधूमादग्निपृथगेव वर्त्तते। तथैव भूतेन्द्रियान्तःकरणेभ्यस्तेषां साक्षिभूतोह्यात्मा पथग्वर्त्तते तथा जीवात्मनोऽपि ब्रह्म भिन्नमस्ति। प्रकृतेः सञ्चालकः पुरुषोत्तमः पृथगस्ति। यथा देहदृशा जरायुजाण्डजस्वेदजोदिभज्जाः सर्वेऽपि पञ्चभूतात्मकाः सन्ति तदैव सर्वेष्वापि जीवेष्वात्मानमात्मनि च सर्वजीवानन्योन्यभावेनानुगतान् पश्यत्। यथैकोऽग्निः स्वपृथक्पृथगाश्रयेषु तेषां भिन्नतया विभिन्नाकारको दृश्यते, तथैव

श्रीभगवानुवाच

अनिमित्तनिमित्तेन स्वधर्मेणामलात्मना।
तीव्रया मयि भक्त्या च श्रुतसम्भृतया चिरम्॥
ज्ञानेन दृष्टतत्त्वेन वैराग्येण बलीयसा।
तयोयुक्तेन योगेन तीव्रेणात्मसमाधिना॥
प्रकृतिः पुरुषस्येह दह्यमाना त्वहर्निशम्।
तिरोभवित्री शनकैरग्नेर्योनिरिवारणिः॥
भुक्तभोगा परित्यक्ता दृष्टदोषा च नित्यशः।
नेश्वरस्याशुभं धत्ते स्वे महिम्नि स्थितस्य च॥
यथा ह्यप्रतिबुद्धस्य प्रस्वापो बह्वनर्थभृत्।
स एव प्रतिबुद्धस्य न वै मोहाय कल्पते॥
एवं विदिततत्त्वस्य प्रकृतिर्मयि मानसम्।
युञ्जतो नापकुरूत आत्मारामस्य कर्हिचित्॥
यदैवमध्यात्मरतः कालेन बहुजन्मना।
सर्वत्र जातवैराग्य आब्रह्मभुवनान्मुनिः॥
मद्भक्तः प्रतिबुद्धार्थो मत्प्रसादेन भूयसा।
निःश्रेयसं स्वसंस्थानं कैवल्याख्यं मदाश्रयम्॥

देवमनुष्यादीनां शरीरेषु स्थितिमान् एक एवयमात्मा स्वाश्रय-गुणभेदेन नानाप्रकारको भासते अतः भगवद्भक्तो जीवस्य स्वरूपप्रच्छादिकां कार्यकारणरूपेण परिणामिनीं भगवन्मायां भगवदनुग्रहेणैव विजित्य स्वीयेवास्तविके ब्रह्मस्वरूपे स्थिरो भवति ।

उपर्युक्ते प्रसङ्गे कीदृशोऽयं पुरुषः कीदृशी चेयं प्रकृतिः केन प्रकारेण चोभयोरपि पार्थक्यमस्तीति प्रतिपादनात् प्रकृतिपुरुष-विवेक-निरूपकं साङ्ख्यमत्रास्ति इति ।

प्रानोतीहाञ्जसा धीरः स्वंदृशा च्छिन्नसंशयः ।
यद्गत्वा न निवर्तेत योगी लिङ्गाद्विनिर्गमे ।।
यदा न योगोपचितासु चेतो मायासु सिद्धस्य विषज्जतेऽङ्ग ।
अनन्यहेतुष्वथ मे गतिः स्यादात्यन्तिकी यत्र न मृत्युहासः ।।
(स्क. ३ अ. २७ श्लो, १—३०)

यथोल्मुकाद्विस्फुलिङ्गाद्धुमाद्वापि स्वसम्भवात् ।
अप्यात्मत्वेनाभिमताद्यथाग्निः पृथगुल्मुकात् ।।
भूतेन्द्रियान्तःकरणात् प्रधानाज्जीवसंज्ञितात् ।
आत्मा तथा पृथग्द्रष्टा भगवान् ब्रह्मसंज्ञितः ।।
सर्वभूतेषु चात्मानं सर्वभूतानि चात्मनि ।
ईक्षेतानन्यभावेन भूतेष्विव तदात्मताम् ।।
स्वयोनिषु यथा ज्योतिरेकं नाना प्रतीयते ।
योनीनां गुणवैषम्यात्तथाऽऽत्मा प्रकृतौ स्थितः ।।
तस्मादिमां स्वां प्रकृतिं दैवीं सदसदात्मिकाम् ।
दुर्विभाव्यां पराभाव्य स्वरूपेणावतिष्ठते ।।
(स्क. ३ अ. २८ श्लो. ४०—४४)

(३३)

कालकारणिकं साङ्ख्यम्

श्रीमद्भागवतमहापुराणे तृतीये स्कन्धे ह्येकोनत्रिंशत्तमेऽध्याये षट्त्रिंशत्तमश्लोकतः पञ्चचत्वारिंशत्तमश्लोकपर्यन्तं भगवान् श्रीकपिलः मातरं देवहूतिम्प्रति कालप्रभाव-वर्णनप्रसङ्गेन कालकारणिकं साङ्ख्यम्[1] समुपदिदेश तद् तथा—

भगवतः परमात्मनः परब्रह्मणःसमुद्भूतं प्रभावसम्पन्नं तथा जागतिकानां नानापदार्थानां नानाप्रकारक-वैचित्र्य-हेतुभूतं स्वरूपविशेषमेव काल शब्देनव्यपदिश्यते। प्रकृतिपुरुषौ ह्येतस्यैव स्वरूपे स्तः तथा ताभ्यामसौ पृथगपि वर्तते। नानाविध कर्मणां मूलभूतमप्यसावेवास्ति । तथाऽस्मादेव महतत्वादीनामभिमानिनः प्राणिनः सर्वदा बिभ्यति। यः सर्वेषामाश्रयत्वात् समग्रेष्वपि प्राणिष्वनुप्रविष्टः सन् भूतैरेव तेषां संहरणङ्करोति सोऽयञ्जगच्छासकानां ब्रह्मादीनां भगवान् काल एव याज्ञानां फलदो विष्णुस्वरूपो वर्त्तते। नास्य किमपि मित्रम्, नास्य शत्रुः, न च सम्बन्धी वर्त्त असौ सर्वदा सुसज्जितस्तिष्ठति। स्व-स्वरूपभूतम्भगवन्तं च विस्मृत्य भोगरूपप्रमाद-पतितेषु प्राणिष्वाक्रमणंविधाय तान् संहरति। अस्य भयादेव वाति वातो, सूर्यस्तपति, इन्द्रो वर्षति, तारिकाः प्रकाशन्ते, ओषधिभिः सह लताः वनयस्पतयश्च काले-काले

---

१. एतद्भगवतो रूपं ब्रह्मणः परमात्मनः ।
परं प्रधानपुरूषंदैवं कर्मचेविष्टितम् ।।
रूपभेदास्पदं दिव्यं काल इत्यभिधीयते ।
भूतानां महदादीनां यतो भिन्नदृशां भयम् ।।
न चास्य कश्चिद्दयितो न द्वेष्यो न च बान्धवः ।
आविशत्यप्रमत्तोऽसौ प्रमत्तं जनमन्तकृत् ।।

फलन्ति, नद्यो वहन्ति, पयोधिः मार्यादां नोल्लंघयते, अग्निः प्रज्वलति, गिरिभिः सह मेदिनी पाथोधौ न निमज्जते। आकाशञ्जीवितेभ्या प्राणिभ्यः श्वासोच्छवासायावकाशं यच्छति महत्तत्त्वमहङ्काररूपस्य शरीरस्य सप्तावरणैः सह ब्रह्माण्डरूपेण विस्तारयति, सत्त्वादिगुणनियामकाः विष्णवादयो देवगणाः येषामधी नस्थमेतच्चराचरमस्ति, ते स्व-सृष्ट्यादिषु कर्मसु यथायुगमतत्परास्तिष्ठन्ति। अविनाशी कालः स्वयमनादिः सन्नप्यन्येषामादिकर्ता वर्तते। स्वयमनन्तः सन्नप्यन्येषामन्तकः। असौ पितुः पुत्रोत्पत्तिङ्कारयन् सर्वञ्जगत्सृजति। स्वसंहारशक्त्या मृत्युना यमराजमपि मारयन् जगदेतत्समाप्नोति च।

प्रसङ्गेऽमुष्मिन् कपिलेनः सर्वस्यामपि जगत्यां सृष्ट्युपक्रमादारभ्यमहाप्रलयपर्यन्तं कालस्यैव प्रभावो भवतीति प्र तिपादितमस्तीति वक्तुं शक्यते, यदत्र कालकारणिकं साङ्ख्यं वर्तते इत्यवबोद्धव्यम्।

यद्भयाद्वाति वातोऽयं सूर्यस्तपति यद्भयात्।
यद्भयाद्वर्षते देवो भगणो भावति यद्भयात्॥
यद्वनस्पतयो भीता लताश्चौषधिभिःसह।
स्वे-स्वे कालेऽभिगृणन्ति पुष्पाणि च फलानि च॥
स्रवन्ति सरितो भीता नोत्सर्पत्युदधिर्यतः।
अग्निरिन्धे सगिरिभिर्भूर्न मज्जति यद्भयात्॥
नभो ददाति श्वसतां पदं यन्नियमाददः।
लोकं स्वदेहं तनुते महान् सप्तभिरावृतम्॥
गुणाभिमानिनो देवाः सर्गादिष्वस्य यद्भयात्।
वर्तन्तेऽनुयुगं येषां वश एतच्चराचरम्॥
सोऽनन्तोऽन्तकरं कालोऽनादिरादिकृदव्ययः।
जनं जनेन जनयन्मारयन्मृत्युनान्तकम्॥

(स्क. ३, अ. २९, श्लो. ३६-४५)

(३४)

ईश्वरस्य प्रकृतिपुरुषपरत्ववादि साङ्ख्यम्

श्रीमद्भागवते तृतीये स्कन्धेह्येकत्रिंशत्तमेऽध्याये द्वादशश्लोकतः समारभ्यैक विंशश्लोक-पर्यन्तं भगवता श्रीकपिलेन गर्भस्थजीवकृतस्तुति प्रसङ्गेन देवहूतिम्प्रति "ईश्वरस्य प्रकृतिपुरुषपरत्ववादि साङ्ख्यम्" प्रतिपादितमस्ति[1]। तद् यथा—

जीवोऽधमो वर्त्तते। भगवान् तस्मै ह्येतादृशीं स्थितिं दर्शयति यस्यां विपच्यमानस्तिष्ठन्ति। भगवान् स्वशरणापन्नं नश्वरं च जगदेतदवितुं नैकविधानि रूपाणि धारयति। अतोऽयं जीवोऽपि भुवि विचारणशीले तस्यैव निर्भये पादारविन्दे समाश्रयते। ये मातुरुदरे देहेन्द्रियान्तःकरणरूपाम्मायामाश्रित्य पुण्यपापकर्मभिः समाच्छादितत्वाद् बद्धे इव प्रतीयेते। सन्तप्ते स्व-स्वान्ते स्फुरमाणं विशुद्धमविकारिणमखण्डबोध स्वरूपं परमात्मानं प्रणमति। वस्तुतो जीवः शरीरादिभ्यः पृथक् सन्नपि पाञ्चभौतिक-

---

१. तस्योपसन्नमवितुं जगदिच्छयाऽऽत्तनानातनोर्भुवि चलच्चरणारविन्दम्।
सोऽहं व्रजामि शरणं ह्यकुतोभयं मे येनेदृशी गतिरदर्श्यसतोऽनुरूपा॥
यस्त्वत्र बद्ध इव कर्मभिरावृतात्मा भूतेन्द्रियाशयमयीमवलम्ब्य मायाम्।
आस्ते विशुद्धमविकारमखण्डबोधमातप्यमान हृदयेऽवसितं नमामि॥
यः पञ्चभूतरचिते रहितः शरीरे च्छन्नोऽयथेन्द्रियगुणार्थचिदात्मकोऽहम्।
तेनाविकुण्ठमहिमानमृषिं तमेनं वन्दे परं प्रकृतिपूरुषयोः पुमांसम्॥
यन्माययोरुगुणकर्मनिबन्धनेऽस्मिन् सांसारिके पथि चरंस्तदभिश्रमेण।
नष्टस्मृतिः पुनरयं प्रवृणीत लोकं युक्त्या कया महदनुग्रहमन्तरेण॥
ज्ञानं यदेतददधात्कतमः स देवस्त्रैकालिकं स्थिरचरेष्वनुवर्तितांशः।
तं जीवकर्मपदवीमनुवर्तमानास्तापत्रयोपशमनाय वयं भजेम॥

शरीरेण सम्बद्धोऽस्ति। अतएव इन्द्रियाणीव, गुणानिव, शब्दादिविषयानिव चिदाभासमिव च प्रतीयते। अतः शरीराद्यावरणैरेषाम्महिमानं न कुण्ठीभवति प्रकृतिपुरुषयोर्नियन्तारं सर्वज्ञं परमं वन्दते। परमपुरुषस्य माययैव स्वस्वरूपस्मृतेर्नाशादयं जीवो नैकविधैः सावादिभिर्गुणैः कर्मबन्धनैश्च संयुक्तः संसृतिसृतौ नैकविधानि कष्टान्यनुभवन् भ्रमति। अतः परमपुरुषस्य परमात्मनः कृपां विना न कयापि युक्त्या स्वस्व-रूप-ज्ञानं भवति। यो जीवस्त्रैकालिकं ज्ञानं करोति, सोऽपि परमपुरुषं विना केनापि न शक्यते ज्ञातुम्, यतः स्थावरजङ्गमेषु सर्वेष्वपि प्राणिष्वेकमात्रान्तर्यामिस्वरूपेणांशेन स एव विद्यमानोऽस्ति। अतः जीवाः कर्मजनितायाः पदव्याः समुपसंहर्तारः त्रिविधतापोपशान्तये तमेव परमपुरुषं भजन्ति।

(३५)

कपिलेन प्रतिपादितं मायावादि साङ्ख्यम्

श्रीमद्भागवतस्य तृतीये स्कन्धे ह्येकत्रिंशत्तमेऽध्याये सप्तत्रिंशत्तमाष्टत्रिंशत्त-

---

देह्यन्यदेहविवरे जठराग्निनासृग्विण्मूत्रकूपपतितो भृशतप्तदेहः।
इच्छन्नितो विवसितुं गणयन् स्वमासान्निर्वास्यते कृपणधीर्भगवन्कदा नु।
येनेदृशीं गतिमसौ दशमास्य ईश संग्राहितः पुरुदयेन भवादृशेन।
स्वेनैव तुष्यतु कृतेन स दीननाथः को नाम तत्प्रति विनाञ्जलिमस्य कुर्यात्॥
पश्यत्ययं धिषणया ननु सप्तवध्रिः शारीरके दमशरीर्यपरः स्वदेहे।
यत्सृष्टयाऽऽसं तमहं पुरुषं पुराणं पश्ये बहिर्हृदि च चैत्यमिव प्रतीतम्॥
सोऽहं वसन्नपि विभो बहुदुःखवासं गर्भान्न निर्जिगमिषे बहिरन्धकूपे।
यत्रोपयातमुसर्पति देवमाया मिथ्यामतिर्यदनु संसृतिचक्रमेतत्॥
तस्मादहं विगतविक्लव उद्धरिष्य आत्मानमाशु तमसः सुहृदाऽऽत्मनैव।
भूयो यथा व्यसनमेतदनेकरन्ध्रं मा मे भविष्यदुपसादित विष्णुपादः॥

(स्कन्धः ३, अध्यायः ३१, श्लोकाः १२-२१)

मयोः श्लोकयोः जीवस्य बाल्याद्यवस्था प्रसङ्गे देवहूतिम्प्रति श्रीकपिलेन प्रतिपादितं मायावादि साङ्ख्यम्[1]—

ब्रह्मा मरीच्यादीन् प्रजापतीनसृजत्, मरीच्यादिभिः कश्यपादयः सृष्टाः कश्यपादिभिश्च देवमनुष्यादीनां प्राणिनां सृष्टिर्विहिता। अतो ह्येतेषु देवप्रवरं नारायणं विहाय न कोऽपि पुरुषोऽस्ति यस्य बुद्धिः स्त्रीरूपया मायया मुग्धा न भवेत्।

स्त्रीरूपिण्याः मायायाः बलं चात्र वर्त्तते। यदसौ स्वभ्रूकुटिविलासमात्रेणैव बहून् दिग्विजयिनो वीरान् पदतलगान् करोति।

परमपुरुषातिरिक्ताः सर्वेऽपि मायामुग्धधियः वर्तन्त इति प्रतिपादनादत्र मायावादि साङ्ख्यमस्ति।

(३६)

जलशायि विष्णुनिरूपकं साङ्ख्यम्

श्रीमद्भागवतमहापुराणस्य तृतीये स्कन्धे त्रयस्त्रिंशदध्याये द्वितीय-तृतीय श्लोकयोः देवहूतिकृतायां भगवत्स्तुतौ जलशायिविष्णुनिरूपकं साङ्ख्यम्[1]—

---

१. तत्सृष्टसृष्टसृष्टेषु को न्वखण्डितधीः पुमान्।
ऋषिं नारायणमृते योषिन्मय्येह मायया॥
बलं मे पश्य मायायाः स्त्रीमय्या जयिनो दिशाम्।
या करोति पदाक्रान्तान् भ्रूविजृम्भेण केवलम्॥
(स्क. ३, अ. ३१ श्लो. ३७, ३८)

२. अथाप्यजोऽन्तःसलिले शयानं भूतेन्द्रियार्थात्ममयं वपुस्ते।
गुणप्रवाहं सदशेषबीजं दध्यौ स्वयं यज्जठराब्जजातः॥
स एव विश्वस्य भवान् विधत्ते गुणप्रवाहेण विभक्तवीर्यः।
सर्गाद्यनीहोऽवितथाभिसन्धिरात्मेश्वरोऽतर्क्य सहस्रशक्तिः॥
(स्क. ३, अ. ३३, श्लो. २-३)

विष्णुस्वरूपिणः कपिलस्यैव नाभितो ब्रह्मोद्बभूब, स प्रलयपयसि शयानस्य पञ्चभूतानि, इन्द्रियाणि, शब्दादयो, विषया मनोमयस्य विग्रहस्य यत् सत्त्वादीनां गुणानां प्रभावेण युक्तं सत्स्वरूपं कार्यस्य कारणस्य वा बीजमस्ति ।

भगवान् निष्क्रियः, सत्यसङ्कल्पः समग्रजीवानां प्रभुः सहस्राभिरचिन्त्याभिः शक्तिभिः सम्पन्नोऽस्ति । स्वशक्तिं गुणप्रवाहरूपेण ब्रह्माद्यनन्तमूर्तिषु विभज्य ताभिः स्वमेव विश्वं सृजति ।

उपर्युक्ते प्रसङ्गे जलशायिनः स्वरूपात् क्रमशः सृष्टिर्भवतीति प्रतिपादितत्वादत्र जलशायिविष्णुनिरूपकं तथा विष्णुकपिलयोरैक्यसूचकं साङ्ख्यमस्तीति दिक् ।

(३७)

अद्वैतवादि साङ्ख्यम्

श्रीमद्भागवतमहापुराणे चतुर्थे स्कन्धे षष्ठेऽध्याये दक्षयज्ञविध्वंसे देवताभिः सहितेन श्रीब्रह्मणा कृतायां श्रीरुद्रस्तुतौ द्विचत्वारिंशत्तमश्लोकतः समारभ्य षट्चत्वारिंशत्तमश्लोकपर्यन्तं समागतमद्वैतवादि साङ्ख्यम्[1] तच्च—

---

1. जाने त्वामीशं विश्वस्य जगतो योनिबीजयोः ।
शक्तेः शिवस्य च परं यत्तद्ब्रह्म निरन्तरम् ॥
त्वमेय भगवन्नेतच्छिवशक्त्योः सरूपयोः ।
विश्वं सृजसि पास्यत्सि क्रीडन्नूर्णपटो यथा ॥
त्वमेव धर्मार्थदुघाभिपत्तये दक्षेण सूत्रेण ससर्जिथाध्वरम् ।
त्वयैव लोकेऽवसिताश्च सेतवो यान् ब्राह्मणाः श्रद्दधते धृतव्रताः ॥
त्वं कर्मणां मङ्गलमङ्गलानां कर्तुः स्म लोकं तनुषे स्वः परं वा ।
अमङ्गलानां च तमिस्रमुल्वणं विपर्ययः केन तदेव कस्यचित् ॥
न वै सतां त्वच्चरणार्पितात्मनां भूतेषु सर्वेष्वभिपश्यतां तव ।
भूतानि चात्मन्यपृथग्दिदृक्षतां प्रायेण रोषोऽभिभवेद्यथा पशुम् ॥
(स्क.४ अ, ६ श्लो. ४२-४६)

विश्वयोनेः प्रकृतेस्तद्बीजात्पुरुषादपि परं परब्रह्म सदाशिव एव वर्त्तते । सदाशिव एव ऊर्णपटमिव स्वस्वरूपभूतयोः शिवशक्तिस्वरूपयोः क्रीडन् लीलयैव संसृतिसर्जनपालनसंहरणानि विदधाति । स एव धर्मार्थयोः प्रापणार्थं वेदस्य रक्षायै च दक्षन्निमित्तीकृत्य यज्ञं प्रकटीचकार । तन्मर्यादिता एन सर्वाश्चापि वर्णाश्रमव्यवस्थाः यासां नियमनिष्ठाः सर्वदा पालनङ् कुर्वन्ति, शुभकर्मकर्त्तृभ्यः स्वर्गलोकं मुक्ति वा स एव यच्छति । स एव पापिश्च महाघोरे नरके पातयति ।

ये महानुभावाः तच्चरणयोः स्वात्मानं समर्पयन्ति तथा ये समग्रेष्वपि तमेव पश्यन्ति, ते समग्रानपि जीवानभेददृशाऽऽत्मन्येवावलोकयन्ति ।

उपर्युक्तप्रसङ्गे ह्येकमेव ब्रह्म सर्वेष्वपि वर्त्तते सर्वमपि च तस्मिन्नेवेति प्रतिपादितमस्ती त्यत्राद्वैतवादि साङ्ख्यं वर्त्तते ।

(३८)

अभेदवादि साङ्ख्यम्

श्रीमद्भागवते चतुर्थे स्कन्धे सप्तमेऽध्याये यज्ञसन्धाने दक्षप्रजापतिम्प्रति

2, अहं ब्रह्मा च शर्वश्च जगतः कारणं परम् ।
आत्मेश्वर उपद्रष्टा स्वयंदृगविशेषण ।।
आत्ममायां समाविश्य सोऽहं गुणमयीं द्विज ।
सृजन् रक्षन् हरन् विश्वं दध्रे संज्ञां क्रियोचिताम् ।।
तस्मिन् ब्रह्मण्यद्वितीये केवले परमात्मनि ।
ब्रह्मरुद्रौ च भूतानि भेदेनाज्ञोऽनुपश्यति ।।
यथा पुमान्न स्वाङ्गेषु शिरःपाण्यादिषु क्वचित् ।
पारक्यबुद्धिं कुरुते एवं भूतेषु मत्परः ।।
त्रयाणामेव भावानां यो न पश्यति वै भिदाम् ।
सर्वभूतात्मनां ब्रह्मन् स शान्तिमधिगच्छति ।।
(स्क. ४ अ. ७ श्लो. ५०—५४)

भगवता श्रीविष्णुना पञ्चाशत्तमश्लोकतः चतुःपञ्चाशत्तमश्लोकपर्यन्तं अभेदवादि-साङ्ख्यं प्रतिपादित[2] मस्ति यत्—

जगतां परमङ्कारणं विष्णुर्वर्त्तते। स एव ब्रह्मा शङ्करश्च। विष्णु एव सर्वेषामात्मा ईश्वरः, साक्षी च वर्त्तते। सः स्वयंप्रकाशः निरूपाधिकश्चास्ति। स्वत्रिगुणात्मिकाम्मायां स्वीकृत्य विष्णु एव जगतः सर्जनपालनसंहरणानि करोति। विष्णु एव कर्मानुरूपे ब्रह्मशङ्कराख्ये नामनी धारयति। इत्थं भेदशुद्धकं विशुद्धं परं ब्रह्म विष्णु एव वर्त्तते। विष्णावेव स्थितं ब्रह्मशङ्करसहितं समग्रमपि जगदज्ञाः-पृथक्पृथगिति मन्वते। यथा मनुष्यः स्वशिरोहस्तादीनवयवान् स्वतः पृथक्तया नानुमोदते, स्वत्वमेव तेषु मन्वते, तथैव भगवद्भक्तोऽपि पृथक्पृथग्दृश्यमानमपि जगद् विभौ विष्णावेवेति मनुते। नैकोऽपि प्राणी विष्णोः पार्थक्यम्भजत इति मनुते। उपर्युक्ते प्रसङ्गे सृष्टेस्तथा ब्रह्मशङ्करादिभ्यो विष्णोरभेदत्वं प्रतिपादितमित्यभेदवादि साङ्ख्यमस्तीति बोध्यम्।

(३९)

सांयौगिकसृष्टिवादि साङ्ख्यम्

श्रीमद्भागवतमहापुराणे चतुर्थेस्कन्धेह्येकादशेऽध्याये ह्येकादशश्लोकतः समारभ्य त्रिंशत्तमश्लोकपर्यन्तं गुह्यकवधान्निरतं ध्रुवं सान्त्वयता श्रीस्वायम्भुवमनुना समुदीरितं सांयौगिकसृष्टिवादि साङ्ख्यम्[1]।

---

1. सर्वभूतात्मभावेन भूतावासं हरिं भगवान्।
आराध्याप दुराराध्यं विष्णोस्तत्परमं पदम्॥
स त्वं हरेरनुध्यातस्तत्पुंसामपि सम्मतः।
कथं त्ववद्यं कृतवाननुशिक्षन् सतां व्रतम्॥
तितिक्षया करुणया मैत्र्या चाखिलजन्तुषु।
समत्वेन च सर्वात्मा भगवान् सम्प्रसीदति॥
सम्प्रसन्ने भगवति पुरुषः प्राकृतैर्गुणैः।
विमुक्तो जीवनिर्मुक्तो ब्रह्म निर्वाणमृच्छति॥
भूतैः पञ्चभिरारब्धैर्योषित्पुरुष एव हि।

तदित्थं श्रीहरि सर्वभूतात्मा वर्त्तते। सोऽत्र वृद्धैः सह क्षमया, नीचैः सह दयया, समैः सह मैत्र्येण समग्रैः जीवैः सह समतायाःव्यवहारेणैवप्रसीदति। हरेः प्रसन्नतायामेव पूरु षः प्राकृतान् गुण न् तथा तत्कार्यभूतं लिङ्गशरीरं विहाय परमानन्दस्वरूपं ब्रह्मपदम्प्राप्नोति।

देहादीनां रूपेषु परिणमद्भिः पञ्चभूतैरेव स्त्रियाः पुरुषस्य चाविर्भावो भवति, तयोः पारस्परिकसमागमनेनैतवैंताःस्त्रियः सर्वेपुरुषाश्चायन्ते। भगवानपि मायया सत्त्वादिषु गुणेषु न्यूनाधिक्यभावत या एवयथा भूतानां सृष्टिर्भवति, तथैव स्थितिलवपि भवतः।निर्गुणः परमात्मा ह्येतेषु निमित्तमात्रमस्ति। परमात्मानं समाश्रित्यैव कार्यकारणात्मकं जगद्यथावद्भ्रमति यथा चुम्बकं समाश्रित्याऽयांसि। कालशक्त्या क्रमशः सत्त्वादिषु गुणेषु क्षोभे लीलामयस्य भगवतः शक्त्यपि सृष्ट्यादिषु रूपेषु विभक्ता भवति। अतः भगवान् स्वयमकर्त्ता सन्नपि जगदुत्पादयति। स्वयमसंहारकः सन्नपि जगतामन्तकोऽस्ति। अनादिः सन्नपि समेषां आदिकर्त्ता वर्त्तते। स एवैकस्माज्जीवाज्जीवान्तरमुत्पाद्य जगत्सृजति, तथा मृत्युना हन्तारमपि हत्वा संहरति। स कालः समग्रायामपि सृष्टौ सामान्येनानुप्रविष्टोऽस्ति। न तस्य शत्रुमित्रे तथा वातचलनेन सह रजोऽपि तेनैव सह चलति, तथैव सर्वेऽपिजीवाः स्वानि-स्वानि कर्माण्यनुसरन्ति।

तयोर्व्यवायात्सम्भूतिर्योषित्पुरुषयोरिह ॥
एवं प्रवर्त्तते सर्गः स्थितिः संयम एव च।
गुणव्यतिकराद् राजन् मायया परमात्मनः ॥
निमित्तमात्रं तत्रासीन्निर्गुणः पुरुषर्षभः।
व्यक्ताव्यक्तमिदं विश्वं यत्र भ्रमति लोहवत् ॥
स खल्विदं भगवान् कालशक्त्या गुणप्रवाहेण विभक्तवीर्यः।
करोत्यकर्तैव निहन्त्यहन्ता चेष्टा विभूम्नः खलु दुर्विभाव्या ॥
सोऽनन्तोऽन्तकरः कालोऽनादिरादिकृदव्ययः।
जनं जनेन जनयन् मारयन् मृत्युनान्तकम् ॥
न वै स्वपक्षोऽस्य विपक्ष एव वा परस्य मृत्योर्विशतः समं प्रजाः।
तं धावमानमनुधावन्त्यनीशा यथा रजांस्यनिलं भूतसङ्घः ॥
आयुषोऽपचयं जन्तोस्तथैवोपचयं विभुः।
उभाभ्यां रहितः स्वस्थो दुःस्थस्य विदधात्यसौ ॥

कर्माण्यनुसृत्यैव सुखदुःखानि भुञ्जते । सर्वसमर्थः श्रीहरिरेवः कर्मपाशबद्धजीवस्यायुषो वृद्धिङ्क्षयञ्च विदधाति ।परं सः स्वयं वृद्धिक्षयाभ्यां रहितः स्वस्वरूपस्थश्च वर्त्तते । परमात्मानमेव मीमांसकाः कर्म, चार्वाकाः स्वभावः, वैशेषिकाः कालः, ज्योतिर्विदः दैवं, कामशास्त्रिणश्च काम इति नामभिः व्यवहरन्ति । न स कस्यापीन्द्रियस्य प्रमाणस्य वा विषयोऽस्ति । महदाद्याः शक्तयोऽपि तस्मादेव प्रकटीबभूवुः सः किं कर्त्तुमर्हतीति जगति कोऽपि नैव जानाति । मूलकारणभूतं तं प्रभुन्तु जातु कोऽप्यर्हति याथातथ्येन परिचेतुम् ।

पुंस जन्ममरणयोः कारणमीश्वरो वर्त्तते । सः सर्जनपालनसंहरणानि कुर्वन्नपि निर्लिप्तस्तिष्ठति। यतः माययैतद् विदधाति । नाथितं वृषभमिव जगत्सृष्टारो ब्रह्मादयोऽपि नामरूपरज्जुबद्धं तमेवाराधयन्ति । सः परमात्माऽभक्तेभ्यः मृत्युरूपो भक्तेभ्यश्चामृतस्वरूपोऽस्ति । स एवात्र जगतामेकमेवाश्रयस्थानम् ।

केचित्कर्म वदन्त्येनं स्वभावमपरे नृप ।
एके कालं परे दैवं पुंसः काममुतापरे ।।
अव्यक्तस्याप्रमेयस्य नानाशक्त्युदयस्य च ।
न वै चिकीर्षितं तात को वेदाथ स्वसम्भवम् ।।
न चैते पुत्रक भ्रातुर्हन्तारो धनदानुगाः ।
विसर्गादानयोस्तात पुंसो दैवं हि कारणम् ।।
स एव विश्वं सृजति स एवावति हन्ति च ।
अथापि ह्यनहंकारान्नाज्यते गुणकर्मभिः ।।
एष भूतानि भूतात्मा भूतेशो भूतभावनः ।
स्वशक्त्या मायया युक्तः सृजत्यत्ति च पाति च ।।
तमेव मृत्युममृतं तात दैवं सर्वात्मनोपेहि जगत्परायणम् ।
यस्मै बलिं विश्वसृजो हरन्ति गावो यथा वै नसि दामयन्त्रिताः ।।
यः पञ्चवर्षो जननीं त्वं विहाय मातुः सपत्न्या वचसा भिन्नमर्मा ।
वनंगतस्तपसा प्रत्यगक्षमाराध्य लेभे मूर्ध्नि पदं त्रिलोक्याः ।।
तमेनमङ्गात्मनि मुक्तविग्रहे व्यपाश्रितं निर्गुणमेकमक्षरम् ।
आत्मानमन्विच्छ विमुक्तमात्मदृग् यस्मिन्निदं भेदमसत्प्रतीयते ।।
त्वं प्रत्यगात्मनि तदा भगवत्यनन्त आनन्दमात्र उपपन्नसमस्तशक्तौ ।
भक्तिं विधाय परमां शनकैरविद्याग्रन्थिं विभेत्स्यसि ममाहमिति प्ररूढम् ।।
(स्क. ४ अ. ११ श्लो. ११-३०)

निर्गुणमद्वितीयमविनाशिनं नित्यमुक्तं परमात्मानमध्यात्मदृशा स्वान्तःकरणे विचिन्वतः सुदृढ़ां भक्तिं प्रापय्य सुदृढ़ामविद्याग्रन्थिं भिनत्तीति । उपर्युक्ते प्रसङ्गे सृष्टेः सांयोगिकत्वं प्रतिपादितमित्यत्र सांयौगिकसृष्टिवादि साङ्ख्यम् ।

(४०)

द्रव्य-क्रियाकारक-चेतनावादि पृथिव्यात्मायतनावादि च साङ्ख्यम्

श्रीमद्भागवते चतुर्थे स्कन्धे सप्तदशेऽध्याये ह्येकोनत्रिंशत्तमश्लोकतः षट्त्रिंत्तमश्लोकपर्यन्तं क्षुत्पीडिताभ्यः प्रजाभ्योऽन्नदानार्थं ग्रस्तबीजां पृथिवीं हन्तुमुद्यतस्य पृथोः स्तवनेहया समाहृतंद्रव्य-क्रिया-कारक-चेतनावादि पृथिव्यात्मायतनवादि च साङ्ख्यम्[1] ।

---

१. नमः परस्मै पुरुषाय मायया विन्यस्तनानातनवे गुणात्मने ।
नमःस्वरूपानुभवेन निर्धुतद्रव्यक्रिया कारकविभ्रमोर्मये ।।
येनाहमात्मायतनं विनिर्मिता धात्रा यतोऽयं गुणसर्गसंग्रहः ।
स एव मां हन्तुमुदायुधः स्वराडुपस्थितोऽन्यं शरणं कमाश्रये ।।
य एतदादावसृजच्चराचरं स्वमाययाऽऽत्माश्रययावितर्क्यया ।
तयैव सोऽयं किल गोप्तुमुद्यतः कथं नु मां धर्मपरो जिघांसति ।।
नूनं बतेशस्य समीहितंज नैस्तन्मायया दुर्जययाकृतात्मभिः ।
न लक्ष्यते यस्त्वकरोदकारयद्योऽनेक एकः परतश्च ईश्वरः ।।
सर्गादि योऽस्यानुरुणद्धि शक्तिभिर्द्रव्यक्रियाकारकचेतनात्मभिः ।
तस्मै समुन्नद्ध निरूद्धशक्तये नमः परस्मै पुरुषाय वेधसे ।।
स वै भवानात्मविनिर्मितं जगद्भूतेन्द्रियान्तःकरणात्मकं विभो ।
संस्थापयिष्यन्नज मां रसातलादभ्युज्जहाराम्भस आदिसूकरः ।।
अपामुपस्थे मयि नाव्यवस्थिताः प्रजा भवानद्य रिरक्षिषुः किल ।
स वीरमूर्तिः समभूद्धराधरो यो मां पयस्युग्रशरो जिघांससि ।।
नूनं जनैरीहितमीश्वराणामस्मद्विधैस्तद्गुणसर्गमायया ।
न ज्ञायते मोहितचित्तवर्त्मभिस्तेभ्यो नमो वीरयशस्करेभ्यः ।।
(स्क. ४, अ. १७, श्लो. २९-३६)

पृथुः स्वरूपेण साक्षात्परम-पुरुषोऽवततार लक्षशः स्वमाययैव नैकविधशरीराणि धारयन् सगुणमयः प्रतीयते । वस्तुतो ऽयमात्मा स्वानुभूत्याधिभूताध्यात्माधिदेवाभिमानतस्तदुद्भूतेभ्यो रागद्वेषादिभ्यश्च सर्वथा पृथग्भूतो वर्त्तते । सः सर्वजगतां विधाता वर्त्तते । तेनैव त्रिगुणात्मिका सृष्टिः सृष्टा, समस्तजीवानामाश्रयत्वेन च पृथिवी परिकल्पिता । सः सर्वथा स्वतन्त्रोऽस्ति । चेत्स एव हन्तुमुद्यतो भवेत्तर्हि त्राता को भवितुमर्हति कल्पारम्भे सः स्वाश्रितया निर्वचनीयया माययैव चराचरं सर्जयामास । माययैव चैतज्जगद्बिभर्ति । सः सर्वदा-सर्वथा धर्मतत्परोऽस्ति । स एकः सन्नपि मायया नैकविधः प्रतीयते । तेन ब्रह्माणं सृष्ट्वा तेनैव विश्वस्य सृष्टिः कारिता । सः सर्वेश्वरोऽस्ति । तस्य लीलाः निर्वशेन्द्रियाः कथं ज्ञातुं शक्नुयुः । तेषां बुद्धिस्तु दुर्जयया मायया विक्षिप्ता वर्त्तते । पञ्चभूतैः, इन्द्रियैः, तदधिष्ठातृदेवताभिः, बुद्ध्या, स्वाहङ्कारशक्त्या च क्रमशो जगतामुत्पत्तिस्थितिसंसरणानि विदधाति । पृथक् पृथक्कार्येभ्यः समये-समये तस्य शक्तयो ह्याविर्भवन्ति तिरोभवन्ति च । स एव स्वरचितानां भूतेन्द्रियान्तःकरणानां जगतां च स्थितये वराहस्वरूपमाधाय पृथिवीं जलान्निःसारितवान् । इत्थं पृथिवीमुद्धृत्य "धराधरः" इति नाम समधिगतवान् । त्रिगुणात्मिायाः सृष्टेः सर्जयित्र्या मायया जीवानां चेतांसि मुग्धानि भवन्ति । बहवस्तु भगवद्भक्तानामपि लीलाशयान् सम्यग्ज्ञातुं न शक्नुवन्ति, तर्हि भगवतः लीलास्तदुद्देश्यांश्च चेन्न ज्ञातुमर्हन्तीति न किमप्याश्चर्यजनकम् ।

(४१)

मायाविवर्त्तवादि साङ्ख्यम्

श्रीमद्भागवतमहापुराणे चतुर्थे स्कन्धे द्वाविंशतितमेऽध्याये सप्तत्रिंशत्तमाष्टत्रिंशत्तमयोः श्लोकयोः महाराजाय पृथवे सनत्कुमारः समुपदिशन् मायाविवर्त्तवादि-साङ्ख्यं[1] प्रतिपादयामास। तद् यथा—

यः श्रीभगवान् देहेन्द्रियप्राणबुद्ध्यहङ्कारैः समावृत्तेषु समेषामपि प्राणीनां स्वान्तेषु जीवनियामकोऽन्तयाम्यात्मस्वरूपेण सर्वत्र साक्षात्प्रकाशते। स एव 'त्वं' 'अहं' शब्दाभ्यां वाच्योऽस्ति। यथा मालायाः ज्ञाने जाते सति सर्पबुद्धिर्नावतिष्ठते, तथैव विवेके जाते सति नावतिष्ठमानं मायाप्रपञ्चजातं यस्मिन् परमपुरुषे कारणकार्यरूपेण

---

१. तत् त्वं नरेन्द्र जगतामथ तस्थुषां च देहेन्द्रियासुधिषणात्मभिरावृतानाम्।
यः क्षेत्रवित्तपतया हृदि विश्वगाविः प्रत्यक्चकास्तिभगवांस्तमवेहि सोऽस्मि।
यस्मिन्निदं सदसदात्मतया विभाति,
माया विवेकविधुति स्रजि वाहिबुद्धिः
तं नित्यमुक्तपरिशुद्धविबुद्धतत्त्वं
प्रत्यूढकर्मकलिलप्रकृतिं प्रपद्ये॥
यत्पादपङ्कजपलाशविलासभक्त्या
कर्माशयं ग्रथितमुद्ग्रथयन्ति सन्तः।
तद्वन्न रिक्तमतयो यतयोऽपि रूद्ध—
स्रोतोगणास्तमरणं भज वासुदेवम्॥
कृच्छ्रो महानिह भयार्णवमप्लवेशां,
षड्वर्गनक्रमसुखेन तितीरषन्ति।
तत् त्वं हरेर्भगवतो भजनीयमङ्घ्रि—
कृत्वोडुपं व्यसनमुत्तर दुस्तरार्णम्॥
(स्क. ४, अ. २२, श्लो. ३७-४०)

प्रतीयते तथा यः स्वयं च कर्मकालकलुषितायाः प्रकृतेरपि परो वर्त्तते । सः परमात्मा च नित्यमुक्तो, निर्मलो, ज्ञानस्वरूपी च वर्त्तते ।

कारणमपि ब्रह्म कार्यकर्त्तापि ब्रह्म केवलं माययैव विवर्त्तः सञ्जातो येन नैकविधस्वरूपाण्यवलोक्यन्ते वस्तुतस्त्वेका मायैव विवर्तकारिणीति प्रतिपादनादत्र मायाविवर्त्तकवादि साङ्ख्यमस्तीति ।

(४२)

साङ्ख्ययोगैक्यवादि साङ्ख्यम्

श्रीमद्भागवतमहापुराणे चतुर्थे स्कन्धे चतुर्विंशतितमेऽध्याये राजपुत्रानुपदिशता श्रीरुद्रेण श्रीनारायणस्तुतौ साङ्ख्ययोगैक्यवादिसाङ्ख्यं समुपदिष्टम् । तद् यथा नारायण समग्रलोकानामादिकारणभूतोऽस्ति, तन्मात्राणामिन्द्रियाणाञ्च नियन्ताऽस्ति, शान्त एकरसः स्वयंप्रकाशी चित्ताधिष्ठातृदैवतञ्चास्ति । स एव सूक्ष्मो वदनवह्निना समग्रलोकानां संहारकर्ता अहङ्काराधिष्ठातृदैवतं साङ्कर्षणस्तथा जगतां प्रकृष्टज्ञानस्योत्पत्तिस्थानभूतायाः बुद्धेरधिष्ठाता प्रद्युम्नश्च वर्त्तते । इन्द्रियाणां मनस्तत्त्वस्य चाधिष्ठाताऽनिरूद्धोऽपि नारायण एव । स्वतेजसा जगद्भासयन् सूर्यस्वरूपेण विराजते ।

---

1. नमः पङ्कनाभाय भूतसूक्ष्मेन्द्रियात्मने ।
वासुदेवाय शान्ताय कूटस्थाय स्वरोचिषे ।।
हङ्कर्षणाय सूक्ष्माय दुरन्तायान्तकाय च ।
नमो विश्वप्रबोधाय प्रद्युम्नायान्तरात्मने ।।
नमो नमो ऽनिरूद्धाय हृषीकेशेन्द्रियात्मने ।
नमो परमहंसाय पूर्णाय निभृतात्मने ।।
स्वर्गापवर्गद्वाराय नित्यं शुचिषदे नमः ।
नमो हिरण्यवीर्याय चातुर्होत्राय तन्तवे ।।
नम ऊर्जे इषे त्रय्याः पतये यज्ञरेतसे ।

पूर्णत्वान्नारायणे वृद्धिक्षयौ न जायेते। स्वर्गमोक्षयो: द्वारभूतः सततं सर्वान्तिर्यामी च वर्त्तते। नारायण एव सुवर्णरूपवीर्यं चातुर्होत्रकर्मणश्च साधनं तथा विस्तारको वह्निस्वरूपी वर्त्तते। स एव पितृणां देवानां च पोषकः सोमो वर्त्तते। त्रयाणामपि वेदानां चाधिष्ठाताऽस्ति। सर्वतर्पकं जलमपि स एव। समस्तजीवानां शरीराणि, पृथिवी, विराट्स्वरूपं चेति तस्यैव स्वरूपाणि सन्ति। त्रिलोकरक्षकः मानसिकैन्द्रियकशारीरिकशक्तिस्वरूपी वायुरपि तस्यैव स्वरूपम्। नारायण एव स्वगुणशब्देन समग्रपदार्थानां ज्ञापकं बाह्याभ्यन्तरिक भेदबोधकं च नभोऽस्ति। महत्पुण्यैरधिगम्याः परमतेजोमयाः स्वर्गवैकुण्ठादयो लोकाश्चापि तस्यैव स्वरूपान्तराणि। प्रवृत्तिनिवृत्तिस्वरूप्यर्थात्कर्मस्वरूपी ज्ञानस्वरूपी च स एव वर्त्तते। मृत्युः पुराणपुरुषः, साङ्ख्ययोगयोरधीश्वरः, श्रीकृष्णश्चेति स एव। सर्वकामपूर्त्तिहेतुः साक्षान्मन्त्रमूर्तिः महद्धर्मश्च तस्यैव स्वरूपे। नारायणस्य ज्ञानशक्तिर्न कदापि कुण्ठिता भवति। कर्त्तृकरणकर्मणां त्रयाणामपि शक्तीनामेकमधिष्ठानन् नारायण एवाहंकाराणामधिष्ठाता रुद्रः स एव ज्ञानक्रियास्वरूपी। तस्मादेव पराः पश्यन्ती, मध्यमा, वैखरीति चतुर्विधायाः वाण्यारभिव्यक्ति जायते। साङ्ख्ययोगयोरैक्यप्रतिपादनादत्र साङ्ख्ययोगैक्यवादि साङ्ख्यमस्तीति।

तृप्तिदाय च जीवानां नमः सर्वरसात्मने ॥
सर्वसत्त्वात्मदेहाय विशेषाय स्थवीयसे।
नमस्त्रैलोक्यपालाय सह ओजो बलाय च ॥
अर्थलिङ्गाय नभसे नमोऽन्तर्बहिरात्मने।
नमः पुण्याय लोकाय अमुष्मै भूरिवर्चसे ॥
प्रवृत्ताय निवृत्ताय पितृदेवाय कर्मणे।
नमोऽधर्मविपाकाय मृत्यवे दुःखदाय च ॥
नमस्त आशिषामीश मनवे कारणात्मने।
नमो धर्माय बृहते कृष्णायाकुण्ठमेधसे ॥
पुरूषाय पुराणाय साङ्ख्ययोगेश्वराय च ॥
शक्तित्रयसमेताय मीढुषेऽहंकृतात्मने।
चेत आकूतिरूपाय नमो वाचो विभूतये ॥
(स्क. ४ अ. २४ श्लो. ३४—४३)

(४३)

आत्मतन्त्रवादि साङ्ख्यम्

श्रीमद्भागवतमहापुराणे चतुर्थस्कन्धे चतुर्विंशतितमेऽध्याये एकोनषष्टितमश्लोकतः पञ्चषष्टितमश्लोकपर्यन्तं राजपुत्रेभ्यः श्रीरुद्रेण समुपदिष्टमात्मतन्त्रवादि-साङ्ख्यम्[1]।

तद् यथा-यस्य साधकस्य भक्तियोगानुगृहीतं विशुद्धं च चेतः बाह्यविषयेषु न भ्रमति न चाज्ञानगुहारूपायां प्रकृतौ लीयते सोऽनायासेनैव भगवत्स्वरूपदर्शनानि करोति। यस्मिन्निदं समग्रं जगद् दृश्यते, तथा यः स्वयं समग्रे जगति भासते। स एव गगनमिव विस्तृतं परमप्रकाशमयं ब्रह्मतत्त्वं व्यपदिश्यते।

---

१. न यस्य चित्तं बहिरर्थविभ्रमं तमोगुहायां च विशुद्धमाविशत्।
यद्भक्तियोगानुगृहीतमञ्जसा मुनिर्विचष्टे ननु तत्र ते गतिम् ॥
यत्रेदं व्यज्यते विश्वं विश्वस्मिन्नवभाति यत्।
तत् त्वं ब्रह्म परं ज्योतिराकाशमिव विस्तृतम् ॥
यो माययेदं पुरुरूपयासृजद् बिभर्ति भूयः क्षपयत्यविक्रियः।
यद्भेदबुद्धिः सदिवात्मदुःस्थया तमात्मतन्त्रं भगवन् प्रतीमहि ॥
क्रियाकलापैरिदमेव योगिनः श्रद्धान्विताः साधु यजन्ति सिद्धये।
भूतेन्द्रियान्तःकरणोपलक्षितं वेदे च तन्त्रे च त एव कोविदाः ॥
त्वमेक आद्यः पुरुषः सुप्तशक्तिस्तया रजःसत्त्वतमो विभिद्यते।
महानहं खं मरुदग्निवार्धराः सुरर्षयो भूतगणा इदं यतः ॥
सृष्टं स्वशक्त्येदमनुप्रविष्टश्चतुर्विधं पुरमात्मांशकेन।
अथो विदुस्तं पुरुषं सन्तमन्तर्भुङ्क्ते हृषीकैर्मधु सारघं यः ॥
स एष लोकानतिचण्डवेगो विकर्षसि त्वं खलु कालयानः।
भूतानि भूतैरनुमेयतत्त्वो घनावलीर्वायुरिवाविषह्यः ॥
(स्क.४ अ. २४ श्लो. ५९—६५)

नारायणस्य माया नैकविधरूपाणि धारयति सोऽनया माययैव जगतां सर्जनपालनसंहरणानि विदधाति । तथापि क्रिययानया नारायणे नायाति कापि विक्रिया । मायाहेतोरेवेतरजनेषु भेदबुद्धिरुदेति । परमात्मानं प्रभावितुं न प्रभवति माया । नारायणस्तु परमस्वतन्त्रोऽस्ति । नारायणस्य स्वरूपं पञ्चभूतानां, इन्द्रियाणां अन्तःकरणानां च प्रेरकरूपेणोपलक्ष्यते । ये कर्मयोगिनः सिद्धये नैकविधकर्मभिः तस्य सगुणं साकारं स्वरूपं सश्रद्धं विधिवत् पूजयन्ति, त एव वेदानां शास्त्राणाञ्च तत्त्वद्रष्टारः सन्ति । नारायण एवाद्वितीयो ह्यादिपुरुषोऽस्ति । सृष्टेः प्राक् मायाशक्तिः स्वपिति, पश्चात् तामेवाश्रित्य सत्त्वरजस्तमसां भेदः सञ्जायते । तदनन्तरं तेभ्य एव गुणेभ्यः महत्तत्त्वाहङ्कारखवातवह्निजलपृथिवीदेवता ऋषिभिः समग्रप्राणिभिश्च सह जगतोऽप्योत्पत्तिर्भवति। तदनन्तरं नारायणः स्वमायाशक्त्या रचितेषु जरायुजाण्डजस्वेदजोद्भिज्जेषु शरीरेषु स्वांशेन प्रविशति । यथा मधुमक्षिकाः स्वोत्पादितमेव मध्वास्वादयन्ति । तथैव नारायणांशो नैकविधशरीरेषु तिष्ठन् इन्द्रियैस्तुच्छीभूतान् विषयानुपायुङ्क्ते । तं नारायणांशमेव "जीवः" पुरुषरित्यादिभिः नामभिर्व्यपदिशन्ति । भगवत्तत्त्वज्ञानं प्रत्यक्षेण न ह्यपि त्वनुमानेन जायते । प्रलयकाले समुपस्थिते कालस्वरूपी नारायण एव स्वीयेन प्रचण्डेनासह्येन च जवेन पृथिव्यादीनि भूतानि-भूतान्तरेभ्यो विचाल्य समग्रभूतानि संहरति। तथा वातः स्वप्रचण्डप्रवाहैः मेघैरेव मेघान् छिन्नानि भिन्नानि च विदधाति तथैव भगवानपि ।

उपर्युक्तप्रसङ्गे नारायणस्वरूपेणात्मना समाश्रिताभिः मायादिभिः समग्राण्यपि सर्जनपालनसंहरणादीनि जायन्तेऽतः आत्माश्रितत्वप्रतिपादना-दिहात्मतन्त्रवादि साङ्ख्यमस्तीति निश्चितम् ।

(४४)

पञ्चत्रिंशत्तत्त्ववादि साङ्ख्यम्

श्रीमद्भागवतमहापुराणे चतुर्थे स्कन्धेऽष्टाविंशतितमेऽध्याये द्विपञ्चाशत्तमश्लोकतः पञ्चषष्टितमश्लोकपर्यन्तं पुरञ्जनोपाख्याने रुदतीम्पुरञ्जनीम्प्रति पूर्वसख्या

ब्राह्मणेन प्रोक्तम्पञ्चत्रिंशत्तत्त्ववादि साङ्ख्यम्[1]।

तद् यथा-जीवब्रह्माणौ विना केनापि समाश्रयेणैव वर्षाणां सहस्राणि ऊषतुः। किन्तु विषयभोगलिप्सया जीवः ब्रह्माणं विहाय पृथिवीमाजगाम। पर्यटता च तेन मायाविरचितं शरीरं दृष्टम्, तन्नवद्वारमेको तत्र द्वारपाली तिस्रः परिकोटयः षट्वैश्यकुलानि पञ्चापणाश्चासन्। तत्पञ्चमहाभूतस्वरूपोपादानकारणैर्निर्मितमासीत्। शरीर स्वामिनी चैका स्त्र्यासीत्। इन्द्रियविषयास्तस्य पञ्चोद्यानानि नवेन्द्रियरन्ध्राणि द्वाराण्यासन्। तेजो, जलं, अन्नमिति तिस्रः परिकोटय आसन्। मनः पञ्चज्ञानेन्द्रियाणीति षट् वैश्यकुलान्यासन्। क्रियाशक्तिस्वरूपाणि कर्मेन्द्रियाण्येवापणान्यासन्। पञ्चभूतान्येवाक्षुण्णान्युपादानकारणान्यासन्। बुद्धिशक्तिरेव तस्य स्वामिन्यासीत्। तदेतादृशन्नगरमासीत् तस्मिन् प्रविष्टः पुरुषः स्वस्वरूपं विस्मरति। तस्मिन् नगरे तस्य स्वामिन्याः बुद्धेः प्रपञ्चे निपत्य, तया सह विहरन् स्वस्वरूपं विसस्मार। तस्याः सङ्गेनैव दौरवस्थ्यम्। जीवब्रह्माणौ हंसौ स्तः। जीवब्रह्मणोर्यद् वास्तविकं स्वरूपमस्ति

---

1. का त्वं कस्यासि को वायं शयानो यस्य शोचसि।
जानासि किं सखायं मां येनाग्रे विचचर्थ ह॥
अपि स्मरसि चात्मानमविज्ञातसखं सखे।
हित्वा मां पदमन्विच्छन् भौमभोगरतो गतः॥
हंसावहं च त्वं चार्य सखायौ मानसायनौ।
अभूतामन्तरा वौकः सहस्रपरिवत्सरान्॥
स त्वं विहाय मां बन्धो गतो ग्राम्यमतिर्महीम्।
विचरन् पदमद्राक्षीः कयाचिन्निर्मितं स्त्रिया॥
पञ्चारामं नवद्वारमेकपालं त्रिकोष्ठकम्।
षट्कुलं पञ्चविपणं पञ्चप्रकृति स्त्रीधवम्॥
पञ्चेन्द्रियार्था आरामा द्वारः प्राणा नव प्रभो।
तेजोऽबन्नानि कोष्ठानि कुलमिन्द्रियसंग्रहः॥
विपणस्तु क्रियाशक्तिर्भूतप्रकृतिरव्यया।
शक्त्यधीशः पुमांस्त्वत्र प्रविष्टो नावबुध्यते॥
तस्मिंस्त्वं रामया स्पृष्टो रममाणोऽश्रुतस्मृतिः।

तदेवानुभाव्यम् । योऽयमीश्वरोऽस्ति । स एव जीवोऽस्ति वस्तुतः सो जीवः ईश्वरान्न भिद्यते । ज्ञानिनो जीवब्रह्मयोरीषदप्यन्तरं नावलोकन्ते । यथैकः पुरुषः स्वछायां दर्पणे कस्यच्चिचक्षुषोश्च भिन्नस्वरूपेष्ववलोकते, तथैवैक एवात्मा विद्याविद्योपाधिभेदेन स्वात्मानमीश्वरजीवस्वरूपयोः पश्यति ।

उपर्युक्तप्रक्रियायां पञ्चत्रिंशत्तत्वानां निरूपणं कृतमस्तीति वक्तुं शक्यते यदत्र पञ्चत्रिंशत्तत्ववादि साङ्ख्यमस्तीति ।

(४५)

सर्वभूतात्महरिनिरूपकं साङ्ख्यम्

श्रीमद्भागवतमहापुराणे चतुर्थे स्कन्धे ह्येकत्रिंशत्तमेऽध्याये त्रयोदशतोऽष्टादश-श्लोकपर्यन्तं गृहात्प्रव्रतजितेभ्यो प्रचेतोभ्यः श्रीनारदेन समुपदिष्टं सर्वभूतात्महरि निरूपकं

तत्सङ्गादीदृशीं प्राप्तो दशां पापीयसीं प्रभो ॥
न त्वं विदर्भदुहिता नायं वीर सुहृत्तव ।
न पतिस्त्वं पुरञ्जन्या रुद्धो नवमुखे यया ॥
माया ह्येषा मया सृष्टा यत्पुमांसं स्त्रियं सतीम् ।
मन्यसे नोभयं यद्वै हंसौ पश्यावयोर्गतिम् ॥
अहं भवान्न चान्यस्त्वं त्वमेवाहं विचक्ष्व भोः ।
न नौ पश्यन्ति कवयश्छिद्रञ्जातु मनागपि ॥
यथा पुरुष आत्मानमेकमादर्शचक्षुषोः ।
द्विधाभूतमवेक्षेत तथैवान्तरमावयोः ॥
एवं स मानसो हंसो हंसेन प्रतिबोधितः ।
स्वस्थस्तद्व्यभिचारेण नष्टामाप पुनः स्मृतिम् ॥
बर्हिष्मन्नेतदध्यात्मं पारोक्ष्येण प्रदर्शितम् ।
यत्परोक्षप्रियो देवो भगवान् विश्वभावनः ॥

(स्क. ४ अ. २८ श्लो. ५२—६५)

साङ्ख्यम्[2]-तच्च-वस्तुतः समग्राणामपि श्रेयसामवधिरात्मास्ति, तथाऽऽत्मज्ञानप्रदाता श्रीहरिरेव समस्तप्राणीनां प्रिय आत्मा वर्त्तते। यथा वृक्षस्य मूलसेचनेन तस्य सर्वेऽवयवाः पुष्यन्ते, यथा भोजनेन प्राणतर्पणेन सर्वाण्यपीन्द्रियाणि तृप्यन्ते। तथैव भगवद्पूजैव सर्वेषां पूजाऽस्ति, यथा वर्षतौ जलं, सूर्यातपेनोत्पद्यते तथा ग्रीष्मे पुनस्तस्यरश्मीष्वेव लीयते यथा समग्राणि चराचरात्मकानि भूतानि पृथिव्यारूत्पद्यन्ते तस्यामेव च विलीयन्ते। तथैव चेतनाचेतनात्मकः समग्रो प्रपञ्चो हरेः एवोत्पद्यते तस्मिन्नेव च विलीयते। वस्तुतोऽत्र विश्वात्मनः श्रीहरेस्तदेव शास्त्रप्रसिद्धं सर्वोपाधिशून्यं स्वरूपमेवास्ति। यथा सूर्यप्रभास्तस्मान्न भिद्यन्ते तथैव यदा-कदा गन्धर्वनगरमिव स्फुरमाणं जगद्भगवदतिरिक्तं नास्ति, यथा जागृतावस्थायामिन्द्रियाणि क्रियाशीलानि भवन्ति किन्तु सुषुप्तौ तेषां शक्तयो लीयन्ते। तथैवैतज्जगत्सर्गकाले भगवतो प्रकटीभवति, कल्पान्ते च तस्मिन्नेव लयमेति। वस्तुतस्तु भगवति तु द्रव्यक्रिया-ज्ञानरूपाणां त्रिविधाहंकारन्कार्याणां तथा तन्निमित्तजानां भेदानां भ्रमाणां च सत्ता नास्त्येव। यथा वारिदोऽन्धकारः प्रकाशश्चेति क्रमश आकाशादेव प्रकटीभवन्ति, तस्मिन्नेव च विलीयन्ते। किन्तु खन्तैर्न लिप्यते। तथैव सत्त्वरजस्तमोमय्यः शक्तयो कर्हिचित्तस्मिन्नेव लीयन्ते इत्थमेवैतासां प्रवाहः प्रचलति। किन्त्वनेन गगनमिवासङ्गे परमात्मनि न क्वापि विक्रिया भवति। श्रीहरिरेव जगतां निमित्तकारणङ् कालोह्युपादानकारणं प्रधानं नियन्ता

---

2. श्रेयसामपि सर्वेषामात्मा ह्यवधिरर्थतः।
सर्वेषामपि भूतानां हरिरात्माऽऽत्मदः प्रियः।।
यथा तरोर्मूलनिषेचनेन तृप्यन्ति तत्स्कन्धभुजोपशाखाः।
प्राणोपहाराच्च यथेन्द्रियाणां तथैव सर्वार्हणमच्युतेज्या।।
यथैव सूर्यात् प्रभवन्ति वारः पुनश्च तस्मिन् प्रविशन्ति काले।
भूतानि भूमौ स्थिरजङ्गमानि तथा हरावेव गुणप्रवाहः।।
एतत्पदं तज्जगदात्मनः परं सकृद्विभातं सवितुर्यथा प्रभा।
यथासवो जाग्रति सुप्तशक्तयो द्रव्यक्रियाज्ञानभिदाभ्रमात्ययः।।
यथा नभस्यभ्रतमःप्रकाशा भवन्ति भूपा न भवन्त्यनुक्रमात्।।
एवं परे ब्रह्मणि शक्तयस्त्वमू रजस्तमःसत्त्वमिति प्रवाहः।।
तेनैकमात्मानमशेषदेहिनां कालं प्रधानं पुरुषं परेशम्।
स्वतेजसा ध्वस्तगुणप्रवाहमात्मैकभावेन भजध्वमद्धा।।

(स्क. ४, अ. ३१, श्लो. १३-१८)

पुरुषोत्तमश्च वर्त्तते। तथा स्वकालशक्त्यैव स एव एनं गुणप्रवाहरूपं प्रपञ्चं संहरति । उपर्युक्ते प्रसङ्गे परमात्मनः श्रीहरेः सर्वस्वरूपत्वं सर्वेषामात्मत्वं च प्रतिपादितम् इति वक्तुं शक्यते यदत्र सर्वभूतात्महरिनिरूपकं साङ्ख्यमस्तीति ।

(४६)

एकादशमनोवृत्तिनिरूपकं संसृतिचक्रकूटवादि वा साङ्ख्यम्

श्रीमद्भागवते महापुराणे पञ्चमे स्कन्धे ह्येकादशेऽध्याये चतुर्थश्लोकतः सप्तदशश्लोकपर्यन्तं रहूगणंप्रति जडभरतेन समुपदिष्टमेकादशमनोवृत्तिनिरूपकं साङ्ख्यमस्ति[1]। तद्यथा- यावन्मनुष्यस्य मनः सत्वरजस्तमोभिः वशीकृतस्तिष्ठति, तावत्सोऽत्र विना केनाप्यङ्कुशेन ज्ञानेन्द्रियकर्मेन्द्रियैः शुभाशुभानि कर्माणि कारयति । एतन्मनः वासनामयं विषयासक्तं गुणप्रेरितं, विकारि, भूतेन्द्रियरूपासु षोडशकलासु मुख्यमस्ति । एतदेव मनो नैकविधनामभिः देवमानवादिरूपाणि धारयित्वा शरीरोपाधिभेदैः जीवस्योत्तमताधमतयोः कारणं भवति । मायामयम्मनः संसारचक्रे छद्मकमस्ति । एतदेव देहाद्यभिमानिना जीवेन सह सम्मिलय कालक्रमागतानि सुखानि दुःखानि तद् व्यतिरिक्तानि मोहरूपाण्यवश्यम्भावीनि फलान्यभिव्यनक्ति । यावदेतन्मनस्ति-

---

१. यावन्मनो रजसा पूरुषस्य सत्त्वेन वा तमसा वानुरुद्धम् ।
चेतोभिराकूतिभिरातनोति निरङ्कुशं कुशलं चेतरं वा ।।
स वासनात्मा विषयोपरक्तो गुणप्रवाहो विकृतः षोडशात्मा ।
बिभ्रत्पृथङ्नामभि रूपभेदमन्तर्बहिष्ट्वञ्च पुरैस्तनोति ।।
दुःखं सुखं व्यतिरिक्तं च तीव्रं कालोपपन्नं फलमाव्यनक्ति ।
आलिङ्ग्य मायारचितान्तरात्मा स्वदेहिनं संसृतिचक्रकूटः ।।
तावानयं व्यवहारः सदाविः क्षेत्रज्ञसाक्ष्यो भवति स्थूलसूक्ष्मः ।
तस्मान्मनो लिङ्गमदो वदन्ति गुणागुणत्वस्य परावरस्य ।।
गुणानुरक्तं व्यसनाय जन्तोः क्षेमाय नैर्गुण्यमथो मनः स्यात् ।
यथा प्रदीपो घृतवर्तिमश्नन् शिखाः सधूमा भजति ह्यन्यदा स्वम् ।।
पदं तथा गुणकर्मानुबद्धं वृत्तीर्मनः श्रयतेऽन्यत्र तत्त्वम् ।।

ष्ठति तावदेव स्वप्नजागृदवस्थयोः व्यवहरणं प्रकटीभूय जीवदृश्यं जायते। अतएव पण्डिताः मन एव त्रिगुणमय्याः ह्यस्याः मायायाः संसृतेश्च गुणातीतस्य परमोत्कृष्टस्य पदस्य कारणमामनन्ति।

विषयासक्तं मनः जीवं सांसारिके कष्टे पातयति। विषयहीनत्वे तु तदैव तं जीवं शान्तिमयं मोक्षपदं प्रापयति। यथा घृताक्तवर्तिकाक्षयकारिणो दीपात्सधूमका शिखा निःसरति तथा समाप्ते घृते सा स्वकारणे वह्नितत्त्वे विलीयते, तथैव विषयेषु कर्मसु चासक्तं मनः विभिन्नाः वृत्तयः समाश्रयते, एताभ्यो मुक्तञ्च तदपि स्वे तत्त्वे विलीयते।

पञ्चकर्मेन्द्रियाणि पञ्चज्ञानेन्द्रियाणि अहङ्कारश्चेत्येकादशसङ्ख्याकाः मनसो वृत्तयः सन्ति। पञ्चविधकर्माणि पञ्चतन्मात्राणि शरीरञ्चेत्येकादश सङ्ख्याकाः तासामाधारभूताः विषयाः कथ्यन्ते। गन्धरूपस्पर्शरसशब्दाः ज्ञानेन्द्रियाणां विषयाः सन्ति। मलोत्सर्गव्यवाय-गमन-भाषणादानप्रदानादीनीति पञ्चकर्मेन्द्रियाणां विषयाः। तथा शरीरम्प्रति ममेति स्वीकृतिरहङ्कारस्य विषयभूता वर्त्तते। केचनाहङ्कारम्मनसः द्वादशीं वृत्तिं तस्याश्रयशरीरञ्च द्वादशं विषयमङ्गीकुर्वन्ति। एताः मनस एकादशवृत्तयः द्रव्य-स्वभाव-आशय-कर्म-कालादिभिः शतशः सहस्रशो कोटिशश्च भेदेषु परिणमन्ते। परमेतासां सत्ता क्षेत्रज्ञस्याऽऽत्मनः सत्तयैवाऽस्ति, स्वतो परस्परं सम्भूय वा नास्ति। एवं सत्यपि मनसो क्षेत्रज्ञेन सह नास्ति कोऽपि सम्बन्धः।

एकादशासन्मनसो हि वृत्तय आकूतयः पञ्च धियोऽभिमानः।
मात्राणि कर्माणि पुरं च तासां वदन्ति हैकादश वीर भूमीः॥
गन्धाकृतिस्पर्शरसश्रवांसि विसर्ग रत्यर्त्यभिजल्पशिल्पाः।
एकादशं स्वीकरणं ममेति शय्यामहं द्वादशमेक आहुः॥
द्रव्यस्वभावाशयकर्मकालैरेकादशामी मनसो विकाराः।
सहस्रशः शतशः कोटिशश्च क्षेत्रज्ञतो न मिथो न स्वतः स्युः॥
क्षेत्रज्ञ एता मनसो विभूतिर्जीवस्य मायारचितस्य नित्याः।
आविर्हिताः क्वापि तिरोहिताश्च शुद्धो विचष्टे ह्यविशुद्धकर्तुः॥
क्षेत्रज्ञ आत्मा पुरुषः पुराणः साक्षात्स्वयंज्योतिरजः परेशः।
नारायणो भगवान् वासुदेवः स्वमाययात्मन्यवधीयमानः॥

एष तु जीवस्यैव मायानिर्मितः सदुपाधिरस्ति । एतत्तु प्रायः संसारबन्धनकारिष्व-विशुद्धकर्मस्वेव प्रवर्त्तते । अस्योपर्युक्ताः वृत्तयो प्रवाहरूपेण नित्यमेव तिष्ठन्ति । जागृद-वस्थास्यां स्वप्नावस्थायाञ्च प्रकटीभवन्ति । सुषुप्तौ तु तिरोधीयन्ते । अवस्थयोरनयोः यः क्षेत्रज्ञो विशुद्धश्चिन्मात्रकोऽस्ति सोऽत्र मनसा ह्येताः वृत्तयः साक्षिरूपेण पश्यति । अयं क्षेत्रज्ञः परमात्मा सर्वव्यापको जगतामादिकारणं परपूर्णो परोक्षः स्वयंप्रकाशो-ऽजन्मा ब्रह्मादीनामपि नियन्ता स्वाश्रितया मायया सर्वेषामन्तःकरणेषु स्थित्वा जीवानां प्रेरकः समग्रभूतानामाश्रयभूतो भगवान् वासुदेवोऽस्ति । यथा वायुः समग्रेषु स्थावर-जङ्गमप्राणिषु प्राणरूपेण संविश्य तान् प्रेरयति । तथैव सः परमेश्वरो भगवान् वासुदेवः सर्वसाक्ष्यात्मस्वरूपेण समग्रेऽपि प्रपञ्चे ओतश्च प्रोतश्चास्ति । यावन्मानवः ज्ञानोदयेन मायान्तिरस्कृत्य सर्वासक्तिं विहाय कामक्रोधादीन् षड्शत्रून् विजित्यात्मतत्त्वन्न जानाति, तद आत्मोपाधिरूपं मनः संसृतिदुःखक्षेत्रन्नावगच्छति, तावत् लोकेऽस्मि-न्नित्यमेव भ्रान्तन्तिष्ठति, यतो ह्येतच्चित्तं तस्य शोकमोहरोगरागलोभद्वेषादीनां संस्काराणां ममतायाश्च वृद्धिं कुर्वन् तिष्ठति । मन एव महान् बली शत्रुः वर्तते । मनो यद्यपि स्वयं तु सर्वथा मिथ्या वर्तते, तथापि आत्मस्वरूपमाच्छादयति ।

उपर्युक्ते प्रसङ्गे मनस एकादशवृत्तीनां याथातथ्येन निरूपणं कृतमिति एकादशमनोवृत्तिनिरूपकं साङ्ख्यमस्ति तथा संसृतिचक्रवर्णनमप्यस्तीति संसृति चक्रकूटवादि साङ्ख्यमप्यस्तीति निश्चप्रचम् ।

यथानिलः स्थावरजङ्गमानामात्मस्वरूपेण निविष्ट ईशेत् ।
एवं परो भगवान् वासुदेवः क्षेत्रज्ञ आत्मेदमनुप्रविष्टः ॥
न यावदेतां तनुभृन्नरेन्द्र विधूय मायां वयुनोदयेन ।
विमुक्तसङ्गो जितषट्सपत्नो वेदात्मतत्त्वं भ्रमतीह तावत् ॥
न यावदेतन्मन आत्मलिङ्गं संसारतापावपनं जनस्य ।
यच्छोकमोहामय रागलोभवैरानुबन्धं ममतां विधत्ते ॥
भ्रातृव्यमेनं तददभ्रवीर्यमुपेक्षयाध्येधितमप्रमत्तः ।
गुरोर्हरेश्चरणोपासनास्त्रो जहि व्यलीकं स्वयमात्ममोषम् ॥
(स्क. ५, अ. ११, श्लोक ४-१७)

(४७)

सदसद्वादि साङ्ख्यम्

श्रीमद्भागवतमहापुराणे पञ्चमे स्कन्धे द्वादशेऽध्यायेऽष्टमश्लोकत एकादशश्लोकं यावत् रहूगणसंशयापनुत्तये श्रीजड़भरतेन समुपदिष्टं सदसद्वादिसाङ्ख्यमस्ति ।[1] तद् यथा—

समग्राण्यपि चराचराणि भूतानि पृथिव्या एव जायन्ते, पृथिव्यामेव विलीयन्ते च । अतस्तस्य क्रियाभेदेन यानि विभिन्नानि नामान्यभूवन् तेषां व्यवहारातिरिक्तं किमपि मूल्यन्नास्ति । अनेन प्रकारेण पृथिवी शब्दस्य व्यवहरणमपि मिथ्यैवास्ति, यतः हीयं स्वोपादानकारणेषु सूक्ष्मपरमाणुषु विलीयते । तथा येषां सम्मेलनेन पृथिवीरूपस्य कार्यस्य सिद्धिर्भवति, ते परमाणवोऽविद्यावशान्मनसैव कल्पिताः सन्ति । वस्तुतस्तेषामपि सत्ता नास्ति । इत्थमेव यत् किंचित् सूक्ष्मस्थूललघुबृहद्वा कार्यकारणं चेतनमचेतनं वेतिगुणैः युक्तन्द्वैतप्रपञ्चजातमस्ति । द्रव्य-स्वभाव- आशय-काल-कर्मादिनाम्न्याः भगवन्मायाया एव कार्यमस्तीति ज्ञेयम् । विशुद्धं परमार्थभूतमद्वितीयन्तथान्तर्बहिर्भेदशून्यं परिपूर्णज्ञानमेव सत्यं वस्तु वर्त्तते । तत् सर्वान्तर्वति निर्विकारं चवर्त्तते । तदेव भगवच्छब्देन व्यवह्रियते । तमेव भगवन्तं विद्वांसो वासुदेवेति कथयन्ति ।

सदसद्रूपप्रतिपादनादत्र सदसद्वादि साङ्ख्यमस्तीति ज्ञेयम् ।

---

१. यदा क्षितावेव चराचरस्य विदाम निष्ठां प्रभवं च नित्यम् .
तन्नामतोऽन्यद् व्यवहारमूलं निरूप्यतां सत् क्रिययानुमेयम् ।।
एवं निरुक्तं क्षितिशब्दवृत्तमसन्निधानात्परमाणवो ये ।
अविद्यया मनसा कल्पितास्ते येषां समूहेन कृतो विशेषः ।।
एवं कृशं स्थूलमणुर्बृहद्यद् असच्च सज्जीवमजीवमन्यत् ।
द्रव्यस्वभावाशयकालकर्मनाम्ना जयावेहि कृतं द्वितीयम् ।।
ज्ञानं विशुद्धं परमार्थमेकमनन्तरं त्वबहिर्ब्रह्म सत्यम् ।
प्रत्यक्प्रशान्तं भगवच्छब्दसंज्ञं यद्वासुदेवं कवयो वदन्ति ।।
(स्क. ५ अ. १२ श्लो. ८-११)

(४८)

भगवत्स्थूलरूपनिरूपकं साङ्ख्यम्

श्रीमद्भागवतमहापुराणे पञ्चमे स्कन्धे षोडशेऽध्याये तृतीयचतुर्थयोः श्लोकयोः पृथुशुकयोः संवादे भूगोलवर्णनप्रसङ्गे प्रोक्तं भगवत्स्थूलरूपनिरूपकं साङ्ख्यमस्ति[1]—तद्यथा—

यन्मनः भगवतो गुणमये स्थूले विग्रहेऽवधातुमर्हति, तस्यैव मनसो वासुदेवसंज्ञक स्वयंप्रकाशे निर्गुणे ब्रह्मरूपे सूक्ष्मतमस्वरूपे स्थितिः संभाव्यते। भगवन्मायायाः गुणानामियान् विस्तरो वर्त्तते, यदत्र कोऽपि पुरुषः देवानिवायुष्यं प्राप्त्वापि मनसा वाचा चास्यान्तं प्राप्तुन्नार्हति। अतः नाम-रूप-परिमाण-लक्षणैः मुख्यवार्ताः समादायैव भूमण्डलस्य विशेषतो वर्णयितुं शक्यन्ते।

उपर्युक्ते प्रसङ्गे भगवतः स्थूलस्वरूपस्य निरूपणं कृतमस्तीत्यत्र भगवत्स्थूलस्वरूपनिरूपकं साङ्ख्यमस्तीति।

(४६)

ब्रह्मकर्तृकसृष्टिवादि साङ्ख्यम्

श्रीमद्भागवतमहापुराणे पञ्चमे स्कन्धे सप्तदशेऽध्याये सप्तदशश्लोकतः समा-

---

१. भगवतो गुणमये स्थूलरूप आवेशितं मनो ह्यगुणेऽपि सूक्ष्मतम आत्मज्योतिपि परे ब्रह्मणि भगवति वासुदेवाख्ये क्षममावेशितुं तदु हैतद्गुरो ऽर्हस्यनुवर्णयितुमिति ॥

ऋषिरुवाच

न वै महाराज भगवतो मायागुणविभूतेः काष्ठां मनसा वचसा वाधिगन्तुमलं विबुधायुषापि पुरुषस्तस्मात्प्राधान्येनैव भूगोलकविशेषं नामरूपमालक्षणतो व्याख्यास्यामः। (स्क. ५ अ. १६ श्ल. ३, ४)

रम्य चतुर्विंशतितमश्लोकं यावद् इलावृते वर्षे सङ्कर्षणस्य स्तुतौ शङ्करेण प्रोक्तं ब्रह्मकर्तृक सृष्टिवादि साङ्ख्यमस्ति[२]। तद् यथा—

ओङ्कारात्समेषामपि गुणानामभिव्यक्तिर्भवति, ओङ्कारोऽव्यक्तस्वरूपी भगवान् परमपुरुषोऽस्ति। तस्य चरणसरोरूहाणि भक्तेभ्यः स्वाश्रयं ददति। भगवान् एव समग्रैश्वर्याणां परमाश्रयो वर्त्तते। भक्तसमक्षं भूतभावनस्वरूपं पूर्णतः प्रकटीकरोति संसारबन्धनाच्च तान्मोचयति। किन्त्वभक्तान् बन्धने निक्षिपति। सर्वेश्वरः सोऽत्र समेषामपि वन्दनीयः। ये क्रोधं वशीकर्त्तुमप्रभवो भवन्ति, ते पापलिप्ताः भवन्ति। परमेश्वरः जगन्नियन्तुः सततं साक्ष्येण जगतः समग्राण्यपि व्यापरणान्यवलोकयति। तथापि मायिकविषयकाणां चित्तवृत्तीनां नाममात्रतोऽपि प्रभावो न भवति। एतादृश्यामवस्थायां स्वमनोः वशीचिकीर्षुः कोऽपि पुरुषो भगवन्तं नाद्रिष्यते। परमेश्वरं ये पुरुषा मायावशीभूताः वस्तुतोऽजानन्तः भ्रान्ता भवन्ति। ते तमधिगन्तुन्नार्हन्ति

---

२. ओ३म् नमो भगवते महापुरुषाय सर्वगुणसंख्यानायानन्तायाव्यक्ताय नम इति ॥

भजे भजन्यारणपादपङ्कजं भगस्य कृत्स्नस्य परं परायणम्।
भक्तेष्वलं भावितभूतभावनं भवापहं त्वा भवभावमीश्वरम् ॥
न यस्य माया गुण चित्तवृत्तिभिर्निरीक्षतो ह्यण्वपि दृष्टिरज्यते।
ईशे यथा नोऽजितमन्युरंहसां कस्तं न मन्येत जिगीषुरात्मनः ॥
असद्दृशो यः प्रतिभाति मायया क्षीबेव मध्यासवताम्रलोचनः।
न नागवध्वोऽर्हण ईशिरे ह्रिया यत्पादयोः स्पर्शनधर्षितेन्द्रियः ॥
यमाहुरस्य स्थितिजन्मसंयमं त्रिभिर्विहीनं यमनन्तमृषयः।
न वेद सिद्धार्थमिव क्वचित्स्थितं भूमण्डलं मूर्धसहस्रधामसु ॥
यस्याद्य आसीद् गुणविग्रहो महान् विज्ञानधिष्ण्यो भगवानजः किल।
यत्सम्भवोऽहं त्रिवृता स्वतेजसा वैकारिकं तामसमैन्द्रियं सृजे ॥
एते वयं यस्य वशे महात्मनः स्थिताः शकुन्ता इव सूत्रयन्त्रिताः।
महानहं वैकृततामसेन्द्रियाः सृजाम सर्वे यदनुग्रहादिदम् ॥
यन्निर्मितां कर्ह्यपि कर्मपर्वणीं मायां जनोऽयं गुणसर्गमोहितः।
न वेद निस्तारणयोगमञ्जसा तस्मै नमस्ते विलयोदयात्मने ॥

(स्क. ५, अ. १७, श्लो. १७—२४)

वेदमन्त्राः परमात्मानं जगदुत्पत्तिस्थितिलयकारणत्वेन प्रतिपादयन्ति, तथापि परमेश्वरः विकारत्रयान्मुक्तो निर्गुणो निर्विकारी च वर्त्ततेऽतोऽनन्तोऽभिधीयते । अनन्तस्वरूपिणः सहस्रमस्तकेषु भूमण्डलमेतत्सर्षबीजमिव स्थितमस्ति ।

यस्मादुत्पन्नोऽहङ्कारस्वरूपी शङ्करः त्रिगुणमयात्तेजसो देवतेन्द्रियाणां भूतानां च सृजनङ्करोति । विज्ञानाश्रितो भगवान्, ब्रह्मापि परमात्मनः महत्तत्त्वस्वरूपो गुणमयोऽस्तिं । महत्तत्त्वाहंकारौ, इन्द्रियाभिमानिन्यः देवताः, इन्द्रियाणि, पञ्चभूतानीत्यादीनि रज्जुवद्धपक्षिणमिव क्रियाशक्तेवशीभूय परमेश्वरानग्रहैणैव जगत्सृजन्ति । सत्वादिगुणसृष्ट्या मोहितोऽयं जीवः परमात्मविरचितां कर्म-बन्धनबन्धिनीं मायांतु कर्हिचिज्जानात्यपि तु तस्याः मुक्त्युपायं सौकर्येण नाप्यते । जगदुत्पत्तिप्रलयावपि परमात्मस्वरूपावेव ।

उपर्युक्ते प्रसङ्गे सङ्कर्षणस्वरूपि ब्रह्म कर्तृकत्वेन वर्णितमस्तीति ब्रह्मकर्तृकसृष्टिवादि साङ्ख्यमस्तीति बोध्यम् ।

(५०)

कार्यकारणभावात्मक ईश्वरवादि साङ्ख्यम्

श्रीमद्भागवतमहापुराणे पञ्चमे स्कन्धेऽष्टादशेऽध्याये द्वितीयश्लोकतः षष्ठश्लोकं यावत् श्रीहयग्रीवभगवत्स्तुतौ धर्मसुतैः भद्रश्रवोभिः प्रोक्तं कार्यकारणभावात्मके ईश्वरवादि साङ्ख्यमस्ति । तद् यथा—

भद्रश्रवस ऊचुः

1. ॐ नमो भगवते धर्मायात्मविशोधनाय नम इति ।।
अहो विचित्रं भगवद्विचेष्टितं घ्नन्तञ्नोऽयं हि मिषन्न पश्यति ।
ध्यायन्न सर्द्धि विकर्म सेवितुं निर्हृत्य पुत्रं पितरं जिजीविषति ।
वदन्ति विश्वं कवयः स्म नश्वरं पश्यन्ति चाध्यात्मविदो विपश्चितः
तथापि मुह्यन्ति तवाजमायया सुविस्मितं कृत्यमजं नतोऽस्मि तम्
विश्वोद्भवस्थामनिरोधकर्म ते ह्यकर्त्तुरङ्गीकृतमप्यपावृतः ।
युक्तं न चित्रं त्वयि कार्यकारणे सर्वात्मनि व्यतिरिक्ते च वस्तुतः ।।
वेदान्युगान्ते तमसा तिरस्कृतान् रसातलाद्यो नृतुरङ्गविग्रहः ।
प्रत्याददे वै कवयेऽभियाचते तस्मै नमस्तेऽवितथे हिताय इति ।।
(स्क. ५ अ. १८ श्लो. २—६)

चित्तविशोधकः ओङ्कारस्वरूपी भगवान् धर्मो वन्दनीयः । तस्य लीला परमविचित्राऽस्ति । यस्मात् जीवोऽयं सम्पूर्णलोकसंहर्तारं कालमवलोकयन्नपि नावलोकयति तुच्छविषयान् सेवितुं पापमयविचारणे संलग्नः स्वहस्ताभ्यां स्वपितृपुत्रा दीनां शवान् दग्ध्वापि स्वयं जीवितुमेवेहते । विद्वांसोः जगन्नश्वरं वर्णयन्ति, सूक्ष्मदर्शिन आत्मज्ञानिन एवमेवावलोकयन्त्यपि तथापि प्रभोः मायया मुधा भवन्ति । भगवान् अनादिः विस्मयावह लीलामयश्च वर्त्तते । कर्त्तृत्वरहितो मायातीतश्च वर्त्तते भगवान् तथापि जगदुत्पत्तिस्थितिलयाः भगवत्कर्मत्वेनैवोररीकृताः वर्त्तते । सर्वात्मरूपेण भगवान्नेव समग्रकार्याणाङ् कारणमस्ति । स्वशुद्धे स्वरूप त्वस्मात्कार्यकारणभावाद-तीतोऽस्ति । भगवता मनुष्यघोटकयोः संयुक्तं शरीरमपि धृतम् । प्रलयकाले यदा तमः प्रधानानि रक्षांसि वेदानचूचुरन् तदा ब्रह्मणा कृतायां प्रार्थनायां वेदान् रसातलादानयत् । अमोघलीलः सत्यसङ्कल्पश्च वर्त्तते भगवान् ।

वस्तुतः कार्यकारणातीतोऽपि प्रभुः सृष्टौ कार्यकारणभावापन्नो भवतीति कार्यकारणभावात्मकेश्वरवादिसाङ्ख्यमत्रास्तीति शम् ।

(५१)

षोडशकलानिरूपकं साङ्ख्यम्

श्रीमद्भागवतमहापुराणे पञ्चमे स्कन्धे ऽष्टादशे ऽध्याये ऽष्टादशे श्लोके भगवतः मायामयं रूपं उपासन्त्या रमया प्रोक्तं षोडशकलावादि साङ्ख्यमस्ति[1] तद् यथा—

यः भगवानिन्द्रियाणां नियन्ता समग्रश्रेष्ठवस्तूनामाकरश्च वर्त्तते । सोऽत्र क्रियाशक्तिर्भानशक्तिः सङ्कल्पाध्यवसादीनां धर्माणां तथा तेषां विषयाणामपी

---

1. ॐ ह्रां ह्रीं ह्रूं ॐ नमो भगवते हृषीकेशाय सर्वगुण—
विशेषैर्विलक्षितात्मने आकूतीनां चित्तीनां चेतसां विशेषाणां—
चाधिपतये षोडशकलायच्छन्दोमयायान्नमयाया—
मृतमयाय सर्वमयाय सहसे ओजसे बलाय कान्ताय—
कामाय नमस्ते उभयत्र भूयात् ।।१८।।
(स्क. ५ अ. १८ खण्डम् १८)

श्वरोऽस्ति । एकादशेन्द्रियाणि पञ्च विषयाश्चेति षोडशकलाभिर्युक्तोऽस्ति । वेदोक्तकर्मभिश्च प्राप्तुं शक्यते । अन्नमयो ऽमृतमयः सर्वमयश्चास्ति ।

उपर्युक्ते प्रसङ्गे इन्द्रियाणि तेषां विषयाश्चेति षोडशकलात्वेन प्रतिपादनादत्र षोडशकलावादि साङ्ख्यम स्तीति वक्तुं सुशकम् ।

(५२)

चतुर्विधयोनिप्रतिपादकं साङ्ख्यम्

श्रीमद्भागवतमहापुराणे पञ्चमे स्कन्धे ऽष्टादशे ध्याये त्रिंशत्तमश्लोकतस्त्रयस्त्रिंशत्तमश्लोकं यावत् कूर्मतनुभृतो भगवतः स्तुतौ ऽत्रर्षपुरुषैः सहार्यम्णा प्रोक्तं चतुर्विधयोनिप्रतिपादकं साङ्ख्यमस्ति[१] ।

तद् यथा—

---

१. ॐ नमो भगवते अकूपाराय सर्वसत्त्वगुणविशेषणाया—
नुपलक्षितस्थानाय नमो वर्ष्मणे भूम्ने नमो नमोऽवस्था—
नाय नमस्ते ।।
यद्रूपमेतन्निजमाययार्पित—
मर्थस्वरूपं बहुरूपरूपितम् ।
सङ्ख्या न यस्यास्त्ययथोपलम्भनात्तस्मै नमस्तेऽव्यपदेशरूपिणे
जरायुजं स्वेदजमण्डजोद्भिदं
चराचरं देवर्षिपितृभूतमैन्द्रियम् ।।
द्यौः खं क्षितिः शैलसरित्समुद्र ।
द्वीपग्रहर्क्षेत्यभिधेय एकः ।।
यस्मिन्नसङ्ख्येयविशेषनाम ।
रूपाकृतौ कविभिः कल्पितेयम् ।
सङ्ख्या यया तत्त्वदृशापनीयते ।
तस्मै नमः साङ्ख्यनिदर्शनाय ते ।। इति ।।
(स्क. ५ अ. १८ खण्ड १३ श्लो. ३३)

यः समयः सत्त्वगुणयुक्तोऽस्ति जले परिभ्रमणात् यस्य स्थानङ् किमपि निश्चितं नासीत्, तथा यः कालमर्यादायाः बहिर्वर्त्तते। ओङ्कारस्वरूपी सर्वाधारः भगवान् कच्छपो भूयो भूयः वन्दनीयोऽस्ति, नैकविधस्वरूपेषु प्रतीयमानन्दृश्यप्रपञ्चजातं यद्यपि मिथ्यैव प्रतीयतेऽतोऽस्य वस्तुतोऽत्र न कापि गणनास्ति, तथ.पि मायया प्रकाशितमेतद्भग वत एव स्वरूपमस्ति तदस्त्यनिर्वचनीयम् । भगवान् एव जरायुजस्वेदजाण्डजोद्भिज्ज-जङ्गमस्थावर-देवतादिभि ऋषि-पितृगण-भूतानि-इन्द्रियाणीत्येतैः स्वर्गमाकाश-पृथिवी-नदीग्रह-तारेष्यादिभिः विविधैर्नामभिः प्रसिद्धोस्ति । भगवान् असंख्येयनामरूपकृतिभि र्युक्तोऽस्ति । कपिला-दिभिर्विद्वद्भिर्या चतुर्विशतीति तत्त्वसङ्ख्या निश्चिता भवति, सा यस्याः तत्वदृशः समुदये निवर्त्तते सा तत्त्वदृगपि वस्तुतः भगवत्स्वरूपमेवास्ति । इत्थं साङ्ख्यसिद्धान्तस्वरूपी स्वयमेव भगवान् वर्त्तते ।

उपर्युक्ते प्रसङ्गे जरायुजस्वेदजाण्डजोद्भिज्जेति चतुर्विधयोनीनां स्वरूपस्य याथातथ्येन प्रतिपादनादत्र चतुर्विधयोनिप्रतिपादकं साङ्ख्यमस्तीति ।

(५३)

अमृतमृत्युवादि साङ्ख्यम्

श्रीमद्भागवतमहापुराणे पञ्चमे स्कन्धे विंशतितमेऽध्याये चतुर्थश्लोकतः षष्ठश्लोकं यावत् प्लक्षादिषड्द्वीपानां वर्णनप्रसङ्गेऽमृतमृत्युवादि साङ्ख्यम् प्रतिपादितमस्ति[1] । तद् यथा—

---

1. यासां जलोपस्पर्शन विधूतरजस्तमसो हंसपतङ्गो
ध्वर्यिनसत्याङ्गसंज्ञाश्चत्वारो वर्णाः सहस्रायुषो विबुधो
पमसंदर्शनप्रजननाः स्वर्गद्वारं त्रय्या विद्यया भगवन्तं
त्रयीमयं सूर्यमात्मानं यजन्ते ॥
प्रत्नस्य विष्णो रूपं यत्सत्यस्यर्तस्य ब्रह्मणः ।
अमृतस्य च मृत्योश्च सूर्यमात्मानमीमहीति ॥
प्लक्षादिषु पञ्चसु पुरुषाणामायुरिन्द्रियमोजः सहो बलं
बुद्धिर्विक्रम इति च सर्वेषामौत्पत्तिकी सिद्धिरविशेषेण वर्त्तते ॥
(स्क. ५ अ. २० श्लो. ४—६)

मणिकूट वज्रकूट-इन्द्रसेन-ज्योतिष्मान्-सुपर्ण-हिरण्यष्ठीव-मेघमालाख्याः सप्तमर्यादापर्वताः सन्ति। असूणा-नर्मणा-आङ्गिरसी सावित्री-सुप्रभार्ता-ऋतम्भरा-सत्यम्भराख्याः सप्तै वमहानद्यः सन्ति। तत्र हंस-पतङ्ग-उर्ध्वायन-सत्याङ्गाख्याः चत्वारो वर्णाः सन्ति। तासु नदीषु स्नानेन तेषां वर्णानां रजस्तमोगुणौ क्षीणौ भवतः। तेषां वर्णानामायुः सहस्रवर्षमितं भवति। एतेषां शरीरेषु देवानामिव श्रान्तिः स्वेदादीनि च न भवन्ति। सन्तानोत्पत्तिश्चापि देवानामिवैव भवति। एते त्रयीविद्यया त्रिष्वपि वेदेषु वर्णितं स्वर्गद्वारभूनमात्मस्वरूपिणं सूर्यमुपासन्ते। एते सत्यं तपोऽर्थादनुष्ठानार्हंधर्माणां प्रतीयमानधर्माणां वेदानां शुभाशुभफलानाञ्चधिष्ठातुः पुराणपुरुषविष्णुस्वरूपिणो भगवतः श्रीसूर्यस्य शरणङ्गच्छन्ति। प्लक्षादिषु पञ्चद्वीपेषु सर्वेषु च मनुष्येषु जन्मत एवायुरिन्द्रियमनोबलशारीरिकबलबुद्धिबलादीनि सम्यग्रूपेण सिध्यन्ति।

उपर्युक्ते प्रसङ्गे अमृतमृत्योर्वर्णनमस्त्यर्थात् प्लक्षादिषु पञ्चद्वीपेषु जनाः देवानामिव भवन्ति परं भवन्ति मर्त्याः आपेक्षिकमांशिकं चामरत्वं तेष्वस्ति प्रतिपादितमिति अमृतमृत्युवादि साङ्ख्यमस्तीति।

(५४)

सोमविज्ञानवादि साङ्ख्यम्

श्रीमद्भागवतमहापुराणे पञ्चमे स्कन्धे विंशतितमेऽध्याये दशमे श्लोके प्लक्षादिषड्द्वीपानां वर्णनप्रसङ्गे प्रतिपादितं सोमविज्ञानवादि साङ्ख्यमस्ति[२]। तद् यथा—

यः कृष्णपक्षे शुक्लपक्षे च स्वमयूखैः विभज्य देवेभ्यः पितृभ्यः समग्रप्राणिभ्यश्चान्नं ददाति, सः चन्द्रोऽस्माकं राजाऽर्थाद्रञ्जनकर्त्ता वर्त्तते।

सोम एवास्मभ्यं देवेभ्यो पितृभ्यश्चान्नं यथाविभागं विभज्य यच्छतीति प्रतिपादनादत्र अग्निसोमात्मकं जगत्सर्वम् "भक्षक भक्ष्ये" अन्नमन्नाद एव चेत्यादिसिद्धान्तसाधकप्रमाणभूतत्वादत्र कथं सोमः सोम इति प्रतिपादनात्सोमविज्ञानवादि साङ्ख्यमस्तीति निश्चितम्।

---

2. स्वगोभिः पितृदेवेभ्यो विभजन् कृष्णशुक्लयोः।
प्रजानां सर्वासां राजान्धेः सोतो न आस्त्विति ।।

(स्क. ५ अ. २० श्लो. १२)

(५५)

अपोविज्ञानप्रतिपादकं साङ्ख्यम्

श्रीमद्भागवतमहापुराणे पञ्चमे स्कन्धे विंशतितमेऽध्याये प्लक्षादिशड्द्वीपानां वर्णनप्रसङ्गेन अपोविज्ञानवादि साङ्ख्यम्प्रतिपादितम् ।

जलाधिदेवः परमात्मनः प्राप्तसाथ्र्यकोऽस्ति । अतएव सः भुर्भुवः स्वरिति त्रींल्लोकान् प्रपुनाति । यतोऽत्र सः स्वरूपत एव पापानां नाशकोऽस्ति । अतएव सर्वेऽपि शरीरेण स्पृशन्ति । जलाधिदेवश्च तेषां तेषां शरीराणामङ्गानि पवित्रीकरोति ।

जलस्य तदधिदेवस्य च किञ्च स्वरूपं किञ्च महत्त्वमस्तीति प्रतिपादनादत्रापोविज्ञानप्रतिपादकं साङ्ख्यं वर्त्तते ।

(५६)

वायुविज्ञानप्रतिपादकं साङ्ख्यम्

श्रीमद्भागवतमहापुराणे पञ्चमे स्कन्धे विंशतितमेऽध्याये सप्तविंशतितमाष्टाविंशतितमयोः श्लोकयोः वायुविज्ञानप्रतिपादकंसा ङ्ख्यमस्ति[१] । तद् यथा—

---

3. यासामम्भः पवित्रममलमुपयुञ्जानाः पुरुषऋषभ
द्रविणदेवकसंज्ञा वर्षपुरुषा आपोमयं देवमपां पूर्णेनाञ्जलिना यजन्ते ।।
आपः पुरुषवीर्याःस्थ पुनन्ती भूर्भुवः सुवः ।
ता नः पुनीतामीवघ्नीः स्पृशतामात्मना भुवः ।।
(स्क. ५ अ. २० श्लो. २२—२३)

२. तद्वर्षपुरुषा ऋतव्रतसत्यव्रतदानव्रतानुव्रतनामानो
भगवन्तं वाय्वात्मकं प्राणायामविधूतरजस्तमसः परमसमाधिना यजन्ते ।।
अन्तः प्रविश्य भूतानि यो बिभर्त्यात्मकेतुभिः ।
अन्तर्यामीश्वरः साक्षात् पातु नो यद्वशे स्फुटम् ।।
(स्क. ५, अ. २०, श्लो. २७-२८)

शाकद्वीपवर्षस्थाः ऋतव्रताः सत्यव्रताः, दानव्रतारनुव्रताश्च ये पुरुषाः प्राणायामैः स्वरजस्तमोगुणौ क्षीणीकृत्य महासमाधिना वातरूपं श्रीहरिमुपासन्ते। ये प्राणादयः स्वकृतिरूपाभिः स्वध्वजाभिः सह प्राणिषु प्रविश्य विराजन्ते। इदञ्च जगदेषामधीनस्थं वर्त्तते। स एव साक्षादन्तर्यामि वायुरूपी भगवान् सर्वान् रक्षति।

उपर्युक्ते प्रघट्टके वायोः सुस्पष्टं वैज्ञानिकं प्रतिपादनमस्तीति वायुविज्ञान-प्रतिपादकं साङ्ख्यमस्तीति निश्चप्रचम्।

(५७)

लोकालोकप्रतिपादकं साङ्ख्यम्

श्रीमद्भागवतमहापुराणे पञ्चमे स्कन्धे विंशतितमेऽध्याये त्रिंशत्तमश्लोकतः षट्चत्वारिंशत्तमश्लोकं यावत् साङ्ख्यमस्ति[२]—

तद् यथा-विद्वद्भिः प्रमाणलक्षणस्थितीरनुसरद्भिः समस्तं भूगोलं पञ्चाशत्कोटियोजनविस्तृतमस्तीति स्वीक्रियते। भूगोलस्य चतुर्थोऽशो अर्थात् सार्धद्वादशकोटियोजनायतोऽस्ति लोकालोकपर्वतः। अस्योपरिसकलजगद्गुरुणा स्वयंभुवा ब्रह्मणा लोकानां स्थितये ऋषभपुष्करचूडवामनाऽपराजितनामकाश्चेतिचत्वारो गजराजानः नियुक्ताः। एतेषां दिग्गजानां स्वांशस्वरूपेणइन्द्रादिलोकपालानां विविधशक्तीनां वृद्धये समस्त लोकानां कल्याणाय परमैश्वर्याधिपतिः सर्वान्तिर्यामी परमगुरुषः श्रीहरिः स्वविश्क्सेना-

---

२. तदुपरिष्टाच्चतसृष्वाशा स्वात्मयोनिनाखिलजगद्गुरुणाधिनिवेशिता ये द्विरदपतय ऋषभः पुष्करचूडो वामनोऽपराजित इति सकललोक स्थितिहेतवः॥

तेषां स्वविभूतीनां लोकपालानां च विविधवीर्योपबृंहणाय भगवान् परममहापुरुषो महाविभूतिपतिरन्तर्याम्यात्मनो विशुद्धसत्त्वं धर्मज्ञान-वैराग्यैश्वर्याद्यष्टमहासिद्ध्युपलक्षणं विष्वक्सेनादिभिः स्वपार्षदप्रवरैः परिवारितो निजवरायुधोपशोभितैर्निजभुजदण्डैः संधारयमाणस्तस्मिन् गिरिवरे समन्तात्सकललोक स्वस्तय आस्ते॥

दिषार्षदसहितः पर्वते ऽमुष्मिन् सर्वत्र विराजते। सः स्वविशुद्धसत्त्वं श्रीविग्रहं धर्म-ज्ञानवैराग्यैश्व-र्याद्यष्टमहासिद्धिभिः सम्पन्नमस्ति। हरेः करारविन्देषु शङ्खचक्रादय आयुधाः शोभन्ते। इत्थं स्वयोगमायया सृष्टानां विविधलोकानां व्यवस्थां सुरक्षितुं सः स्वलीलामयेन वपुषा कल्पान्तं यावत्सर्वत्र विराजते। लोकालोकान्तर्वर्तिनः भूभागस्य यावान् विस्तरोऽस्ति। तेनैव तस्यापरतो लोकप्रदेशपरिमाणस्य व्याख्या ज्ञेया। तदग्रे तु केवलं योगेश्वराणामेव सम्यक्तया गतिर्भवितुमर्हति। स्वर्गपृथिव्योरन्तराले यद् ब्रह्माण्ड-केन्द्रमस्ति तत्रैवास्ति सूर्यस्य स्थितिरिति। सूर्यब्रह्माण्डगोलकयोरन्तराले सर्वतः पञ्च-विंशतिकोटियोजना-नामन्तरं नास्ति। सूर्योऽस्मिन् मृतण्ड चेतने वैराजरूपेण विराजते, अस्मादेवास्य नाम मार्तण्डो वर्त्तते। एषा हिरण्मयी ज्योतिर्ब्रह्माण्डात् समजायतेऽतोऽमुं हिरण्यगर्भमपि कथयन्ति। सूर्येणैव दिगाकाशध्रुवलोकान्तरिक्षलोकभूर्लोकभुवर्लोक-स्वर्लोक-नरक-लोकरसातललोकानान्तथान्येषां समग्राणामपि भागानां विभागो भवति। सूर्य एव देवता-तिर्यङ्-मनुष्य-सरीसृप-लता-वृक्षादीनां समग्रजीवसमूहानामात्मा नेत्रेन्द्रियाधिष्ठातऽस्ति।

उपर्युक्ते प्रसङ्गे लोकालोकपर्वतयोः याथातथ्येन निरूपणादत्र लोकालोक प्रतिपादकं साङ्ख्यमस्तीति।

आकल्पमेवं वेषं गत एष भगवानात्मयोगमायया विरचित विविध-
लोकयात्रागोपीथायेत्यर्थः ॥

योऽन्तर्विस्तार एतेन ह्यलोकपरिमाणं च व्याख्यातं यद् बहिर्लोकालोका-
चलात्। ततः परस्ताद्योगेश्वरगतिं विशुद्धामुदाहरन्ति ॥

अण्डमध्यगतः सूर्यो द्यावाभूम्योर्यदन्तरम्।
सूर्याण्डगोलयोर्मध्ये कोट्यः स्युः पञ्चविंशतिः ॥

मृतेऽण्ड एष एतस्मिन् यदभूत्ततो मार्तण्ड इति व्यपदेशः।
हिरण्यगर्भ इति यद्धिरण्याण्ड समुद्भवः ॥

सूर्येण हि विभज्यन्ते दिशः खं द्यौर्मही भिदा।
स्वर्गापवर्गौ नरका रसौकांसि च सर्वशः ॥

देवतिर्यङ्मनुष्याणां सरीसृपसवीरूधाम्।
सर्वजीवनिकायानां सूर्य आत्मा दृगीश्वरः ॥

(स्क. ५, अ. २०, श्लो. ३९-४६)

(५८)

ऋतुविज्ञानप्रतिपादकं साङ्ख्यम्

श्रीमद्भागवतमहापुराणे पञ्चमे स्कन्धे द्वाविंशतितमेऽध्याये तृतीये खण्डे चन्द्रादिग्रहाणां स्थितिवर्णनप्रसङ्गे ऋतुविज्ञानप्रतिपादकं साङ्ख्यमस्ति[1]।

तद् यथा-वेदाः विद्वांसश्च यस्य गतिं ज्ञातुमुत्सहन्ते सः साक्षादादिपुरुषो भगवान्नारायणः स्वलोकानां कल्याणाय कर्मणां शुद्धये च स्ववेदमयं विग्रहङ्कालं द्वादशमासेषु विभज्य वसन्तादिषु षट्सु ऋतुषु तेषां यथायोग्यं गुणविभजनङ्करोति।

भगवान् स्वीयेन कालस्वरूपेण स्वयं वर्षस्य द्वादशभागान् मासाख्यान् षड्विभागानृतुसंज्ञाँश्च करोतीति प्रतिपादनादत्र ऋतुविज्ञानप्रतिपादकं साङ्ख्यमस्तीति स्वीक्रियते।

(५९)

षोडशकलपुरुषप्रतिपादकं साङ्ख्यम्

श्रीमद्भागवतमहापुराणे पञ्चमे स्कन्धे द्वाविंशतितमेऽध्याये नवमदशमयोः श्लोकयोः षोडशकलपुरुषप्रतिपादकं साङ्ख्यमस्ति[2]। तद् यथा—

---

१. स एष भगवानादिपुरुष एव साक्षान्नारायणो लोकानां स्वस्तय आत्मानं त्रयीमयं कर्मविशुद्धिनिमित्तं कविभिरपि च वेदेन विजिज्ञास्यमानो द्वादशधा विभज्य षट्सु वसन्तादिष्वृतुषु यथोपजोषमृतुगुणान् विदधाति॥
(स्क. ५, अ. २२, ख. ३,)

2. अथ चापूर्यमाणाभिश्च कलाभिरमराणां क्षीयमाणाभिश्च कलाभिः पितृणामहोरात्राणि पूर्वपक्षापरपक्षाभ्यां वितन्वानः सर्वजीवनिवहप्राणो जीवश्चैकमेकं नक्षत्रं त्रिंशता त्रिंशता मुहूर्त्तैर्भुङ्क्ते॥

य एष षोडशकलः पुरुषो भगवान् मनोमयोऽन्नमयोऽमृतमयो देवपितृमनुष्यभूतपशुपक्षीसरीसृपवीरुधां प्राणाप्यायनशीलत्वात्सर्वमय इति वर्णयन्ति॥
(स्क. ५, अ. 22, ख. ९-१०)

चन्द्रस्वरूपी कृष्णपक्षे क्षीयमाणाभिः कलाभिः पितृगणानां शुक्लपक्षे वर्धमानाभिर्कलाभिर्देवानामहोरात्राणि विभजते। त्रिंशत्रिंशन्मुहूर्त्तैष्वेकैकं नक्षत्रं लङ्घते। अन्नमयत्वादमृतमयत्वाच्च। असावेव समेषां जीवानाम्प्राणो जीवश्चास्ति। षोडशभिः कलाभिर्युक्तः मनोमयोऽन्नमयो अमृतमयः पुरुषस्वरूपी भगवान् चन्द्रोऽस्ति। चन्द्र एव देव-पितृ-नृ-भूत-पशु-पक्षि-सरीसृप-वृक्षादीनां समेषां प्राणीनां प्राणान् पुष्णाति। अतएवसर्वमय इत्यभिधीयते।

उपर्युक्ते प्रसङ्गे चन्द्रस्वरूपी भगवान् सर्वमयो पुरुषः षोडशकलः प्रतिपादितोऽस्ति। अतोऽत्र षोडशकलपुरुषवादि साङ्ख्यमस्तीति शम्।

(६०)

ग्रहचक्रविज्ञानप्रतिपादकं साङ्ख्यम्

श्रीमद्भागवतमहापुराणे पञ्चमे स्कन्धे त्रयोविंशतितमेध्याये प्रथम-खण्डतः सप्तमखण्डं यावद् ग्रहचक्रविज्ञानप्रतिपादकं साङ्ख्यमस्ति[1]।

तद् यथा—सप्तर्षिभ्यस्त्रयोदशलक्षयोजनोर्ध्वं ध्रुवलोकोऽस्ति। एतदेव भगवद् विष्णोः परमं पदमामनन्ति। तत्रभगवताम्परमभक्तः ध्रुवो विराजते, अग्निरिन्द्रो प्रजापतिः कश्यपो धर्मश्चैते सहैव सादरं ध्रुवं प्रदिक्षन्ते। साम्प्रतमपि कल्पान्तं स्थायिनो प्राणिनो ऽमुमेवाश्रयन्ते। अव्यक्तगतिना भगवता कालेन यद्—ग्रहनक्षत्रादयो ज्योतिर्गणाः निरन्तरं भ्राम्यन्ते। भगवान् ध्रुवलोकमेव तेषामाधारस्तम्भत्वेन नियोजयामास।

---

१. अथ तस्मापरतस्त्रयोदशलक्षयोजनान्तरतो यत्तद्विष्णोः परमं पदमभिवदन्ति यत्रह महाभागवतोध्रुव औत्तानपादिरग्निनेन्द्रेण प्रजापतिना कश्यपेन धर्मेण च समकालयुग्भिः सबहुमानं दक्षिणतः क्रियमाण इदानीमपि कल्पजीविनामाजीव्य उपास्ते तस्येहानु भाव उपवर्णितः।
स हि सर्वेषां ज्योतिर्गणानांग्रहनक्षत्रादीनामनिमिषेणात्यक्तरंहसा भगवता कालेन भ्राम्यमाणानां स्थाणुरिवावष्टम्भ ईश्वरेण विहितः शश्वदवभासते॥
यथा मेढीस्तम्भ आक्रमणपशवः संयोजितास्त्रिभिः त्रिभिःसवनैर्यथास्थानं मण्डलानि चरन्त्येवं भगणा ग्रहादय एतस्मिन्नन्तर्बहिर्योगेन कालचक्र आयोजिता

यथा पशवः रज्जुबद्धाः स्तम्भं परिभ्रमन्त्यन्ते च निष्कासयन्ति तथैव नक्षत्राणि-ग्रहाश्च बहिरन्तः क्रमेण कालचक्रबद्धाः ध्रुवलोकं समाश्रित्यैव वायोः प्रेरणया कल्पान्तं यावद् भ्रमन्ति । यथा मेघाः श्येनादयो पक्षिणश्च स्वकर्मणां साहाय्येन वाय्वाधीनाः गगने उड्डीयन्ते तथैव स्वकर्माण्यनुसृत्य परिभ्रमन्ति पृथिव्याञ्च न पतन्ति, ध्रुवमाश्रिताः ग्रहाः नक्षत्राणि च । केचन भगवद्योगमायामाश्रित्य स्थितं ज्योतिश्चक्रं शिशुमाररूपेण वर्णयन्ति । शिशुमारः कुण्डलीकृतोऽस्ति वदनमधोभिमुखस्ति । शिशुमारस्य पुच्छाग्रे ध्रुवस्तिष्ठति, पुच्छस्य मध्ये प्रजापति अग्निरिन्द्रः धर्मश्चेति सन्ति । पुच्छमूले धातृ-विधातारौ वर्त्तेते । कटिप्रदेशे सप्तर्षयो वर्तन्ते । अभिजितः समारभ्य पुनर्वसुंयावदुत्तरायणस्य चतुर्दशनक्षत्राणि शिशुमारस्य दक्षिणाग्रे सन्ति, पुष्यतः समारभ्य उत्तराषाढ़नक्षत्रं यावद्यानि—दक्षिणायननक्षत्राणि सन्ति तानि वामभागे वर्तन्ते । लोकेऽपि यदा शिशुमारः कुण्डलाकृतिमद् भवति । तदा तस्योभयांगयोः सङ्ख्या समा भवति, तथैवात्र नक्षत्रसङ्ख्यायामपि साम्यमस्ति । शिशुमारस्य पृष्ठेमू लपूर्वाषाढोत्तराषाढ़ा-

---

ध्रुवमेवावलम्ब्य वायुनोदीर्यमाणा आकल्पान्त परिचङ्क्रमन्ति नभसि यथा मेघाः श्येनादयो वायुवशाः कर्मसारथयः परिवर्तन्ते एवं ज्योतिर्गणाः प्रकृतिपुरुषसंयोगानुगृहीताः कर्मनिर्मितगतयो भुवि न पतन्ति ।

केचनैतज्ज्योतिरनीकं शिशुमारसंस्थानेन भगवतो वासुदेवस्य योगधारणायामनुवर्णयन्ति ।।४।। यस्य पुच्छाग्रेऽवाक्शिरसः कुण्डलीभूतदेहस्य ध्रुव उपकल्पितस्तस्य लाङ्गूले प्रजापतिरग्निरिन्द्रो धर्म इति पुच्छमूले धाता विधाता च कट्यां सप्तर्षयः । तस्य दक्षिणावर्तकुण्डलीभूतशरीरस्य तान्युदगयनानि दक्षिणपार्श्वे तु नक्षत्राण्युपकल्पयन्ति दक्षिणायनानि तु सव्ये । यथा शिशुमारस्य कुण्डलाभोगसंनिवेशस्य पार्श्वयोरुभयोरप्यवयवाः समसङ्ख्या भवन्ति । पृष्ठे त्वजवीथी आकाशगङ्गा चोदरतः ।।५।। पुनर्वसुपुष्यौ दक्षिणवामयोः श्रोण्योरार्द्राश्लेषे च दक्षिणवामयोः पश्चिमयोः पादयोरभिजिदुत्तराषाढ़े दक्षिणवामयोर्नासिकयोर्यथासङ्ख्यं श्रवणपूर्वाषाढ़े दक्षिणवामयोर्लोचनयोर्धनिष्ठा मूलं च दक्षिणवामयोः कर्णयोर्मघादीन्यष्टनक्षत्राणि दक्षिणायनानि वामपार्श्ववङ्क्रिषु युञ्जीत तथैव मृगशीर्षादीन्युदगयनानि दक्षिणपार्श्ववङ्क्रिषु प्रातिलोम्येन प्रयुञ्जीत शतभिषाज्येष्ठे स्कन्धयोर्दक्षिणवामयोर्न्यसेत् ।।६।। उत्तराहनावगस्तिरधराहनौ यमो मुखेषु चाङ्गारकः शनैश्चर उपस्थे बृहस्पतिः ककुदि वक्षस्यादित्यो हृदये नारायणो मनसि चन्द्रो, नाभ्यामुशना, स्तनयोरश्विनौ, बुधः प्राणापानयोः राहुर्गले केतवः सर्वाङ्गेषु । रोमसु सर्वे तारागणाः ।

(स्क० ५, अ० २३, श्लो० १-७)

ख्यानि नक्षात्राणि सन्ति, उदरे आकाशगङ्गा वर्त्तते। दक्षिणवामकटिपार्श्वयोः पुनर्वसु पुष्यनक्षत्रे स्तः, पश्चात् स्थितयोर्दक्षिणवामचरणयोरार्द्राश्लेषे, नासारन्ध्रयोरभिजि-दुत्तराषाढे, दक्षिणे वामे च कर्णे धनिष्ठामूलनक्षत्रे, मघादीनि दक्षिणायनस्याष्ट नक्षत्राणि वामपार्श्वे, विपरीतक्रमेण मृगशिरादीन्युत्तरायणस्याष्टनक्षत्राणि दक्षिण-पार्श्वे सन्ति। शतभिषाज्येष्ठे स्कन्धयोर्वर्त्तेते। उत्तराहनावगस्त्यरधोहनौ च यमः, मुखे मङ्गलः, लिङ्गे शनिः, गुदायां बृहस्पतिः, वक्षसि सूर्यः, हृदये नारायणः, मनसि चन्द्रः, नाभावङ्गारकः, स्तनयोरश्विनीकुमारौ, प्राणापानयोर्बुधः, कण्ठे राहुः, सर्वेष्वङ्गेषु केतुः, लोमसु च सर्वे तारागणाः स्थिताः सन्ति। एतद् भगवतः सर्वदेवमयं स्वरूपमस्ति।

उपर्युक्ते प्रसङ्गे सर्वाण्यपि नक्षत्राणि सर्वे ग्रहाश्च भगवद्रूपजाः सन्ति तथा नक्षत्राणां ग्रहाणां च स्थितिर्केन प्रकारेण वर्त्तत इति प्रतिपादनादत्र ग्रहचक्रवादि-साङ्ख्यमस्तीति।

(३३)

ईक्षया जगत्सृष्टिप्रतिपादकं साङ्ख्यम्

श्रीमद्भागवतमहापुराणे पञ्चविंशतितमेऽध्याये ऽष्टमश्लोकतस्त्रयोदशश्लोकं यावत् सङ्कर्षणदेवस्य संस्थितिवर्णनप्रसङ्गे समुदीरितमीक्षया जगत्सृष्टिप्रतिपादकं साङ्ख्यमस्ति[1]। तद् यथा—

---

१. य एष एवमनुश्रुतो ध्यायमानो मुमुक्षूणामनादिकालकर्मवासनाग्रथितम-विद्यामयं हृदयग्रन्थिं सत्त्वरजस्तमोमयमन्तर्हृदयं गत आशु निर्भिनत्ति तस्यानुभावान् भगवान् स्वायम्भुवो नारदः सह तुम्बुरुणा सभायां ब्रह्मणः संश्लोकयामास ॥

उत्पत्तिस्थितिलयहेतवोऽस्य कल्पाः,
सत्त्वाद्याः प्रकृतिगुणा यदीक्षयाऽऽसन्।
यद्रूपं ध्रुवमकृतं यदेकमात्मन्,
नानाधात्कथमु ह वेद तस्य वर्त्म ॥

भगवाननन्तः तस्य माहात्म्यश्रवणेन निदिध्यासनेन च मुमुक्षूणां स्वान्तेष्वाविर्भूय तेषामनादिकालीनया कर्मवासनया ग्रथितां सत्त्वरजस्तमोगुणात्मिकां विद्यामयीं हृदयग्रन्थीं तत्कलमुच्छिन्नत्ति । तस्य दर्शनेनैव जगदुत्पत्तिस्थितिप्रलयानां हेतुभूताः सत्त्वादयो-प्राकृताः गुणाः स्वस्वकार्येषु समर्था भवन्ति । यस्य स्वरूपं ध्रुवमनन्तमकृतमनादिमच्चास्ति तथा य एकलः सन्नपि नानात्मकं प्रपञ्चं स्वस्मिन् धारयति । एतादृशो भगवतः सङ्कर्षणस्य तत्त्वं तत्त्वतः को ज्ञातुमर्हति । यस्मिन्निदं कार्यकारणस्वरूपं जगद्भासते तथा स्वजनानां चेतांस्याकृष्टुं कृता शौर्यपूर्णा लीला परमपराक्रमवता-केशरिणादर्शत्वेनाङ्गीकृता । सः सङ्कर्षणो भगवान् कृपया विशुद्धं सत्त्वमयं स्वरूपं

मूर्ति नः पुरुकृपया बभार सत्त्वं,
संशुद्धं सदसदिदं विभाति तत्र ।
यल्लीलां मृगपतिराददेऽनवद्या—
मादातुं स्वजनमनांस्युदारवीर्यः ।।
यन्नामश्रुतमनुकीर्तयेदकस्मा—
दार्तो वा यदि पतितः प्रलम्भनाद् वा ।
हन्त्यंहः सपदि नृणामशेषमन्यं
कं शेषाद्भगवत आश्रयेन्मुमुक्षुः ।।
मूर्धन्यर्पितमणुवत्सहस्रमूर्ध्नो
भूगोलं सगिरिसरित्समुद्रसत्त्वम् ।
आनन्त्यादनिमितविक्रमस्य भूम्नः
को वीर्याण्यधिगणयेत्सहस्रजिह्वः ।।
एवं प्रभावो भगवाननन्तो,
दुरन्तवीर्योरुगुणानुभावः ।
मूले रसायाः स्थित आत्मतन्त्रो-
यो लीलया क्ष्मां स्थितये बिभर्ति ।।

(स्क. ५, अ. २५, ख. ८ श्लो. ९--१३,)

दधाति। स एव मुमुक्षूणामाश्रयः। तस्यैव शिरसि पर्वतनदीसमुद्रादिमद्भूमण्डलं रजसां कणिकामिव धारितमस्ति। सोऽस्त्यनन्तो एत एव तस्य पराक्रमाणाम् परिमाणं नास्ति। तस्य महिमानं सहस्रसङ्ख्याकाभिरपि जिह्वाभिः नार्हति कोऽपि वर्णितुम्। वस्तुतस्तस्य वीर्यातिशयिनः गुणाः प्रभावाश्च निःसीमानः सन्ति। सः स्वमहिम्नि-स्थितः स्वतन्त्रोऽस्ति। समग्राणामपि लोकानां स्थितये लीलयैव समग्रामपि पृथिवीं धारयति।

उपर्युक्तप्रसङ्गे भगवतामीक्षणेनैव सर्वा सृष्टिः सञ्जायत इति प्रतिपादनादत्र 'ईक्षया जगत्सृष्टिप्रतिपादकं साङ्ख्यमस्तीतिशम्।'

—०—

श्रीमद्भागवतमहापुराणे

षष्ठः स्कन्धः

(६२)

षोडशकलर्लिङ्गप्रतिपादकं साङ्ख्यम्

श्रीमद्भागवतमहापुराणे षष्ठे स्कन्धेप्रथमेऽध्याये ऽष्टचत्वारिंशत्तमश्लोकतः समारभ्य पञ्चपञ्चाशत्तमश्लोकं यावदजामिलोपाख्याने विष्णुना सह यमदूतानां वार्तालापे समागतं षोडशकललिङ्गप्रतिपादकं साङ्ख्यमस्ति[1]। तद् यथा—

भगवान् सर्वज्ञो यमः समेषामन्तःकरणेषु विराजते ऽतएव सः स्वमनसैव समेषां पूर्वरूपाणि समवलोकयति। सहैव भाविस्वरूपमपि विचारयति। यथा सुप्तोऽज्ञानी-पुरूषः स्वप्नवेलायां प्रतीयमानं कल्पितं शरीरमेव स्वीयं वास्तविकं शरीरं मनुते। सुप्तं जागृतं वा शरीरं विस्मरति तथैव जीवोऽपि स्वपूर्वजन्मस्मृतिं विस्मरति। वर्तमानशरीरातिरिक्तन्न किंचिदप्यवबुध्यते। जीवः स्वीयैः पञ्चभिर्कर्मेन्द्रियैरादानप्रदानगमनादीनि करोति। पञ्चभिर्ज्ञानेन्द्रियैः रूपरसादीननुभवति। षोडशेन मनसा सह सप्तदशः स्वयं सम्भूयैकल एव मनसः ज्ञानेन्द्रियाणा-

---

1. मनसैव पुरे देवः पूर्वरूपं विपश्यति।
अनुमीमांसतेऽपूर्वं मनसा भगवानजः॥
यथाज्ञस्तमसा युक्त उपास्ते व्यक्तमेव हि।
न वेद पूर्वमपरं नष्टजन्मस्मृतिस्तथा॥
पञ्चभिः कुरुते स्वार्थान् पञ्च वेदाथ पञ्चभिः।
एकस्तु षोडशेन त्रीन् स्वयं सप्तदशोऽश्नुते॥
तदेतत् षोडशकलं लिङ्गं शक्तित्रयं महत्।

ङ्कर्मेन्द्रियाणाञ्च विषयानुपभुङ्क्ते। जीवस्य एतत् षोडशकलं सत्त्वादित्रिगुणमयञ्च लिङ्ग शरीरमनादि वर्त्तते। एतदेव जीवं भूयोभूय: हर्षशोकभयपीड़ादिदात्रोः जन्म-निधनयो चक्रे पातयति। यो जीवो ज्ञानवशीभूतः कामक्रोधलोभमोहमदमत्सराख्येषु षड् शत्रुषु विजयं नाधिगच्छति, सो ऽनिच्छन्नपि विविव्रवासनाः समनुसृत्य नैकविधानि कर्माणि विदधाति। तादृश्यां स्थितौ सः कोशैयकीटमिव स्वात्मानं कर्मप्रपञ्चे बद्धं विदधाति। इत्थं स्वयमेव मोहवशगो भवति। कोऽपि शरीरी जीव: विना कर्मक्ष क्षणमपि स्थातुन्नार्हति। प्रत्येकस्य पुंसः भाविकाः गुणाः हठाद्विवशीकृत्य तेन कर्म-कारयन्ति। जीव: स्वपूर्व-जन्मनः पापपुण्यमयान् संस्कारानुसृत्य स्थूलसूक्ष्मे शरीरे प्राप्नोति। जीवस्य स्वाभाविक्यः प्रबलाश्च वासनाः कर्हिचित् मातृनिभं स्त्रीपुरूपं विदधति। प्रकृतिसंसर्गेणैव पुरुष: स्वात्मानं वस्तुस्वरूपशून्यं लिङ्गशरीरम्भनुते। एषः विपर्ययो भगवद्भजनेन शीघ्रमेव दूरीभवति।

उपर्युक्ते प्रसङ्गे जीवस्य षोडशकलामयता प्रतिपादिता तन्मुक्तिमार्गश्च प्रदर्शितः। लिङ्गशरीरस्य षोडशकलानां प्रतिपादनादत्र षोडशकलालिङ्गप्रतिपादकं साङ्ख्यमस्तीति।

धत्तेऽनुसंसृतिं पुंसि हर्षशोकभयार्तिदाम्॥

देह्यज्ञोऽजितषड्वर्गो नेच्छन्कर्माणि कार्यते।

कोशकार इवात्मानं कर्मणाऽऽच्छाद्य मुह्यति॥

न हि कश्चित् क्षणमपि जातु तिष्ठत्यकर्मकृत्।

कार्यते ह्यवशः कर्म गुणैः स्वाभाविकैर्बलात्॥

लब्ध्वा निमित्तमव्यक्तं व्यक्ताव्यक्तं भवत्युत।

यथा योनि यथा बीजं स्वभावेन बलीयसा॥

एष प्रकृतिसङ्गेन पुरुषस्य विपर्ययः।

आसीत् स एव न चिरादीशसङ्गाद्विलीयते॥

(स्क. ६ अ. १ श्लो. ४८—५५)

(६३)

विश्वसृग्गणकं साङ्ख्यम्

श्रीमद्भागवतमहापुराणे षष्ठे स्कन्धे तृतीयेऽध्याये द्वादशश्लोकतः सप्तदशश्लोकं यावद् यमदूतानां संवादे विश्वसृग्गणकं साङ्ख्यमस्ति[1] । तद् यथा—

मदतिरिक्तोऽन्यश्चराचरात्मकस्य जगतः स्वामी वर्त्तते, तस्मिन्नेव जगदिदं तन्तुषु वस्त्रमिवौतञ्च प्रौतञ्च वर्त्तते । तस्यैवांशाः ब्रह्मविष्णुमहेश्वराः जगतामुत्पत्ति-स्थितिलयान् विदधति । स एव सर्वं जगत्प्रोतं वृषभमिव स्वाधीनङ्करोति । यथा कृषकः स्ववृषभौ प्रथमं लघुरज्जौ बद्ध्वा पश्चात् तां रज्जुमेकस्यां बृहद्रज्जौ बध्नाति । तथैव जगदीश्वरो भगवानपि ब्राह्मणादिवर्णान् ब्रह्मचर्याद्याश्रमरूपात्मकासु लघु लघु नामरज्जुषु निर्बध्य पश्चात्सर्वाणि नामानि वेदवाणीरूपायां बृहद्रज्जौ बध्नाति एवं सर्वे जीवाः नामकर्मरूपात्मके बन्धने बद्धाः तमेव स्वीयं सर्वस्वं समर्पयन्ति । इन्द्रो, निर्ऋतिः, वरुणः, चन्द्रः, वह्निः, वायुः, शङ्करः, सूर्यः ब्रह्मा, द्वादशादित्या, विश्वेदेवाः,

---

१. परो मदन्यो जगतस्तस्थुषश्च,
ओतं प्रोतं पटवद्यत्र विश्वम् ।
यदंशतोऽस्य स्थितिजन्मनाशा
नस्योतवद् यस्य वशे च लोकः ।।
यो नामभि र्वाचि जनान्निजायां ।
बध्नाति तन्त्यामिव दामभिर्गाः ।
यस्मै बलिं त इमे नाम कर्म—
निबन्धबद्धाश्चकिता वहन्ति ।।
अहं महेन्द्रो निर्ऋतिः प्रचेताः,
सोमोऽग्निरीशः पवनोऽर्को विरिञ्चः ।

अष्टौ वसवः, साध्याः, एकोनपञ्चाशन्मरूद्गणाः, सिद्धाः, एकादशरूद्राः, रजोगुणतमोगुणाभ्यां रहिताः भृग्वादयो प्रजापतयः, महान्तो महान्तः देवाः, सर्वेंहसत्त्वप्रधानाः सन्तोऽपि तस्य मायाधीनाः वर्त्तन्ते। भगवान् कदा किङ् केन प्रकारेण चिकीर्षतीति ते न जानन्ति, तर्ह्यन्येषां तु का कथा। यथा घटपटादयो रूपवन्तः पदार्थाः स्वप्रकाशकं नेत्रमवलोकितुन्न शक्नुवन्ति। तथैवान्तःकरणे साक्षिरूपेण स्थितं परमात्मानं कोऽपि प्राणी, इन्द्रिय-मन-प्राण-हृदय-वागादिना केनापि साधनेन ज्ञातुन्नैव न शक्नोति। सः प्रभुः सर्वेषां स्वामी परमस्वतन्त्रश्चास्ति। तस्य दूताः तमिव परममनोहररूपगुण स्वभावैः युक्ताः लोकेऽमुष्मिन् प्रायशो विचरन्ति।

उपयुक्ते प्रसङ्गे विश्वसृजां प्रभोः वैशिष्ट्यं प्रतिपादयद्भिर्विश्वसृग्गणना कृतेति विश्वसृग्गणकं साङ्ख्यमस्तीति।

आदित्यविश्वे वसवोऽथ साध्या—
मरुद्गणा रुद्रगणाः ससिद्धाः।।
अन्ये च ये विश्वसृजोऽमरेशा,
भृग्वादयोऽस्पृष्टरजस्तमस्काः।
यस्येहितं न विदुः स्पृष्टमायाः,
सत्त्वप्रधाना अपि किं ततोऽन्ये।।
यं वै न गोभिर्मनसासुभिर्वा
हृदा गिरा वासुभुतो विचक्षते।
आत्मानमन्तर्हृदि सन्तमात्मनां
चक्षुर्यं थैवाकृतयस्ततः परम्।।
तस्यात्मतन्त्रस्य हरेरधीशितुः
परस्य मायाधिपतेर्महात्मनः।।
प्रायेण दूता इत वै मनोहरा
श्चरन्ति तद्रूपगुणस्वभावाः।।
(स्क. ६ अ. ३ श्लो. १२—१७)

(६४)

देहास्वादिनानातत्त्वप्रतिपादकं साङ्ख्यम्

श्रीमद्भागवतमहापुराणे षष्ठे स्कन्धे चतुर्थेऽध्याये त्रयोविंशतितमश्लोकतः श्चतुस्त्रिंशच्छ्लोकं यावद् देहास्वादिनानातत्त्वप्रतिपादकं साङ्ख्यं हंसगुह्यदिस्तोत्रे दक्षप्रजापतिना प्रतिपादितमस्ति[२] । तद् यथा—

---

२. नमः परायावितथानुभूतये
गुणत्रयाभास निमित्तबन्धवे ।
अदृष्टधाम्ने गुणतत्त्वबुद्धिभि—
र्निवृत्तमानाय दधे स्वयम्भुवे ।।
न यस्य सख्यं पुरुषोऽवैति सख्युः,
सखा वसन् संवसतः पुरेऽस्मिन् ।
गुणो यथा गुणिनो व्यक्तदृष्टे—
देहोऽसवोऽक्षा मनवो भूतमात्रा
नात्मानमन्यं च विदुः परंयत् ।
सर्वं पुमान् वेद गुणांश्च तज्ज्ञो
न वेद सर्वज्ञमनन्तमीडे ।।
यदोपरामो मनसो नामरूप—
रूपस्य दृष्टस्मृतिसम्प्रमोषात् ।
य ईयते केवलया स्वसंस्थया,
हंसाय तस्मै शुचिसद्मने नमः ।।
मनीषिणो ऽन्तर्हृदि संनिवेशितं,
स्वशक्तिभिर्नवभिश्च त्रिवृद्भिः ।
वह्निं यथा दारुणि पाञ्चदश्यं
मनीषया निष्कर्षन्ति गूढम् ।।
स वै ममाशेषविशेषमाया
निषेध निर्वाण सुखानुभूतिः

भगवदनुभूतिर्भगवच्चिच्छक्तिश्चामोघे स्तः। भगवान् जीवात् प्रकृतेश्च परः तुर्यो नियन्ता सर्वथा स्फूर्तिदायकश्च वर्त्तते, ये जीवास्त्रिगुणमयीं सृष्टिमेव वस्तुस्वरूपेण सत्यामेव मन्वते, ते भगवत्स्वरूपं साक्षात्कर्तुन्न प्रभवन्ति। यतः भगवदवधि प्रमापकं किमपि प्रमाणं न भवति। भगवतो ऽवधिः सीमा च नास्ति। सः स्वयंप्रकाशः परात्परश्च वर्त्तते। जीवेश्वरौ परस्परं सखायौ वर्त्तते। तथा अस्मिन्नेव देह एकत्रैव वसतः, परन्तु जीवः सर्वशक्तिमतः सख्यभावं न जानाति, यथा रूपरसगन्धादयो विषयाः स्वप्रकाशकानि नेत्रघ्राणादीनीन्द्रियाणि तेषां वृत्तीश्च नावगच्छन्ति। यतो भगवान् जीवजगतोः द्रष्टास्ति न तु दृश्यः। देहेन्द्रियप्राणान्तः-करणवृत्तयः पञ्चमहाभूतानि तेषां तन्मात्राणि चेति जडत्वात्सात्मानं स्वातिरिक्तं वा नावगच्छन्ति। जीव एतान् एतेषां कारणभूतान् सत्त्वरजस्तमोगुणांश्चापि जानाति। परं स दृश्यरूपेण च भगवन्तं ज्ञातुं नार्हति, यथा भगवानेव सर्वेषां ज्ञातानन्तश्च वर्त्तते। यदा समाधौ प्रमाण-विकल्प-विपर्यय रूपविविधज्ञानादीनां स्मरणशक्तेश्च लोपे नामरूपात्मकस्य जगतः निरूपकं मनः उपारमते। तदा मनो विनापि केवलं सच्चिदा-नन्दमयस्वस्वरूपस्थित्या भगवान् प्रकाशते। भगवान् शुद्धोऽस्ति शुद्धं हृदयमन्दिरमेव च तस्य वासभूः। तथा याज्ञिकाः काष्ठस्थितमग्निं सामित्रेनीति पंचदशमन्त्रैः प्रकटीकुर्वन्ति तथैव ज्ञानिनः पुरुषाश्चापि स्वसप्तविंशतिशक्तिषु गूढ़रूपेण स्थितं भगवन्तं स्वशुद्धबुद्ध्या स्वान्ते समुपलभन्ते। जगति यावद् वार्धक्यमवलोक्यते तन्माया कृतमेवास्ति।

ससर्वनामा स च विश्वरूपः,
प्रसीदतामनिरूक्तात्मशक्तिः॥
यद् यन्निरुक्तं वचसा निरूपितं,
धियाक्षभिर्वा मनसा वोत यस्य।
मा भूत् स्वरूपं गुणरूपं हि तत्तत्,
स वै गुणापाय विसर्गलक्षणः॥
यस्मिन् यतो येन च यस्य यस्मै,
यद् यो यथा कुरुते कार्यते च।
परावरेषां परमं प्राक् प्रसिद्धं,
तद् ब्रह्म तद्धेतुरनन्यदेकस्॥
यच्छक्तयो वदतां वादिनां वै,

मायायाः निषेधे केवलं परममुखस्य साक्षात्कारस्वरूपी परमात्मैवावतिष्ठते। विचारणायां भगवत्स्वरूये मायोपलब्धिः निर्वक्तुं न शक्यते। अर्थादियं मायाऽपि भगवत्स्वरूपिण्येवास्ति, अतः सर्वाणि नामानि रूपाणि च भगवत एव सन्ति। युद्वाचा समुदीर्यते, मनसा, बुद्ध्येन्द्रियैश्च गृह्यते, स भगवान् तु गुणानामुत्पत्तेः प्रलयस्य चाधिष्ठानमस्ति। भगवति तेषां केवलं प्रतीतिर्भवति। भगवत्येवेदं सर्वं जगत्स्थितमस्ति। भगवत एव निःसृतं भगवतैव निर्मितं भगवत्यपलीयते। रूपाणां घटकः रूपवाँश्च भगवान् एव वर्त्तते। अर्थात् सः स्वयमेव स्वात्मानं नैकधा सृजति। कार्यकारणयोरभेदावस्थायामपि स्वयं सितस्वरूपेण भगवान् एव विराजते स्म। अतः भगवान् एव समेषामपि कारणमस्ति। जीवजगतां भेदात् स्वगतभेदाच्च पृथगेकोऽद्वितीयोऽस्ति। भगवत एव शक्तयो वादिप्रतिवादीनां विवादसंवादयोरैकमत्यस्य विषया भवन्ति। भूयो भूयश्च तान्मोहयन्तीव। भगवानन्तो प्राकृतैः कल्याणै गुणगणैश्च युक्तः स्वयमनन्तश्चास्ति। उपासकास्तं हस्तपादादियुक्तं साकारकमुपासन्ते। साङ्ख्यवादिनश्च हस्तपादादिरहितं निराकारकं मन्वते। यद्यपि परस्परं विरुद्धास्ति मान्यता परं

विवादसंवादभुवो भवन्ति।
कुर्वन्ति चैषां मुहुरात्ममोहं।
तस्मै नमोऽनन्तगुणाय भूम्ने॥
अस्तीति नास्तीति च वस्तुनिष्ठयो—
रेकस्थवोर्भिन्नविरुद्धधर्मयोः॥
अवेक्षितं किञ्चन योगसाङ्ख्ययोः।
समं परं ह्यनुकूलं बृहत् तत्॥
योऽनुग्रहार्थं भजतां पादमूलम्।
अनामरूपो भगवाननन्तः॥
नामानि रूपाणि च जन्मकर्मभिः।
भेजे स मह्यं परमः प्रसीदतु॥
यः प्राकृतैर्ज्ञानपथैर्जनानां।
तथाशयं देहगतो विभाति।
यथानिलः पार्थिवमाश्रितो गुणं॥
स ईश्वरो मे कुरूतान्मनोरथम्॥

(स्क. ६ अ. ४ श्लो. २३—३४)

तत्त्व तस्तस्यैकस्यैवाद्वितीयस्य ब्रह्मण एवोपासनास्ति उभयोरपि। आधारं विना हस्त-पादादीनां स्थिति नैव सम्भाव्यते। निषेधस्यापि च काप्यवधिर्भवत्येव, भगवानाधारभूतो निषेधस्य चावधिरस्ति। अतएव साकारकत्वनिराकारकत्वयोरुभयोरप्यविशुद्धयोः समं परमं ब्रह्मास्ति। भगवान् प्राकृतोऽनन्तश्चाऽस्ति। तस्य नामरूपाणि न सन्ति, तथा ये ध्यायन्ति भजन्ति च तेष्वनुग्रहार्थं नैकविधरूपेषु प्रकटीभूय नैकविधाः लीलाः विदधाति। तत्र रूपलीलाश्चापि विदधाति तथा रूपलीलाः समाश्रित्यानेकविधानि नामानि धारयति। लोकानामुपासकानाञ्च भावनाः प्रायः सामान्या भवति, अतएव भगवान् तेषामन्तःस्थस्तस्य-तस्य भावनां समाश्रित्य पृथक्पृथग्देवरूपेण प्रतीयते। यथा वातः गन्धमाश्रित्य सुगन्धिमान् प्रतीयते परं वस्तुतो वातः स्वयं न सौगन्ध्यवान् नैव भवति। तथैव भगवान् सर्वेषां भावनाः समनुसरति। तथा तथा च प्रतीयते, परं न तस्य पारमार्थिकरूपेण तत्स्वरूपं वर्त्तते।

उपर्युक्ते प्रसङ्गे देहास्वादिनां नानात्वं प्रतिपादितमस्तीति वक्तुं शक्यते यदत्र देहास्वादिनानातत्वप्रतिपादकं साङ्ख्यमस्तीति।

(६५)

ब्रह्मादिभगवद्विभूतिवर्णनकृत् साङ्ख्यम्

श्रीमद्भागवते महापुराणे षष्ठे स्कन्धे चतुर्थेऽध्याये पञ्चचत्वारिंशत्तम श्लोकतः समारभ्य पञ्चाशत्तमं श्लोकं यावत् हंसगुह्यस्तोत्रे प्रसन्नेन भगवता दक्ष-प्रजापतिम्प्रति प्रतिपादितं ब्रह्मादिभगवद्विभूतिवर्णनकृत् साङ्ख्यमस्ति[1]।

---

१. ब्रह्मा भवो भवन्तश्च मनवो विबुधेश्वरा।
विभूतयो मम ह्येता भूतानां भूतिहेतवः।
तपो मे हृदयं ब्रह्मंस्तनुर्विद्या क्रियाऽऽकृतिः।
अङ्गानि ऋतवो जाता धर्म आत्मसवः सुराः॥
अहमेवासमेवाग्रे नान्यत् किं चान्तरं बहिः।
संज्ञानमात्रमव्यक्तं प्रसुप्तमिव विश्वतः॥
मय्यनन्तगुणेऽनन्ते गुणतो गुणविग्रहः।
यदाऽऽसीत्तत एवाद्यः स्वयम्भूः समभूदजः॥
स वै यथा महादेवो मम वीर्योपबृंहितः।

तदित्थम् ब्रह्मा शङ्कर प्रजापतिस्वाम्भुवादिमनवः इन्द्रादयो देवेश्वराश्च भगवतो विभूतयो वर्त्तन्ते। समेषां प्राणिनां चाभिवृद्धिकर्तारः सन्ति। तपः भगवतां हृदयं, विद्या शरीरं, कर्माण्याकृतिः, यज्ञारङ्गानि, धर्मो मनः, देवाश्च प्राणाः सन्ति। यदैषां सृष्टिर्नासीत्, तदा केवलं परमात्मैवासीन्निष्क्रियरूपेण स्थितः। बहिरन्तश्च किमप्यन्यन्नासीत् द्रष्टादृश्यरूपयोर्पृथक्केवलं ज्ञानस्वरूपमक्तम सीत्। अनन्तगुणानामाधारः भगवाननन्तो वर्त्तते। यदा गुणमय्याः मायायाः क्षोभादेतद्ब्रह्माण्डशरीरं प्रादुरभूत्तदास्मिन्नाऽदिपुरुषोऽयोनिजो ब्रह्मा स्त्रष्टुमुपक्रमे। यदा भगवान् शक्तिं चेतनाञ्च सञ्चारयामास, तदा देवमूर्धन्यो ब्रह्मा प्रादुर्बभूव। यदा सः स्वात्मानं सृष्टिकर्मण्यसमर्थममन्यत, तदा भगवान् तमादिदेश तपस्कुरू, तदनन्तरं ब्रह्मा भीषणं तपश्चचार तत्प्रभावेणच सर्वतः प्राक् नव प्रजापतीन् ससर्ज।

उपयुक्ते प्रसङ्गे ब्रह्मादीनां भगवद्विभूतित्वेन वर्णितत्वादत्र ब्रह्मादिभगवद् विभूतिवर्णनकृत् साङ्ख्यमस्तीति निश्चितम्।

(६६)

कर्मासद्वादि साङ्ख्यम्

श्रीमद्भागवतमहापुराणे षष्ठे स्कन्धे पञ्चमेऽध्याय एकादशश्लोकतो विंश-

---

मेने खिलमिवात्मानमुद्यतः सर्गकर्मणि॥
अथ तेऽभिहितो देवस्तपोऽतप्यत दारुणम्।
नवविश्वसृजो युष्मान् येनादावसृजद्विभुः।
एषा पञ्चजनस्याङ्ग दुहिता वै प्रजापतेः।
असिक्नी नाम पत्नीत्वे प्रजेश प्रतिगृह्यताम्॥
मिथुनव्यवायधर्मस्त्वं प्रजासर्गमिमं पुनः।
त्वत्तोऽधस्तात् प्रजाः सर्वा मिथुनीभूय मायया।
मदीयया भविष्यन्ति हरिष्यन्ति च मेबलिम्॥

(स्क. ६ अ- ४ श्लो. ४५—५३)

तितमश्लोकं यावन् नारदोपदेशमनुसृत्य दक्षप्रजापतेः पुत्रैः क्रियमाणे विमर्शे "कर्मासद्वादि साङ्ख्यम्" प्रतिपादितमस्ति[1]। तदित्थम्—

एतदस्ति लिङ्गशरीरं यत्साधारणतया जीवशब्देन व्यवहरन्ति, एतदेव पृथिव्यस्ति, एतदेव चाऽऽत्मनोऽनादिबन्धनभूतमस्ति। अस्यान्तमनवलोक्य मोक्षे ऽनुपयोगिषु कर्मसु व्यापृतिः व्यर्थीभूताऽस्ति। ईश्वरः केवलमस्ति, सः जाग्रदादिभ्यस्तिसृभ्यो ऽवस्थाभ्यः तासामभिमानिभ्यश्च पृथग्भूतस्तासां साक्षीभूतस्तुरीयोऽस्ति। भगवान् समेषामाश्रयोऽस्ति परं स न कमप्याश्रयते। प्रकृत्यादिभ्योऽतिरिक्तं नित्यमुक्तं परमात्मानमवलोक्य भगवते समर्पितैः कर्मभिः जीवस्य बन्धो नैव भवति। यथा मानवः बिलस्वरूपिणि पाताले प्रविश्य ततः परावर्तितुं नैव शक्नोति। तथैव जीवो यमधिगत्य भूयः संसृतिन्न परावर्तते। यः स्वयमन्तर्ज्योतिः स्वरूपोऽस्ति तम्परमात्मानमविज्ञाय नश्वराणां स्वर्गादिलोकफलदानां कर्मणाङ् करणेन कः लाभः। एषां बुद्धिरेव बहुरूपिणी सत्त्वरजस्तमसां धारिणी व्यभिचारिणींस्त्रियमिवास्ति। जीवने ऽमुष्मिनस्यारन्तमविज्ञाय विवेकञ्चानधिगत्याशान्त्यभिवर्धकानाङ् कर्मणामाचरणस्य नास्ति किमपि प्रयोजनम्। बुद्धिसङ्गादेव जीवरूपस्य पुरुषस्यैश्वर्यं स्वातन्त्र्यञ्च विनष्टम्। बुद्धेरन्तेवासी जीवः कुलटापतिमिव न जाने कुत्र कुत्र भ्रमति। अस्य नैकविधाः गतीरविज्ञायैव क्रियमाणैर्विवेशून्यैर्कर्मभिर्न काऽपि सिद्धिः समधिगंस्यते। मायैव उभयतोवाहिनी सरिदस्ति सैवेह सृष्टिप्रलयौ करोति। ये जनाः अस्याः निःसर्तुमेव तपस्याविद्यादीन् तदा नाश्रयन्ते।

---

१. भूः क्षेत्रं जीवसंज्ञं यदनादि निजबन्धनम्।
अदृष्ट्वा तस्य निर्वाणं किमसत्कर्मभिर्भवेत्॥
एक एवेश्वरस्तुर्यो भगवान् स्वाश्रयः परः।
तमदृष्ट्वाभवं पुंसः किमसत्कर्मभिर्भवेत्॥
पुमान् नैवैति यद्गत्वा बिलस्वर्गं गतो यथा।
प्रत्यग्धामाविद इह किमसत्कर्मभिर्भवेत्॥
नानारूपात्मनो बुद्धिः स्वैरिणीव गुणान्विता।
तन्निष्ठामगतस्येह किमसत्कर्मभिर्भवेत्॥

तानवरोद्धुं क्रोधाहङ्कारादिरूपेषु सा भूयोऽपि वेगेन वहति । यः पुरुषः तस्याः वेगेन विवशीभूतोऽनभिज्ञश्चास्ति, सोऽत्र मायिकैर्कर्मभिर्नैवलप्स्यते किमपि । पंचविंशतितत्त्वान्येवेकमद्भुतं सदनं सन्ति । पुरुषस्तेषामाश्रयमयआश्रयोऽस्ति । स एवाखिलकार्यकारणात्मकस्य जगतोधिष्ठातावर्तते । एतदविज्ञाय वस्तुस्वातन्त्र्यमनधिगत्यावस्तुस्वातन्त्र्येण क्रियमाणानि कर्माणि व्यर्थीभूतान्येव सन्ति । भगवत्स्वरूपावबोधकं शास्त्रमिह हंसमिव नीरक्षीरविवेकमदस्ति । तच्छास्त्रं मोक्षबन्धने जड़चेतने च पृथक्-पृथक्कृत्य दर्शयति । एतादृगध्यात्मशास्त्रस्याश्रयं विहाय बहिर्मुखैर्कर्मभिर्न कोऽपि लाभः । कालचक्रमनवरतं भ्रमति । सर्वञ्जगदाकर्षति नास्याऽस्ति कोऽपि रोधकः । परं स्वतन्त्रमस्तिाएतदविज्ञाय कर्मफलानि नित्यानीति मन्यमानाः ये जनाः सकामभावेन कर्माण्यनुतिष्ठन्ति, तेऽनित्यैर्कर्मभिकिम्प्राप्स्यन्ते[1] न किमपीत्यर्थ । शास्त्रादेव द्वितीया जनिर्भवति । शास्त्रस्यादेशश्च कर्मनिवृत्तिस्वरूपी वर्त्तते । नैतज्जानन् पुरुषो गुणमयेषु शब्दादिषु विषयेषु विश्वसिति ।

उपर्युक्ते प्रसङ्गे आसक्तिमत्कर्मणाञ्ज्ञानपूर्वकङ् क्रियमाणानाङ् कर्मणाञ्चास्प्तवम्प्रतिपादितमिति वक्तुं शक्यते यदत्र कर्मासद्वादि साङ्ख्यमस्तीति ।

---

१. तत्संगभ्रंशितैश्वर्यं संसरन्तं कुभार्यवत् ।
तद्गतीरबुधस्येह किमसत्कर्मभिर्भवेत् ।।
सृष्ट्यप्ययकरीं मायां वेलाकूलान्तवेगिताम् ।
मत्तस्य तामविज्ञस्य किमसत्कर्मभिर्भवेत् ।।
पञ्चविंशतित्त्वानां पुरुषोऽद्भुतदर्पणम् ।
अध्यात्ममबुधस्येह किमसत्कर्मभिर्भवेत् ।।
ऐश्वरं शास्त्रमुत्सृज्य बन्धमोक्षानुदर्शनम् ।
विविक्तपदमज्ञाय किमसत्कर्मभिर्भवेत् ।
कालचक्रं भ्रमिस्तीक्ष्णं सर्वं निष्कर्षयज्जगत् ।
स्वतन्त्रमबुधस्येह किमसत्कर्मभिर्भवेत् ।।
शास्त्रस्य पितुरादेशं यो न वेद निवर्त्तकम् ।
कथं तदनुरूपाय गुणविश्रम्भ्युपक्रमेत् ।।
(स्क. ६, अ. ५ श्लो. ११-२०)

(६७)

विकल्पवितर्कादिप्रमाणनिरूपकं साङ्ख्यम्

श्रीमद्भागवतमहापुराणे षष्ठे स्कन्धे नवमेऽध्याये त्रयस्त्रिंशत्तमश्लोकतः समारभ्य पञ्चचत्वारिंशत्तमश्लोकं यावद् वृत्रस्योत्पत्तौ देवकृतायां भगवतस्तुतौ विकल्पवितर्कादिप्रमाणनिरूपकं साङ्ख्यमस्ति[1]। तच्चेत्थम्—

भगवान् नारायणो वासुदेव आदिपुरुषो महापुरुषो वर्त्तते। तस्य महिमा निःसीमोऽस्ति। सोऽत्र परममङ्गलमयः परमकल्याणस्वरूपी परमदयालुश्चास्ति। स एव सर्वजगतामाधारोऽद्वितीयो जगत्स्वामी, सर्वेश्वरः सर्वसौन्दर्य मृदुलताधिष्ठातृदेव्या श्रियः परमप्रियोऽस्ति। परमहंसपरिव्राजकादयो विरक्ताः महात्मानो यदा आत्मसंयमरूपेप रमसमाधौ तं ध्यायन्ति, तदा तेषां शुद्धे स्वान्ते परमहंसात्मनो वस्तुधर्मस्य भगवद्भजनस्य चोदयो भवति। एतेन तेषां स्वान्तस्थाः ह्यज्ञानकपाटाः समुद्घाट्यन्ते। तेषामात्मालोके भगवानात्मानन्दरूपेण विना केनाप्यावरणेन प्रकटीभवति। भगवान् विना

---

१. ॐनमस्तेऽस्तु भगवन्नारायण वासुदेवादिपुरुष महापुरुष महानुभाव परममङ्गल परमकल्याण परमकारुणिक केवल जगदाधार लोकैकनाथ सर्वेश्वर लक्ष्मीनाथ परमहंसपरिव्राजकैः परमेणात्मयोगसमाधिना परिभावितपरिस्फुटपारमहंस्यधर्मेणोद्घाटिततमःकपाटद्वारे चित्तेऽपावृत आत्मलोके स्वयमुपलब्धनिजसुखानुभवो भवान्॥

दुरवबोध इव तवायं विहारयोगो यदशरणोऽशरीर इदमनवेक्षितास्मत्समवाय आत्मनैवाविक्रियमाणेन सगुणमगुणः सृजसि पासि हरसि॥

अथ तत्र भवान् किं देवदत्तवदिहगुणविसर्गपतितः पारतन्त्र्येण स्वकृतकुशलाकुशलं फलमुपाददत्याहोस्विदात्माराम उपशमशीलः समञ्जसदर्शन उदास्त इति ह वाव न विदामः॥

न हि विरोध उभयं भगवत्यपरिगणितगुणगणे ईश्वरेऽनवगाह्यमाहात्म्येऽर्वाचीन विकल्पवितर्कविचारप्रमाणाभासकुतर्कशास्त्रकलिलान्तः करणाश्रय-

केनाप्याश्रयेण प्राकृतशरीरेण वा सहयोगमनपेक्ष्यैव निर्गुणो: निराकार: सन्नपि स्वयमेव सगुणस्य जगत: सृजनपालनसंहरणानि करोति। सम्यक्तया ज्ञातुं न शक्यते यद् सृष्टौ भगवानेव देवदत्तादिव्यक्तिमिव गुणानुकार्यरूपे जगति प्रादुर्भवति। कर्माधीनत्वं वाऽधिगत्य स्वशुभाशुभकर्मफलानि भुङ्क्ते। आत्माराम: शान्तस्वभाव: सर्वोदासीन: साक्षिमात्रेण च तिष्ठति। सर्वत्र च दृष्टिसाम्यं रक्षति। भगवत्युभे विरुद्धेऽपि वस्तुनी तिष्ठत। भगवद्गुणारसंख्येया:, महिमा चानवगाह्योऽस्ति। सोऽस्ति सर्वशक्तिमान्। आधुनिका: नैकविधविकल्पवितर्कविचारमिथ्याप्रमाणकरणकुतर्कपूर्णानि शास्त्राण्यधीत्य स्वस्वान्तं दूषयन्ति, अतएव ते दुराग्रहिणो भवन्ति। भगवति तेषां वाद-विवादायावसरोऽपि नास्ति। भगवतो वास्तविकं स्वरूपं समग्रमायामयपदार्थै: परं केवलमस्ति। यदा तस्मिन्नेव स्वां मायां तिरस्करोति, तदैतादृशी का वार्ता या तस्मिन् न सम्भाव्यते। अतएव भगवान् जनसाधारणमिव कर्त्ता भोक्ताऽपि भवितुमर्हति, महापुरुषानिवोदासीनोऽपिच। कारणमस्ति सोऽयमततु तस्मिन् भगवति कर्तृत्वमस्ति न चाकर्तृत्वमेव। उभाभ्यां विलक्षणोऽनिर्वचनीयश्चास्ति। यथा एकमेव रज्जुशकलं भ्रान्तपुरुषेभ्य: सर्पमालादीनां रूपेण प्रतीयते, परं ज्ञाता रज्जुरूपेण जानाति, तथैव भगवान्नपि भ्रान्तेभ्य: कर्त्ता-भोक्ताऽऽदिषु नैकरूपेषु प्रतीयते। ज्ञानी च सच्चिदानन्दस्य रूपेण समवलोकयते। भगवान् सर्वेषामपि बुद्धिमनुसरति। वस्तुत्वरूपेण सर्वेष्वपि वस्तुषु विराजते, सर्वेषां स्वामी वर्त्तते। समग्रजगताङ् कारणभूतानां ब्रह्माप्रकृत्यादीनामपि कारणमस्ति।

दुरवग्रहवादिनां विवादानवसर उपरतसमस्तमायामये केवल एव आत्ममायामन्तर्धाय को न्वर्थो दुर्घट इव भवति स्वरूपद्वयाभावात् ॥

समविषममतीनां मतमनुसरसि यथा रज्जुखण्ड: सर्पादिधियाम् ॥

स एव हि पुन: सर्ववस्तुनि वस्तुस्वरूप: सर्वेश्वर: सकलजगत्कारणभूत: सर्वप्रत्यगात्मत्वात् सर्वगुणाभासोपलक्षित एक एव पर्यवशेषित: ॥

अथ ह वाव तव महिमामृतरससमुद्रविप्रुषा सकृदवलीढया स्वमनसि निष्यन्दमानानवरतसुखेन विस्मारितदृष्टश्रुतविषयसुखलेशाभासा: परमभागवता एकान्तिनो भगवति सर्वभूतप्रियसुहृदि सर्वात्मनि नितरां निरन्तरं निर्वृतमनस: कथमु ह वा एते मधुमथन पुन: स्वार्थकुशला ह्यात्मप्रियसुहृद: साधवस्त्वच्चरणाम्बुजानुसेवां विसृजन्ति न यत्र पुनरयं संसारपर्यावर्त: ॥

भगवान् सर्वेषामन्तर्याम्यन्तरात्मा चास्ति। अतः जगत्यामनन्ताः गुणदोषाः प्रतीयन्ते, तेषां प्रतीतयः स्वाधिष्ठानत्वेन भगवन्तमेव सङ्केतयन्ति। श्रुतयोऽपि समस्तपदार्थान्निषिध्य चरमे निषेधावधिरूपेण भगवन्तमेव शेषयन्ति। भगवतामनन्तो महिमा रसस्यानन्तः पयोधि वर्त्तते। पाथोधेरस्य शीकरस्य निषेवणेनापि स्वान्ते नित्यं नैरन्तर्येण परमानन्दधारा प्रवहति, तस्मादेव जगति विषयभोगाणां यावन्तो लेशमात्राणां प्रतीतिमात्राणाञ्च सुखानामनुभूति र्भवति सानुभूतिः परमानन्दप्राप्तौ तु न सुखलेशमपीति प्रतीयते। परमानन्दप्राप्तौ जननमृत्यूरपगच्छतः। त्रिलोक्यारात्मा तदाश्रयश्च भगवानेव वर्त्तते। स एव त्रयाणामपि लोकानां सञ्चालको वर्त्तते। नात्र किमपि सङ्दिग्धं यद् दैत्यदानवासुराश्चापि भगवद् विभूतय एव सन्ति। तथापि समयो

त्रिभुवनात्मभवन त्रिविक्रम त्रिनयन त्रिलोकमनोहरानुभाव तवैव विभूतयो दितिजदनुजादयश्चापि तेषामनुपक्रमसमयोऽयमिति स्वात्ममायया सुरनरमृगमिश्रित जलचराकृतिभिर्यथापराधं दण्डं दण्डधर दधर्थ एवमेनमपि भगवञ्जहि त्वाष्ट्रमुत यदि मन्यसे ।।

अस्माकं तावकानां तवनतानां तत ततामह तव चरणनलिनयुगलध्यानानुबद्धहृदयनिगडानां स्वलिङ्गविवरणेनात्मसात्कृतानामनुकम्पानुरञ्जितविशदरुचिरशिशिरस्मितावलोकेन विगलितमधुरमुखरसामृतकलया चान्तस्तापमनघार्हसि शमयितुम् ।।

अथ भगवंस्तवास्माभिरखिलजगदुत्पत्तिस्थितिलयनिमित्तायमानदिव्यमायाविनोदस्य सकलजीवनिकायानामन्तर्हृदयेषु बहिरपि च ब्रह्मप्रत्यगात्मस्वरूपेण प्रधानरूपेण च यथादेशकालदेहावस्थानविशेषं तदुपादानोपलम्भकतयानुभवतः सर्वप्रत्ययसाक्षिण आकाशशरीरस्य साक्षात् परब्रह्मणः परमात्मनः कियानिह वा अर्थविशेषो विज्ञापनीयः स्याद् विस्फुलिङ्गादिभिरिव हिरण्यरेतसः ।।

अतएव स्वयं तदुपकल्पयास्माकं भगवतः परमगुरोस्तव चरणशतपलाशच्छायां विविधवृजिनसंसारपरिश्रमोपशमनीमुपसृतानां वयं यत्कामेनोपसादिताः ।।

ऽयन्न तेषां समुन्नतेरिति निश्चित्य स्वयोगमायया देवनृपशुनृसिंहादिषु मिश्रितेषु मत्स्यादिजलचरादिषु चावतीर्य यथापराधं दण्ड्यान् दण्डयति। भगवान् समेषामपि पितृपितामहप्रपितामहादिभूतः सर्वस्वमस्ति। सर्वस्यापि जगतः समुत्पत्तिस्थितिलयानां कर्त्र्या महामायया सह भगवान् महापुरुषः नैकविधाः लीलाः करोति। समेषामपि जीवानामन्तःब्रह्मस्वरूपेण विराजते। जीवानां बहिरपि प्रकृतिरूपेणाऽपि भगवानेव विराजते। जगत्यां यावन्तो देशकालावस्थाद्याः सन्ति। तेषामुपादानस्वरूपेण प्रकाशस्वरूपेण च भगवान्नेव तान्ननुभवति। सर्वासां वृत्तीनां साक्षी भगवान् वर्त्तते। आकाशमिव विभुः निर्लिप्तश्चास्ति। भगवान्नचिन्त्यैश्वर्यसम्पन्नो जगतां परमो गुरुरस्ति।

उपर्युक्ते प्रसङ्गे विकल्पवितर्कादिप्रमाणानां निरूपणमस्तीत्य तो वक्तुं शक्यते यदत्र विकल्पवितर्कादिनिरूपकं साङ्ख्यमस्तीति।

(६८)

ओजः सहोबलादिप्रतिपादकं साङ्ख्यम्

श्रीमद्भागवतमहापुराणे षष्ठे स्कन्धे द्वादशेऽध्याये सप्तमश्लोकतः समारभ्य द्वादशश्लोकं यावदिन्द्रवृत्रयोर्युद्धवेलायां इन्द्रहस्ताद्वज्रे च्युते सति ह्रीमन्तमिन्द्रम्-

---

अथो ईश जहि त्वाष्ट्रं ग्रसन्तं भुवनत्रयम्।
ग्रस्तानि येन नः कृष्ण तेजांस्यस्त्रायुधानि च॥
हंसाय दह्ननिलयाय निरीक्षकाय,
कृष्णाय मृष्टयशसे निरूपक्रमाय।
सत्संग्रहाय भवपान्थनिजाश्रमाप्ता—
वन्ते परीष्टगतये हरये नमस्ते॥

(स्क. ६, अ. ९, ख. ३३-४३, श्लो. ४४-४५)

प्रतिह्रृय्पनुत्तये वृत्रेण समुदीरितं ओजःसहोबलादिप्रदिपादकं साङ्ख्यमस्ति[1]। तदित्थम्—

सर्वज्ञः सनातन आदिपुरुषो भगवान्नेव जगदुत्पत्तिस्थितिलयकरणे समर्थोऽस्ति। तदतिरिक्तो देहाभिमानी युद्धायोत्सुक आततायी न कथमपि जयमधिगन्तुमर्हति। सर्वे लोकाः लोकपालाश्च वागुरके बद्धान् पक्षिण इव यस्याऽऽधीन्ये स्थिताश्चेष्टन्ते, स काल एव समेषां विजयपराजययोः हेतुरस्ति। स काल एव मनुष्यस्य मनोबलमिन्द्रियबल शरीरबलं प्राणबलं जीवनबलं मृत्युबलं वेति रूपेषु स्थितोऽस्ति। मनुष्यस्तमविज्ञाय जडं शरीरमेव जयपराजययोर्हेतुतयावगच्छति। यथा काष्ठपुत्तलिका यन्त्रमृगश्च नृत्यकारयितुः, हस्ते तिष्ठतः, तथैव समग्रप्राणिनो भगवद्धस्ते वर्त्तन्ते। भगवत्कृपां विना पुरुषः, प्रकृतिः, महत्तत्त्वम्, अहङ्कारः, पञ्चतन्मात्राणि पञ्चभूतानि, इन्द्रियाणि, अन्तःकरणचतुष्टयम् एते पृथक्पृथक्सम्भूय वाविश्वस्योत्पत्त्यादिकरणे

---

१. युयुत्सतां कुत्रचिदाततायिनां।
जयः सदैकत्र न वै परात्मनाम्॥
विनैकमुत्पत्तिलयस्थितीश्वरं।
सर्वज्ञमाद्यं पुरुषं सनातनम्॥
लोकाः सपाला यस्येमे श्वसन्ति विवशा वशे।
द्विजा इव शिचा बद्धाः स काल इह काणम्॥
ओजः सहो बलं प्राणममृतं मृत्युमेव च।
तमज्ञाय जनो हेतुमात्मानं मन्यते जडम्॥
यथा दारुमयी नारी यथा यन्त्रमयो मृगः।
एवं भूतानि मघवन्नीशतन्त्राणि विद्धि भोः॥
पुरुषः प्रकृतिर्व्यक्तमात्मा भूतेन्द्रियाशयाः।
शक्नुवन्त्यस्य सर्गादौ न विना यदनुग्रहात्॥
अविद्वानेवमात्मानं मन्यतेऽनीशमीश्वरम्।
भूतैः सृजति भूतानि ग्रसते तानि तैः स्वयम्॥
(स्क. ६ अ. १२ श्लो. ७—१२)

समर्थाः न भवन्ति। यो न जानाति यद् भगवान्नेव समेषां नियामको वर्त्तते, स एव परतन्त्रं जीवं स्वतन्त्रं कर्त्तारं भोक्तारं वा जानाति। वस्तुतो वयं भगवान्नेव प्राणिभिः प्राणीनां सर्जनसंहरणे करोति।

उपर्युक्ते प्रसङ्गे ओजःसहोबलानां निरूपणङ्कृतमिति ओजः सहोबलादि-निरूपकं साङ्ख्यमस्तीति।

(६९)

भूतैर्भूतसृष्टिप्रतिपादकं साङ्ख्यम्

श्रीमद्भागवते महापुराणे षष्ठे स्कन्धे पञ्चदशेऽध्याये तृतीयश्लोकतः समारभ्याष्टमश्लोकं यावदङ्गिरानारदाभ्यां पुत्रशोकसन्तप्तस्क्रान्तं चित्रकेतुम्प्रति समुपदिष्टम्भूतैर्भूतसृष्टिप्रतिपादकं साङ्ख्यं वर्त्तते[1]। तद् यथा—

यथा जलस्य वेगेन सिकताकणाः संयुज्यन्ते वियुज्यन्ते च परस्परन्तथैव य यप्रभावतो प्राणिनामपि संयोगवियोगौ भवतः। यथा केभ्योऽपि बीजेभ्यो बीजान्तराण्युत्पद्यन्ते विनश्यन्ति च। सर्वमेतच्चराचरात्मकं जगदुत्पत्तेः प्राङ्

---

1. यथा प्रयन्ति संयान्ति स्रोतोवेगेन वालुकाः।
संयुज्यन्ते विमुज्यन्ते तथा कालेन देहिनः॥
यथा धानासु वै धानां भवन्ति न भवन्ति च।
एवं भूतेषु भूतानि चोदितानीशमायया॥
वयं च त्वं च ये चेमे तुल्यकालाश्चराचराः।
जन्ममृत्योर्यथा पश्चात् प्राङ्नैवमधुनापि भोः॥
भूतैर्भूतानि भूतेशः सृजत्यवति हन्त्यजः।
आत्मसृष्टैरस्वतन्त्रैरनपेक्षोऽपि बालवत्॥
देहेन देहिनो राजन् देहाद् देहोऽभिजायते।
बीजादेव यथा बीजं देह्यर्थ इव शाश्वतः॥
देहदेहिविभागोऽयमविवेककृतः पुरा।
जातिव्यक्तिविभागोऽयं यथा वस्तुनिकल्पितः॥
(स्क. ६ अ. १५ श्लो. ३—८)

नासीत् परम्भगवन्मायया प्रेरिता: प्राणिन: प्राणिभ्य: समुत्पद्यन्ते विनश्यन्ति च। प्रलये चापि जगदेतन्न स्थास्यति, अतोऽत्र वर्तमानमप्यस्तित्वन्नास्ति। अनेन सिध्यति यत् सत्यं वस्तु तु सर्वथैकविधमेव तिष्ठति, भगवान्नेव समस्तप्राणिनामपि पतिरस्ति। तस्मिन् जन्ममृत्युरित्यादयो विकारा: नैव सन्ति। स न किमपि समीहते न चापेक्षते। स: स्वयमेव प्राणिनां सृजनपालनसंहरणानि करोति। यथाऽत्र बाला: क्रीडनकानि निर्माय-निर्माय भिन्दन्ति, तथैवेश्वरोऽपि सृष्ट्वा सृस्टि सृष्ट्वा संहरति। यथैकमाद्बीजादितरद्बीजमुत्पद्यते तथैवमातृपितृदेहाभ्याम्पुत्र: उत पितु: देहेन मातु: देहाच्च पुत्रस्य देह: समुत्पद्यते। पितृ-मातृ-पुत्रा: जीवरूपेण देहिन: सन्ति, बाह्यदृशा च शरीराणि। तेषु जीवो घटादिकार्येषु पृथिवीमिव नित्योऽस्ति। यथैकस्मिन् मृत्तिकारूपे वस्तुनि घटत्वादि-जातीनां घटादीनां व्यक्तीनां च विभाग: केवलङ्कल्पनामात्रमस्ति, तथैव देही देहयोर्विभागोऽपि अनादिरविद्याकल्पितश्चास्ति।

उपर्युक्ते प्रसङ्गे भूतैरेव भूतानां सृष्टि: क्रियते, न केवलेन परमपुरुषेण परमात्मनेति प्रतिपादनादत्र भूतैर्भूतसृष्टिप्रतिपादकं साङ्ख्यमस्ति।

(७०)

जीवगतिप्रतिपादकं साङ्ख्यम्

श्रीमद्भागतमहापुराणे षष्ठे स्कन्धे षोडशे ऽध्याये चतुर्थश्लोकत: समारभ्यैकादशश्लोकं यावच्चित्रकेतो: मृतपुत्रेण प्रतिपादितं जीवगतिप्रतिपादकं साङ्ख्यमस्ति[१]।

---

२. कस्मिन् जन्मनि अमी मह्यं पितरोमातरोऽभवन्।
कर्मभि: भ्राम्यमाणस्य देवतिर्यङ्नृयोनिषु॥
बन्धुज्ञात्यरिमध्यस्थ मित्रोदासीन विद्विष:।
सर्व एव हि सर्वेषां भवन्ति क्रमशो मिथ:॥
यथा वस्तूनि पण्यानि हेमादीनि ततस्तत:।
पर्यटन्ति नरेष्वेवं जीवो योनिषु कर्तृषु॥
नित्यस्यार्थस्य सम्बन्धो ह्यनित्यो दृश्यते नृषु।

तदित्थम्---

जीवः स्वकर्माण्यनुसृत्य देवयोनौ पशुयोनौ, पक्षियोनौ तथा च न जाने कासु-कासु योनिषु कियद्भिः जन्मभिर्भ्राम्यति। तासु च न जाने कियत्यो मातरः कियन्तो पितरश्चाजायन्त। नैकेषु जन्मषु सर्वेऽप्यन्योऽन्यं भ्रातरः, सम्बन्धिनः, शत्रवो, मित्राणि उदासीनाः द्वेषिणश्च जायन्ते, यथा सुवर्णादीनि क्रय-विक्रय-वस्तूनि चैकस्माद् व्यापारिणोऽयं व्यापारिणम्प्रति यान्त्यायान्ति च। तथैव जीवोऽपि विभिन्नासु योनिषूत्पद्यते। मनुष्याऽपेक्षयाऽधिककालपर्यन्तं स्थितिमद्भिः सुवर्णादिभिरपि मनुष्यस्य सम्बन्धो न शाश्वतिको वर्त्तते। यावद्येन वस्तुना सम्बन्धस्तिष्ठति, तावदेव तेन वस्तुना सह ममता भवति। जीवः नित्योऽहङ्कृतिशून्यश्चास्ति। सोऽत्रगर्भमागत्य यावद् यस्मिन् शरीरे तिष्ठति तावदेव तच्छरीरं स्वीयं मनुते। जीवो नित्योऽविनाशी सूक्ष्मः जन्मादिरहितः समेषामाश्रयः स्वयंप्रकाशश्चास्ति। अस्मिन् स्वरूपतः जन्ममृत्य्वादयो केऽपि न सन्ति। तथाप्ययमीश्वररूपत्वात् स्वमायागुणैरेव स्वात्मानं विश्वरूपत्वेन प्रकटीकरोति। अस्यात्यन्तं प्रियाप्रिये न स्तः, न स्वीयो, न परकीयः, यतः गुणदोषयोः, हिताहितयोश्च मित्रशत्र्वोः विभिन्नबुद्धिवृत्तीनामयङ् केवलं साक्षी वर्त्तते। वस्तुतोऽयमद्वितीयोऽस्ति। आत्मायं कार्यकारणयोः साक्षी स्वतन्त्र-श्चास्ति। अतएवायं शरीरस्य गुणदोषौ कर्मफलानि च न गृह्णाति। सर्वदैवौदासीन्येन तिष्ठति।

उपर्युक्ते प्रसङ्गे जीवस्य गमनागमने, वृत्तयः, स्थितयश्च प्रतिपादिताः सन्तीति वक्तुं शक्यते, यदत्र जीवगतिप्रतिपादकं साङ्ख्यमस्तीति।

यावद् यस्य हि सम्बन्धो ममत्वं तावदेव हि॥
एवं योनिगतो जीवः स नित्यो निरहङ्कृतः।
यावद् यत्रोपलभ्येत तावत् स्वत्वं हि तस्य तत्॥
एष नित्योऽव्ययः सूक्ष्म एष सर्वाश्रयः स्वदृक्।
आत्ममायागुणैर्विश्वमात्मानं सृजति प्रभुः॥
न ह्यस्यातिप्रियः कश्चिन्नाप्रियः स्वः परोऽपि वा।
एकः सर्वधियां द्रष्टा कर्त्तॄणां गुणदोषयोः॥
नादत्त आत्मा हि गुणं न दोषं न क्रियाफलम्।
उदासीनवदासीनः परावरदृगीश्वरः॥

(स्क. ६ अ. १६ श्लो. ४—११)

(७१)

परमाणुपरममहदन्तानां सम्भवाप्ययप्रतिपादकं साङ्ख्यम्

श्रीमद्भागवत महापुराणे षष्ठे स्कन्धे षोडशेऽध्याये पञ्चत्रिंशत्तमश्लोकतः समारभ्याष्टचत्वारिंशत्तमश्लोकं यावद् भगवतोऽनन्तस्य स्तुतौ राज्ञा चित्रकेतुना प्रोक्तं परमाणुपरममहदन्तानां सम्भवाप्ययप्रतिपादकं साङ्ख्यमस्ति[1]।

तदित्थम्—

जगदुत्पत्तिस्थितिलयाः भगवल्लीलाविलसितानि सन्ति। विश्वनि-र्मातारः ब्रह्मादयो भगवदंशांशाः सन्ति। सूक्ष्मातिसूक्ष्मपरमाणुतः समारभ्य स्थूलातिस्थूलानां समग्रवस्तूनामादौ मध्येऽन्ते च भगवानेव विराजते। स्वयं चादिमध्यावसानशून्योऽस्ति।

---

1. अजितजितः सममतिभिः साधुभिर्भवान् जितात्मभिर्भवता।
विजितास्तेऽपि च भजतामकामात्मनां य आत्मदोऽतिकरुणः॥
तव विभवःखलु भगवान् जगदुदयस्थितिलयादीनि।
विश्वसृजस्तेंऽशांशास्तत्र मृषा स्पर्धन्ते पृथगभिमत्या॥
परमाणुपरममहतोस्त्वमाद्यन्तान्तरवर्ती त्रय विधुरः।
आदावन्तेऽपि च सत्त्वानां यद्ध्रुवं तदेवान्तरालेऽपि॥
क्षित्यादिभिरेष किलावृतः सप्तभिर्दशगुणोत्तरैराण्डकोशः।
यत्र पतत्यणुकल्पः सहाण्डकोटिकोटिभिस्तदनन्तः॥
विषयतृषो नरपशवो य उपासते विभूतीर्न परं त्वाम्।
तेषामाशिष ईश तदनु विनश्यन्ति तथा राजकुलम्॥
कामधियस्त्वयिरचिता न परमरोहन्ति यथा करम्भबीजानि।
ज्ञानात्मन्यगुणमये गुणगणतोऽस्य द्वन्द्वजालानि॥
जितमजित तदा भवता यदाऽऽह भागवतं धर्ममनवद्यम्।
निष्किंचना ये आत्मारामा यमुपासतेऽपवर्गाय॥
विषममतिर्न यत्र नृणां त्वहमिति मम तवेति च यदन्यत्र।
विषमधिया रचितो यः ह्यविशुद्धः क्षयिष्णुरधर्मबहुलः॥

असौ ब्रह्माण्डकोशः पृथिव्यादिभिः परस्परं दशगुणितेभ्यः सप्तावरणेभ्यश्चावृत्तोऽस्ति। स्वात्मानमिवान्यः कोटिशः ब्रह्माण्डेषु भगवत्ययं सह परमाणुवत् पर्य्यटते; तथापि भगवत्सीमानं ज्ञातुन्नैव शक्नोतीति भगवाननन्तोऽस्ति। ये जनाः नरपशवः केवलं विषयभोगानेवेहन्ते भगवन्तमभजन्तः तद्विभूतिस्वरूपिणः इन्द्रादिदेवान् समुपासन्ते। यथा राजकुले नष्टे सति तदनुयायिनां जीविकाऽपि नश्यति, तथैव इन्द्रादीनां नाशे तैर्प्रत्ताभोगा श्चापि नश्यन्ति।

परमात्मा ज्ञानस्वरूपी निगुर्णश्च वर्त्तते। यथा भर्जितबीजानामङ्कुराणि न भवन्ति तथा भगवन्तं प्रति सकामभावनाऽपि जन्मनिधनादिभावाय नोपपद्यते। जीवो यानि सुखानि दुःखानि वाऽनुभवति तानि सत्त्वादिगुणेभ्यो जायन्ते, न तु निर्गुणादात्मनः। भागवतधर्मः परमो निर्गुणादात्मनो जायते। भागवतधर्मः परमो धर्मोऽस्ति, तस्मिन्

कः क्षेमो निजपरयो कियानर्थः स्वपरद्रुहा धर्मेण।
स्वद्रोहात् तव कोपः परसम्पीडया च तथाधर्मः।
न व्यभिचरति तवेक्षा यया ह्यभिहितो भागवतो धर्मः।
स्थिरचरसत्त्वकदम्बेष्वपृथग्धियो यमुपासत त्वार्याः॥
न हि भगवन्नघटितमिदं त्वद्दर्शनान्नृणामखिलपापक्षयः।
यन्नाम सकृच्छ्रवणात् पुल्कसकोऽपि विमुच्यते संसारात्॥
अथ भगवान् वयमधुना त्वदवयोकपरिमृष्टाशयमलाः।
सुरर्षिणा यदुदितं तावकेन कथमन्यथा भवति॥
विदितमनन्त समस्तं तव जगदात्मनो जनैरिहाचरितम्।
विज्ञाप्यं परमगुरोः कियदिव सवितुरिव खद्योतैः॥
नमस्तुभ्यं भगवते सकलजगत्स्थितिलयोदयेशाय।
दुःरवसितात्मगतये कुयोगिनां भिदा परमहंसाय॥
यं वै श्वसन्तमनु विश्वसृजः श्वसन्ति यं चेकितानमनुचित्तय उच्चकन्ति।
भूमण्डलं सर्षपायति यस्य मूर्ध्नि
तस्मै नमो भगवतेऽस्तु सहस्रमूर्ध्ने॥

(स्क. ६ अ. १६ श्लो. ४२—४८)

अहम्ममात्मिका विषमा बुद्धिर्न भवति । सर्वेषु चरेष्वचरेषु च प्राणिषु ये महात्मानः समदर्शिनो भवन्ति, वस्तुतस्तु त एव भागवतं धर्ममुपासन्ते । भगवद्दर्शनैः नामस्मरणैश्च पापानि क्षीयन्ते मुक्तिश्च प्राप्यते । भगवान् सर्वजगतामात्मा वर्त्ततेऽतएव जगति प्राणिनो यत् किञ्चिदपि कुर्वन्ति तत्सर्वं भगवान् जानाति । भगवदाध्यक्ष्येणैव जगतामुत्पत्तिस्थितिलयाः जायन्ते । भेददृशा कुयोगिनो भगवतः स्वरूपं तत्त्वतो नावगच्छन्ति, भगवतः स्वरूपं परमं विशुद्धमस्ति । भगवच्चेष्टाया: शक्तिं समधिगत्यैव ब्रह्मादयो देवाश्चेष्टितुमर्हन्ति । भगवतश्चिच्छाययैव जीवितानीन्द्रियाणि विषयान् ग्रहीतुं शक्नुवन्ति । अनन्तस्वरूपिणो भगवतः शिरसि भूमण्डलं सर्षपकणमिव प्रतीयते । भगवाननन्तः सहस्रशिरष्कोऽस्ति ।

उपर्युक्ते प्रसङ्गे परमाणुपरममहदन्तानां समेषामपि तत्त्वानां सम्भवाप्यययोः निरूपणमस्तीति तत्प्रतिपादकं साङ्ख्यमत्रावबोध्यम् ।

(७२)

शब्दब्रह्म-परब्रह्मप्रतिपादकं साङ्ख्यम्

श्रीमद्भागवतमहापुराणे षष्ठे स्कन्धे षोडशेऽध्याय एकपञ्चाशत्तमश्लोकतः समारम्य षट्पञ्चाशत्तमश्लोकं यावद् विद्याधरपतिं चित्रकेतुम्प्रति भगवतानन्तेन समुदीरितं शब्दब्रह्मपरब्रह्मप्रतिपादकं साङ्ख्यमस्ति[1] ।

---

१. अहं वै सर्वभूतानि भूतात्मा भूतभावनः ।
शब्दब्रह्म परं ब्रह्म ममोभे शाश्वती तनू ।।
लोके विततमात्मानं लोकं चात्मनि सन्ततम् ।
उभयं च मया व्याप्तं मयि चैवोभयं कृतम् ।।
यथा सुषुप्तः पुरुषो विश्वं पश्यति चात्मनि ।
आत्मानमेकदेशस्थं मन्यते स्वप्न उत्थितः ।।
एवं जागरणादीनि जीवस्थानानि चात्मनः ।
मायामात्राणि विज्ञाय तद्द्रष्टारं परं स्मरेत् ।।
येन प्रसुप्तः पुरुषः स्वापं वेदात्मनस्तदा ।
सुखं च निर्गुणं ब्रह्म तमात्मानमवेहि माम् ।।
उभयं स्मरतः पुंसः प्रस्वापप्रतिबोधयोः ।
अन्वेति व्यतिरिच्येत तज्ज्ञानं ब्रह्म तत्परम् ।।
(स्क. ६ अ. १६ श्लो.५१—५६)

तदित्थम्-भगवान् सर्वप्राणिस्वरूपी वर्त्तते, स एव च समेषां स्वस्वरूपाणां पालकोऽस्ति, तस्यैव शब्दब्रह्म परब्रह्मेति सनातने स्वरूपे स्तः। आत्मा कार्यकारणात्मा वर्त्तते, जगच्चात्मनि स्थितमस्ति, तथाधिष्ठानरूपेण भगवानुभयोरपि व्याप्तोऽस्ति उभेऽपि च भगवति कल्पिते स्तः। जीवस्य जाग्रदाद्योऽवस्थाः परमेश्वरस्य मायास्वरूपिण्यः सन्ति, भगवान् तु साक्षी वर्त्तते, मायातीतः परमात्मा चास्ति। सुप्तः पुरुषः यस्य साहाय्येन स्वनिद्रामतीन्द्रियसुखं वानुभवति तदेव ब्रह्म वर्त्तते। यद् ब्रह्मवात्मशब्देन व्यपदिश्यते। पुरुषोऽत्र निद्रायाः जाग्रदवस्थायाश्चानुभवकर्त्ता वर्त्तते। सोऽत्र तास्वस्थास्व नुगतः सन्नपि ताभ्यः पृथगस्ति।

सः पुरुषः सर्वास्ववस्थासु स्थितिमान् वर्त्तते सः ज्ञानस्वरूपी ब्रह्म वर्त्तते तदेव परमं ब्रह्मऽस्ति।

उपर्युक्ते प्रसङ्गे भगवान् शब्दब्रह्मास्ति परब्रह्मास्ति स एवात्मास्ति स एव पुरुषोस्तीति प्रतिपादितमस्तीत्यतो वक्तुं शक्यते यदत्र शब्दब्रह्मपरब्रह्मादिप्रतिपादकं साङ्ख्यमस्तीति।

(७३)

द्वन्द्वोपदर्शकं साङ्ख्यम्

श्रीमद्भागवते महापुराणे षष्ठे स्कन्धे सप्तदशेऽध्यायेऽष्टाविंशतितमश्लोकतस्त्रिंशत्तमश्लोकं यावच्चित्रकेतुशापसमये रुद्रपार्वतीसंवादे समागतं द्वन्द्वोपदर्शकं साङ्ख्यमस्ति[1]।

---

१. नारायणपराः सर्वे न कुतश्चन बिभ्यति।
स्वर्गापवर्गनरकेष्वपि तुल्यार्थदर्शिनः॥
देहिनां देहसंयोगाद् द्वन्द्वानीश्वरलीलया।
सुखं दुःखं मृति र्जन्म शापोऽनुग्रह एव च॥
अविवेककृतः पुंसो ह्यर्थभेद इवात्मनि।
गुणदोषविकल्पश्च भिदेव स्रजिवत् कृतः॥
(स्क. ६ अ. १७ श्लो. २८—३०)

तदित्थम्—

भगवच्छरणापन्नाः सर्वगतं भगवन्तं सर्वत्र लीलयैव देहस्य संयोगवशात् सुखदुःखे, जन्मन्मृत्यू, शापानुग्रहेत्यादीन् द्वन्द्वान् प्राप्नुवन्ति । यथा स्वप्ने भेदभ्रमात् सुख-दुःखदीनां प्रतीतिर्भवति, जाग्रदवस्थायां च भ्रमवशादेव मालायां सर्पबुद्धिर्भवति, तथैव मनुष्योऽज्ञानवशीभूत आत्मनि देवमनुष्यादीन् भेदान् तथा गुणान् दोषादीन् वा परिकल्पते । वस्तुतस्तु नैनेषां स्थितिर्भवति तथापि सर्वेऽपि द्वन्द्वाः मुधैव प्रतीयन्ते ।

उपर्युक्ते प्रघट्टके केन प्रकारेण जीवेषु द्वन्द्वाः समुद्भवन्ति कुतश्चायान्ति केन प्रकारेण चैतेषामपाकरणङ्कर्त्तुं कर्तुं शक्यत इत्यादिप्रतिपादनादत्र द्वन्द्वोपदर्शकं साङ्ख्य-मस्तीति मन्तव्यम् ।

—०—

श्रीमद्भागवतमहापुराणे

सप्तमः स्कन्धः

(७४)

त्रैगुण्यविशेषनिरूपकं साङ्ख्यम्

श्रीमद्भागवतमहापुराणे सप्तमे स्कन्धे प्रथमेऽध्याये षष्ठश्लोकतः समारभ्यैकादशश्लोकं यावत् सुरासुरेषु समभावाभावात्मक सन्देहे जाते सति पृथुना पृष्टेन शुकेन संशयापनुत्तये प्रोक्तं त्रैगुण्य-विशेषनिरूपकं साङ्ख्यमस्ति[1] । तदित्थम्—

वस्तुतो भगवान् निर्गुणोऽजन्माऽव्यक्तः प्रकृते परश्चाऽस्ति । इत्थं सत्यपि स्वमायागुणान्स्वीकृत्य सोऽत्र बाध्यबाधकभावं गृह्णाति ।

सत्त्वरजस्तमांसीतिप्रकृतिगुणाः सन्ति न परमात्मनः । भगवान् समये समये गुणान् स्वीकरोति तथा सत्त्वगुणाभिवृद्धौ देवानां ऋषीणां च, रजोगुणाभिवृद्धौ दैत्यानां, तमोगुणाभिवृद्धौ च यक्षरक्षसामभिवृद्धिङ् करोति । यथा व्यापकोऽग्निः काष्ठादिष्वाश्रयेषु स्थितोऽपि तेभ्यः प्रथमन्न ज्ञायते, परन्तु मन्थने प्रकटीभवति । परमात्मा

---

१. निर्गुणोऽपि ह्यजोऽव्यक्तो भगवान् प्रकृतेः परः ।
स्वमायागुणमाविश्य बाध्यबाधकतां गतः ।।
सत्त्वं रजस्तम इति प्रकृतेर्नात्मनो गुणाः ।
न तेषां युगपद् राजन् ह्रास उल्लास एव वा ।।
जयकाले तु सत्त्वस्य देवर्षीन् रजसोऽसुरान् ।
तमसो यक्षरक्षांसि तत्कालानुगुणोऽभजत् ।।
ज्योतिरादिरिवाभाति सङ्घातान्न विविच्यते ।
विदन्त्यात्मानमात्मस्थं मथित्वा कवयोऽन्ततः ।।

सर्वत्र विराजते न पृथग्दृश्यते विचारशीलो पुरुषः हृदयं निर्मन्थ्य तदतिरिक्तानि सर्वाणि तत्त्वान्तराणि निर्बाध्यान्तःस्वस्वान्त एव तमन्तर्यामिरूपेण प्राप्नोति । यदा परमेश्वरः शरीराणि निर्मातुमीहते । तदा स्वमायया रजोगुणात्मिकां भिन्नां सृष्टिं करोति । यदाऽयं विचित्रयोनिषु रन्तुमीहते, तदा सत्त्वगुणात्मिकां सृष्टिङ् करोति । यदा सः सुषुप्सते तदा तमोगुणमभिवर्धयते । भगवान् सत्यसङ्कल्पोस्ति, स एव जगतामुत्पत्तये भूतानां, प्रकृतेः पुरुषसहकारीणांमाश्रयस्य कालस्य सृष्टिङ् करोति । अतए वसः कालाधीनो नास्त्यपितु काल एव तस्याधीन्येऽस्ति । कालस्वरूपोऽयमीश्वरो यदा सत्त्वगुणमभिवर्धयते तदा सत्त्वमयानां देवानां बलं वर्धयते एवं तदैव सः एवं परमयशस्वी देवप्रियोः परमात्मा देवविरोधिनः रजोगुणिनश्च दैत्यान् संहरति । वस्तुतः सः समोऽस्ति ।

उपर्युक्ते प्रसङ्गे त्रैगुण्य विवरणमस्ति कस्येमे गुणाः कदा केन केन प्रकारेणोपयुज्यन्त इत्यादिकञ्च प्रतिपादितमस्तीति वक्तुं शक्यते, यदत्र त्रैगुण्यप्रतिपादकं साङ्ख्यमस्तीति ।

यदा सिसृक्षुः पुर आत्मनः परो,
रजः सृजत्येष पृथक् स्वमायया ।
सत्त्वं विचित्रासु रिरंसुरीश्वरः—
शयिष्यमाणस्तम ईरयत्यसौ ।।
कालं चरन्तं सृजतीश आश्रयं,
प्रधानपुम्भ्यां नरदेव सत्यकृत् ।
य एष राजन्नपि काल ईशिता
सत्त्वं सुरानीकमिवैधयत्यतः ।।
तत्प्रत्यनीकानसुरान् सुरप्रियो
रजस्तमस्कान् प्रमिणोत्युरूश्रवाः ।।
(स्क. ७ अ. १ श्लो. ९—११)

(७५)

विभ्रमदृष्टान्तनिरूपकं साङ्ख्यम्

श्रीमद्भागवतमहापुराणे सप्तमे स्कन्धे द्वितीयेऽध्याय एकविंशतितमश्लोकतः समारभ्य षड्विंशतितमश्लोकं यावत् स्वमातरं दितिं प्रति हिरण्यकशिपुना प्रतिपादितं विभ्रमदृष्टान्तनिरूपकं साङ्ख्यमस्ति[1]।

तदित्थम्—

यथा पानीयस्थले बहवो जनाः सम्मिलन्ति परन्तेषां सम्मेलनं किञ्चित्कालायैव भवति, तथैव जीवाश्चापि स्वस्वकर्मचक्रेण दैववशगाः संयुक्ताः वियुक्ताश्च भवन्ति। वस्तुत आत्मा नित्योऽविनाशी शुद्धः सर्वगतः सर्वज्ञः देहेन्द्रियादिभ्यश्च पृथगस्ति। सः स्वीययाऽविद्यया देहादीनां सृष्टिं विधाय भोगसाधनं सूक्ष्म-शरीरं स्वीकरोति।

---

१ भूतानामिह संवासः प्रपायामिव सुव्रते।
दैवेनैकत्र नीतानामुन्नीतानां स्वकर्मभिः॥
नित्य आत्माव्ययः शुद्धः सर्वगः सर्ववित्परः।
धत्तेऽसावात्मनो लिङ्गं मायया विसृजन्गुणान्॥
यथाम्भसा प्रचलता तरवोऽपि चला इव।
चक्षुषा भ्राम्यमाणेन दृश्यते चलतीव भूः॥
एवं गुणैर्भ्राम्यमाणे मनस्यविकलः पुमान्।
याति तत्साम्यतां भद्रे ह्यलिङ्गो लिङ्गवान्।
एष आत्मविपर्यासो ह्यलिङ्गे लिङ्गे भावना।
एष प्रियाप्रियैर्योगो वियोगः कर्मसंसृतिः॥
सम्भवश्च विनाशश्च शोकश्च विविधः स्मृतः।
अविवेकश्च चिन्ता च विवेकास्मृतिरेव च॥
(स्क. ७ अ. २ श्लो २१—२६)

वस्तुत आत्मा नित्योऽविनाशीशुद्धः सर्वगतः सर्वज्ञः देहेन्द्रियादिभ्यश्च पृथगास्ति। स स्वीययाऽविद्यया देहादीनाँ सृष्टिं विधाय भोगसाधनं सूक्ष्मशरीरं स्वीकरोति। यथा वीचिव्याकुले पयसि प्रतिम्बिताः तरवोऽपि दोलायमाना इव प्रतीयन्ते, भ्राम्यमाणेन चक्षुषा सह पृथिव्यपि भ्राम्यतीव प्रतीयते, तथैव विषयान् हेतुकृत्य मनो भ्रमति। वस्तुतो निर्विकारः सन्नपि तदिवाऽऽत्मावि भ्रमन्निव प्रतीयते। आत्मनः स्थूलसूक्ष्मयोः शरीरयोः कश्चन सम्बन्धो नास्ति, तथाप्यात्मा सम्बन्धीव ज्ञायते। सर्वथा शरीररहितमात्मानं शरीरत्वेन स्वीकरोतीत्येतदे वाज्ञानमस्ति। अस्मादेव प्रियाप्रियवस्तूनां संयोगवियोगौ भवतः। कर्मसम्बन्धत्वादेव संसारे भ्रमिर्भवति। जन्ममृत्यू नैकविधशोकाभिनिचिन्तनंविवेकविस्मृत्यादीनां समेषामपि कारणमज्ञानमेवास्ति।

उपर्युक्ते प्रसङ्गे विभ्रमाणां दृष्टान्ताः निरूपिताः सन्तीति वक्तुं शक्यते यदत्र विभ्रमदृष्टान्तप्रतिपादकं साङ्ख्यमस्तीति।

(७६)

कल्पान्तसृष्टिप्रक्रियावादि साङ्ख्यम्

श्रीमद्भागवतमहापुराणे सप्तमे स्कन्धे तृतीये ऽध्याये षड्विंशतितमश्लोकतः समारभ्य चतुस्त्रिंशत्तमश्लोकं यावद्ब्रह्मदर्शनावसरे हिरण्यकशिपुना तत्स्तुतौ व्याहृतं कल्पान्तसृष्टिप्रक्रियावादि साङ्ख्यमस्ति[1]। तद् यथा—

कल्पान्ते सर्वा सृष्टिः कालप्रेरितेन तमोगुणस्य गाढ़ान्धकारेणाऽऽवृत्ताऽभवत्। तदा स्वयंप्रकाशस्वरूपिणा भगवता स्वतेजसा पुनः सृष्टिः प्रकटिता समभूत्। भगवान्

---

१. कल्पान्ते कालसृष्टेन योऽन्धेन तमसाऽऽवृतम्।
अभिव्यनग् जगदिदं स्वयंज्योतिः स्वरोचिषा ॥
आत्मना त्रिवृता चेदं सृजत्यवति लुम्पति।
रजः सत्त्वतमोधाम्ने पराय महते नमः ॥
नम आद्याय बीजाय ज्ञानविज्ञानमूर्त्तये।
प्राणेन्द्रियमनोबुद्धिविकारै र्व्यक्तिमीयुषे ॥
त्वमीशिषे जगतस्तस्थुषश्च,
प्राणेन मुख्येन पतिः प्रजानाम्।

त्रिगुणमयरूपेण सृष्टिरक्षासंहरणानि करोति । रजोगुणसत्त्वगुणतमोगुणानामाश्रयो भगवान् वर्त्तते । भगवान् सर्वेभ्यः परो महान्नस्ति, जगतांमूलकारणञ्चास्ति । ज्ञान-विज्ञाने भगवन्मूर्ती स्तः । प्राणेन्द्रियमनोबुद्ध्यादिभिर्विकारैः स्वात्मानं भगवान् प्रकटीचकार । भगवान् सूत्रात्मस्वरूपेण चराचरात्मकं जगत्स्वनियंत्रणे रक्षति प्रजाश्च: रक्षति । चेतनायाः मनस इद्रियाणाञ्च स्वामी भगवान् एवास्ति । पञ्चभूतानां, शब्दादीनां विषयाणाञ्च तथा तेषां संस्काराणां रचयिताऽपि महत्तत्त्वरूपेण भगवान् एवास्ति । ये वेदाः होतारोऽध्वर्यवो ब्रह्माण उद्गातारः एतादृग्भिः ऋत्विग्भिः

चित्तस्य चित्तेर्मन इन्द्रियाणां
　　पतिर्महान् भूतगुणाशयेशः ।।
　　त्वं सप्ततन्तून् वितनोषि तन्वा,
त्रय्या चातुर्होत्रकविद्यया च ।
त्वमेक आत्माऽऽत्मवतामनादि—
　　रनन्तपारः कविरन्तरात्मा ।।
त्वमेव कालोऽनिमिषो जनाना
　　मायुर्लवाद्यावयवैः क्षिणोषि ।
कूटस्थ आत्मा परमेष्ठ्यजो महां—
　　स्त्वं जीवलोकस्य च जीव आत्मा ।।
त्वत्तः परं नापारमप्यनेजदेजत्व किञ्चिद् व्यतिरिक्तमस्ति ।
विद्याः कलास्ते तनवश्च सर्वा हिरण्यगर्भोऽसि बृहत्त्रिपृष्ठः ।
व्यक्तं विभो स्थूलमिदं शरीरं
　　येनेन्द्रियप्राणमनोगुणांस्त्वम् ।
भुङ्क्षे स्थितो धामनि पारमेष्ठ्ये
　　अव्यक्त आत्मा पुरुषः पुराणः ।।
अनन्ताव्यक्तरूपेण येनेदमखिलं ततम् ।
　　चिदचिच्छक्तियुक्ताय तस्मै भगवते नमः ।।
　　　　(स्क. ७ अ. ३ श्लो. २६—३४)

क्रियमाणस्य यज्ञस्वप्रतिपादनङ्करोति एतत्सर्वं भगवच्छरीरमेवास्ति । तैरेवाग्निष्टोमादीन् सप्तयज्ञान्भगवानेव विस्तरति, भगवान् एव समग्रप्राणिनामात्मास्ति । समस्ताः विद्याः कलाश्च भगवच्छरीराणि सन्ति । सुवर्णमयं ब्रह्माण्डं भगवद्गर्भे स्थितमस्ति । व्यक्तं ब्रह्माण्डं भगवतः स्थूलं शरीरमस्ति । अनेनेन्द्रियप्राणमनसां विषयानुपभुङ्क्ते तदापि स्वीये परमैश्वर्यमये स्वरूपे तिष्ठति । वस्तुतः भगवान् पुराणपुरुषः स्थूलंभ्यः सूक्ष्मेभ्यश्च परः परब्रह्मैवास्ति । भगवान् स्वीयेनानन्तेनाऽव्यक्तेन च स्वरूपेण सर्वस्मिन् जगति, व्याप्तोऽस्ति । चेतनाचेतने उभेऽपि भगवच्छवती स्तः ।

उपर्युक्ते प्रसङ्गे कल्पान्ते केन प्रकारेण सृष्टिर्भवतीति प्रतिपादितमस्तीति वक्तुं शक्यते, यदत्र कल्पान्तसृष्टिप्रक्रियावादि साङ्ख्यमस्मिन् स्तीति ।

(७७)

अन्तर्बहिश्च ब्रह्मस्थितिदर्शकं साङ्ख्यम्

श्रीमद्भागवते महापुराणे सप्तमे स्कन्धे षष्ठेऽध्याय एकोनविंशतितमश्लोकतस्त्रयोविंशतितमश्लोकं यावद् दैत्यबालकानुपदिशता प्रह्लादेनोपदिष्टमन्तर्बहिश्च ब्रह्मस्थितिदर्शकं साङ्ख्यमस्ति[१] । तद् यथा—

---

१. न ह्यच्युतं प्रीणयतो बह्वायासोऽसुरात्मजाः ।
आत्मत्वात् सर्वभूतानां सिद्धत्वादिह सर्वतः ।।
परावरेषु भूतेषु ब्रह्मान्तस्थावरादिषु ।
भौतिकेषु विकारेषु भूतेष्वथ महत्सु च ।।
गुणेषु गुणसाम्ये च गुणव्यतिकरे तथा ।
एक एव परो ह्यात्मा भगवानीश्वरोऽव्ययः ।।
प्रत्यगात्मस्वरूपेण दृश्यरूपेण च स्वयम् ।
व्याप्यव्यापकनिर्देश्यो ह्यनिर्देश्योऽविकल्पितः ।।
केवलानुभवानन्दस्वरूपः परमेश्वरः ।
माययाऽन्तर्हितैश्वर्य ईयते गुणसर्गया ।।
(स्क. ७, अ. ६, श्लो. १९-२३)

भगवत्प्रसादाय विशिष्टपरिश्रमस्य प्रयत्नस्य च नापेक्षाऽस्ति। सः सर्वत्र सर्वसत्तास्वरूपेण स्वयंसिद्धोऽस्ति। ब्रह्मादिस्तम्बपर्यन्तं लघुस्थूलेषु सर्वेष्वपि प्राणिषु पञ्चभूतात्मकेषु वस्तुषु, पञ्चभूतेषु, सूक्ष्मतन्मात्रेषु, महतत्त्वे, त्रिष्वपि गुणेषु, गुणसाम्यावस्थायाम्प्रकृतौ चैक एवाविनाशी परमात्मा विराजते। स एव समग्रसौन्दर्यमाधुर्यैश्वर्याणां खनिरस्ति। स एवाऽन्तर्यामी दृष्टस्वरूपेणाऽस्ति। स एव च दृश्यात्मके जगत्स्वरूपेऽपि। सर्वथाऽनिर्वचनीयो विकल्परहितः सन्नपि दृष्टदृश्यस्वरूपेण व्याप्यव्यापकरूपेण च तस्य निर्वचनङ् क्रियते। सोऽनुभव-स्वरूप आनन्दस्वरूप एकः परमेश्वर एवास्ति, गुणमयसृष्टिकर्त्र्या माययैव तस्यैश्वर्यं तिरोधीयते। मायानिवृत्तौ सत्यामेव तस्य दर्शनानि जायन्ते।

उपर्युक्ते वर्णने ब्रह्मणः स्थितेर्वर्णनमस्ति यदसौ सर्वेषामन्तर्बहिश्च विराजत इति हेतोः वक्तुं शक्यते यदत्रान्तर्बहिश्च ब्रह्मस्थितिदर्शकं साङ्ख्यमस्तीति।

(७८)

आत्मस्वरूपनिरूपकं साङ्ख्यम्

श्रीमद्भागवते महापुराणे सप्तमे स्कन्धे सप्तमेऽध्याय एकोनविंशतितम श्लोकतः समारम्य पञ्चविंशतितमश्लोकं यावत्, श्रीनारदेन इन्द्राय समुपदिष्टं गर्भस्थेन प्रह्लादेन च श्रुतमवधारितञ्चाऽऽत्मस्वरूपनिरूपकं साङ्ख्यमस्ति[1]। तदित्थम्—

आत्मा नित्योऽविनाशी, शुद्धः क्षेत्रज्ञआश्रयो निर्विकारः स्वयम्प्रकाशः, सर्वेषाङ् कारणम्, व्यापकोऽसङ्ग आवरणरहितश्चास्ति। उपर्युक्तानिद्वादशसङ्ख्याकान्यात्मनः

---

१. आत्मा नित्योऽव्ययः शुद्ध एकः क्षेत्रज्ञ आश्रयः।
अविक्रियः स्वदृग् हेतुर्व्यापकोऽसङ्ग्यनावृतः॥
एतैर्द्वादशभिर्विद्वानात्मनो लक्षणैः परैः।
अहं ममेत्यसद्भावं देहादौ मोहजं त्यजेत्॥
स्वर्णं यथा ग्रावसु हेमकारः,
क्षेत्रेषु योगैस्तदभिज्ञ आप्नुयात्।

समुत्कृष्टानि लक्षणानि सन्ति। एभिरात्मवित् शरीरादिष्वज्ञानवशादहम्ममेति यो मिथ्याभावस्तं त्यजेत्। यथा सुवर्णखनौप्रस्तरमिश्रितं सुवर्णं तन्निःसारणविधिज्ञः सुवर्णकारस्तद्विधिना तत्प्राप्नोति, तथैवाऽध्यात्मतत्त्ववेत्ता पुरुष आत्मप्राप्त्युपायैः स्वशरीररूपे क्षेत्र एव ब्रह्मपदं साक्षात्करोति। आचार्याः मूलप्रकृतिं महत्तत्त्वमहङ्कारं पञ्चतन्मात्राणीत्यष्टतत्त्वानि प्रकृतित्त्वेन गृह्णन्ति। तेषां त्रयो गुणाः सन्ति सत्त्वरजस्तमांसीति। तेषां विकाराः षोडशसङ्ख्याकाः सन्ति, दशेन्द्रियाणि मनः पञ्चमहाभूतानीति। एतेषु सर्वेषु पुरुषतत्त्वमनुगतमस्ति। एतेषां समूह एव देहोऽस्ति। देहो द्विविधो भवति, स्थावरो जङ्गमश्चेति। अस्मिन्नेवान्तःकरणानीन्द्रियाणीत्यादीनामनात्मवस्तूनम्प्रत्येकमात्मा नास्ति। आत्मा सर्वात्मकोऽस्ति तथापि सर्वेभ्यः पृथगस्ति। जाग्रत्स्वप्नसुषुप्तीति तिस्रोऽवस्थाः समनुभूयन्ते। स एव सर्वातीतः सर्वसाक्षी परमात्मा वर्त्तते।

उपर्युक्ते प्रघट्टके द्वादशभिमुख्यलक्षणैरात्मस्वरूपं निरूपितमस्तीति वक्तुं शक्यते, यदत्र "आत्मस्वरूपनिरूपकं साङ्ख्यमस्तीति।"

क्षेत्रेषु देहेषु तथाऽऽत्मयोगै—
रध्यात्मविद् ब्रह्मगतिं लभेत ॥
अष्टौ प्रकृतयः प्रोक्ता—
स्त्रय एव ही तद्गुणाः।
विकाराः षोडशाचार्यैः
पुमानेकः समन्वयात् ॥
देहस्तु सर्वसङ्घातो जगत् तस्थुरिति द्विधा।
अत्रैव मृग्यः पुरुषो नेति नेतित्यजत् व्यजन् ॥
अन्वयव्यतिरेकेण विवेकेनोशताऽऽत्मना।
सर्गस्थानसमाम्नायैर्विमृशद्भिरसत्वरैः ॥
बुद्धेर्जागरणं स्वप्नः सुषुप्तिरिति वृत्तयः।
तायेनैवानुभूयन्ते सोऽध्यक्षः पुरुषः परः ॥
(स्क. ७, अ. ७, श्लो. १९-२५)

(७९)

भावसृष्टिनिरूपकं साङ्ख्यम्

श्रीमद्भागवतमहापुराणे सप्तमे स्कन्धे नवमेऽध्याये विंशतितमश्लोकतः समारभ्य द्वाविंशतितमश्लोकं यावत् प्रह्लादकृतभगवत्स्तवने समागतं "भावसृष्टि-निरूपकं साङ्ख्यमस्तीति[1]।"

तदित्थम्— सत्त्वादिगुणहेतुना विभिन्नस्वभावकाः यावन्तोः ब्रह्मादयः श्रेष्ठाः कालादयः कनिष्ठाश्च कर्तारः सन्ति, तेषां प्रेरको भगवान्नस्ति। ते सर्वेऽपि यानि-कानिचिदुपकरणान्यादाय यदा कदा यत् किञ्चिदऽपि यथा कथञ्चिदऽपि कुर्वन्ति तत्सर्वमदृष्टसाहाय्येन रूपान्तरितं वा विदधति, तत्सर्वं भगवत्स्वरूपमेवाऽस्ति। पुरुषानुमत्या कालेन गुणेषु क्षोभे जाते सति माया मनः प्रधानं लिङ्गशरीरं निर्मिमीते। एतत् लिङ्गशरीरं बलवत् कर्ममयं नैकविधेषु नामरूपेष्वासक्तं छन्दोमयमस्ति। एतदेवाऽविद्ययाकल्पितम्मनः दशेन्द्रियाणि पञ्चतन्मात्राणीति षोडशविकाररूपैररैः संसार-चक्रं भवति। भगवदतिरिक्तस्तिष्ठन् नास्ति कोऽपि पुरुषो योऽत्र मनोरूपस्य संसृति-

---

१.   यस्मिन् यतो यर्हि येन च यस्य यस्माद्,
        यस्मै यथा यदुत यस्त्वपरः परो वा।
    भावः करोति विकरोति पृथक्स्वभावः—
        सञ्चोदितस्तदखिलं भवतः स्वरूपम्॥
    माया मनः सृजति कर्ममयं बलीयः,
        कालेन चोदितगुणानुमतेन पुंसः।
    छन्दोमयं यदजयार्पितषोडशारं
        संसारचक्रमज कोऽतितरेत् त्वदन्यः॥
    स त्वं हि नित्यविजितात्मगुणः स्वधाम्ना,
        कालो वशीकृतविसृज्यविसर्गशक्तिः।
    चक्रे विसृष्टमजयेश्वर षोडशारे,
        निष्पीड्यमानमुपकर्ष विभो प्रपन्नम्॥
                                        (स्क. ७, अ. ९, श्लो. २०-२२)

चक्रस्य पारमियात्। मायैतस्मिन् षोडशारे चक्रे निक्षिप्य इक्षुमिव निष्पीडयति। भगवान् स्वचैतन्यशक्त्या बुद्धेः समग्रान् गुणान् सर्वदा वशीकृतान् विदधाति। कालरूपेण समग्रसाध्यसाधनानि च स्वायत्तीकरोति।

उपर्युक्ते स्थले भावसृष्टेः सुस्पष्टं निरूपणमस्तीति वक्तुं शक्यते, यदत्र भावसृष्टिनिरूपकं साङ्ख्यमस्तीति।

(८०)

अनन्तनाभेर्जगदुत्पत्तिप्रतिपादकं साङ्ख्यम्

श्रीमद्भागवतमहापुराणे सप्तमे स्कन्धे नवमेऽध्याये त्रिंशत्तमश्लोकतोऽष्टत्रिंशत्तमश्लोकं यावन्नृसिंहावतारे हिरण्यकशिपोर्वधे श्रीनृसिंह सान्त्वयितुं देवैः कृतायां स्तुताव-प्यशान्तं भगवन्तं नृहरिं सान्त्वयितुं प्रह्लादोऽस्तौषीत्। तस्य स्तवने सम्प्राप्तमनन्तनाभेर्जगदुत्पत्तिप्रतिपादकं साङ्ख्यमस्ति[1]। तदित्थम्—

जगदेतद्भगवत्स्वरूपमेवास्ति। यतोऽस्याऽऽदौ भगवान् एव कारणरूपेण तिष्ठत्यन्तेऽपि चावधिरूपेण भगवान् एव स्थास्यति, मध्येप्रतीतिरूपेणऽपि स एवाऽस्ति। भगवान् स्वमायया गुणानां परिणामस्वरूपस्य जगतः सृष्टिङ् कृत्वा अस्मिन् पूर्वतो विद्य-

---

१. एकस्त्वमेव जगदेतदमुष्य यत् त्व—
माद्यन्तयोः पृथगवस्यसि मध्यतश्च।
सृष्ट्वा गुणव्यतिकरं निजमाययेदं
नानेव तैरवसितस्तदनुप्रविष्टः॥
त्वं वा इदं सदसदीश भवांस्ततोऽन्यो
माया यदात्मपरबुद्धिरियं ह्यपार्था।
यद् यस्य जन्म निधनं स्थितिरीक्षणं च
तद् वै तदेव वसुकालवदष्टितर्वोः॥
न्यस्येदमात्मनि जगद् विलयाम्बुमध्ये,

मानोऽपिप्रवेशलीलाङ्करोति, गुणयुक्तश्च नैकविधो प्रतीयते। यत्कार्यकारणरूपेणावभासते तत्सर्वं भगवत्स्वरूपमेवाऽस्ति। यस्माद् यस्य जन्मस्थितिलयार्जायन्ते तत् तस्यैव स्वरूपं भवति। यथा बीजवृक्षौ कार्यकारणदृशा भिन्नौ स्तः। तथापि गन्धतन्मात्रदृशा उभावप्येकीभूतौ स्तः। भगवान् समग्रं जगत्स्वस्मिन्नन्तर्धायाऽऽत्मसुखमनुभवन् निष्क्रियः सन् प्रलयपयसि स्वपिति। तदा स्वयंसिद्धयोगेन ब्रह्माण्डमवरुध्य स्वरूपप्रकाशे निद्रायां लीनयति, तुरीये ब्रह्मपदे च तिष्ठति। तदा भगवान् तमोगुणाद्विषयोभ्यश्च सर्वथा पृथग्भवति; स्वकालशक्त्या प्रकृतिगुणांश्च प्रेरयति। अत एतद् ब्रह्माण्डं भगवच्छरीरमेवाऽस्ति पूर्वमेतद्भगवत्येव लीनमासीत्। यदा प्रलयपयसि शेषशय्यायां शयानेन योगनिद्रासमाधिः परित्यक्तस्तदा वटबीजाद् विशालं वृक्षमिव भगवन्नभसि ब्रह्माण्डकमलमुद्बभूव, तस्मिन्

शेषेऽऽत्मना निजसुखानुभवो निरीहः।
योगेन मीलितदृगात्मनिपीतनिद्र
स्तुर्ये स्थितो न तु तमो न गुणांश्च युङ्क्षे॥
तस्यैव ते वपुरिदं निजकालशक्त्या,
संचोदितप्रकृतिधर्मण आत्मगूढम्।
अम्भस्यनन्तशयनाद् विरमत्समाधे—
र्नाभेरभूत्स्वकणिकावटवन्महाब्जम्॥
तत्सम्भवः कविरतोऽन्यदपश्यमान—
स्त्वां बीजमात्मनि ततं स्वबर्हिविचिन्त्य।
नाविन्ददब्दशतमप्सु निमज्जमानो
जातेऽङ्कुरे कथमु होपलभेत बीजम्॥
स त्वात्मयोनिरतिविस्मित आस्थितोऽब्जं
कालेन तीव्रतपसा परिशुद्धभावः।
त्वामात्मनीश भुवि गन्धमिवातिसूक्ष्मं
भूतेन्द्रियाशयमये विततं ददर्श॥
एवं सहस्रवदनाङ्घ्रिशिरः करोरु—

सूक्ष्मदर्शी ब्रह्मा प्रादुरासीत् । यदा ब्रह्मा कमलातिरितक्तन्न किमप्यवालोकत् । तदा स्वस्मिन् बीजरूपेणावऽस्थितम्भगवन्तं स ज्ञातुन्नाऽशक्नोत् । तथा भगवन्तं बहिष्ठं विज्ञाय जले प्रविश्य शतवर्षाण्यन्वेषयामास परन्तु तत्र किमऽपि नाधिगतन्तत्समीचीनमेवाऽस्ति । यतोऽहङ्कारे जाते तस्मिन् व्याप्तं बीजं बहिर्प-वतयाऽवलोकयितुङ्कथमर्हति । ब्रह्माश्चर्यान्वितः श्रान्तः कमलेसमुपाविशत् । गले काले तीव्रया तपश्चर्यया यदा तस्य हृदयं विशुद्धं समभूत्, तदा भूतेन्द्रियान्तः करणरूपं स्वशरीर एवौतं-प्रौतञ्च स्थितं भगवत्स्वरूपं साक्षादकरोत् । विराट् पुरुषः सहस्रशः मुखपादहस्तोरू-नासिकाकर्णनेत्रादिभिरायुधैरलङ्करणैश्च सम्मन्न आसीत् । चतुर्दशभुवनानि तस्य विभिन्नावयवरूपेण विराजन्ते स्म । तं दृष्ट्वा ब्रह्मा परमां प्रीतिं समध्यगात् । रजोगुणतमोगुणरूपौ मधुकैटभौ महादैत्यावास्ताम् । यदा तौ वेदान्नपाहरताम्, तदा भगवता ह्यग्रीवाऽवतारो धृतः । तौ निहत्य सत्त्वगुणरूपाः श्रुतीः ब्रह्मणे प्रत्यर्पयत् । सः सत्त्वगुण एव भगवतः प्रियतमं शरीरमस्ति । पवं मनुष्यपशु-पक्षी-ऋषि-देव-मत्स्यादिस्वरूपेष्ववतरत् लोकानां पालनङ्करोति संहरणञ्च करोति । अवतरणैश्च स भगवात् प्रत्येक स्मिन् युगे युगधर्मान् रक्षति ।

नासास्यकर्णनयनाभरणायुधाढ्यम् ।
मायामयं सुदुपलक्षितसन्निवेशं—
दृष्ट्वा महापुरुषमाप मुदं विरिञ्चः ।।
तस्मै भवान् हयशिरस्तनुवं च बिभ्रद्
वेदद्रुहावतिबलौ मधुकैटभाख्यौ ।
हत्वाऽऽनयच्छ्रुतिगणांस्तु रजस्तमश्च
सत्त्वं तव प्रिततमां तनुमामनन्ति ।।
इत्थं नृ तिर्यगृषिदेवझषावतारै--
र्लोकान् विभावयसि हंसि जगत्प्रतीपान् ।
धर्मं महापुरुष पासि युगानुवृत्तं
छन्नः कलौ यदभवस्त्रियुगोऽथ स त्वम् ।।

(स्क. ७, अ. ९, श्लो. ३०-३८)

उपर्युक्ते स्थलेऽनन्तनाभेर्ब्रह्माण्डकमलं ततो ब्रह्मा ब्रह्मणश्च सृष्टिस्तथा तेनैवानन्तेन भगवता पालनङ् क्रियते, तेनैव संहृत्य स्वात्मन्येव च सर्वन्निधीयत इति प्रतिपादनाद् वक्तुं शक्यते यदत्रानन्तनाभेर्जगदुत्पत्तिप्रतिपादकं साङ्ख्यमस्तीति ।

(८१)

सगुणनिर्गुणोभयविधब्रह्मणः सृष्टिप्रतिपादकं साङ्ख्यम्

श्रीमद्भागवतमहापुराणे सप्तमे स्कन्धे नवमेऽध्याये सप्तचत्वारिंशत्तमश्लोकतः समारभ्य पञ्चाशत्तमश्लोकं यावत्प्रह्लादकृतायां भगवतः श्रीनृहरेः स्तुतौ सम्प्राप्तं सगुणनिर्गुणोभयविधब्रह्मणः सृष्टिप्रतिपादकं साङ्ख्यमस्ति[1] ।

---

१. रूपे इमे सदसती तव वेदसृष्टे,
बीजाङ्कुराविव न चान्यदरूपकस्य ।।
युक्ताः समक्षमुभयत्र विचिन्वते त्वां,
योगेन वह्निमिव दारुषु नान्यतः स्यात् ।।
त्वं वायुरग्निरवनिर्वियदम्बुमात्राः,
प्राणेन्द्रियाणि हृदयं चिदनुग्रहश्च ।
सर्वं त्वमेव सगुणो विगुणश्च भूमन्.
नान्यत् त्वदस्त्यपि मनोवचसा निरुक्तम्,
नैते गुणा न गुणिनो महदादयो ये ।
सर्वे मनः प्रभृतयः सहदेव मर्त्याः ।।
आद्यन्तवन्त उरुगाय विदन्ति हित्वा,
मैवं विमृश्य सुधियो विरमन्ति शब्दात् ।।
तत् तेऽर्हत्तम नमः स्तुति कर्मपूजाः ।
कर्म स्मृतिश्चरणयोः श्रवणं कथायाम् ।।
संसेवया त्वयि विनेति षडङ्गया किम् ।
भक्ति जनः परमहंसगतौ लभेत ।।
(स्क. ७ अ. ९ श्लो. ४७—५०)

तद् यथा—

वेदाः भगवतो बीजाङ्कुराणीव द्वे रूपे प्रतिपादयन्ति, कार्यकारणात्मके। वस्तुतोऽत्र भगवान् प्राकृतरूपेण विहीनोऽस्ति। परन्तु कार्यकारणरूपे विहाय भगवज्ज्ञापकं साधनान्तरन्नास्ति। काष्ठमन्थनेन यथाग्निर्प्रकटीक्रियते तथैव योगिनः भक्तियोगमाधनेन भगवन्तङ् कार्यकारणयोः समधिगच्छन्ति। वाय्वग्निपृथिव्याकाशापः पञ्चतन्मात्राणि, प्राणेन्द्रियमनश्चित्तमहङ्काराः, समग्रञ्जगत्, सगुणो निर्गुणश्च केवलं भगवान् एवाऽस्ति। मनसा वाचा च यन्निरूपितमस्ति, तत्सर्वं भगवत्यन्तर्भवति। सत्त्वादयो-गुणास्तेषां परिणामभूतानि महदादीनि तत्त्वानि देवाः मनुष्याश्च केऽपि स्वतन्त्रतया भगवत्स्वरूपं ज्ञातुन्न प्रभवन्ति। यतोऽत्रेमान्याद्यन्तमयानि भगवान् त्वनन्तोऽस्ति, एवं विज्ञाय ज्ञानिनः शब्दमायायारुपरमन्ते। भगवत्सेवायाः षडङ्गानि सन्ति, नमस्क्रिया स्तुतिः, सर्वकर्मसमर्पणं, सेवापूजा, चरणकमलानाञ्चिन्तनं लीलाकथानां श्रवणञ्चेति। एतां षडङ्गसेवां विना भगवच्चरणकमलभक्तिः कथं प्राप्तुं शक्यते? विना भक्त्या च कथं सः प्राप्तुमर्हः? अर्थादियं षडङ्गसेवा भगवत्प्राप्तये नितरामपेक्षिता भवतीति निश्चितम्।

उपर्युक्ते प्रसङ्गे सगुणस्य निर्गुणस्य च ब्रह्मणो निरूपणमस्तीत्यतो वक्तुं शक्यते यदत्र सगुणनिर्गणोभयविधब्रह्मणः सृष्टिप्रतिपादकं साङ्ख्यमस्तीति।

(८२)

पुरुषनिरुक्तिवादि साङ्ख्यम्

श्रीमद्भागवतमहापुराणे सप्तमे स्कन्धे चतुर्दशेऽध्यायेऽष्टत्रिंशत्तमे श्लोके देशकालादिविशेषेण गृहस्थधर्मनिरूपणप्रसङ्गे युधिष्ठिरम्प्रति देवर्षिणा श्रीनारदेन प्रतिपादितं पुरुषनिरुक्तिवादिसाङ्ख्यमस्ति[1]।

---

१. पुराण्यनेन सृष्टानि नृतिर्यगृषिदेवताः।
शेते जीवेन रूपेण पुरेषु पुरुषो ह्यसौ॥
तेष्वेषु भगवान् राजंस्तारतम्येन वर्त्तते।
तस्मात् पात्रं हि पुरुषो यावानात्मा यथेयते॥
(स्क. ७ अ. १४ श्लो. ३७—३८)

तद्यथा—भगवता मनुष्य-पशु-पक्ष्यृषि-देवतादीनां शरीररूपाणां पुरां सृष्टिर्विहिता तथा स भगवान् एव एतासु पुर्सु जीवरूपेण स्वपित्यपि, अतएव तस्य पुरुष इत्यप्यन्यतमं नामाऽस्ति। भगवान् स्वयमेकरसः सन्नपि न्यूनातिरिक्तरूपेण प्रकाशमयोऽस्ति। अतएव पशु-पक्ष्यादि-शरीरादिभ्य आपेक्षिकरूपेण मनुष्य एव श्रेष्ठं पात्रमस्ति। मनुष्येष्वपि यस्मिन् मनुष्ये भगवदंशः तपो योगादयो यावन्तोऽधिकाः सन्ति तावानेव स भवति गरीयान्।

उपर्युक्ते प्रसङ्गे सर्वजीवेषु वैविध्येन न्यूनातिरिक्ततया भगवान् विराजतेऽतोऽत्र इतरेभ्य आपेक्षिकरूपेण पुरुष एव श्रेष्ठः। पुरुषेष्वपि च यावत्पुरुषत्ववैपुल्यं तावदेव गरीयस्त्वमस्तीति प्रतिपादितमस्तीति वक्तुं शक्यते, यदत्र पुरुषनिरूक्तिवादि साङ्ख्यमस्तीति मन्तव्यमिति।

(८३)

शरीरादिषु रथादिरूपकनिरूपकं साङ्ख्यम्

श्रीमद्भागवतमहापुराणे सप्तमे स्कन्धे पञ्चदशाध्याय एकचत्वारिंशत्तम श्लोकतः समारभ्य षट्चत्वारिंशत्तमश्लोकं यावद् युधिष्ठिरम्प्रति देवर्षिणा श्रीनारदेन गृहस्थानाङ्कृते मोक्षधर्मनिरूपणावसरे प्रतिपादितं शरीरादिषु रथादिरूपकनिरूपकं साङ्ख्यमस्ति[1]। तदित्थम्

शरीरं रथमस्ति, इन्द्रियाण्यश्वाः सन्ति, इन्द्रियाणां स्वामी मनः कविकात्वम्भजते, शब्दादयो विषयाः पन्थानः सन्ति, बुद्धिः सारथी वर्त्तते, चित्तमेव भगवता निर्मिता बन्धनरज्जुरस्ति। दशप्राणाः धुरस्थाने सन्ति, धर्मा-धर्मौ चक्रे भवतः, एतेषामभिमानी जीवो रथी वर्त्तते, ओङ्कारश्चास्य रथिनो धनुर्वर्त्तते, शुद्धो जीवात्मा शरः, परमात्मा

---

१. आहुः शरीरं रथमिन्द्रियाणि हयानभीषून् मन इन्द्रियेशम्।
वर्त्मानि मात्रा धिषणां च सूतं सत्त्वं बृहद्बन्धुरमीशसृष्टम्॥
(स्क. ७ अ. १५ श्लो. ४१)

चास्य लक्ष्यमस्ति। रागद्वेष-लोभशोक-मोह-भय-मद-मानऽपमानाः परगुणेषुदोष-दर्शनञ्छलं हिंसा, परोन्नतिमवलोक्य विषादः, तृष्णा, प्रमादः, बुभुक्षा, निद्रादयो जीवानां बहवः शत्रवः सन्ति। तेषु रजोगुणप्रधानाः तमोगुणप्रधानाश्च वृत्तयः सन्ति। काचिदेव वृत्तिः सत्त्वगुणप्रधानऽपि भवति। एतन्मनुष्यशरीररूपं रथं यावत्स्ववशे वर्त्तते, तथाऽस्येन्द्रियाणि मनसादीनि च सर्वाण्यपि साधनानि स्वस्थावस्थायां सन्ति, तावदेव श्रीगुरूचरणकमलशुश्रूषया ज्ञानमधिगम्य, ज्ञानासिना भगवदाश्रयेण शत्रून्नेतान्निहत्य स्वस्वराज्य-सिंहासनमधिगच्छेत्। तदनन्तरं परमशान्तभावेन शरीरमपि जह्यात्। अन्यथा स्वल्पतमेऽपि प्रमादे ते इन्द्रियाश्वाः तैः सह मित्रता निर्वाहकः बुद्धिःस्वरूपी-सारथी रथिनं जीवं विपरीते पथि नीत्वा विषयस्वरूपिभ्यो लुण्ठकेभ्यो दास्यन्ति। ते लुण्ठकाः सारथिघोटकसहितं जीवाख्यं रथिनं मृत्युवशादत्यन्तं भयावहगाढ़ान्धकारमये, संसारकूपे निपातयिष्यन्ति।

उपर्युक्ते स्थले शरीरस्येन्द्रियाणां धर्मादीनां समेषामपि जीवब्रह्मपर्यन्तानां पदार्थानांर थादिरूपकेण शोभनन्नि निरूपणङ्कृतमित्यतो वक्तुं शक्यते, यदत्र शरीरादिषु रथादिरूपकनिरूपकं साङ्ख्यमस्तीति।

(८४)

त्रिविधाद्वैतप्रतिपादकं साङ्ख्यम्

श्रीमद्भागवतमहापुराणे सप्तमे स्कन्धे पञ्चदशेऽध्याये द्विषष्टितमश्लोकतः समारभ्य पञ्चषष्टितमश्लोकं यावद् गृहस्थानाङ्कृते मोक्षधर्मनिरूपणावसरे श्रीमता देवर्षिणा नारदेन श्रीमन्तं युधिष्ठिरं प्रति प्रतिपादितं त्रिविधाऽद्वैतप्रतिपादकं साङ्ख्यमस्ति[1]। तदित्थमत्रावबोद्धव्यम्

---

१. भावाद्वैतं क्रियाद्वैतं द्रव्याद्वैतं तथाऽऽत्मनः।
वर्त्तयन्स्वानुभूत्येह त्रीन्स्वप्नान्धुनुते मुनिः॥
कार्यकारणवस्त्वैक्यमर्शनं पटतन्तुवत्।
अवस्तुत्वाद् विकल्पस्य भावाद्वैतं तदुच्यते॥
यद्ब्रह्मणि परे साक्षात् सर्वकर्मसमर्पणम्।
मनोवाक्तनुभिः पार्थ क्रियाद्वैतं तदुच्यते॥
आत्मजायासुतादीनामन्येषां सर्वदेहिनाम्।
यत् स्वार्थकामयोरैक्यं द्रव्याद्वैतं तदुच्यते॥
(स्क. ७ अ. १५ श्लो. ६२—६५)

विचारशीलाः पुरुषाः स्वानुभूतिभिः आत्मनस्त्रिविधमद्वैतं साक्षात्कुर्वन्ति । ते जाग्रत्स्वप्नसुषुप्ति-द्रष्टा-दर्शनदृश्यभेदरूपं स्वप्नमपाकुर्वन्ति । तदिदमनेन प्रकारेण त्रिधा भवति, यद् भावाद्वैतङ्क्रियाद्वैतन्द्रव्याद्वैतञ्चेति । यथा वस्त्रं सूत्र प्ररूपमेव भवति, तथैव कार्याण्यपि कारणमात्रस्वरूपाणि सन्ति । यतो वस्तुतस्तु भेदो नैव वर्त्तते । इत्थं सर्वेषामैक्यस्य विचारो भावाद्वैतनाम्ना व्यपदिश्यते ।

मनसा वाचा शरीरेण च जायमानानि कर्माणि स्वयं परब्रह्मणि परमात्मन्येव भवन्ति । तस्मिन्नेव चाध्यस्तानि सन्ति । अनया भावनया समस्तकर्मणां समर्पणं क्रियाद्वैतनाम्ना निगद्यते ।

स्त्रीपुत्रादयः सम्बन्धिनस्तथा सांसारिकाणां समस्त-प्राणीनां स्वार्थाः भोगा श्चैक्यमयाः सन्ति, तेषु स्वत्वपरत्वभेदो नास्ति, इत्यादिरूपको विचारो द्रव्याद्वैत मिति कथ्यते ।

उपर्युक्ते प्रसङ्गे भावाद्वैतस्य क्रियाद्वैतस्य द्रव्याद्वैतस्य च सम्यक्तया निरूपणङ्कृतमस्तीति वक्तुं शक्यते, यदत्र त्रिविधाऽद्वैतप्रतिपादकं साङ्ख्यमस्तीति ।

—०—

श्रीमद्भागवतमहापुराणे

अष्टमः स्कन्धः

(८५)

भगवत्स्वरूपनिरूपकं साङ्ख्यम्

श्रीमद्भागवतमहापुराणेऽष्टमे स्कन्धे प्रथमेऽध्याये नवमश्लोकतः समारभ्य षोडशश्लोकं यावत्स्वायम्भुवादिमन्वन्तरचतुष्टयवर्णनप्रसङ्गे मनुना प्रतिपादितं भगवत्स्वरूपनिरूपकं साङ्ख्यमस्ति[1]।

तद् यथा—

यश्चेतनायाः स्पर्शमात्रेण विश्वञ्चेतयते, परमेतद् विश्वं यञ्चिन्तयितुं शक्तो न भवति, यश्च प्रलयेऽपि जागर्ति, यः सर्वज्ञश्चास्ति स एव परमात्मा वर्त्तते। समग्रं जगत् जगद्वासिनः सर्वेऽपि चराचरास्तेन परमात्मना ओताश्च प्रोताश्च सन्ति। अतः सांसारिके कस्मिंश्चिदपि पदार्थे मोहमकुर्वन् तत्त्यागञ्च कुर्वन् जीवनन्निर्व्योढु

---

१. येन चेतयते विश्वं विश्वं चेतयते च यम्।
यो जागर्ति शयानेऽस्मिन्नायं तं वेद वेद सः॥
आत्मावास्यमिदं विश्वं यत् किंचिज्जगत्यां जगत्।
तेन त्यक्तेन भुञ्जीथा मा गृधः कस्यस्विद्धनम्॥
यं न पश्यति पश्यन्तं चक्षुर्यस्य न रिष्यति।
तं भूतनिलयं देवं सुपर्णमुपधावत॥
न यस्याद्यन्तौ मध्यं च स्वः परो नान्तरं बहिः।
विश्वस्यामूनि यद्यस्माद् विश्वं च तदृतं महत्॥
स विश्वकायः पुरुहूत ईशः।

मेवोपयोगङ्कुर्यात् । तृष्णा सर्वथा परिहेया । सांसारिक्य: सम्पद: कस्यापि नैव सन्ति, भगवान् सर्वेषां साक्षी वर्त्तते, बुद्धिवृत्तय: नेत्रादीनीन्द्रियाणि च द्रष्टुनैव शवनुवन्ति । यस्य परमात्मनआद्यन्तौ न स्त:, तस्य मध्यन्तु कथं भवेत् । यस्य स्वं परकीयं वा नास्ति यस्य बहिरन्तश्च नास्ति । स: विश्वस्यादिरन्तोमध्यश्च स्वे परकीये बहिरन्यश्च सर्वं वर्त्तते । तस्य सत्तयैव विश्वस्य सत्ताऽस्ति । सोऽनन्त: वस्तुसत्यं परमं ब्रह्माऽस्ति । स एव विश्वस्य रूपमस्ति । तस्यानन्तानि नामानि सन्ति । स: सर्वशक्तिमान् सत्य: स्वयंप्रकाशोऽजन्मा पुराणपुरुषश्चाऽस्ति । स: स्वमायाशक्त्यैव विश्वसृष्टेर्जन्मादीन् स्वीकरोति । स्वीयया विद्याशक्त्या च तत्त्यक्त्वा नि:स्पृही सत्त्वस्वरूपमात्रं तिष्ठति । अतएवर्षयो मनवश्च नैष्कर्म्य-स्थितिमर्थात् ब्रह्मैकत्वं प्राप्तुङ्कर्मयोगमनुतिष्ठन्ते । प्राय: कर्मकर्त्तैवान्ते निष्क्रिय: सन् कर्मभ्यो मुक्तो भवति । सर्वशक्तिमान् भगवानपि कर्माणि करोति । परं सोऽत्राऽऽत्मलाभात्परिपूर्णकामत्वात् तेषु कर्मष्वनासक्तो भवति । अतस्तमनुसृत्याऽनासक्ता: कर्माणि कुर्वन्तोऽपि कर्मबन्धनेभ्यो मुक्ता एव तिष्ठन्ति । भगवान् ज्ञानस्वरूपी वर्त्ततेऽ तस्तस्मिन् ज्ञानस्यांशोऽपि नैव वर्त्तते । स: सर्वथा परिपूर्णोऽस्ति । अतएव सोऽत्र किमपि नेहते । भगवान् कस्यापि प्रेरणां विनैव स्वच्छन्दतया कर्माणि करोति । स: स्वमर्यादायामेव स्थित: सन् स्वकर्मभि: नृन् शिक्षयति । स एव सर्वेषामपि धर्माणां प्रवर्त्तकोऽस्ति ।

सत्य: स्वयंज्योतिरज: पुराण: ।।
धत्तेऽस्य जन्माद्यजयाऽऽत्मशक्त्या ।
तां विद्ययोदस्य निरीह आस्ते ।।
अथाग्रे ऋषय: कर्माणीहन्तेऽकर्महेतवे ।
ईहमानो हि पुरुष: प्रायोऽनीहां प्रपद्यते ।।
ईहते भगवानीशो न हि तत्र विषज्जते ।
आत्मलाभेन पूर्णार्थो नावसीदन्ति येऽनु तम् ।।
तमीहमानं निरहंकृतं बुधं ।
निराशिषं पूर्णमनन्यचोदितम् ।
नृञ्छिक्षयन्तं निजवर्त्मसंस्थितं ।
प्रभुं प्रपद्येऽखिलधर्मभावनम् ।।

(स्क. ८ अ. १ श्लो. ९—१६)

उपर्युक्ते प्रसङ्गे भगवतः स्वरूपनिरूपणमस्तीति वक्तुं शक्यते, यदत्र भगवत्स्वरूपनिरूपकं साङ्ख्यमस्तीति ।

(८६)

गुणसम्प्रवाहनिरूपकं साङ्ख्यम्

श्रीमद्भागवतमहापुराणेऽष्टमे स्कन्धे तृतीयेऽध्याये द्वितीयश्लोकतः समारभ्यैकोनत्रिंशत्तमश्लोकं यावद् गजेन्द्रकृतभगवत्स्तवने ग्राहाद्गजेन्द्रस्य मोक्षणे च समधिगतं गुणसम्प्रवाहनिरूपकं साङ्ख्यमस्ति[1] ।

तदित्थम्—

भगवान् विष्णुर्जगतां मूलकारणमस्ति, समेषां हृदयेषु च पुरुष-रूपेण विराजते । सर्वजगतामेकः स्वामी वर्त्तते । यमाश्रित्य संसृतौ चेतना विस्तीर्यते । जगदेतत्तस्मिन्नेव स्थितमस्ति । तस्य सत्यमेव प्रतीयते । स एवैतस्मिन् व्याप्तोऽस्ति तथा स एवैतस्य रूपेण प्रकटितोऽस्ति । एवं सत्यपि सः संसृतेः संस्सृतिकारणभूतायाः प्रकृतेश्च सर्वथा परोऽस्ति । सः स्वयंप्रकाशः स्वयंसिद्धः सत्तात्मकः सर्वेषां शरण्योऽस्ति । जगत्प्रपञ्चः तस्य माययैव तस्मिन्नध्यस्तोऽस्ति । अतोऽत्र कदाचित् प्रतीयते कर्हिचिच्च नैव, परन्तु,

---

१. ॐ नमो भगवते तस्मै यत एतच्चिदात्मकम् ।
पुरुषायादिबीजाय परेशायाभिधीमहि ।।
यस्मिन्निदं यतश्चेदं येनेदं य इदं स्वयम् ।
योऽस्मात् परस्माच्च परस्तं प्रपद्ये स्वयम्भुवम् ।।
यः स्वात्मनीदं निजमाययार्पितं ।
क्वचिद् विभातं क्व च तत् तिरोहितम् ।।
अविद्धदृक् साक्ष्युभयं तदीक्षते
स आत्ममूलोऽवतु मां परात्परः ।।

तस्य समदृष्टिः सर्वदैव तिष्ठति । सैवास्य साक्षी वर्त्तते, सर्वेषां स्वस्य च मूलमस्ति । तस्य कारणान्तरन्नास्ति । प्रलये लोकाः, लोकपालाः तेषाङ्कारणानि च सर्वथा विनश्यन्ति । तदा केवलं गाढन्तमः एवावतिष्ठते । परमनन्तः परमात्मा तस्मात्परो विराजते । तस्य लीलारहस्यविज्ञानं नातिसुकरम् । सोऽत्र नटमिव नैकरूपाणि धारयति, तस्य वस्तुस्वरूपन्तु देवाः ऋषयो वापि केचनैव जानन्ति । यस्य परममङ्गलमयानि दर्शनानि कर्तुं महात्मानः संसृतेः सर्वा आसक्तयः परित्यजन्ति । वनङ्गत्वाऽखण्डभावेन ब्रह्मचर्यादीना-मलौकिकानां व्रतानां पालनङ्कुर्वन्ति । तथा स्वात्मानं सर्वहृदयेषु विराजमानमवलोकयन्तः स्वाभाविकरूपेण सर्वहितमाचरन्ति । न भगवतो जन्मकर्माणि

कालेन पञ्चत्वमितेषु कृत्स्नशो,
लोकेषु पालेषु च सर्वहेतुषु ।
तमस्तदासीद् गहनं गभीरं,
यस्तस्य पारेऽभिविराजते विभुः ।।
न यस्य देवा ऋषयः पदं विदु,
र्जन्तुः पुनः कोऽर्हति गन्तुमीरितुम्,
यथा नटस्याकृतिभिर्विचेष्टतो,
दुरत्ययानुक्रमणः स मावतु ।।
दिदृक्षवो यस्य पदं सुमङ्गलं,
विमुक्तसङ्गा मुनयः सुसाधवः ।।
चरन्त्यलोकव्रतमव्रणं वने,
भूतात्मभूताः सुहृदः स मे गतिः ।।
न विद्यते यस्य च जन्म कर्म वा,
न नामरूपे गुणदोष एव वा ।
तथापि लोकाप्ययसम्भवाय यः,
स्वमायया तान्यनुकालमृच्छति ।।
तस्मै नमः परेशाय ब्रह्मणेऽनन्तशक्तये,
अरूपायोरुरूपाय नम आश्चर्यकर्मणे ।।

सन्ति, न नामरूपाणि चापि, तर्हि तत्सम्बन्धे गुणदोषकल्पनापि कर्त्तुङ्कथं शक्यते। तथापि जगतां सृष्टिसंहरणाभ्यां समये-समये सः स्वमायया गुणदोषान् नामरूपाणि जन्मकर्माणि च स्वीकरोति। सः स्वरूपशून्यः सन्नपि नैकरूपोऽस्ति, तस्य कर्माण्याश्चर्योत्पादकानि सन्ति। स्वयंप्रकाशः सर्वसाक्षी परमात्मा समेषां वन्द्योऽस्ति। सोऽत्र मनसा वाचा चेतसाऽपि चागोचरोऽस्ति। विवेकिनो पुरुषाः कर्मसंन्यासेन कर्मसमर्पणेन वा स्वस्वान्तं विशोध्य यं प्राप्नुवन्ति, सः नित्यमुक्तः परमानन्दमयो ज्ञानस्वरूपी वर्त्तते। स एव कैवल्यमुक्तिदोऽस्ति, सत्त्वरजस्तमसां त्रयाणामपि गुणानां धर्मान्

नम आत्मप्रदीपाय साक्षिणे परमात्मने,
नमो गिरां विदूराय मनसश्चेतसामपि ।।
सत्त्वेन प्रतिलभ्याय नैष्कर्म्येण विपश्चिता।
नमः कैवल्यनाथाय निर्वाण सुखसंविदे ।।
नमः शान्ताय घोराय मूढाय गुणधर्मिणे।
निर्विशेषाय साम्याय नमो ज्ञानघनाय च ।।
क्षेत्रज्ञाय नमस्तुभ्यं सर्वाध्यक्षाय साक्षिणे।
पुरुषायात्ममूलाय मूलप्रकृतये नमः ।।
सर्वेन्द्रियगुणद्रष्ट्रे सर्वप्रत्ययहेतवे।
असताच्छाययोक्ताय सदाभासाय ते नमः ।।
नमो नमस्तेऽखिलकारणाय,
निष्कारणायाद्भुतकारणाय ।।
सर्वागमाम्नायमहार्णवाय।
नमोऽपवर्गाय परायणाय ।।
गुणारणिच्छन्नचिदूष्मपाय,
तत्क्षोभ विस्फूर्जितमानसाय।
नैष्कर्म्यभावेन विवर्जितागम।
स्वयंप्रकाशाय नमस्करोमि ।।
मादृक्प्रपन्नपशुपाशविमोक्षणाय,
मुक्ताय भूरिकरुणाय नमोऽलयाय।

स्वीकृत्य क्रमशः शान्तघोरमूढाख्याः तिस्रोऽवस्थाः स्वीकरोति, स भेदरहितः समभावेन स्थितः ज्ञानधनश्चास्ति। भगवान् समेषां स्वामी सर्वक्षेत्रेष्वेको ज्ञाता सर्वसाक्षी च वर्त्तते। पुरुषमूलप्रकृतिरूपेऽपि भगवत एव स्तः। स एव समस्तेन्द्रियाणां विषयाणाञ्च द्रष्टाऽस्ति, सर्वप्रतीतिनामाधारोऽस्ति, अहङ्कारादिभिः सदसद्वस्तुभिश्चापि भगवद् अस्तित्वमेव प्रकटीभवति। सर्ववस्तुसत्तात्वेनापि भगवान् एव भासते, भगवति विकाराः परिणतयश्च न भवन्तीति जगतामाश्चर्यावहं कारणमस्ति यथा सर्वसरिन्निर्झ-राणां परमाश्रयः पयोधिरस्ति। तथैव भगवान् सर्ववेदानां शास्त्राणाञ्च परमार्थभूतो-ऽस्ति। भगवान् एव मोक्षस्वरूपी वर्त्तते। सर्वसाधवो भगवन्तन्तमेवाश्रयन्ते। यथा यज्ञाग्निररणौ सुगुप्तः तिष्ठति तथैव भगवता स्वज्ञानं माययाच्छादितमस्ति। भगवान् गुणेषु क्षुब्धेषु सत्सु तैः नैकविधां सृष्टिं सङ्कल्पयते। ये जनाः कर्मसंन्यासेन कर्मसमर्प-णेन वा स्वाऽऽत्मतत्त्वं विभाव्य वेदशास्त्रेभ्यश्चोद्गच्छन्ति, तेषामात्मस्वरूपेण भगवान् स्वयमेव प्रकाशते। यथा कोऽपि दयार्द्रः पुरुषो पाशपतितस्य पशोर्बन्धनं छिन्द्यात् तथैव भगवान् स्वशरणागतानां पाशान् छिनत्ति नित्यमुक्तः परम करुणामयश्चास्ति भगवान्। अतएव भवतानां श्रेयसे न कर्हिचिद प्यलासयते। भगवान् समेषामपि प्राणिनां स्वान्तेषु

स्वांशेन सर्वतनुभृन्मनसि प्रतीत।
प्रत्यग्दृशे भगवते बृहते नमस्ते॥
आत्मात्मजाप्तगृहवित्तजनेषु सक्तै।
र्दुष्प्रापणाय गुणसङ्गविवर्जिताय॥
मुक्तात्मभिः स्वहृदये परिभाविताय।
ज्ञानात्मने भगवते नम ईश्वराय॥
यं धर्मकामार्थविमुक्तिकामा।
भजन्त इष्टां गतिमाप्नुवन्ति॥
किं त्वाशिषो रात्यपि देहमव्ययं।
करोतु मेऽदभ्रदयो विमोक्षणम्॥
एकान्तिनो यस्य न कञ्चनार्थं।
वाञ्छन्ति ये वै भगवत्प्रपन्नाः॥
अत्यद्भुतं तच्चरितं सुमङ्गलं॥
गायन्त आनन्दसमुद्रमग्नाः॥

स्वांशेनऽन्तरात्मत्वेनोपलभ्यते। सः सर्वैश्वर्यपूर्णोऽनन्तश्च वर्त्तते। ये जनाः शरीरेषु पुत्रेषु गुरूजनेषु गृहसम्पत्सु स्वजनेषु जागत्सु स्वशरीरेषु चासक्ताः भवन्ति। ते भगवन्तं समधिगन्तुं अतिकाठिन्यन कर्हिचिदेव शक्नुवन्ति, यतो भगवान् गुणेभ्यो पृथगस्ति, जीवन्मुक्तः पुरुषः स्वस्वान्ते सततं भगवन्तं चिन्तयति। धर्मार्थकाममोक्षाणां कामनया मानवस्तमेव भजन् स्वेष्टं प्राप्तुं शक्नोति। भगवान् भक्ताय स्वेष्टेन सहैवाऽविनाशि पार्षदशरीरं यच्छति। योऽविनाशी सर्वशक्तिमान् इन्द्रियातीतोऽव्यक्तोऽत्यन्तं सूक्ष्मश्चास्ति। योऽत्यन्तन्नेदीयान् सन्नपि बहुदूरष्ठमिव प्रतीयते, यः ज्ञानयोगभक्तियोगाभ्याम्प्राप्यते। सोऽत्र सर्वेषामस्ति वन्दनीयः। यस्य स्वल्पतमयाऽपि कलया नैकविधनामरूपाणाम्भेदेन मुक्तानाम्ब्रह्मादीनां वेदानां चराचरात्मकस्य जगतश्च सृष्टिः समभूत्। यथा प्रज्वलिताद्वह्नेः ज्वालाः, प्रकाशः, मयात्सूर्यात् तस्य गभस्तयश्च भूयो-भूयः निःसरन्ति लीनाश्च भवन्ति, तथैव चाऽत्र बुद्धिः, मनः, यस्मात् स्वयंप्रकाशमयात्परमात्मनः इन्द्रियाणि, शरीरञ्चेति जायन्ते लीयन्ते च। सः परमात्मा न देवता, नासुरः, न नरो, न पशुः, न पक्षी, न स्त्री, न पुरुषः, न क्लीबः, साधारणोऽसाधारणश्च, प्राण्यपि नास्ति न गुणः, न कर्म, न कार्यम्, न कारणमित्थं सर्वनिषेधे यदवशिष्यते तदेव तस्य

तमक्षरं ब्रह्म परं परेश
मव्यक्तमाध्यात्मिकयोगगम्यम्।
अतीन्द्रियं सूक्ष्ममिवातिदूर
मनन्तमाद्यं परिपूर्णमीडे॥
यस्य ब्रह्मादयो देवा वेदा लोकाश्चराचराः।
नामरूपविभेदेन फल्गव्या च कलया कृताः॥
यथार्चिषोऽग्नेः सवितुर्गभस्तयो,
निर्यान्ति संयान्त्यसकृत् स्वरोचिषः॥
तथा यतोऽयं गुणसम्प्रवाहो।
बुद्धिर्मनः खानिशरीरसर्गाः॥
स वै न देवासुरमर्त्यतिर्यङ्।
न स्त्री न षण्ढो न पुमान् न जन्तुः॥
नायं गुणः कर्म न सन्न चासन्।

स्वरूपमस्ति, स एव सर्वस्वमस्ति । जीवो बहिरन्तश्चाज्ञानेनाऽऽवृत्तोऽस्ति । तज्ज्ञानं कालक्रमेण नैव नश्यत्यपि तु तत्तु केवलं भगवत्कृपयैव प्राप्तेत्त्वज्ञानेन विनश्यति ।

भगवान् विश्वस्यान्तरात्मस्वरूपेण विश्वरूपसामग्र्या क्रीडति । सोऽजन्मा परमपदस्वरूपी परमात्मा वन्द्योऽस्ति । योगिनः योगेन कर्मवासना कर्मफलानि च वशीकृत्य स्वयोगशोधिते हृदये योगीश्वरं भगवन्तं साक्षात्कुर्वन्ति । भगवतः तिस्रः शक्तयः सत्त्वस्य रजसस्तमसश्च रागादिवेगरूपारसह्याः सन्ति । अवशेन्द्रियास्तु भगवत्प्राप्ति-पन्थानमप्यधिगन्तुन्नैव शक्नुवन्ति । भगवच्छक्तिरिहाऽनन्ताऽस्ति । भगवन्माय याहम्बुद्ध्याऽऽत्मस्वरूपन्तिरोहितमस्ति । अस्मादेव जीवोऽयं स्वरूपं ज्ञातुन्नैव शक्नोति भगवन्महिमाऽनन्तोऽस्ति । सः सर्वशक्तिमान् माधुर्यनिधिश्च वर्त्तते ।

उपर्युक्ते प्रसङ्गे गुणसम्प्रवाहस्य भगवत्स्वरूपेण वर्णनमस्तीत्यतो वक्तुं शक्यते यदत्र गुणसम्प्रवाहनिरूपकं साङ्ख्यमस्तीति ।

निषेधशेषो जयतादशेषः ।।
जिजीविषे नाहमिहामुया कि —
मन्तर्बहिश्चावृतयेभयोन्या,
इच्छामि कालेन न यस्य विप्लव—
स्तस्यात्मलोकावरणस्य मोक्षम् ।।
सोऽहं विश्वसृजं विश्वमविश्वं विश्ववेदसम्,
विश्वात्मानमजं ब्रह्म प्रणतोऽस्मि परं पदम ।
योगरन्धितकर्माणो हृदि योगविभाविते ।
योगिनो यं प्रपश्यन्ति योगेशं तं नतोऽस्म्यहम् ।।
नमो नमस्तुभ्यमसह्यवेग,
शक्तित्रसायाखिलधीगुणाय ।
प्रपन्नपालायदुरन्तश क्तये,
कदिन्द्रियाणामनवाप्य वर्त्मने ।।
नायं वेद स्वमात्मानं यच्छक्त्याहंधिया हतम् ।
तंदुरत्ययमाहात्म्यं भगवन्तमितोऽस्म्यहम् ।।
(स्क. ८ अ. ३ श्लो. २—२९)

(८७)

अक्षरब्रह्मप्रतिपादकं भावविभावप्रतिपादकञ्च साङ्ख्यम्

श्रीमद्भागवतमहापुराणे ऽष्टमे स्कन्धे पञ्चमेऽध्याये षड्विंशतितमश्लोकतः पञ्चाशत्तमश्लोकं यावद् ब्रह्मणा श्रीभगवत्स्तवने व्याहृतमक्षरब्रह्मप्रतिपादकं साङ्ख्यमस्तीति[1]।

तदित्थम्—भगवान्निर्विकारः सत्योऽनन्त आदिपुरुषः सर्वेषां स्वान्तेष्वन्तर्यामिस्वरूपेण स्थितो ऽखण्डो ऽतर्क्यश्चास्ति। मनोवाचौ भगवन्तन्निरूपयितुन्नैव प्रभवतः। भगवान् सर्वदेवानामाराधनीयः स्वयंप्रकाशो वर्त्तते। प्राण-बुद्धि-मनोहङ्काराणाञ्ज्ञातास्ति। इन्द्रियाणि तेषां विषयाश्च भगवतैव प्रकाश्यन्ते। अज्ञानं तं स्पृष्टुमपि नार्हति। प्रकृतिविकारभूताज्जन्ममृत्युमयाच्छरीरादपि पृथगस्ति। जीवस्य उभेऽपि

---

१. अविक्रियं सत्यमनन्तमाद्यं,
गुहाशयं निष्क्रियमप्रतर्क्यम्।
मनोऽग्रयानं वचसानिरूक्तं,
नमामहे देववरं वरेण्यम्॥
विपश्चितं प्राणमनोधियात्मना—
मर्थेन्द्रियाभासमनिद्रमव्रणम्।
छायातपौ यत्र न गृध्रपक्षौ,
तमक्षरं खं त्रियुगं व्रजामहे॥
अजस्य चक्रं त्वजयेर्यमाणं
मनोमयं पञ्चदशारमाशु।
त्रिणाभि विद्युच्चलमष्टनेमि
यदक्षमाहुस्तमृतं प्रपद्ये॥
य एकवर्णं तमसः परं त—

विद्याऽविद्यात्मके उभेऽपि पक्षे भगवति नैव स्तः। भगवान्नविनाशी सुखस्वरूपी च वर्त्तते। सत्यत्रेताद्वापरेषु तु भगवान् प्रकटरूपेण विराजते। शरीरमेतज्जीवस्य मनोमयचक्र-मस्ति। दशेन्द्रियाणि पञ्चप्राणाश्चेति पञ्चदशैतस्याऽराणि सन्ति। सत्त्वगुण: रजो गुण: तमोगुणश्चेति गुणारस्य नाभिस्वरूपा: वर्त्तन्ते। पृथिव्यप्तेजोवाय्वाकाशा: मनो बुद्धिरहङ्कारश्चेत्यष्टौ नेमिस्वरूपा: सन्ति। स्वयं मायैनं सञ्चालयति। विद्युदपेक्षयापि शीघ्रगामी वर्त्तते। चक्रस्यास्य धुररूपेण परमात्मा विराजते। सोऽयं परमात्मैव सत्योऽस्ति य: ज्ञानस्वरूपी प्रकृतेर्परोऽदृश्यश्चास्ति, समस्तवस्तूनांमूलस्थोऽव्यक्तो ऽस्ति; देशकालवस्तुभिर्य: ज्ञातुं न शक्यते। स एव प्रभु: जीवस्यास्य स्वान्तेऽन्तर्यामी-स्वरूपेण विराजते। विचारशीला: पुरुषा: भक्तियोगेन तमेवाराधयन्ति। यया मायया मोहितो जीव: स्वीयं वास्तविकं लक्ष्यं स्वरूपं च विस्मृतोऽस्ति, सा माया तस्यैव परमात्मनो वर्त्तते, अन्यो कोऽपि मायाया: पारमधिगन्तुन्नार्हति। सर्वशक्तिमान् प्रभु: स्वमायां तथा मायागुणान् स्ववशीकृत्य समग्रप्राणिनां स्वान्तेषु समभावेन विचरति। जीवो

दलोकमव्यक्तमनन्तपारम्।
आसाञ्चकारोपसुपर्णमेनमुपासते योगरथेन धीरा:॥
न यस्य कश्चातितितर्ति मायां,
यया जनो मुह्यति वेदनार्थम्।
तं निर्जितात्मात्मगुणं परेशं,
नमाम भूतेषु समं चरन्तम्॥
इमे वयं तत्प्रिययैव तन्वा,
सत्त्वेन सृष्टा बहिरन्तराविः।
गतिन्न सूक्ष्मामृषयश्च विद्महे,
कुतोऽसुराद्या इतर प्रधाना:॥
पादौ महीयं स्वकृतैव यस्य,
चतुर्विधो यत्र हि भूतसर्ग:।
स वै महापूरुष आत्मतन्त्र:
प्रसीदतां ब्रह्म महाविभूति:॥
अम्भस्तु यद्रेत उदारवीर्यं सिध्यन्ति जीवन्त्युत वर्धमान:,
लोकास्त्रयोऽथाखिललोकपाला: प्रसीदतांब्रह्ममहाविभूति:॥
सोमं मनो यस्य समामनन्ति,

भगवत्कृपयैव भगवन्तं प्राप्तुं शक्नोति, न तु पुरुषार्थेन । मनुष्याः सुराः, ऋषयश्चापि भगवतः परमप्रियात् सत्त्वमयात् शरीरादेवोत्पन्नाः सन्ति, तथापि तस्य बहिरन्तश्चैकर सात्मकं स्वरूपं ज्ञातुन्न प्रभवन्ति । तर्हि रजोगुणतमोगुणप्रधानाः ह्यसुरादयस्तु तङ्कथं ज्ञातुं शक्नुयुः । भगवन्निर्मितेयं भूः तस्य चरणौ स्तः । भुवि जरायुजाण्डजस्वेदजोद्भिज्जाख्याः प्राणिनो निवसन्ति । परमशक्तिमज्जलं भगवद्वीर्यमस्ति, अस्माज्जलादेव त्रयोऽपि लोकाः लोकपालाश्च समुद्भवन्ति, वर्धन्ते, जीवन्ति च । चन्द्रस्तस्य मनोऽस्ति । चन्द्रस्वरूपेण समग्रदेवानामन्नं बलमायुश्च वर्त्तते । स एव वृक्षाणां सम्राडेव प्रजानामभिवर्धकोऽस्ति । अग्निः प्रभोर्मुखमस्ति । अग्नेरुत्पत्तिः वैदिकानि यागादीनि कर्माणि पूर्णतया सम्पन्नानि सन्त्विति समजायत । अग्निः शरीरे जठराग्निरूपेण समुद्रे बडवाग्निरूपेण तिष्ठन् तत्स्थान्नन्नजलादीन् धातून् पचति । समग्राणां द्रव्याणा-

---

दिवौकसां वै बलमन्ध आयुः ।
ईशो नगानां प्रजनः प्रजानाम्,
प्रसीदतां नः स महाविभूतिः ।।
अग्निर्मुखं यस्य तु जातवेदा,
जातः क्रियाकाण्डनिमित्तजन्मा ।
अन्तः समुद्रेऽनुपचन् स्वधातून्,
प्रसीदतां नः स महाविभूतिः ।।
यच्चक्षुरासीत् तरणिर्देवयानं,
त्रयीमयो ब्रह्मण एष धिष्ण्यम् ।
द्वारं च मुक्तेरमृतं च मृत्युः,
प्रसीदतां नः स महाविभूतिः ।।
प्राणादभूद् यस्य चराचराणां ।।
प्राणः सहो बलमोजश्च वायुः ।
अन्वास्म सम्राजमिवानुगा वयं,
प्रसीदतां नः स महाविभूतिः ।।
श्रोत्राद्दिशो यस्य हृदश्च खानि प्रजज्ञिरे खं पुरुषस्य नाभ्याः ।
प्राणेन्द्रियात्मासुशरीरकेतं प्रसीदतां नः स महाविभूतिः ।।

मुत्पत्तिरप्यग्नेरजायत । येन भगवता जीवो देवयानमार्गेण ब्रह्मलोकं प्राप्नोति । यो देवानां साक्षान्मूर्त्तिः भगवद्ध्येयन्नधामाऽस्ति, यः पुण्यलोकस्वरूपत्वात् मुक्तिद्वारममृतमयश्च वर्त्तते; कालरूपत्वान्मृत्युरस्ति । सूर्यस्तस्य नेत्रमस्ति । प्रभोर्प्राणेभ्य एव चराचरस्य प्राणाः तथा तेषां शारीरिकमानसिकैन्द्रियकबलप्रदो वायुरजायत । स भगवान् चक्रवर्ती सम्राडस्ति, तथेन्द्रियाधिष्ठातृदेवतास्तस्यानुचराः सन्ति । यस्य कर्णाभ्यां दिशः, हृदयादिन्द्रियगोलकानि, नाभेराकाशश्चाजायन्त । प्राणापानोदानसमानव्यानाः, दशेन्द्रियाणि मनः नागकूर्मकृकलदेवदत्तधनञ्जयाख्यारसवः सर्वमेतत् तस्यैव स्वरूपा-

---

बलान्महेन्द्रस्त्रिदशाः प्रसादा—
न्मन्योर्गिरीशो धिषणाद् विरिञ्चः ।
खेभ्यश्च छन्दांस्यृषयो मेढ्तः कः
प्रसीदतां नः स महाविभूतिः ।।
श्रीर्वक्षसः पितरश्छाययाऽऽसन्,
धर्मः स्तनादितरः पृष्ठतोऽभूत् ।
द्यौर्यस्य शीर्ष्णोऽप्सरसो विहारात्
प्रसीदतां नः स महाविभूतिः ।।
विप्रो मुखं ब्रह्म च यस्य गुह्यं
राजन्य आसीद् भुजयोर्बलं च ।
ऊर्वोर्विडोजोऽङ्घ्रिरवेदशूद्रौ
प्रसीदतां नः स महाविभूतिः ।।
लोभोऽधरात् प्रीतिरुपर्यभूद्द्युति
र्नस्तः पशव्यः स्पर्शेन कामः ।
भ्रुवोर्यतः पक्ष्मभवस्तु कालः
प्रसीदतां नः स महाविभूतिः ।।
द्रव्यं वयः कर्मगुणान् विशेषं
यद्योगमायाविहितान्वदन्ति ।

त्मकंन् शरीरस्याश्रयश्चापि स एव भगवान् परमैश्वर्यशाली विराजते । यस्य बलादिन्द्रः प्रसादात् समस्तदेवगणाः, क्रोधाच्छङ्कारः, बुद्धेर्ब्रह्मा, इन्द्रियेभ्यो वेदाः ऋषयश्च, लिङ्गाच्च प्रजापतिरयाजत। भगवतो वक्षःस्थलात् लक्ष्मीः, छायायाः पितृगणाः, स्तनाभ्यां धर्मः, पृष्ठादधर्मः, शिरस आकाशः, विहाराच्चाप्सरसोऽजायन्त।

यस्य मुखाद् ब्राह्मणाः सरहस्या वेदाः, बाहुभ्यां क्षत्रियाः बालानि, च ऊरुभ्यां वैश्यास्तेषां वृत्तिश्च, चरणाभ्यां वेदबाह्याः शूद्रास्तेषां वृत्तिः सेवा चाजायत। यस्याधरात्

यद्दुर्विभाव्यं प्रबुधापबाधं
प्रसीदतां नः स महाविभूतिः ।।
नमोऽस्तु तस्मा उपशान्तशक्तये
स्वाराज्यलाभप्रतिपूरितात्मने ।
गुणेषु मायारचितेषु वृत्तिभि-
र्न सज्जमानाय नभस्वदूतये ।।
स त्वं नो दर्शयात्मानमस्मत्करणगोचरम् ।
प्रपन्नानां दिदृक्षूणां सस्मितं ते मुखाम्बुजम् ।।
तैस्तैः स्वेच्छाधृतै रूपैः काले काले स्वयं विभो ।
कर्म दुर्विषहं यन्नो भगवांस्तत् करोति हि ।।
क्लेशभूर्यल्पसाराणि कर्माणि विफलानि च ।
देहिनां विषयार्तानां न तथैवार्पितं त्वयि ।।
नावमः कर्मकल्पोऽपि विफलायेश्वरार्पितः ।
कल्पते पुरुषस्यैष स ह्यात्मा दयितो हितः ।।
यथा हि स्कन्धशाखानां तरोर्मूलावसेचनम् ।
एवमाराधनं विष्णोः सर्वेषामात्मनश्च हि ।।
नमस्तुभ्यमनन्तायदुर्वितर्क्यात्मकर्मणे ।
निर्गुणाय गुणेशाय सत्त्वस्थाय च साम्प्रतम् ।।
(स्क. ८, अ. ५, श्लो. २६—५०)

लोभः, ओष्ठात् प्रीतिः, नासिकायाः कान्तिः, स्पर्शात् पशूनां प्रियो कामः, भ्रूभ्यां यमः, नेत्रलोमभ्यः कालश्चाजायत। पञ्चभूतानि, कालः, कर्माणि सत्त्वादयो गुणाः, यदत्र विवेकिभिः बाधितुमर्हो निर्वचनीयानिर्वचनीयो वा विशिष्टः पदार्थो वर्त्तते, सः सर्वः भगवद्योगमायया निर्मितोऽस्ति। ये माया निर्मितगुणेषु दर्शनादिवृत्तिभिरासक्ता न भवन्ति, ये वायूनिव सर्वदा सङ्गरहितास्तिष्ठन्ति, येषु समग्राः शक्तयः शान्ताः सन्ति। स आत्मानन्दलाभात्पूर्णो आत्मस्वरूपी भगवान् वन्द्योऽस्ति। भगवान् स्वयमेव समये समये नैकविधानि स्वरूपाणि धारयति, कठिनतमङ्कार्यञ्च सहस्रतया पूरयति। स्वातन्त्र्येण क्रियमाणानि कर्माणि बन्धकराणि भवन्ति भगवत्समर्पितञ्च कर्म लेशतोऽपि न कर्हिचिद् विकलीकुरुते अपितु सर्वथा च तत् सफलीभवति। यतो भगवान् जीवस्य परमहितैषी परमप्रियतम आत्मैवास्ति। यथा वृक्षस्य-मूलसेचनं तस्य शाखापल्लवानामपि सेचनमस्ति, तथैव भगवदाराधनं समग्रप्राणिनां स्वस्य चाराधनं वर्त्तते। त्रिष्वपि कालेषु ततः परमपि च यो ह्येकरसात्मकोऽस्ति, यस्य लीलानां रहस्यं तर्कवितर्केभ्यो परमस्ति। यो गुणेभ्यो परः सन्नपि सर्वगुणस्वामी वर्त्तते। सः परमपिता परमेश्वरः समेषामपि वन्द्योऽस्ति।

उपर्युक्ते प्रघट्टके ऽक्षरब्रह्मणः प्रतिपादनमस्तितथा च भावाभावयोः प्रतिपादनमस्तीति वक्तुं शक्यते यदत्र अक्षरब्रह्मप्रतिपादकं भावविभावप्रतिपादकञ्च साङ्ख्यं वर्त्तत इति।

(८८)

भगवन्मयविश्वप्रतिपादकं साङ्ख्यम्

श्रीमद्भागवतमहापुराणे ऽष्टमे स्कन्धे सप्तमे ऽध्याय एकविंशतितमश्लोकतः समारभ्य पञ्चत्रिंशत्तमश्लोकं यावत्समुद्रोद्भूतहालाहलविषभयापनुत्तये प्रजापत्यादिभिः क्रियमाणे भवस्तवने समागतं भगवन्मयविश्वप्रतिपादकं साङ्ख्यमस्ति[1]। तदित्थम्—

---

१. देवदेव महादेव भूतात्मन् भूतभावन।
त्राहि नः शरणापन्नांस्त्रैलोक्यदहनाद् विषात्॥
त्वमेकः सर्वजगत ईश्वरो बन्धमोक्षयोः।
तं त्वामर्चन्ति कुशलाः प्रपन्नार्तिहरं गुरुम्॥
गुणमय्या स्वशक्त्यास्य सर्गस्थित्यप्ययान् विभो।
धत्से यदा स्वदृग् भूमन् ब्रह्मविष्णुशिवाभिधाम्।

देवानामपि देवो महादेवः समग्रप्राणिनामात्मा तेषां जीवनप्रदाता-चास्ति। सर्वजगतां बन्धनाय मुक्तये वा महादेव एव समर्थोऽस्ति। त्रिलोक्याः भस्मीकरणे समर्थ तदतिरिक्तः कः पचेत। शरणागतवत्सलः जगद्गुरुर्वर्त्ततेऽतो विवेकिनस्तं समुपासन्ते। स्वगुणमयशक्त्या जगतां सृष्टिस्थितिप्रलयेभ्यः स्वयमनन्त एकरसात्मकः सन्नपि ब्रह्मविष्णुशिवादीनि नामानि धारयति। स एव स्वयंप्रकाश ब्रह्मतत्त्वभूतोऽस्ति। भगवदतिरिक्ता सृष्टि-र्नास्ति। यतो ऽयमात्माऽस्ति। नैकविधाभिः शक्तिभिः स्वयं भगवान् एव जगद्रूपेण भासते, स ईश्वरः सर्वसमर्थश्चास्ति। सर्वे वेदाः भगवत एव प्रादुर्बभूवुरिति समग्रज्ञानानां मूलस्रोतोऽभूतः सः सिद्धज्ञानस्वरूपी वर्त्तते। भगवानेव जगतामादिकारणं महत्तत्त्वं त्रिविधोऽहङ्कारश्चास्ति। प्राणेन्द्रियपञ्चभूत शब्दादि-

---

त्वं ब्रह्म परमं गुह्यं सदसद्भावभावनः।
नानाशक्तिभिराभातस्त्वमात्मा जगदीश्वरः॥

त्वं शब्दयोनिर्जगदादिरात्मा
प्राणेन्द्रिय द्रव्यगुणस्वभावः।
कालः क्रतुः सत्यमृतं च धर्म—
स्त्वय्यक्षरं यत् त्रिवृदामनन्ति॥

अग्निर्मुखं तेऽखिलदेवतात्मा
क्षितिं विदुर्लोकभवाङ्घ्रिपङ्कजम्।
कालं गतिं तेऽखिलदेवतात्मनो-
दिशश्च कर्णौ रसनं जलेशम्॥

नाभिर्नभस्ते श्वसनं नभस्वान्
सूर्यश्च चक्षूंषि जलं स्म रेतः।
परावरात्माश्रयणं तवात्मा
सोमो मनो द्यौर्भगवञ्छिरस्ते॥

कुक्षिः समुद्रा गिरयोऽस्थिसङ्घा
रोमाणि सर्वौषधिवीरुधस्ते।
छन्दांसि साक्षात् तव सप्तधातव—
स्त्रयीमयात्मन् हृदयं सर्वधर्मः॥

णां च पृथक्पृथक्स्वभास्वरूपी तेषां मूलकारणभूतोऽस्ति। भगवान् स्वयमेव प्राणिनां वृद्धिह्रासकर्त्ता कालो वर्त्तते, कल्याणकर्ता यज्ञस्वरूपश्च वर्त्तते। धर्मोऽपि भगवत्स्वरूपमेवअउम् इति त्र्यक्षरो प्रणवो भगवान् एव वर्त्तते। अथवा त्रिगुणात्मिका प्रकृतिरपि भगवान् एव वर्त्तते। सर्वदेवस्वरूपो ऽग्निर्भगवन्मुखमस्ति। त्रयाणामपि लोकानामभ्युदयकर्त्ता शङ्करोऽस्ति। पृथिव्येतस्य चरणभूताऽस्ति, सर्वदेवमयोऽस्ति। कालो गतिः दिक् श्रोत्रं, वरुणः रसनेन्द्रियं, एवं नाभिः, वातः श्वासः, सूर्यश्चक्षुः, जलं वीर्यम् अहङ्कारो जीवानामाश्रयः, चन्द्रो मनः, स्वर्ग शिरः, पयोधिः कुक्षिः, गिरयोऽस्थीनि, सर्वौषधयस्तृणानि च लोमानि, गायत्र्यादीनि छन्दासि सप्तधातवः, सर्वविधो धर्मः हृदयम् सद्योजाताद्य उपनिषदः पञ्चमुखानि सन्ति। पञ्चमुखानां पदच्छेदत एवाऽष्टत्रिंशत्कलात्मकाः जज्ञिरे। यदा भगवान् समस्तेभ्यो प्रपञ्चेभ्य उपरमते तथा स्वस्मिन् स्वरूपे

मुखानि पञ्चोपनिषदस्तवेश,
यैस्त्रिंशदष्टोत्तरमन्त्रवर्गः।
यद् यच्छिवाख्यं परमार्थतत्त्वं देव स्वयंज्योतिरवस्थितिस्ते॥
छाया त्वधर्मोर्मिषु यैर्विसर्गो
नेत्रत्रयं सत्त्वरजस्तमांसि।
साङ्ख्यात्मनः शास्त्रकृतस्तवेक्षा—
छन्दोमयो देव ऋषिः पुराणः॥
न ते गिरित्राखिललोकपाल,
विरिञ्चिवैकुण्ठसुरेन्द्रगम्यम्।
ज्योतिः परं यत्र रजस्तमश्च
सत्त्वं न यद् ब्रह्म निरस्तभेदम्॥
कामाध्वरत्रिपुरकालगराद्यनेक,
भूतद्रुहः क्षपयतः स्तुतये न तत् ते।
यस्त्वन्तकाल इदमात्मकृतं स्वनेत्र
वह्निस्फुलिङ्गशिखया भसितं न वेद॥
ये त्वात्मरामगुरुभिर्हृदिचिन्तिताङ्घ्रि

स्थिरो भवति सा स्थिति: शिवनाम्ना व्यपदिश्यते, वस्तुत: तदेव स्वयंप्रकाशमयं परमार्थतत्त्वमस्ति। अधर्मस्य दम्भलोभादिषु भगवच्छायाऽस्ति, यया विविधा संसृतिर्जायते। सत्त्वरजस्तमांसि शिवनेत्राणि सन्ति। गायत्र्यादीनि छन्दांसि तन्मया वेदाश्च भगवद्विचारस्वरूपा: सन्ति। भगवान् एव साङ्ख्यादिसर्वशास्त्र स्वरूपेण स्थितोऽस्ति। तेषां कर्त्ताऽपि स्वयं भगवान् एवाऽस्ति। भगवत: परमज्योतिर्मयं स्वरूपं परमं ब्रह्म वर्त्तते, तस्मिन् रजोगुणस्तमोगुण: सत्त्वगुणश्च नास्ति न च कोऽपि भेदोऽस्ति। तत्त्वतस्तत्स्वरूपं सर्वे लोकपाला: ब्रह्मादयो देवाश्चापि नावगच्छन्ति। भगवान् शिवरूपेण कामदेवं दक्षयागं, त्रिपुरासुरं, हालाहलङ्कालकूटं जीवद्द्रुहिणोऽसुरांश्च संहरति। शिवस्वरूपस्य नेत्रोत्थितमुल्मुकमेव त्रिलोकीं भस्मसात् करोति। जीवन्मुक्ता आत्मारामाश्च भगच्चरणयुगलं ध्यायन्ति। भगवानपि शिवरूपेण ज्ञाने तपस्यायां च तत्पर: तिष्ठति। कार्यकारणात्मकाज्जगत: परा माया वर्त्तते, मायायाश्चात्यन्तं परो भगवान् वर्त्तते। महेश्वरस्य लीलाख्यक्ता: सन्ति तथापि जगत्कल्याणाय व्यक्तरूपेणापि स एवेह विराजते।

उपर्युक्तप्रकारेणैतज्जगद् भगवतो नैकविधलीलास्वरूपमेवास्ति। भगवदतिरिक्तं नास्ति किमपि। सर्वं भगवत एव जायते भगवतैव पाल्यते भगवत्येव चान्तर्भवति तथा सर्वाणि कार्याणि कारणानि च तज्जान्येव तदन्तर्भूतानि च वर्त्तन्त इति वक्तुं शक्यते, यदत्र भगवन्मयविश्वप्रतिपादकं साङ्ख्यमस्तीति।

द्वन्द्वं चरन्तमुमया तपसाभितप्तम्।
कत्थन्त उग्रपरूषं निरतं श्मशाने
ते नूनमूतिमविदंस्तव हातलज्जा:।।
तत् तस्य ते सदसतो: परत: परस्य,
नाञ्ज: स्वरूपगमने प्रभवन्ति भूम्न:।
ब्रह्मादय: किमुत संस्तवने वयं तु
तत्सर्गसर्गविषया अपि शक्तिमात्रम्।।
एतत् परं प्रपश्यामो न परं ते महेश्वर।
मृडनाय हिलोकस्य व्यक्तिस्तेऽव्यक्तकर्मण:।।
(स्क. ८, अ. ७ श्लो. २१—३५)

(८६)

भगवति विविधविकल्पकल्पकं साङ्ख्यम्

श्रीमद्भागवतमहापुराणे ऽष्टमे स्कन्धे द्वादशे ऽध्याये चतुर्थश्लोकत: समारभ्यैकादशश्लोकं यावद् भगवन्तं हरिं प्रति मोहिनीस्वरूपदिदृक्षया भगवता भवेन कृतायां प्रार्थनायां समधिगतं भगवति विविधविकल्प-कल्पकं साङ्ख्यं वर्त्तते[1]। तदित्थम्

समग्रदेवानामाराध्यो भगवान् विश्वव्यापी विश्वस्वरूपी श्रीहरिर्वर्त्तते। समग्रचराचरात्मकपदार्थानाम् मूलकारणमीश्वर आत्मा चापि श्रीहरिरस्ति। जगतामादिमध्यावसानास्तस्मादेव जायन्ते परन्तु स्वयमादिमध्यावसानशून्योऽस्ति। भगवदविनाशिस्वरूपे द्रष्टादृश्यभोक्ताभोग्यात्मको भेदश्च नास्ति। वस्तुत: सत्यं चिन्मात्रं ब्रह्मैवाऽस्ति। कल्याणेप्सवो महात्मानउभयलोकयोरासक्तिं सर्वा: कामनाश्च विहाय केवलं भगवच्चरणारविन्दयुगलमेव ध्यायन्ति। भगवानमृतस्वरूपसमग्रप्राकृतगुणैर्विहीन: शोकच्छायायारप्यत्यन्तं दूरष्ठ: परिपूर्णो ब्रह्माऽस्ति, केवलानन्दी निर्विकारश्च वर्त्तते। भगवदतिक्तिं किमपि नास्ति। भगवान् सर्वेभ्यो विशिष्टो पृथग्भूतो वर्त्तते। भगवान् विश्वस्य स्थितिलयानां परमङ्कारणमस्ति सर्वजीवेभ्य: शुभाशुभकर्म-

---

1. देवदेव जगद्व्यापिञ्जगदीश जगन्मय।
 सर्वेषामपि भावानां त्वमात्मा हेतुरीश्वर:।
आद्यन्तावस्य यन्मध्यमिदमन्यदहं बहि:।
 यतोऽव्ययस्य नैतानि तत् सत्यं ब्रह्मचिद्भवान्॥
तवैव चरणाम्भोजं श्रेयष्कामा निराशष:
 विसृज्योभयत: सङ्गं मुनय: समुपासते॥
त्वं ब्रह्म पूर्णममृतं विगुणं विशोक—
 मानन्दमात्रमविकारमनन्यदन्यत्॥
विश्वस्य हेतुरुदयस्थितिसंयमाना।
 मात्मेश्वरश्च तदपेक्षतयानपेक्ष:॥

फलदः स्वामी वर्त्तते। वस्तुतस्तु सर्वापेक्षाशून्यो निरपेक्षो वर्त्तते। कार्यकारणं द्वैताद्वैतं च यत् किञ्चिदप्यस्ति तत्सर्वं भगवत्स्वरूपमेव, यथालङ्कारभूते सुवर्णे मूलसुवर्णे च वस्तुभेदो न भवति तथैव जनाः वस्तुतत्त्वमजानन्तः नैकविधभेदकल्पनाङ् कुर्वन्ति। निरुपाधिकेऽपि गुणाश्रयेण भेदो प्रतीयते। केऽपि ब्रह्मेति विदन्ति, इतरे धर्मनाम्ना व्यपदिशन्ति, तथा केचन प्रकृतिपुरुषयोः परं परमेश्वरं मन्वते। इत्थमेव केचन विमला-उत्कर्षिणी-ज्ञाना-क्रिया-योगा-प्रह्वी-सत्या-ईशाना-अनुग्रहाख्याभिर्नवभिः शक्तिभिर्युक्तं परमं पुरुषं क्लेशकर्मादिबन्धनरहितं पूर्वेषामपि पूर्वजमविनाशिनं पुरुषविशेषं मन्वते। येषां चेतांसि मायासंश्लिष्टानि सन्ति। ते भगवन्तं तत्त्वतो ज्ञातुन्नार्हन्ति। स वायुमिवाकाशे ऽदृश्यस्वरूपेण वर्तमानोऽपि समग्रे चराचरात्मके जगति विराजते, तथाऽस्य चेष्टास्थिति-जन्म-नाश-कर्माणि-संसारबन्धन-मोक्षादीनि सर्वाणि सर्वदा सर्वथा सर्वज्ञः सर्वेश्वरः सर्वान्तर्याम्येव जानाति।

एकस्त्वमेव सदसद् द्वयमद्वयं च।
स्वर्णं कृताकृतमिवेह न वस्तुभेदः॥
अज्ञानतस्त्वयि जनैर्विहितो विकल्पो।
यस्माद् गुणैर्व्यतिकरो निरूपाधिकस्य॥
त्वां ब्रह्म केचिदवयन्त्युत धर्ममेके।
एके परं सदसतोः पुरुषं परेशम्।
अन्येऽवयन्ति नवशक्तियुतं परं त्वां।
केचिन्महापुरुषमव्ययमात्मतन्त्रम्॥
नाहं परायुर्ऋषयो न मरीचिमुख्या।
जानन्ति यद्विरचितं खलु सत्त्वसर्गाः॥
यन्मायया मुषितचेतस ईश दैत्य,
मर्त्यादयः किमुत शश्वदभद्रवृत्ताः॥
स त्वं समीहितमदः स्थितिजन्मनाशं।
भूतेहितं च जगतो भवबन्धमोक्षौ॥
वायुर्यथा विशति खं च चराचराख्यं।
सर्वं तदात्मकतयावगमोऽवरून्त्से॥

(स्क. ८ अ. १२ श्लो. ४—११

उपर्युक्तप्रकारेण भगवति नैकविधविकल्पानां कल्पना क्रियत इत्यतोऽत्र भगवति विविध-विकल्प-कल्पकं साङ्ख्यमस्तीति ज्ञेयम् ।

(९०)

चतुर्विंशतितत्त्वेषु गुणत्वविधायकं साङ्ख्यम्

श्रीमद्भागवतमहापुराणेऽष्टमे स्कन्धे षोडशेऽध्याये अष्टाविंशतितमश्लोकतः समारभ्य सप्तत्रिंशत्तमश्लोकं यावद् दितिम्प्रति भगवता कश्यपेन समुपदिष्टं चतुर्विंशतितत्त्वेषु गुणत्वविधायकं साङ्ख्यमस्ति[1] । तदित्थम्

मूर्त्तौ, वेद्यां, सूर्ये, जले, अग्नौ, गुरौ च भगवान् पूजनङ् गृह्णाति । सः सर्वशक्तिमान् वर्त्तते ऽन्तर्यामितयाराधनीयश्चाऽस्ति, सर्वभूतेषु सः सर्वभूतानि च तस्मिन् निवसन्ति । इत्यतस्तं वासुदेवनाम्ना व्यपदिशन्ति । समग्रजगतस्तत्कारणस्य च साक्षी वर्त्तते ऽव्यक्तः सूक्ष्मश्च । तथा प्रकृतिपुरुषरूपोऽपि स एव । चतुर्विंशतिगुणज्ञः गुणसङ्ख्याता साङ्ख्यशास्त्रप्रवर्त्तकश्चास्ति । भगवान् यज्ञपुरुषोऽस्ति यस्य प्रायणी-

---

१. निर्वर्तितात्मनियमो देवमर्चेत् समाहितः ।
अर्चायां स्थण्डिले सूर्ये जले वह्नौ गुरावपि ।।
नमस्तुभ्यं भगवते पुरुषाय महीयसे ।
सर्वभूतनिवासाय वासुदेवाय साक्षिणे ।।
नमोऽव्यक्ताय सूक्ष्माय प्रधानपुरुषाय च ।
चतुर्विंशद्गुणज्ञाय गुण-संख्यान-हेतवे ।।
नमो द्विशीर्ष्णे त्रिपदे चतुःशृङ्गाय तन्तवे ।
सप्तहस्ताय यज्ञाय,

योदयनीये कर्मणी शिरसी वर्त्तते, प्रातः मध्याह्नतृतीयसवनानि त्रयो पादाः सन्ति। चत्वारो वेदाः शृङ्गाणि सन्ति, गायत्र्यादीनि सप्तछन्दांसि सप्तहस्ताः सन्ति; धर्ममयो वृषभरूपी यागो वेदैः प्रतिपादितोऽस्ति। यस्यात्मस्थानीयः स्वयं भगवान् वर्त्तते, सोऽस्ति समेषामपि वन्द्यः। लोककल्याणकर्त्ता शिवस्वरूपी प्रलयङ्कर्ता रूद्ररूपी च, समग्रशक्तिधारकोऽपि स एवास्ति। समग्रविद्यानामधिपो भूतानां स्वामी चास्ति, भगवान् एव समेषां प्राणभूतः सर्वस्वरूपी च वर्त्तते। योगकारणं योगः योगैश्वर्य-स्वरूपी च स एवास्ति। नरनारायणर्षिरूपेण प्रकटीभूतः स्वयं भगवान् वर्त्तते। भगवच्छरीरं मरकतमणिमिव श्यामलं वर्त्तते। सर्वसम्पदां सौन्दर्यस्य च देवी लक्ष्मीः

त्रयोविद्यात्मने नमः ।।

नमः शिवाय रूद्राय,
नमः शक्तिधराय च।

सर्वविद्याधिपतये,
भूतानां पतये नमः।

नमो हिरण्यगर्भाय,
प्राणाय जगदात्मने।

योगैश्वर्य शरीराय,
नमस्ते योगहेतवे ।।

नमस्त आदिदेवाय साक्षिभूताय ते नमः।
नारायणाय ऋषये नराय हरये नमः ।।

नमो मरकतश्याम,
वपुषेऽधिगतश्रिये ।।

केशवाय नमस्तुभ्यं।
नमस्ते पीतवाससे ।।

त्वं सर्ववरदः पुंसां।
वरेण्य वरदर्षभ ।।

भगवत्सेविका वर्त्तते। विष्णुस्वरूपी सः पीताम्बरधारी वर्त्तते। सर्वविधवरप्रदातृश्रेष्ठोऽस्ति। जीवैर्वरणीयोऽस्ति। एतदेवास्ति बीजं यद् धीराः विवेकिनश्च पुरुषाः स्वकल्याणाय भगवच्चरणरजांसि समुपासन्ते। यस्य चरणकमलयोः सुरभिग्रहणेप्सया लक्ष्मीः सेवायां संलग्ना तिष्ठति देवाश्चापि।

उपर्युक्ते प्रसङ्गे चतुर्विंशतितत्त्वानाङ् गुणत्वेन विधानमस्तीति वक्तुं शक्यते यदत्र चतुर्विंशतितत्त्वेषु गुणत्वविधायकं साङ्ख्यमस्तीति।

(६१)

भगवति सर्वभावप्रतिपादकं साङ्ख्यम्

श्रीमद्भागवतमहापुराणे ऽष्टमे स्कन्धे विंशतितमे ऽध्याय एकविंशतितममश्लोकतः समारभ्यैकोनविंशतितमश्लोकं यावद् भगवता विराट्स्वरूपङ् गृह्यते

अतस्ते श्रेयसे धीराः,
पादरेणुमुपासते ॥
अन्ववर्तन्त यं देवाः,
श्रीश्च तत्पादपद्मयोः।
स्पृहयन्त इवामोदं
भगवान्मे प्रसीदताम् ॥
(स्क. ८ अ. १६ श्लो. २८—३७)

तत्प्रसङ्गेसमधिगतं भगवति सर्वभावप्रतिपादकं साङ्ख्यमस्तीति निम्नोक्तप्रकारेण बोध्यम्भवति[1]

भगवतो ऽनन्तस्य त्रिगुणात्मकं वामनं शरीरं ववृधे, तस्मिन् पृथिवी, खं दिशः, स्वर्ग, पातालम्, समुद्रम्, पशवः पक्षिणोः देवताश्चेति सर्वेऽपि तदन्तर्बभूवुः। ऋत्विगाचार्यसदस्यैः सह बलिना सर्वैश्वर्यस्वामिनो भगवतस्तस्मिन् त्रिगुणात्मके शरीरे पञ्चभूतानि इन्द्रियाणि, तेषां विषयाः, अन्तःकरणानि, जीवैः सह सम्पूर्णं त्रिगुणात्मकं

---

१. तद् वामनं रूपमवर्धताद्भुतम्,
हरेरनन्तस्य गुणत्रयात्मकम् ।
भूः खं दिशो द्यौर्विवराः पयोधय—
स्तिर्यङ् नृदेवाऋषयो यदासत ।।
काये बलिस्तस्य महाविभूतेः,
सहर्त्विगाचार्यसदस्य एतत् ।
ददर्श विश्वं त्रिगुणं त्रिगुणात्मके ।
भूतेन्द्रियार्थाशयजीवयुक्तम् ।।
रसामचष्टाङ्घ्रितलेऽथ पादयो,
मंहीं महीध्रान् पुरुषस्य जङ्घयोः ।
पतत्त्रिणो जानुनि विश्वमूर्ते ।
रूर्वोर्गणं मारुतमिन्द्रसेनः ।
सन्ध्यां विभोर्वाससि गुह्य ऐक्षत्,
प्रजापतीञ्जघने आत्ममुख्यान् ।
नाभ्यां नभः कुक्षिषु सप्तसिन्धून् ।
उरूक्रमस्योरसि चर्क्षमालाम् ।।
हृद्यङ्ग धर्मं स्तनयोर्मुरारे,
ऋतं च सत्यं च मनस्यथेन्दुम् ।।
श्रियं च वक्षस्यरविन्दहस्तां ।

जगद् ददर्श। राजा बलिः भगवद्विश्वरूपे चरणतलयोः रसातलं, चरणयोः पृथिवी, जङ्घयोः पर्वतान्, जानुनोः पक्षिणः, जघनयोश्च मरूद्गणान् ददर्श। इत्थमेव भगवद् वस्त्रेषु सन्ध्यां गुह्यस्थानेषु प्रजापतिगणान् जघनस्थले समस्तान् सुरगणान्, नाभौ गगनं, कुक्षौ, सप्तपाथोधीन्, वक्षःस्थले नक्षत्रगणान् ददर्श। भगवद्धृदये धर्मम्, स्तनयोः ऋतानि सत्यानि च वचांसि, मनसि चन्द्रम्, वक्षसि कमलधारिणीङ् कमलाम्, कण्ठे साम समग्रशब्दसमूहाँश्च, ददर्श, बाहुषु समग्रान् देवगणान्, कर्णयोः दिशः, मस्तके स्वर्गम्, केशेषु

कण्ठे च सामानि समस्तरेफान् ॥
इन्द्रप्रधानानमरान्भुजेषु ।
तत्कर्णयोः ककुभो द्यौश्चमूर्ध्नि ॥
केशेषु मेघाञ्छ्वसनं नासिकाया—
मक्ष्णोश्च सूर्यं वदने च वह्निम् ॥
वाण्यां च छन्दांसि रसे जलेशम्
भ्रुवोर्निषेधं च विधिं च पक्ष्मसु ।
अहश्च रात्रिं च परस्य पुंसो,
मन्युं ललाटेऽधर एव लोभम् ॥
स्पर्शे च कामं नृप रेतसोऽम्भः,
पृष्ठे त्वधर्मं क्रमणेषु यज्ञम् ।
छायासु मृत्युं हसिते च मायाम्
तनूरुहेष्वोषधिजातयश्च ॥
नदीश्च नाडीषु शिला नखेषु
बुद्धावजं देवगणानृषींश्च ।
प्राणेषु गात्रे स्थिरजङ्गमानि,
सर्वाणि भूतानि ददर्श वीरः ॥

(स्क. ८ अ. २० श्लो. २१– २९)

मेघमालाः, नासिकयोः, वायुं,-नेत्रयोः सूर्यं, मुखेऽग्निं च ददर्श। तथा वाचि वेदान्, रसनायां वरुणं, भ्रुवोर्विधिनिषेधे, पक्ष्मयोरहर्निशे, ललाटे क्रोधम्, अधरे लोभं च ददर्श। स्पर्शे कामम्, वीर्ये जलम्, पृष्ठे धर्मम्, पदविन्यासे यज्ञं, छायायां मृत्युम्, हास्ये मायाम्, शरीरस्य रोमसु च सर्वत्रौषधीन् दर्शयामास। नाडीसु नदीः, नखेषु शिलाः, बुद्धौ ब्रह्माणं देवान् ऋषींश्च ददर्श। इत्थं बलिः भगवदिन्द्रियेषु शरीरे च चराचरात्मकञ्जगद् ददर्श।

उपर्युक्ते प्रसङ्गे बलिना दृष्टं वामनस्वरूपात्परिबृंहितं भगवद्विराट् स्वरूपं निरूपितं वर्त्तते, भगवतः शरीरे इन्द्रियेषु च सर्वमपि चराचरात्मकं जगद् वर्त्तते, तदतिरिक्तं किमपि नास्तीति प्रतिपादनादत्र भगवति सर्वभावप्रतिपादकं साङ्ख्यमस्तीति बोध्यम्।

—०—

श्रीमद्भागवतमहापुराणे

नवमः स्कन्धः

(६२)

परमपुरुषकारणतावादि साङ्ख्यम्

श्रीमद्भागवतमहापुराणे नवमे स्कन्धे प्रथमेऽध्याये ऽष्टमे श्लोके श्रीपरीक्षितम्प्रति श्रीशुकदेवेन प्रतिपादितं परमपुरुषकारणतावादि साङ्ख्यमस्ति[1] तदित्थम्—

परमपुरुषः परमात्मा स्थूलकायानां लघुकायानां सूक्ष्म-सूक्ष्मतरसूक्ष्मतमकायानां च सर्वेषामपि चराचराणाम्प्राणिनामात्मा वर्त्तते । अर्थात् भगवान् परमपुरुष एव सर्वात्मस्वरूपेण स्वमायामाश्रित्य लीलाः करोति । प्रलयवेलायां केवलं परमपूरुष एवा ऽऽसीत् । दृश्यमानमेतज्जगत्तदा तस्मिन्नेव लीनमासीत् परमपुरुषं व्यतिरिच्य नासीत् । परमपुरुषं व्यतिरिच्य नासीत् किमपि तत्त्वान्तरम् ।

उपर्युक्तेन वर्णनेन स्पष्टतया प्रतिपादितम्भवति यदसौ परमपुरुष एव जगतामर्थात् जागदुत्पत्ति-स्थिति-लयानां कारणमस्ति । परमपुरुषस्य कारणता प्रतिपादनादत्र परमपुरुषकारणतावादि साङ्ख्यमस्तीति ज्ञेयम् ।

---

१. परावेषां भूतानामात्मा यः पुरुषः परः ।
स एवासीदिदं विश्वङ् कल्पान्तेऽन्यन्न किंचन ॥

(स्क. ९, अ. १, श्लो. ७)

(६३)

सुदर्शनसर्वात्मकत्ववादि साङ्ख्यम्

श्रीमद्भागवतमहापुराणे नवमे स्कन्धे पञ्चमेऽध्याये तृतीयश्लोकतः समारभ्य सप्तमश्लोकं यावद् दुर्वाससि दयावता श्रीअम्बरीषेण सुदर्शनस्य स्तवनङ्कुर्वता प्रतिपादितं सुदर्शनसर्वात्मकत्ववादि साङ्ख्यम्[१]। तदित्थम्—

सुदर्शनचक्रमग्निरस्ति, परमशक्तिमान् तेजस्वी सूर्योऽपि सुदर्शनमेवाऽस्ति। नक्षत्राधिपः शश्यपि सुदर्शनस्यैव रूपान्तरमस्ति। पृथिवी, जलानि, खम्, वायुः, पञ्चतन्मात्राणि, सर्वाणीन्द्रियाणि चेति सुदर्णनस्यैव स्वरूपाणि सन्ति। भगवच्चक्रं सुदर्शनं सहस्त्रारमस्ति। न तत्समक्षङ्किमपि शस्त्रान्तरं स्थातुमर्हति। सुदर्शनमेव भगवत्प्रेरणया जगदिदं सर्वथा रक्षति। धर्मः, मधुराणि, सत्यानि च वचांसि, सर्वेषां यज्ञानामधिपः सर्वयज्ञस्वरूपी च सुदर्शनचक्राख्यो देव एव वर्त्तते। परमपुरुषस्य परमात्मनः श्रेष्ठतमं धाम सुदर्शनमेवाऽस्ति। सर्वेषामपि धर्माणां मर्यादारक्षकोऽस्ति। अधर्माचरणशीलान-

---

१. त्वमग्निर्भगवान् सूर्यस्त्वं सोमोज्योतिषां पतिः।
त्वमापस्त्वं क्षितिर्व्योम वायुर्मात्रेन्द्रियाणि च॥
सुदर्शन नमस्तुभ्यं सहस्त्राराच्युतप्रिय।
सर्वास्त्रघातिन् सर्वात्मा त्वंतेज पौरुषं परम्॥
नमः सुनाभाखिलधर्मसेतवे
ह्यधर्मशीलासुरधूमकेतवे।
त्रैलोक्यगोपाय विशुद्धवर्चसे—
मनोजवायाद्भुत कर्मणे गुणे॥
स्वतेजसा धर्ममयेन संहृतं,
तमः प्रकाशश्च धृतो महात्मनाम्।
दुरत्ययस्ते महिमा गिरांपते
त्वद्रूपमेतत् सदसत् परावरम्॥
(स्क. ९, अ. ५, श्लो. ३—७)

सुरान् भस्मीकर्त्तुं सुदर्शनं साक्षादग्निरस्ति। विशुद्धं तेजोमयं सुदर्शनमेवाऽस्ति। मनसो वेगमिवास्ति सुदर्शनस्य गतिः। कर्माणि चाद्भुतानि सन्ति। वेदवाचामधीश्वरत्वेनापि सुदर्शनमेव विराजते। तस्य धर्ममयेन तेजसा तमांसि नश्यन्ति; सूर्यादीनां प्रकाशस्य च रक्षा भवति। भगवतः सुदर्शनस्य महिम्नः पारमधिगन्तुमत्यन्तेन काठिन्येन कर्हिचिदेव शक्यते। उच्चनीचयोः लघुमहतोश्च भेदभावेनेतञ्च प्रोतश्च कार्यकारणात्मकं समग्रमपि जगदस्यैव स्वरूपमस्ति।

उपर्युक्तेन प्रघट्टकेन स्पष्टीभवति यत्सुदर्शनमपि साक्षान्नारायणस्य स्वरूपान्तरमस्ति परमपितुः परमपुरुषस्य तेजोमयं स्वरूपमस्तीति सर्वजगन्मयं प्रतिपादितमस्ति। इत्यतो वक्तुं शक्यते, यदत्र सुदर्शनसर्वात्मकत्ववादि साङ्ख्यमस्तीति।

(९४)

सत्त्वरजस्तमोभिर्विभिन्नसृष्टिप्रतिपादकं साङ्ख्यम्

श्रीमद्भागवतमहापुराणे नवमे स्कन्धे दशमेऽध्याये चतुर्दशे श्लोके श्रीसिन्धुना क्रियमाणायां श्रीरामचन्द्रस्य स्तुतौ प्रोक्तं सत्त्वरजस्तमोभिर्विभिन्नसृष्टिप्रतिपादकं साङ्ख्यमस्ति[1]। तच्चेत्थम्—

मूढाः प्राणिनो भगवन्तमनन्तं, वस्तुस्वरूपेण ज्ञातुन्नैव शक्नुवन्ति। भगवान् सर्वजगतां स्वामी वर्त्तते। स चैवैषामादिकारणमस्ति तथा जगतां सर्वेष्वपि परिवर्त्तनेषु ह्येकरसोऽस्ति भगवान्। सर्वगुणानां स्वामी चापि भगवान्नेव वर्त्तते।

---

१. न त्वां वयं जडधियो नु विदाम भूमन्,
कूटस्थमादिपुरुषं जगतामधीशम्।
यत्सत्त्वतः सुरगणा रजसः प्रजेशा—
मन्योश्च भूतपतयः स भवान् गुणेशः॥

(स्क. ९, अ. १०, श्लो. १४)

यदा भगवान् सत्त्वगुणं समाश्रयते तदा देवानां सृष्टिर्भवति, रजोगुणं स्वीकृत्य च प्रजापतीन् सृजति तमोगुणस्य स्वीकृतौ भगवतां क्रोधेन रुद्रगणाः समुत्पद्यन्ते । इत्थमेव परम्परया गुणैरेव विविधा सृष्टिः सृज्यते ।

उपर्युक्ते प्रसङ्गे सत्त्वरजस्तमोगुणान् समाश्रित्य भगवान् देव-प्रजापति-रूद्रान् सृजति । तैश्च सर्वा सृष्टिः परम्परया संसृज्यते ऽतोऽत्र वक्तुं शक्यते, यदत्र सत्त्वरजस्तमोभिर्विभिन्नसृष्टिप्रतिपादकं साङ्ख्यमस्ति । अत्र तृतीयविभक्त्या गुणाः केवलं करणत्वेन गृह्यन्ते अर्थात्तेषां स्वीकर्त्तैवाऽस्ति स्रष्टा, तस्य साक्ष्येणैव गुणाः नैक-विधरूपेषु परिणमन्त इति ।

(९५)

मायाचेष्टितवादि साङ्ख्यम्

श्रीमद्भागवतमहापुराणे नवमे स्कन्धे चतुर्विंशतितमेऽध्याये षट्पञ्चाशत्तम-श्लोकतः समारभ्याष्टपञ्चाशत्तमश्लोकं यावच्छ्रीमन्तं परीक्षितम्प्रति भगवता श्रीशुकदेवेन प्रतिपादितं मायाचेष्टितवादि साङ्ख्यमस्ति । तच्चेत्थमवबोद्धव्यम् यत्—

यदा यदेह धर्मस्य क्षयो वृद्धिश्च पाप्मनः ।
तदा तु भगवानीश आत्मानं सृजते हरिः ।।
न ह्यस्य जन्मनो हेतुः कर्मणो वा महीपते ।
आत्ममायां विनेशस्य परस्य द्रष्टुरात्मनः ।।
यन्मायाचेष्टितं पुंसः स्थित्युत्पत्त्यप्ययाय हि ।
अनुग्रहस्तन्निवृत्तेरात्मलाभाय चेष्यते ।।

(स्क. ९, अ. २४, श्लो. ५६-५८)

यदा यदा धर्मस्य ह्रासो भवति पापस्य चाभिवृद्धिर्जायते, तदा तदा सर्वशक्तिमान् भगवान् श्रीहरिरवतरति। भगवान् सर्वेषां द्रष्टा सङ्गरहित आत्मा चाऽस्ति। अतएव तस्यात्मस्वरूपिणीं योगमायां विहाय तस्य जन्मनाङ् कर्मणाञ्च नाऽस्ति किमपि कारणान्तरम्। भगवन्मायायाः विलासमेव जीवस्य जन्मनः, जीवनस्य मृत्योश्च कारणमस्ति। भगवतामनुग्रह एव मायाप्रपञ्चादुन्मुच्याऽऽत्मस्वरूपावबोधको मुक्तिकारकश्च भवति।

प्रसङ्गेऽस्मिन् न केवलञ्जगतामपि तु परमेश्वरस्यापि जन्मकर्माणि मायाविलासेनैव भवन्ति, मायाचेष्टितमेवाऽस्ति सर्गस्थितिलयात्मकमिति मायाचेष्टितवादिसाङ्ख्यमस्तीति ज्ञेयम्।

—०—

श्रीमद्भागवतमहापुराणे

दशमः स्कन्धः

(९६)

सत्यैकपदार्थवादि साङ्ख्यम्

श्रीमद्भागवतमहापुराणे दशमे स्कन्धे द्वितीये ऽध्याये षड्विंशतितमे श्लोके सत्यैकपदार्थवादि साङ्ख्यमस्ति[१]। तच्च गर्भस्थस्य श्रीकृष्णचन्द्रस्य स्तुतौ ब्रह्मादिभिर्देवै व्याहृतमस्ति। तदित्थमवबोध्यम्—

भगवान् सत्यसङ्कल्पोऽस्ति। सत्यमेव भगवत्प्राप्तेः श्रेष्टतमं साधनमस्ति। सृष्टेः प्राक् प्रलयस्य पश्चाच्च संसारस्य स्थितिसमयेऽसत्यास्ववस्थास्वऽपि सर्वथा भगवान् सत्यस्वरूपेणैव विराजते। पृथिव्यप्तेजोवाय्वाकाशाख्यपञ्चसहाभूतानां प्रत्यक्षदृश्यमानसत्यानामपि भगवान् एव कारणमस्ति। तेष्वन्तर्यामिरूपेण भगवान् विराजते, अपि च भगवान् दृश्यमानस्य जगतः परमार्थस्वरूपोऽस्ति। अतएव भगवान् सत्यस्वरूपमेवाऽस्ति।

उपर्युक्ते कथानके सत्यस्वरूपिणो भगवतः महिमा गीयते। सत्यस्वरूपेणैव सर्वत्र भगवान् विराजते, अर्थात् सत्यमेवैकः पदार्थोऽस्ति नान्यः कश्चिदिति प्रतिपादनादत्र सत्यैकपदार्थवादि साङ्ख्यमस्तीति ज्ञेयम्।

---

१. सत्यव्रतं सत्यपरं त्रिसत्यं
सत्यस्य योनिं निहितं च सत्ये।
सत्यस्य सत्यमृतसत्यनेत्रं
सत्यात्मकं त्वां शरणं प्रपन्नाः॥

(स्क. १०, अ. २, श्लो. २६)

(६७)

वृक्षरूपकेण सृष्टिनिरूपकं साङ्ख्यम्

श्रीमद्भागवतमहापुराणे दशमे स्कन्धे द्वितीयेऽध्याये सप्तविंशतितमे श्लोके ब्रह्मादिभिर्देवैः कृतायां स्तुतौ समधिगतं वृक्षरूपकेण सृष्टिनिरूपकं साङ्ख्यमस्ति[1]। तदित्थं ज्ञेयम्—

विश्वङ्किम् ? एतत्तु सनातनो वृक्षोऽस्ति। वृक्षस्यास्याश्रयत्वेन स्थिता प्रकृतिर्वर्त्तते। संसारवृक्षस्य सुखदुःखनामके द्वे फले वर्त्तेते। सत्त्वरजस्तमसाख्यानि त्रीणि मूलानि सन्ति। धर्मार्थकामभमोक्षाख्याश्चत्वारो रसाः सन्ति। अस्य ज्ञानस्य पञ्चविधयः सन्ति। श्रोत्रं, त्वक्, नेत्रं, रसना, नासिका चेति। संसृतिवृक्षस्यास्य उत्पत्तिः, स्थितिः, वृद्धि, ह्रासः, परिणमनं नाशश्चेति षट्स्वभावाः सन्ति। रसरुधिर-मांसमेदोऽस्थिमज्जाशुक्राख्याः सप्तधातवोऽस्य संसृतिवृक्षस्य त्वचः सन्ति। पञ्च महाभूतानि, मनः, बुद्धिः अहङ्कारश्चेत्यष्टावस्य शाखाः सन्ति। वदनादीनि नव-द्वाराण्यस्य वृक्षस्य कोटराणि सन्ति। प्राणापानव्यानोदानसमाननागकूर्मकृकलदेवदत्त-धनञ्जयेति दशप्राणाः वृक्षस्यास्य पर्णानि सन्ति। जीवेश्वराख्यौ पक्षिणौ संसृति-वृक्षेऽमुष्मिन् निवसतः।

उपर्युक्ते प्रघट्टके स्पष्टतः संसृतिचक्रस्य वृक्षरूपकेण निरूपणङ्कृतमस्तीति वक्तुं शक्यते यदत्र वृक्षरूपकेण सृष्टिनिरूपकं साङ्ख्यमस्तीति बोध्यम्।

---

१. एकायनोऽसौ द्विफलस्त्रिमूल—

श्चतूरसः पञ्चविधः षडात्मा।

सप्तत्वगष्टविटपो नवाक्षो

दशच्छदी द्विखगो ह्यादिवृक्षः॥

(स्क. १०, अ. २, श्लो. २७)

(६८)

अवतारवादि साङ्ख्यम्

श्रीमद्भागवतमहापुराणे दशमे स्कन्धे द्वितीयेऽध्याय एकोनचत्वारिंशत्तम-श्लोकतः समारभ्य चत्वारिंशत्तमश्लोकं यावद्देवकीगर्भस्थस्य भगवतः श्रीकृष्णस्य स्तुतौ ब्रह्मादिभिर्देवैः प्रतिपादितमवतारवादि साङ्ख्यमस्ति[1]। तदित्थमव— बोध्यम्—

भगवान् अजन्मा वर्त्तते। यदि तस्य जन्मकारणविषये कोऽपि तर्कते तर्हि एतदेव तर्कितुमर्हति, यदवतरणादिकं भगवतः लीलाविनोदमात्रमस्तीति। यतो भगवान् द्वैतस्य लेशतोऽपि शून्यः सर्वाधिष्ठानस्वरूपोऽस्ति। विश्वस्योत्पत्तिस्थितिलयारज्ञान-वशात् भगवत्यारोप्यन्ते। भगवता नैकशः मत्स्यहयग्रीव-कच्छप-नृसिंह-वराह-हंस-राम-परशुराम-वामनाख्यानऽवतारान् स्वीकृत्य त्रिलोक्याः सुरक्षा विहिता, तथैव भगवान् भूभारहरणाय कृष्णरूपेणाऽवतरति, सोऽस्ति समेषामपि वन्द्यः।

उपर्युक्ते प्रसङ्गे श्रीहरिन्देवकीगर्भसंस्थं श्रीकृष्णरूपेणावतरन्तं स्तुवन्तौ ब्रह्मादयो देवास्तस्यावतरणलीलाविनोदं प्रतिपादयन्तीति वक्तुं शक्यते, यदत्र "अवतारवादि साङ्ख्यमस्ति" इति।

---

१. न तेऽभवस्येश भवस्य कारणं
विना विनोदं बत तर्कयामहे।
भवो निरोधः, स्थितिरप्यविद्यया
कृता यतस्त्वय्यभयाश्रयात्मनि॥
मत्स्याश्वकच्छपनृसिंहवराहहंस
राजन्यविप्रविबुधेषु कृतावतारः।
त्वं पासि नस्त्रिभुवनं च यथाधुनेश
भारं भुवो हर यदूत्तम वन्दनं ते॥
(स्क. १०, अ.२, श्लो. ३९-४०)

(६६)

सृष्टप्रविष्टादिसिद्धान्तवादि साङ्ख्यम्

श्रीमद्भागवतमहापुराणे दशमे स्कन्धे तृतीयेऽध्याये द्वादशश्लोकतः समारभ्य विंशतितमश्लोकं यावच्छ्रीकृष्णचन्द्रस्य जन्मकाले वसुदेवेन देवक्या च परमात्मनस्तस्य स्तवनं विहितम्। तस्मिन्नेव समधिगतं सृष्टप्रविष्टादिसिद्धान्तवादि साङ्ख्यमस्ति[१]।

तदित्थमवसेयम्भवति।

यद्—भगवान् श्रीकृष्णचन्द्रः स्वजननवेलायां सूतिकागृहं देदीप्यमानमकरोत्। वसुदेवस्तु निश्चितवान् यदसौ परमात्मा वर्त्तत इति ज्ञानेनानेन तस्य भीः निवर्तयामास। स्वबुद्धिं स्थिरीकृत्य भगवच्चरणारविन्दयोः ननाम। सकरबद्धं प्रार्थयामास यत्—प्रकृतेरतीतः साक्षात्पुरूषोत्तम एव श्रीकृष्णो वर्त्तते। भगवान् एव सर्गादौ स्वप्रकृत्या त्रिगुणात्मकं जगत्सृजति। तस्यां सृष्टावप्रविष्टोऽपि प्रविष्ट इव प्रतीयते। यथा

---

१. अथैनमस्तौदवधार्य पूरुषं
परं नताङ्गः कृतधीः कृताञ्जलिः।
स्वरोचिषा भारत सूतिकागृहं
विरोचयन्तं गतभीः प्रभाववित्॥
वसुदेव उवाच
विदितोऽसि भवान् साक्षात् पुरुषः प्रकृतेः परः।
केवलानुभवानन्दस्वरूपः सर्वबुद्धिदृक्॥
स एव स्वप्रकृत्येदं सृष्ट्वाग्रे त्रिगुणात्मकम्।
तदनु त्वं ह्यप्रविष्टः प्रविष्ट इव भाव्यसे॥
यथेमेऽविकृता भावास्तथा ते विकृतैः सह।
नानावीर्याः पृथग्भूता विराजं जनयन्ति हि॥
संनिपत्य समुत्पाद्य दृश्यन्तेऽनुगता इव।
प्रागेव विद्यमानत्वान्न तेषामिह सम्भवः॥

यावन्महत्तत्त्वादीनि कारणतत्त्वानि पृथक्पृथक् तिष्ठन्ति, तावत् तेषां शक्त्यऽपि पृथक्पृथग्भवति। यदा तानीन्द्रियादिभिः षोडशविकृतिभिः सह सम्भवन्ति, तदैव ब्रह्माण्डमेतत्सृजन्ति। एतदुत्पाद्यैतस्मिन्नेवानुप्रविष्टानीव प्रतीयन्ते। परन्तु सत्यं तु एतदेवास्ति यत्तानि न कस्मिञ्चिदपि पदार्थे प्रविशन्ति कारणमेतस्यास्ति यत् तैर्निर्मितानी यानि वस्तूनि सन्ति, तासु ते पूर्वत एव विद्यमानानि भवन्ति। तथैव बुद्ध्या केवलं गुणानां लक्षणान्येवानुमीयन्ते। इन्द्रियैश्च केवलं गुणमया विषया एव गृह्यन्ते। यद्यपि भगवान् गुणेष्वपि तिष्ठति, तथापि गुणानाङ्ग्रहणेन भगवद्ग्रहणन्न भवति, कारणमस्ति यद् भगवान् एव सर्वस्वमस्ति, स एवान्तर्यामी वर्त्तते, परमार्थसत्यमात्मस्वरूपमस्ति, गुणानामावरणं भगवन्तमाच्छादयितुं नार्हति। अतएव भगवानन्तर्बहिश्च नास्ति, तर्हि केषु कथं प्रवेक्ष्यति। यो दृश्यमानान् गुणान् स्वस्मात्पृथगिति विज्ञाय सत्याः सन्तीति मन्वानो ज्ञरित्यभिधीयते। यतो विचार्यमाणे देहगेहादिपदार्थाः वाग्वि-

---

एवं भवान् बुद्ध्यनुमेयलक्षणै
 ग्राह्यैर्गुणैः सन्नपि तद्गुणाग्रहः।
अनावृतत्वाद्बहिरन्तरं न ते
 सर्वस्य सर्वात्मन आत्मवस्तुनः॥
य आत्मनो दृश्यगुणेषु सन्निति
 व्यवस्यते स्वव्यतिरेकतोऽबुधः।
विनानुवादं न च तन्मनीषितं
 सम्यग् यतस्त्यक्तमुपाददत् पुमान्॥
त्वत्तोऽस्य जन्मस्थित्तिसंयमान् विभो
 वदन्त्यनीहादगुणादविक्रियात्।
त्वयीश्वरे ब्रह्मणि नो विरुध्यते
 त्वदाश्रयत्वादुपचर्यते गुणैः॥
स त्वं त्रिलोकस्थितये स्वमायया
 बिभर्षि शुक्लं खलु वर्णमात्मनः।
सर्गाय रक्तं रजसोपबृंहितं
 कृष्णं च वर्णं तमसा जनात्यये॥

(स्क. १०, अ. ३, श्लो. १२-२०)

लासातिरिक्तत्वेन नैव सिध्यन्ति । विचारमनुसृत्य यस्य वस्तुनो ऽस्तित्वन्नैव सिध्यति तस्य सत्यत्वगान्यतामान्नरः बुद्धिमान् भवितुं कथमर्हति । भगवान् स्वयं समग्रगुणक्रियाभिः शून्योऽस्ति, तथापि जगतोऽस्य सृष्टि-स्थिति-प्रलयास्तस्मादेव जायन्ते । परमैश्वर्यशालिने परमात्मने सर्वं सङ्गच्छते, यतस्त्रयाणामपि गुणानामाश्रयो भगवान् एवाऽस्ति अतएव गुणानां कार्यादीनि भगवत्यारोप्यन्ते । लोकानां त्रयाणामपि रक्षायै स्वमायया भगवान् एव सत्त्वमयं शुक्लवर्णं विष्णुस्वरूपं धारयति । समुत्पत्तये रजः प्रधानं रक्तवर्णं ब्रह्मास्वरूपं प्रलयवेलायाञ्च च तमोगुणप्रधानं कृष्णवर्णमऽहङ्कारयुक्तं रूद्ररूपं धारयति ।

उपर्युक्ते प्रसङ्गे केन प्रकारेण सृज्यते केन प्रकारेण च प्रविष्टत्वं सिध्यतीति प्रतिपादितमस्तीति वक्तुं शक्यते यदत्र सृष्टप्रविष्टादिसिद्धान्तवादि साङ्ख्यमस्तीति ।

(१००)

निर्विशेषशेषवादि साङ्ख्यम्

श्रीमद्भागवतमहापुराणे दशमे स्कन्धे तृतीयेऽध्याये चतुर्विंशतितमश्लोकतः समारभ्य सप्तविंशतितमश्लोकं यावद् भगवद्विष्णोरवतारभूतस्य श्रीकृष्णचन्द्रस्य देवक्या कृतायां स्तुतौ समधिगतं निर्विशेपशेषवादि साङ्ख्यमस्ति[१] ।

तदित्थम्—

वेदैः यद्रूपमव्यक्तं सर्वकारणत्वेनोपवर्णितम्, यद् ब्रह्म ज्योतिःस्वरूपं समग्रगुणहीनं विकाररहितञ्च वर्त्तते, यच्च विशेषणशून्यमनिर्वचनीयं निष्क्रियं तथा विशुद्ध-

१. रूपं यत्तत् प्राहुरव्यक्तमाद्यं
ब्रह्मज्योतिर्निर्गुणं निर्विकारम् ।
सत्तामात्रं निर्विशेषं निरीहं
स त्वं साक्षाद् विष्णुरध्यात्मदीपः ।।

सत्त्वेन प्रतिपादितं तदेव बुद्ध्यादीनां प्रकाशकं विष्णुस्वरूपात्मकं तेजो वर्त्तते। यदा ब्रह्मण आयुषः द्वे परार्धे पूर्येते कालशक्तिप्रभावेण च सर्वे लोकाः नश्यन्ति। पञ्चभूतान्यहङ्कारे, अहङ्कारो महत्तत्त्वे, महत्तत्त्वञ्च प्रकृतौ लीयते तदा भगवान् केवलात्मा अवशिष्यते। अतएव तस्य नामान्तरं शेषोऽप्यस्ति। प्रकृतेः सहायकोऽस्ति। निमेषतः समारभ्य वर्षपर्यन्तं नैकविभागेषु विभक्तो यः कालोऽस्ति, यस्य चेष्टया समग्रञ्जगच्चेष्टते। तथा यस्य काऽपि सीमा नास्ति। सः कालोऽपि भगवल्लीलामात्रीभूतोऽस्ति। भगवान् सर्वशक्तिमान् कल्याणानामाश्रयीभूतश्चास्ति। जीवोऽयं मृत्युग्रस्तो ऽस्ति। असौ मृत्युरूपिणः करालव्यालाद्भीतः लोकलोकान्तरेषु भ्रान्तोऽभवत्। परमेतेन नैकमप्येतादृक्किमपि स्थानं तेनाधिगतं यत्र निर्भयः स्थातुं शक्नुयात्। भगवत्कृपयैव तच्चरणारविन्दशरणं समधिगम्यते। तदैव निर्भयता समधिगम्यते। अन्यत्त्वन्यदेव किन्तु मृत्युरपि भगवच्छरणापन्नात् सुदूरमेव तिष्ठति।

उपर्युक्ते प्रसङ्गे भगवतः निर्विशेषस्थितेः शेषस्थितेश्च सम्यक्तया निरूपणं

नष्टे लोके द्विपरार्धावसाने
महाभूतेष्वादिभूतं गतेषु।
व्यक्तेऽव्यक्तं कालवेगेन याते
भवानेकः शिष्यते शेषसंज्ञः॥
योऽयं कालस्तस्य तेऽव्यक्त बन्धो
चेष्टामाहुश्चेष्टते येन विश्वम्।
निमेषादिर्वत्सरान्तो महीयां—
स्तं त्वेशानं क्षेमधाम प्रपद्ये॥
मर्त्यो मृत्युव्यालभीतः पलायन्
लोकान् सर्वान् निर्भयं नाध्यगच्छत्।
त्वत्पादाब्जं प्राप्य यदृच्छयाद्य
स्वस्थः शेते मृत्युरस्मादपैति॥

(स्क. १०, अ. ३, श्लो: २४—२७)

कृतमस्तीति वक्तुं शक्यते यदत्र निर्विशेषशेषवादि साङ्ख्यमस्तीति । भगवतः निर्विशेषा स्थितिरेव शिष्टा शक्तिरस्तीत्यपि निर्विशेषशेषवादि साङ्ख्यमत्रावबोध्यम् । यतः महाप्रलये तदतिरिक्तं न किमपि शिष्यते ।

(१०१)

जीवादिषट्पदार्थाधिक्यवादि साङ्ख्यम्

श्रीमद्भागवतमहापुराणे दशमे स्कन्धे ऽष्टमे ऽध्याय एकोनचत्वारिंशत्तमे श्लोके मृद्भक्षणव्याजेन यशोदायै विश्वरूपप्रकटीकरणप्रसङ्गे श्रीशुकदेवेन प्रोक्तं जीवादिषट्पदार्थाधिक्यवादि साङ्ख्यमस्ति[१] । तदित्थम्—

जीवः, कालः, स्वभावः, कर्म-कर्मवासना-शरीरादिभिश्च नैकविधरूपेषु दृश्यमानं समग्रमेतज्जगत् समग्रं व्रजस्थानं तथा स्वात्मानमपि च माता यशोदा श्रीकृष्णचन्द्रस्य बालवदने ददर्श । तदा तस्याः चेतः शङ्कानिमग्नं समभूत् ।

इत्येतस्मिन् प्रसङ्गे जीवः, कालः,, स्वभावः,, कर्म, कर्मवासना, शरीरादीनीति षट्पदार्थाः विशेषरूपेण प्रतिपादिताः सन्तीति वक्तुं शक्यते, यदत्र जीवादिषट्पदार्थाधिक्यवादि साङ्ख्यमस्तीति ।

(१०२)

अद्वैतवादि साङ्ख्यम्

श्रीमद्भागवतमहापुराणे दशमे स्कन्धे नवमे ऽध्याये त्रयोदशचतुर्दशश्लोकयोः

---

१. एतद् विचित्रं सहजीव काल—
स्वभाव कर्माशय लिङ्ग भेदम् ।
सूनोस्तनौ वीक्ष्य विदारितास्ये
व्रजं सहात्मानमवाप शङ्काम् ।।
(स्क. १०. अ. ८, श्लो. ३९)

श्रीकृष्णचन्द्रस्योलूखलबन्धनप्रसङ्गे श्रीशुकदेवेन प्रतिपादितमद्वैतवादि साङ्ख्यमस्ति[१]। तद् यथा—

यस्य बहिर्नास्ति, न चान्तो ऽस्ति नादिर्वर्त्तते, स चानन्तोऽस्ति। यश्च जगतामादावप्यासीदन्तेऽपि च भविष्यति तथा जगतामन्तर्बहिश्च वर्त्तते तथा च जगतः स्वरूपेऽपि स एवास्ति परमात्मा। स इन्द्रियातीतो ऽव्यक्तश्चाऽस्ति। उपर्युक्ते प्रसङ्गे भगवदतिरिक्तङ् किमपि नास्तीति प्रतिपादितमस्तीत्यतो वक्तुं शक्यते, यदत्राद्वैतवादिसाङ्ख्यं वर्त्तत इति।

(१०३)

त्रैगुण्यात् सृष्टेः प्रतिपादकं साङ्ख्यम्

श्रीमद्भागवतमहापुराणे दशमे स्कन्धे चतुर्विंशतितमे ऽध्याये द्वाविंशतितमत्रयोविंशतितमयोः श्लोकयोः श्रीनन्दम्प्रति सुरेन्द्रमखभङ्गम्प्रस्तुतवता भगवता श्रीकृष्णचन्द्रेण प्रतिपादितन्त्रैगुण्यात् सृष्टेः प्रतिपादकं साङ्ख्यमस्ति[२]। तदित्थम्—

---

१. न चान्तर्न बहिर्यस्य न पूर्वं नापि चावरम्।
पूर्वापरं बहिश्चान्तर्जगतो यो जगच्च यः॥
तं मत्वाऽऽत्मजमव्यक्तं मर्त्यलिङ्गमधोक्षजम्।
गोपिकोलूखले दाम्ना बबन्ध प्राकृतं यथा॥
(स्क. १०, अ. ९, श्लो. १३—१४)

२. सत्त्वं रजस्तम इति स्थित्युत्पत्त्यन्तहेतवः।
रजसोत्पद्यते विश्यमन्योऽन्यं विविधं जगत्॥
रजसा चोदिता मेघा वर्षन्त्यम्बूनि सर्वतः।
प्रजास्तैरेव सिद्ध्यन्ति महेन्द्रः किं करिष्यति॥
(स्क. १०, अ. २४, श्लो. २२-२३)

जगतामुत्पत्ति-स्थित्यन्तानाङ् कारणानि क्रमशः सत्त्वगुणः रजोगुणस्तमोगुणश्चेति सन्ति। नैकविधं समग्रं जगत्स्त्रीपुरुषयोः संयोगेन रजोगुणेनोत्पन्नमस्ति। तस्यैव रजोगुणस्य प्रेरणया मेघाः सर्वत्र जलं वर्षयन्ति। जलादन्नानि जायन्ते। अन्नेनैव च जीवानाञ्जीविका प्रचलति।

उपर्युक्ते प्रसङ्गे त्रिभिः गुणैरेव सृष्टि-स्थिति-लयाः भवन्तीति प्रतिपादितमस्तीत्यतो वक्तु शक्यते यदत्र त्रैगुण्यात् सृष्टेः प्रतिपादकं साङ्ख्यमस्तीति।

(१०४)

मायातः सृष्टिप्रतिपादकं साङ्ख्यम्

श्रीमद्भागवतमहापुराणे सप्तत्रिंशत्तमे ऽध्याय एकादशश्लोकतस्त्रयोदश श्लोकं यावत् केशिवधे श्रीनारदकृतायां भगवतः श्रीकृष्णचन्द्रस्य स्तुतौ समधिगतं मायातः सृष्टिप्रतिपादकं साङ्ख्यमस्ति[1]। तदित्थम्—

श्रीसच्चिदानन्दस्वरूपिणः श्रीकृष्णचन्द्रस्य स्वरूपं मनसो वाण्याश्च विषयभूतं नाऽस्ति। भगवान् योगेश्वरो ऽस्ति। सर्वजगतान्नियामकः स एवास्ति। स एव सर्वेषां स्वान्तेषु वसति। सर्वे च तस्मिन्नेव निवसन्ति। यथैकोऽग्निः सर्वकाष्ठेषु व्याप्नोति तथैवैकः परमात्मा श्रीकृष्णः सर्वजगतामात्मा वर्त्तते। आत्मस्वरूपः सन्नपि स्वात्मानं गोपायति। यतः भगवान् पञ्चकोशभूतायाङ् गुहायान्निवसति। तथापि

---

१. कृष्ण कृष्णाप्रमेयात्मन् योगेश जगदीश्वर।
वासुदेवाखिलावास सात्वतां प्रवर प्रभो॥
त्वमात्मा सर्वभूतानामेकोज्योतिरिवैधसाम्।
गूढो गुहाशयः साक्षी महापुरुष ईश्वरः॥
आत्मनाऽऽत्माश्रयः पूर्वं मायया ससृजे गुणान्।
तैरिदं सत्यसंकल्पः सृजस्यत्स्यवसीश्वरः॥
(स्क. १०, अ. ३७, श्लो. ११—१३)

पुरुषोत्तमस्य स्वरूपे सर्वेषां नियन्तृस्वरूपे सर्वेषां साक्षिस्वरूपे चानुभूयते। सर्वेषामधिष्ठानभूप्पअधिष्ठानशून्यो भवति। भगवान् सृष्ट्यादौ स्वमाययैव गुणानां सृष्टिङ्करोति तान् गुणानेव स्वीकृत्य जगतामुत्पत्तिस्थितिप्रलयान् करोति। एतदर्थं भगवान् न वस्त्वन्तरमपेक्षते। यतः सः सर्वशक्तिमान् सत्यसङ्कल्पश्चास्ति।

उपर्युक्तप्रसङ्गे माययैवः श्रीपरमेश्वरः सम्पूर्णञ्जगदुत्पादयति पालयति संहरति चेति प्रतिपादनादत्र मायातः सृष्टिप्रतिपादकं साङ्ख्यमस्तीति।

(१०५)

अवतारवादि साङ्ख्यम्

श्रीमद्भागवतमहापुराणे दशमे स्कन्धे ऽष्टत्रिंशत्तमेऽध्याये द्वात्रिंशत्तमे श्लोके कंसाज्ञया श्रीरामकृष्णावानेतुं प्रस्थिते ऽक्रूरे तस्मिन्नेव प्रसङ्गे ऽक्रूरेण क्रियमाणान् विचारान् प्रस्तुवता श्रीशुकदेवेनोदीरितमवतारवादि साङ्ख्यमस्ति[2]। तदित्थम्—

अक्रूरो व्यचारद् यज्जगतामादिकारणौ प्रधानपुरुषावेव बलरामश्रीकृष्णस्वरूपयोरवतीर्णौ वर्त्तेते। तावेव जगतां परमपती वर्त्तेते तावेव स्वपूर्णांशैरवतीर्णौ स्तः। अतएव तौ स्वकान्त्या दिशो वितिमिरयतः। जगताङ्कल्याणञ्च कुरुतः।

उपर्युक्तायां विचारणायां स्पष्टीभवति, यदसौ पुरुषोत्तमो प्रधानश्चावतरत इति। अतएव वक्तुं शक्यते, यदत्र प्रधानपुरुषयोरवतारप्रतिपानादत्रा ऽवतारवादिसाङ्ख्यमस्ति, इति।

---

२. प्रधानपुरुषावाद्यौ जगद्धेतू जगत्पती।
अवतीर्णौ जगत्यर्थे स्वांशेन बलकेशवौ॥

(स्क. १०, अ. ३८, श्लो. ३२)

(१०६)

पाद्मभुवनकोशवादि साङ्ख्यम्

श्रीमद्भागवतमहापुराणे दशमे स्कन्धे चत्वारिंशत्तमे ऽध्याये श्रीकृष्णचन्द्रस्य-स्तुतौ श्रीअक्रूरेण प्रतिपादितं पाद्मभुवनकोशवादि साङ्ख्यमस्ति[१] ।

तच्चेत्थमवबोध्यम्—

भगवान् प्रकृत्यादीनां समग्रकारणानामपि परमङ्कारणमस्ति । भगवानविनाशी पुरुषोत्तमो नारायणो वर्त्तते । तस्यैव नाभिपद्माद् ब्रह्मण आविर्भावः समजनि येन ब्रह्मणा चराचरात्मकस्य जगतः सृष्टिर्विहिता । पृथिवी, जलं, तेजः, वायुः आकाशः, अहङ्कारः, महत्तत्त्वम् प्रकृतिः, पुरुषः, मनः इन्द्रियाणां विषयास्तेषामधिष्ठातृदेवताः इत्येतान्येव चराचरात्मकस्य जगतस्तथा जगद्व्यवहारस्य कारणानि सन्ति, तथा चैतानि सर्वाण्यपि परमात्मनः जलशायिनः श्रीकृष्णङ्स्याङ्गभूतानि सन्ति । प्रकृतिः प्रकृतिजाः सर्वे पदार्थाश्च इदंवृत्तिना गृह्यन्ते । अतएवेमे प्राकृताः पदार्थारनात्मनः सन्ति । अनात्मत्वादेव च जड़ाः सन्ति । अतएव भगवत्स्वरूपं तत्त्वतो ज्ञातुन्नार्हन्ति । यतो भगवान् स्वयमात्मैवास्ति । ब्रह्मावश्यमेव भगवत्स्वरूपमस्ति । परन्तु सः प्रकृतिगुणेन रजसा युक्तो ऽस्ति । अतएव सोऽपि भगवत्प्रकृतेस्तस्याः परत्वस्य च स्वरूपे नावगच्छति । साधवो योगिनश्च स्वान्तः करणावस्थितमन्तर्यामिस्वरूपेण समस्तभूतेषु भौतिकेषु

---

१. न तोऽस्म्यहं त्वाखिलहेतुहेतुं
नारायणं पूरुषमाद्यमव्ययम् ।
यन्नाभिजातादरविन्दकोशाद्
ब्रह्माविरासीद् यत एष लोकः ।।
भूस्तोयमग्निः पवनः खमादि
र्महाजनादिर्मन इन्द्रियाणि
सर्वेन्द्रियार्था विबुधाश्च सर्वे
ये हेतवस्ते जगतोऽऽङ्गभूताः ।।

पदार्थेषु च व्याप्तं परमात्मस्वरूपेण सूर्यः, चन्द्रमा, अग्निः, इत्यादिनां स्वरूपेण, तथातेषां साक्षिणे महापुरुषस्य स्वरूपेण, नियन्तुः ईश्वरस्य स्वरूपेण च भगवन्तं श्रीकृष्णचन्द्रमेवोपासन्ते। बहवोः कर्मकाण्डिनो ब्राह्मणाः कर्ममार्गोपदेशिन्या विद्यया इन्द्रोऽग्नि इत्यादीन्येनेकानि देववाचकानि नामानि तथा वज्रहस्तः सप्तार्चिरित्यादीनि रूपाणि तस्यैव भगवतः प्रतिपादयन्ति। तथा च महतो यज्ञान् सम्पादयन्तः भगवन्तं श्रीकृष्णचन्द्रमुपासन्ते। बहवो ज्ञानिनः स्वसमग्रकर्मणां न्यासं कुर्वन्ति साधुभावं च समाश्रयन्ते तेऽपि ज्ञानयज्ञेन ज्ञानस्वरूपं श्रीकृष्णमेवोपासन्ते। संस्कृताः शुद्धमनस्काः वैष्णवा भगवदुपदिष्टाभिः पञ्चरात्रादिभिर्विधिभिर्तन्मयाः सन्तः भगवतश्चतुर्व्यूहादीनामनेकरूपाणां नारायणः इत्येकस्य रूपस्य चोपासनाङ्कुर्वन्ति। अन्ये च शिवोपदिष्टेन यथा यस्याचारभेदेनावान्तरभेदाश्चऽपि सन्ति तेन शिवस्वरूपे भगवन्तं श्रीकृष्णचन्द्रमेवोपासन्ते। ये जनाः देवानन्यान् भजन्ते तथा तान् भगवतः पृथङ्मन्यते, तेऽपि वस्तुतस्तु भगवन्तमेवोपासन्ते यतः भगवान् श्रीकृष्ण एव सर्वदेवानां स्वरूपावस्थितो वर्त्तते। सर्वेश्वरश्चास्ति। यथा पर्वतेभ्यः नैकोद्गमेभ्यः निःसृताः नद्यः वर्षावाभिः पूरिताः सत्यः इतस्ततः भ्रामन्त्यः समुद्रमेव प्रविशन्ति, तथैव सर्वेऽप्युपासनापन्थानः इतस्ततो परिभ्रम्याप्यन्ततः श्रीकृष्णमेव प्राप्नुवन्ति।

नैते स्वरूपं विदुरात्मनस्ते
ह्यजादयोऽनात्मतया गृहीताः।
अजोऽनुबद्धः सगुणैरजाया
गुणात् परं वेद न ते स्वरूपम्॥
त्वां योगिनो यजन्त्यद्धा
महापुरुषमीश्वरम्।
साध्यात्मं साधिभूतं च
साधिदैवं च साधवः
त्रय्या च विद्यया केचित्त्वां वै वैतानिका द्विजाः।
यजन्ते विततैर्यज्ञैर्नानारूपामराख्यया॥
एके त्वाखिलकर्माणि संन्यस्योपशमं गताः।
ज्ञानिनो ज्ञानयज्ञेन यजन्ति ज्ञानविग्रहम्॥

भगवत्प्रकृतेस्त्रयो गुणाः सत्त्वगुणः रजोगुण स्तमोगुणश्चेति सन्ति। ब्रह्मणः समारभ्य स्तम्बपर्यन्तं सर्वेऽपि जीवाः प्राकृताः सन्ति। यथा वस्त्राणि सूत्रैः सहौतानि प्रौतानि च भवन्ति, तथैव सर्वेऽपि तस्याः प्रकृतेस्तैः गुणैरेवौताश्च प्रोताश्च सन्ति। भगवान् सर्वस्वरूपः सन्नपि तैर्न लिप्यते। भगवद् दृङ् निर्लिप्ताऽस्ति यतो भगवान् सर्ववृत्तीनां साक्षी वर्त्तते। गुणप्रभावजा सृष्टिरज्ञानमूला वर्त्तते, सैव च देव-मनुष्य-पशुपक्ष्यादिषु सर्वास्वपि योनिषु व्याप्ता वर्त्तते। परन्तु भगवान् तस्यानिर्लिप्तो वर्त्तते अग्निर्भवगन्मुखमस्ति, पृथिवी चरणौस्तः सूर्यचन्द्रौ नेत्रे स्तः, खन्नाभिः, दिशः श्रोत्रे, स्वर्गं शिरः, देवेन्द्रगणाः बाहू, समुद्रङ्कुक्षिः, वायुरेव भगवत्प्राणशक्तिरूपेणोपासनार्थं कल्पितोऽस्ति। वृक्षारोषधयश्च रोमाणि सन्ति, मेघाः शिरसः केशाः सन्ति, पर्वताः भगवतो ऽस्थ्नां समूहाः नखाश्च सन्ति। उन्मेषनिमेषावहोरात्रे वर्त्तते, प्रजापति-

---

अन्ये च संस्कृतात्मानो विधिनाभिहितेन ते।
यजन्ति त्वन्मयास्त्वां वै बहुमूर्त्यैकमूर्तिकम्॥
त्वामेवान्ये शिवोक्तेन मार्गेण शिवरूपिणम्।
बह्वाचार्यविभेदेन भगवन् समुपासते॥
सर्व एव यजन्ति त्वां सर्वदेवमयेश्वरम्।
येऽप्यन्यदेवताभक्ता यद्यप्यन्यधियः प्रभो॥
यथाद्रिप्रभवा नद्यः पर्जन्यापूरिताः प्रभो।
विशन्ति सर्वतः सिन्धुं तद्वत्त्वां गतयोऽन्ततः॥
सत्त्वं रजस्तम इति भवतः प्रकृते र्गुणाः
तेषु हि प्राकृता प्रोताः आब्रह्मस्थावरादयः॥
तुभ्यं नमस्तेऽस्त्वविषक्तदृष्टये
सर्वात्मने सर्वधियां च साक्षिणे।
गुणप्रवाहोऽयमविद्यया कृतः
प्रवर्त्तते देवनृतिर्यगात्मसु॥
अग्निर्मुखं तेऽवनिरङ्घ्रिरीक्षणं
सूर्यो नभो नाभिरथो दिशः श्रुतिः।
द्यौः कं सुरेन्द्रास्तव बाहवोऽर्णवाः

र्जननेन्द्रियमस्ति, वृष्टिश्च भगवद्वीर्यमस्ति । यथा जले जलचराः जीवाः, उदुम्बरफले सूक्ष्मसूक्ष्माः कीटा निवसन्ति, तथैवोपासनार्थं स्वीकृते भगवतः मनोमये पुरुषस्वरूपे नैकविधजीवभरिताः लोकाः लोकपालाश्च कल्पिताः सन्ति । भगवान् क्रीडार्थं पृथिव्यां यानि यानि रूपाणि धारयति तानि तान्यावरणानि जनानामाधिव्याधीः दूरीकुर्वन्ति । भगवान् वेदानामृषिणामोषधीनां सत्यव्रतानाञ्च रक्षार्थं मत्स्यरूपं धृतवान् । प्रलय-पाथोधौ स्वछन्दं विजहार । मधुकैटभयोः संहरणाय हयग्रीवावतारो गृहीतः । भगवान् एव कच्छपरूपेण मन्दराचलन्दधार । भुवः समुद्धरणाय वराहावतारो धृतः । प्रह्लाद निभानां साधूनां भेदभावनाशनाय तेषामुपद्रवनिवृत्तये च नृहरिरूपन् दधार । बामनस्वरूपेण लोकत्रयं त्रिभिः पादविक्षेपै मानयामास । धर्मोल्लङ्घनकर्तृणां गर्विणाङ् क्षत्रियाणां संहरणाय परशुरामरूदपन्दधार । रावणविनाशाय रघुवंशे रामरूपेणावततार । वैष्णवानां यदुवंशीनाञ्च पालनाय भगवान् स्वात्मानमेव वासुदेव-सङ्कर्षण-प्रद्युम्न-अनिरूद्धेति चतुर्व्यूहस्वरूपेण प्रकटीचकार । दैत्यानान्दानवानञ्च मोहनाय शुद्धहिंसायाः प्रवर्त्तकस्य बुद्धस्य स्वरूपेणापि भगवानवततार । क्षत्रियाः यदा म्लेच्छ-प्रायाः भविष्यन्ति तेषां विनाशाय भगवान् एव कल्किरूपेणाऽवतरिष्यति । सर्वे जीवाः

कुक्षिर्मरूत् प्राणबलं प्रकल्पितम् ।।
रोमाणि वृक्षौषधयः शिरोरूहा
मेघाः परस्यास्थिनरखानि तेऽद्रयः ।
निमेषणं रात्र्यहनी प्रजापति
र्मेद्रस्तु वृष्टिस्तववीर्यमिष्यते ।।
त्वय्यव्ययात्मन् पुरुषे प्रकल्पिता
लोकाः सपाला बहुजीवसंकुलाः ।
यथा जले सञ्जिहते जलौकसो
ऽप्युदुम्बरे वा मशका मनोमये ।।
यानि यानीह रूपाणि क्रीडनार्थं बिभर्षि हि ।
तैरामृष्टशुचो लोका मुदा गायन्ति ते यशः ।।
नमः कारणमत्स्याय प्रलयाब्धिचराय च ।
हयशीर्ष्णे नमस्तुभ्यं मधुकैटभमृत्यवे ।।

भगवन्माययैव मुग्धाः सन्ति । मोहवशादेवाहम्ममेति दुराग्रहैः गृहीताः कर्मपथःसु परिभ्रमन्ति । जीवात्मा मिथ्याभूतानि देह-गेहादीनि स्त्री-पुत्र-धनादीनि च सत्यानि मत्वा मूढास्तेष्वनुरञ्जन्ति । तथाऽनित्यवस्तूनि नित्यानि, अनात्मतत्त्वान्यात्मतत्त्वत्वेन दुःखान्यपि च सुखानीति मन्वानाः सर्वत्र विपरीतां बुद्धिमज्ञानवशात्प्राप्नोति तथा भगवान् एव सर्वथा प्रेयान् वर्त्तत इति नावगच्छति । यथानभिज्ञः पुमान् जलाय तटाकङ्गच्छेत् तथा सरसः समुदभूतान् तृणकमलादीन् विलोक्य एवमवगच्छेद्यदत्र जलं नास्तीति तथा सूर्यमयूखेषु मिथ्याप्रतीयमानां जलाय मृगतृष्णामभिधावति, तथैव जीवः स्वमाययैव भ्रान्तः जगदीश्वरं विहाय विषयेषु सुखेहया भ्रमति । जीवो ऽविनाशिनोऽक्षरस्य वस्तुज्ञानाऽनभिज्ञो भवति । अतएव नैकविधवस्तुकामनासुतासां परिपूर्त्यर्थञ्च क्रियमाणेषु कर्मसु कृतसङ्कल्पो भवति । तदतिरिक्तमिन्द्रि-

---

अकूपाराय बृहते नमो मन्दरधारिणे ।
क्षित्युद्धारविहाराय नमः सूकरमूर्त्तये ।।
नमस्तेऽद्भुतसिंहाय साधुलोकभयापह ।
वामनाय नमस्तुभ्यं क्रान्तत्रिभुवनाय च ।।
नमो भृगूणां पतये दृप्तक्षत्रवनच्छिदे ।
नमस्ते रघुवर्याय रावणान्तकराय च ।।
नमस्ते वासुदेवाय नमः संकर्षणाय च ।
प्रद्युम्नायानिरुद्धाय सात्वतां पतये नमः ।।
नमो बुद्धाय शुद्धाय दैत्यदानवमोहिने ।
म्लेच्छप्रायक्षत्रहन्त्रे नमस्ते कल्किरूपिणे ।।
भगवञ्जीवलोकोऽयं मोहितस्तव मायया ।
अहं ममेत्यसद्ग्राहो भ्राम्यते कर्मवर्त्मसु ।।
अहं चात्मात्मजागारदारार्थस्वजनादिषु ।
भ्रमामि स्वप्नकल्पेषु मूढः सत्यधिया विभो ।।
अनित्यानात्मदुःखेषु विपर्ययमतिर्ह्यहम् ।

याण्यपि मनः कर्षन्ति । जीवश्चात्मानन्नार्हति । एवं भ्रान्तोऽपि कर्हिचिद्भगवदनुग्रहेण भगवच्चरणाविन्दे शरणीकरोति । यदा मुक्त्यवसरः प्राप्यते तदैव सत्पुरुषाणां सान्निध्येन भगवति मनोवृत्तिः व्यस्ता भवति । भगवान् विज्ञानधनः विज्ञानस्वरूपी च वर्त्तते । सर्वासां प्रतीतीनां वृत्तीनाञ्च कारणं भगवान् एव वर्तते ऽधिष्ठानञ्च । जीवस्वरूपे कालस्वरूपे कर्मस्वरूपे स्वभावस्वरूपे प्रकृतिस्वरूपेऽपि च भगवान् एव विराजते । तथैतेषां समेषामपि तत्त्वानान्नियन्ताऽपि वर्त्तते । भगवतः शवतयोऽनन्ताः सन्ति । सोऽत्र स्वयं परमं ब्रह्माऽस्ति । समस्तजीवानामाश्रयः सङ्कर्षणस्वरूपी भगवान् एव वर्त्तते । बुद्धिमनसोरधिष्ठातृदेवो हृषीकेशोऽस्ति । स परमेश्वरः शरणापन्नानाम्परिपालकः योगक्षेमवाही च वर्त्तते ।

उपर्युक्ते प्रसङ्गे भगवतः शेषशायिनः नाभेर्पद्म पद्माच्च पद्मयोनिः ब्रह्मा जायते तस्माच्च क्रमशः सृष्टिर्भवति । अतो वक्तुं शक्यते यद्भुवनकोशोऽयं पद्मजमेवास्तीत्यतो ऽत्र पाद्मभुवनकोशवादि साङ्ख्यमस्तीति ।

द्वन्द्वारामस्तमोविष्टो न जाने त्वाऽऽत्मनःप्रियम् ।।
यथा बुधो जलं हित्वा प्रतिच्छन्न तदुद्भवैः ।
अभ्येति मृगतृष्णां वै तद्वत्त्वाहं पराङ्मुखः ।।
नोत्सहेऽहं कृपणधीः कामकर्महतं मनः ।
रोद्धुं प्रमाथिभिश्चाक्षैर्ह्रियमाणमितस्ततः ।।
सोऽहं तवाङ्घ्र्युपगतोऽस्म्यसतां दुरापं
तच्चाप्यहं भवदनुग्रह ईश मन्ये ।
पुंसो भवेद् यर्हि संसरणापवर्ग—
स्त्वय्यब्जनाभ सदुपासनया मतिः स्यात् ।।
नमो विज्ञानमात्राय सर्वप्रत्ययहेतवे ।
पुरुषेशप्रधानाय ब्रह्मणेऽनन्तशक्तये ।।
नमस्ते वासुदेवाय सर्वभूतक्षयाय च ।
हृषीकेश नमस्तुभ्यं प्रपन्नं पाहि मां प्रभो ।।

(स्क. १०, अ. ४०, श्लो. १—३०)

(१०७)

त्रैगुण्यतः सर्ग प्रतिपादकं साङ्ख्यम्

श्रीमद्भागवतमहापुराणे दशमे स्कन्धे षट्चत्त्वारिंशत्तमे ऽध्याये नवत्रिंशत्तम-श्लोकतः समारभ्य द्विचत्वारिंशत्तमं श्लोकं यावच्छ्रीउद्धवेन श्रीनन्दम्प्रति प्रतिपादितन् त्रैगुण्यप्रतिपादकं साङ्ख्यमस्तीति[1]।

तच्चेत्थमवबोध्यम्—

भगवान् जन्मरहितोऽस्ति। तस्मिन् प्राकृताः गुणाः नैव सन्ति। तथापि लीलायै सत्त्वरजस्तमांसि स्वीकरोति तैश्च जगतां सृष्टिस्थितिलयान् विदधाति। यदा बालकाः भ्रमरिका क्रीडाङ्कुर्वन्ति, मानवा वेगेनः भ्रमन्ति वा तदा तैः सर्वा पृथिवी भ्रमतीव प्रतीयते तथैव वस्तुतः सर्वकारि चित्तमेवास्ति परन्तस्मिन् अहं बुद्धित्वाद् भ्रमवशा-च्चऽऽत्मानं कर्त्तृत्वेन गृह्णाति। परन्तु वस्तुतत्त्वं नैवमस्ति। वस्तुतस्तु भगवान् एव सर्वेषामात्मा पुत्र-मातृ-पितृ-स्वाम्यादिरस्ति।

उपर्युक्तम्प्रसङ्गमनुसृत्यवक्तुं शक्यते यद् भगवाँल् लीलायै गुणान्स्वीकरोति गुणैश्च सृजति-पालयति, संहरति च। इत्यतो गुणा एव सृष्टि-स्थितिलयानाङ्कारण भूताः सन्तीति प्रतिपादनात् त्रैगुण्तः सर्ग प्रतिपादकं साङ्ख्यमत्रास्तीति समवबोद्धव्यम्।

---

१. न चास्य कर्म वा लोके सदसन्मिश्रयोनिषु।
क्रीडार्थः सोऽपि साधनां परित्राणाय कल्पते॥
सत्त्वं रजस्तम इति भजते निर्गुणो गुणान्।
क्रीडन्नतीतोऽत्र गुणैः सृजत्यवति हन्त्यजः॥
यथा भ्रमरिकादृष्ट्या भ्राम्यतीव महीयते।
चित्ते कर्तरि तत्रात्मा कर्तेवाहं धिया स्मृतः॥
युवयोरेव नैवायमात्मजो भगवान् हरिः।
सर्वेषामात्मजो ह्यात्मा पिता माता स ईश्वरः॥
(स्क. १० अ. ४६ श्लो. ३९—४२)

(१०८)

आत्मसृष्टिप्रतिपादकं साङ्ख्यम्

श्रीमद्भागवतमहापुराणे दशमे स्कन्धे सप्तचत्त्वारिंशत्तमेऽध्याय एकोनत्रिंशत्तमश्लोकतः समारभ्य त्रयस्त्रिंशत्तमश्लोकं यावच्छ्रीकृष्णस्यमित्रेणोद्धवेन श्रीकृष्णस्य सन्देशरूपेण प्रतिपादितमात्मसृष्टिप्रतिपादकं साङ्ख्यमस्ति[1] ।

तच्चाऽस्ति-यत्—

भगवान् समेषामुपादनकारणत्वात् सर्वात्वा वर्त्तते, सर्वानुगतश्चास्ति। अतएव कस्मादपि प्राणिनः प्रभुः, प्रभोश्च कोऽपि प्राणी वियुक्तो भवितुन्नार्हति । यथा सांसारिकाः सर्वेऽपि पदार्थाः पृथिव्यप्तेजोवाय्वाकाशैः संयुक्ताः सन्ति, पञ्चभूतेभ्य एव च सर्ववस्तुजातञ्जातं वर्त्तते । तथैव भगवान् मनसः प्राणानां पञ्चभूतानामिन्द्रियाणां समे-

---

१. भवतीनां वियोगो मे न हि सर्वात्मना क्वचित् ।
यथा भूतानि भूतेषु खं वाय्वग्निर्जलं मही ।।
तथाऽहं च मनः प्राणभूतेन्द्रियगुणाश्रयः ।।
आत्मन्येवाऽऽत्मनाऽऽत्मानं सृजे हन्म्यनुपालये ।
आत्ममायानुभावेन, भूतेन्द्रियगुणात्मना ।।
आत्माज्ञानमयः शुद्धो व्यतिरिक्तोऽगुणान्वयः ।
सुषुप्तिस्वप्नजाग्रद्भिर्मायावृत्तिभिरीयते ।।
येनेन्द्रियार्थान्ध्यायेत मृषा स्वप्नवदुत्थितः ।
तन्निरून्ध्यादिन्द्रियाणि विनिद्रः प्रत्यपद्यत ।।
एतदन्तः समाम्नायो योगः साङ्ख्यं मनीषिणाम् ।
त्यागस्तपो दमः सत्यं समुद्रान्ता इवापगाः ।।
(स्क. १० अ. ४७ श्लो. २९—३३)

षामपि विषयाणाञ्चाऽऽश्रयोस्ति । वस्तुतो भगवान् सर्वेषु सर्वे च भगवति सन्ति, भगवान् स्वमायया भूतेन्द्रियविषयरूप: सन् तेषामाश्रयत्वमपि भजते, तथा च स्वयं निमित्ती भूय स्वात्मानं स्वयमेव सृजति पाति, संहरति च। आत्मा मायायास्तत्कार्येभ्यश्च पृथग्वर्त्तते । स विशुद्धो ज्ञानस्वरूपी जडाया: प्रकृते: नैकेभ्यो: केभ्यो: जीवेभ्य: स्वस्यैव चावान्तर भेदेभ्य: पृथग्भूत: सर्वथा शुद्धोऽस्ति । कोऽपि गुणस्तं स्पर्ष्टुन्नार्हति । मायाया: तिस्रो वृत्तय: सुषुप्तिस्वप्नजाग्रदवस्थात्मिका: सन्ति । एताभि: वृत्तिभि: स एवाखण्डोऽनन्तो बोधस्वरूपी चाऽऽत्मा कर्हिचित्प्राज्ञ: कर्हिचित्तैजस: कर्हिचिद विश्वरूपात्मक: प्रतीयते स्वप्ने प्रतीयमानपदार्थानिव जाग्रदवस्थायां प्रतीयमानानिन्द्रियाणांविषयानपि मिथ्यात्वेन गृह्णीयात् तथा तद् विषयासक्तानीन्द्रियमनांसि वशीकुर्यात् सुप्तोत्थितस्वाप्नविषयानिव सांसारिकान् विषयान् परिहाय भगवान् साक्षात्कुर्यात्त् यथा सर्वा: नद्य: समुद्रमेवाभिधावन्ति तथैव मनस्विनां पुंसां वेदाभ्यास:, योगसाधनं आत्मामात्मविवेक: त्यागो तप: इन्द्रियाणां संयम: समस्तधर्माश्च भगवत्प्राप्तावेव समाप्यन्ते ।

उपर्युक्तप्रसङ्गे ह्यात्मनो नित्यत्वमात्म न एव च सम्पूर्णा सृष्टिर्भवतीति प्रतिपादितमस्ति । इत्यतो वक्तुं शक्यते । यदत्राऽऽत्मसृष्टिप्रतिपादकं साङ्ख्यमस्तीति ।

(१०६)

द्वैतसृष्टिप्रतिपादकं साङ्ख्यम्

श्रीमद्भागवतमहापुराणे दशमे स्कन्धेऽष्टचत्वारिंशत्तमेऽऽष्टध्यायेऽादश-श्लोकत: समारभ्य पञ्चविंशतितमश्लोकं यावच्छ्री अक्रूरेण श्रीरामकृष्णयो: समर्चनं विधाय व्याहृतन्द्वैतसृष्टिप्रतिपादकं साङ्ख्यमस्ति[1] । तदित्थम्—

---

१. युवां प्रधानपुरुषौ जगद्धेतू जगन्मयौ ।
भवद्भ्यां न विना किंचित् परमस्ति न चापरम् ।।
आत्मसृष्टमिदं विश्वमन्वाविश्य स्वशक्तिभि: ।
ईयते बहुधा ब्रह्मन् श्रुतप्रत्यक्षगोचरम् ।।
यथा हि भूतेषु चराचरेषु
मह्यादयो योनिषु भवान्ति नाना ।

श्रीबलरामकृष्णचन्द्रौ जगताङ्कारणे जगत्स्वरूपे ह्यादिपुरुषौ स्तः, तदतिरिक्तं किमऽपि वस्त्वन्तरन्नास्ति। भगवान् स्वशक्त्यैव जगदेतत्सृजति। भगवान् एव स्वकालमायादिभिः शक्तिभिः दृश्यमानश्रूयमाणेषु सर्वेष्वपि वस्तुषु प्रविष्टः प्रतीयते। यथा पृथिव्यादिभिः कारणतत्त्वैरेव तेषाङ्कार्याणि स्थावरजङ्गमादीनि निर्मीयन्ते। तेष्वनुप्रविष्ट इव भगवान् नैकरूपेषु प्रतीयते परन्तु वस्तुतस्तु भगवान् केवलङ्कारणस्वरूप्येवास्ति। इत्थमेव भगवान् रजोगुणसत्त्वगुणतमोगुणशक्तिभिः क्रमशः सृजनपालनसंहरणानि करोति। परन्तु गुणानान्तद्भूतकर्मणाञ्च बन्धनं भगवति भवितुन्नैव प्रभवति। यतः भगवान् शुद्धो ज्ञानस्वरूपी वर्त्तते। स्वयमात्मवस्तुनि स्थूलसूक्ष्मदेहाद्युपाध्यभावात् जन्ममृत्यू तत्र नैव स्तः न च भेदभावश्चापि, इत्यत एव भगवति बन्धमोक्षौ नैव स्तः। भगवति चेत् स्वं स्वं प्रयोजनमनुसृत्य बन्धमोक्षयोर्या कल्पना क्रियते तत्र कल्पकानाम-

---

एवं भवान् केवल आत्मयोनि,
ष्वात्माऽऽत्मतन्त्रो बहुधा विभाति ।।
सृजस्यथो लुम्पसि पासि विश्वम्,
रजस्तमःसत्त्वगुणैः स्वशक्तिभिः ।
न बध्यसे तद्गुणकर्मभिर्वा
ज्ञानात्मनस्तेक्क च बन्धहेतुः ।।
देहाद्युपाधेरनिरूपितत्वाद्
भवो न साक्षान्न भिदात्मनः स्यात् ।
अतो न बन्धस्तव नैव मोक्षः,
स्यातां निकामस्त्वयि नोऽविवेकः।।
त्वयोदितोऽयं जगतो हिताय,
यदा यदा वेदपथः पुराणः ।
बाध्येत पाखण्डपथैरसद्भि
स्तदा भवान् सत्त्वगुणं विभर्ति ।।
स त्वं प्रभोऽद्य वसुदेवगृहेऽवतीर्णः

विवेक एकास्ति बीजम् । जगताङ्कल्याणाय भगवान् सनातनं वेदमार्गं प्रकटीचकार । अतो यदा यदा पाखण्डिभिः क्षतिर्विधीयते, तदा तदा शुद्धसत्त्वमयं शरीरं गृहीत्वाभगवान् स्वयमवतीर्य पाखण्डिनः संहरति । इत्थमेव भगवान् स्वयं स्वांशेन बलेन सह भूभारापनुत्तये प्रकटीबभूव । भगवान् श्रीकृष्णोऽसुरांशसम्भूतान् नाममात्रशासकान् तेषां शतशताक्षौहिणी सेनाश्च संहृतवान् । इत्थमेवेह यदुवंशस्य यशोऽपि विस्तारयामास । सर्वे देवाः पितरो भूतगणाः राजानश्च भगवत एव स्वरूपाणि सन्ति । भगवच्चरणोदकङ् गङ्गा लोकत्रयं पुनाति ! भगवान् सर्वजगताञ्जनको गुरुश्चास्ति ।

उपर्युक्ते प्रसङ्गे द्वैतसृष्टेः प्रतिपादनमस्तीति वक्तुं शक्यते, यदत्र द्वैतसृष्टिप्रतिपादकं साङ्ख्यं वर्त्तत इति ।

(११०)

कालस्वीकर्त्तृ साङ्ख्यम्

श्रीमद्भागवतमहापुराणे दशमे स्कन्ध एकपञ्चाशत्तमेऽध्यायेऽष्टादशश्लोकतः समारभ्यैकोनविंशतितमश्लोकं यावत्च्चिरकालपर्यन्तं स्वः पालनतत्परायेक्ष्वाकुकुला-

---

स्वांशेन भारमपनेतुमिहासि भूमेः ।
अक्षौहिणीशतवधेन सुरेतरांश—
राज्ञाममुष्य च कुलस्य यशो वितन्वन् ।।
अद्येश नो वसतयः खलु भूरिभागाः सर्वदेवपितृभूतनृदेवमूर्तिः
यत्पादशौचसलिलं त्रिजगत् पुनाति
स त्वं जगद्गुरूरधोक्षज याः प्रविष्टः ।।
(स्क. १० अ. ४८ श्लो. १८—२५)

वतंसाय श्रीमुचुकन्दाय नृपतये देवैः प्रतिपादितं कालस्वीकर्तृसाङ्ख्यमस्ति[१]। तच्चेत्थमवबोध्यम्—

कालवशात् स्त्रियः पुत्राः मन्त्रिणोऽमात्याश्च सर्वेऽपि विलयङ्गताः । कालो बलीयःस्वऽपि बलीयान् वर्त्तते । सः स्वयं परमसमर्थोऽविनाशी भगवत्स्वरूपी च वर्त्तते । यथा गोपालाः गाः वशीकुर्वन्ति तथैवायङ्कालः सर्वाः प्रजाः स्ववशीकरोति ।

उपर्युक्ते प्रसङ्गे कालस्य सत्ता सर्वशक्तिमत्त्वेन स्वीकृता । इत्यतो वक्तं शक्यते, यदत्र कालस्वीकर्तृसाङ्ख्यमस्तीति सुनिश्चतम् ।

(१११)

अवतारवादि साङ्ख्यम्

श्रीमद्भागवतमहापुराणे दशमे स्कन्धे ह्येकपञ्चाशत्तमे ऽध्याये सप्तत्रिंशत्तम-

---

१. सुता महिष्यो भक्तो ज्ञातयोऽमात्यमन्त्रिणः ।
प्रजाश्च तुल्यकालीया नाधुना सन्ति कालिता : ।।
कालो बलीयान् वलिनां भगवानीश्वरोऽव्ययः ।
प्रजाः कालयते क्रीडन् पशुपालो यथा पशून् ।।
वरं वृणीष्व भद्रं ते ऋते कैवल्यमद्य नः ।
एक एवेश्वरस्तस्य भगवान् विष्णुरव्ययः ।
(स्क. १० अ. ५१ श्लो. १८—२०)

श्लोकतः समारभ्यैकचत्वारिंशत्तमश्लोकं यावदवतारवादि साङ्ख्यमस्ति[1]।

तच्चेत्थमवबोध्यम्—

भगवतः सहस्रशो नामकर्माणि सन्ति। भगवान् स्वयमप्यनन्तानाञ्जन्मकर्मणां सङ्ख्यानङ् कर्तुन्नार्हति। सम्भवति यत्कोऽपि पुरुषः नैकजन्मषु पृथिव्याः रजः कणान् सङ्ख्यातुञ्चापि कदाचित् प्रभवेत्। परन्तु भगवतः जन्मगुणकर्माणि च कोऽपि कदापि कथञ्चिदपि सङ्ख्यातुन्नार्हति। सनकसनन्दनादयस्त्रिकालदर्शिनोः ऋषयः त्रिकालसिद्धानि भगवज् जन्मकर्माणि गायन्ति परन्ते चाऽपि पारमधिगन्तुन्नैव शक्नुवन्ति।

भगवान् ब्रह्मणः प्रार्थनया भूभारहरणाय यदुवंशे वसुदेवगेहे श्रीकृष्ण स्वरूपेणाऽवततार।

उपर्युक्तप्रसङ्गे भगवता श्रीकृष्णेन स्वयं मुचुकुन्दाय स्वाऽवतारकर्मणां विषये समुपदिष्टमित्यतो वक्तुं शक्यते यदत्राऽवतारवादि साङ्ख्यमस्तीतिशम्।

---

१. जन्मकर्माभिधानानि सन्ति मेऽङ्ग सहस्रशः।
न शक्यन्तेऽनुसङ्ख्यातुमनन्तत्वान्मयापि हि।
क्वचिद् रजांसि विममे पार्थिवान्युरूजन्मभिः।
गुणकर्माभिधानानि न मे जन्मानि कर्हिचित्॥
कालत्रयोपपन्नानि जन्मकर्माणि मे नृप।
अनुक्रमन्तो नैवान्तं गच्छन्ति परमर्षयः॥
तथाप्यद्यतनान्यङ्ग श्रृणुष्व गदतो मम।
विज्ञापितो विरिञ्चेन पुराहं धर्मगुप्तये॥
भूमेर्भारायमाणानामसुराणां क्षयाय च।
अवतीर्णो यदुकुले गृह आनकदुन्दुभेः॥
वदन्ति वासुदेवेति वसुदेसुवं हि माम्॥
(स्क. १०, अ. ५१ श्लो. ३७—४१)

(११२)

मोहात्मकसंसारवादि साङ्ख्यम्

श्रीमद्भागवतमहापुराणे दशमे स्कन्धे चतुःपञ्चाशत्तमेऽध्याये त्रिचत्वारिंशत्तमश्लोकतः समारभ्याष्टचत्वारिंशत्तम श्लोकं यावत् श्रीकृष्णरुक्मिणोः युद्धे रुक्मिणि पराभूते भगवन्तं श्रीकृष्णं सान्त्वयता श्रीबलरामेण प्रतिपादितं मोहात्मकसंसारवादि साङ्ख्यमस्ति[1]। तच्चेत्थमवबोध्यम्—

ये जनाः भगवन्मायया मुग्धाः देहमेवात्मानं मन्यन्ते, त एवैतादृशम्मोहङ्कुर्वन्ति यदसौ शत्रुरेतन्मित्रमसौदासीन्यमान् चास्तीति। सर्वदेह धारिणामात्मा ह्येकोऽस्ति। कार्यकारणैः मायया च सह तस्य कोऽपि सम्बन्धो नास्ति। जलघटाद्युपाधिभेदेन सूर्यचन्द्रादिप्रकाशयुक्ताः पदार्थाः आकाशश्च पृथक् पृथक् प्रतीयन्ते परं वस्तुतः एक एव सन्ति, तथैव मूढाः शरीरभेदमधिकृत्याऽऽत्मनो भेदं मन्वते, शरीरमाद्यन्तमस्ति, आत्मन्यज्ञाना-

---

१. आत्ममोहो नृणामेप कल्प्यते देवमायया।
सुहृद् दुर्हृदुदासीन इति देहात्ममानिनाम्॥
एक एव परो ह्यात्मा सर्वेषामपि देहिनाम्।
नानेव गृह्यते मूढैर्यथा ज्योतिर्यथा नभः॥
देह आद्यन्तवानेष द्रव्यप्राणगुणात्मकः।
आत्मन्यविद्यया क्लृप्तः संसारयति देहिनम्॥
नात्मनोऽन्येन संयोगो वियोगश्चासतः सति।
तद्धेतुत्वात्तत्प्रसिद्धेर्दृग्रूपाभ्यां यथा रवेः॥
जन्मादयस्तु देहस्य विक्रिया नात्मनः क्वचित्।
कलानामिव नैवेन्दोर्मृतिर्ह्यस्य कुहूरिव॥
यथा शयान आत्मानं विषयान् फलमेव च।
अनुभुङ्क्तेऽप्यसत्यर्थे तथाऽऽप्नोत्यबुधो भवम्॥
स्क. १० अ. ५४ श्लो. ४३—४८)

देवास्याकल्पना क्रियते, कल्पितशरीरमेव सत्यत्वेन गृह्णाति तर्हि जन्ममृत्युचक्रे पतति। नेत्ररूपे उभेऽपि सूर्येणैव प्रकाशेते। सूर्य एवास्ति तयोः कारणम्। अतएव सूर्येण सह नेत्ररूपयोर्वियोगसंयोगौ कर्हिचिदपि न भवतः। इत्थमेव जगतामेव सत्तात्तऽऽत्मसत्तया ज्ञायते। सर्वजगताम्प्रकाशक आत्मैवाऽस्ति। तर्ह्यात्मना सहासत्पदार्थानां संयोग-वियोगौ कथं भवेताम्। जनन-स्थिति-वृद्धि-परिवर्तन-ह्रास-मृत्युश्चेति विकाराः शरीरस्यैव भवन्ति नाऽऽत्मनः। यथा कृष्णपक्षे कला एव क्षीयन्ते न तु चन्द्रः किन्तु व्यवहारे जनाः चन्द्रमेव क्षीणङ् कथयन्ति। इत्थमेव विकारानेतान् शारीरकानपि भ्रान्त्या आत्मनः मन्यन्ते। यथा सुप्तः पुमान् पदार्थस्य सत्ताभावेऽपि स्वप्ने भोक्तृभोग्य भोगरूपात्मकानि फलान्यनुभवति, तथैव वाऽज्ञानिनः मिथ्यैव संसारचक्रमनुभवन्ति। सत्यतामनन्ततीञ्च चिरन्तनताञ्चाऽभ्युपगच्छन्ति जनः संसारस्यास्यति प्रतिपादित-मस्ति, यञ्च ञ्जगदेतभ्ब्रह्मोत्मा सर्वात्मकमस्तीति। अतएव वक्तुं शक्यते यदत्र मोहात्मसंसारवादिसाङ्ख्यम् वर्त्तते इति।

उपर्युक्ते प्रसङ्गे सांसारिकाः सर्वेऽपि पदार्थाः वस्तुतस्तु नैव सन्ति किन्तु यथा स्वप्नस्थः पुमान् पदार्थाऽभावेऽपि भोक्तृभोग्यभोगात्मकानि फलान्यनुभवति तथैव मायया मुग्धो जनाः संसारस्य सत्यताञ्चिरन्तनतां वाऽभ्युपगच्छतीति प्रतिपादनादिह जगदेतन्मोहात्मक मेवाऽस्तीति प्रतिपादनाच्चेह मोहात्मक ससारवादि साङ्ख्यमस्तीतिशम्।

(११३)

त्रैगुण्यसृष्टिवादि साङ्ख्यम्

श्रीमद्भागवतमहापुराणे दशमे स्कन्ध एकोनषष्टितमे ऽध्याये पञ्चविंशतितमश्लोकतः समारम्य त्रिंशत्तमश्लोकं यावद्भुवा श्रीकृष्णचन्द्रस्य स्तुतौ व्याहृतं त्रैगुण्यसृष्टिवादि साङ्ख्यमस्ति[1]। तच्चेत्थमवबोध्यम्—

---

1. नमस्ते देवदेवेश शङ्खचक्रगदाधर।
भक्तेच्छोपात्तरूपाय परमात्मन् नमोऽस्तु ते॥
नमः पङ्कजनाभाय नमः पङ्कजमालिने।
नमः पङ्कजनेत्राय नमस्ते पङ्कजाङ्घ्रये॥
नमो भगवते तुभ्यं वासुदेवाय विष्णवे।

भगवान् भक्तानामाकाङ्क्षापूर्त्तये तथा तथा रूपाणि दधाति । भगवतः नाभेः पद्म प्रादुरभूत् । भगवान्सर्वैश्वर्यस्य धर्मस्य यशसः श्रियः ज्ञानस्य वैराग्यस्य चाऽऽश्रयोऽस्ति । सः सर्वव्यापकः सन्नपि वसुदेवनन्दनन्दनत्वेन श्रीकृष्णरूपेणऽवततार । स एव पुरुषः सर्वकारणानामपि कारणमस्ति । पूर्णज्ञानस्वरूपी चास्ति । जन्मरहितोऽपि सर्वजगताञ्जन्मदः सर्वशक्तीनामाश्रयीभूतो ब्रह्माऽस्ति । जगतां यत्किमपि कार्यकारणस्वरूपात्मकं रूपमस्ति यावन्तश्च प्राणिनोऽप्राणिनश्च सन्ति । सर्वाण्यपि भगवत्स्वरूपाण्येव सन्ति । यदा भगवान् सिसृक्षते, तदोत्कटं रजो गुणम्, प्रलयेप्सायां तमोगुणम्, रिरक्षायां च सत्त्वगुणं स्वीकरोति । एवं सत्यपि भगवान् गुणैर्न लिप्यते । भगवान् एव प्रकृतिपुरुषयोः संयोगवियोगहेतुभूतः कालोऽस्ति तथैभिः परोऽप्यस्ति । पृथिव्यप्तेजोवाय्वाक.शपञ्चतन्मात्राणि मनः इन्द्रियाणि तेषामधिष्ठातृदेवतरहङ्कारो महत्तत्त्वञ्चेति सर्वञ्चराचरात्मकञ्जगद् भववतोऽद्वितीये स्वरूपे भ्रान्त्यैव पृथक्प्रतीयते ।

उपर्युक्ते प्रसङ्गे भगवान् त्रीनपि गुणान् स्वीकृत्य सृजन-पालन-संहरणानि करोतीति प्रतिपादितमस्ति । इत्यतो वक्तुं शक्यते, यदत्र त्रैगुण्सृष्टिवादि-साङ्ख्यमस्तीति ।

पुरुषायादिबीजाय पूर्णबोधाय ते नमः ।।
अजाय जनयित्रेऽस्य ब्रह्मणेऽनन्तशक्तये ।
परावरात्मन् भूतात्मन् परमात्मन् नमोऽस्तुते ।।
त्वं वै सिसृक्षू रज उत्कटं प्रभो,
तमो निरोधाय बिभर्ष्यसंवृतः ।
स्थानाय सत्त्वं जगतो जगत्पते,
कालः प्रधानं पुरुषो भवान् परः ।।
अहं पयो ज्योतिरथानिलो नभो,
मात्राणि देवा मन इन्द्रियाणि ।
कर्ता महानित्यखिलं चराचरं ।
त्वय्यद्वितीये भगवन्नयं भ्रमः ।।

(स्क. १० अ. ५९ श्लो. २५—३०)

(११४)

कालादिदशकसङ्घातवादि साङ्ख्यम्

श्रीमद्भागवतमहापुराणे दशमे स्कन्धे त्रिषष्टितमेऽध्याये पञ्चविंशतितमषड्विंशतितमयोः श्लोकयोः बाणासुरश्रीकृष्णसङ्ग्रामे माहेश्वरेण ज्वरेण कृतायां श्रीकृष्णस्तुतौ सम्प्राप्तं कालादिदशकसङ्घातवादिसाङ्ख्यमस्ति[1]। तच्चेत्थमवबोध्यम्।

भगवच्छक्तिरनन्ताऽस्ति। ब्रह्मादीनामीश्वराणामपीश्वरो महेश्वरोऽस्ति भगवान् सर्वेषामात्मा सर्वस्वरूपी च वर्त्तते। अद्वितीयो ऽयं भगवान् केवलं ज्ञानस्वरूपी वर्त्तते। जगतामुत्पत्ति-स्थिति-लयानाङ्कारणम्परम्महेश्वरः श्रीकृष्ण एवऽस्ति। श्रुतिभिः स एव वर्ण्यतेऽनुमीयते च। सर्वविकारशून्यं, परमं ब्रह्माऽपि स एव श्रीकृष्णो वर्त्तते। कालो, दैवं, कर्म, जीवः स्वभावः द्रव्यं, क्षेत्रं, प्राणः, आत्मा, एकादशेन्द्रियाणि, पञ्चमहाभूतानीति विकारातश्चार्थैतेषां सङ्घातभूतं लिङ्गशरीरं तस्मात् कर्माणि, कर्मभ्यश्च लिङ्गशरीरमिति बीजाङ्कुरन्यायेनान्योन्याऽऽश्रितोत्पत्तिर्भवतीति भगवन्मायायारेवास्ति प्रभावो ऽयम्।

उपर्युक्ते प्रसङ्गे कालादीनां दशकस्य सङ्घाताऽऽत्मिकैवाऽस्ति सृष्टिरियमिति प्रतिपादितमस्ति। इत्यतो वक्तुं शक्यते यदत्र कालादिदशकसङ्घातवादि साङ्ख्यमस्तीति।

---

१. नमामि त्वानन्तशक्तिं परेशं,
सर्वात्मानं केवलं ज्ञप्तिमात्रम्।
विश्वोत्पत्तिस्थानसंरोधहेतु,
यत्तद् ब्रह्म ब्रह्मलिङ्गं प्रशान्तम्॥
कालो दैवं कर्म जीवः स्वभावो,
द्रव्यं क्षेत्रं प्राण आत्मा विकारः।
तत्संघातो बीजरोहप्रवाह
स्त्वन्मायैषा तन्निषेधं प्रपद्ये॥
(स्क. १० अ. ६३ श्लो. २८—२६)

(११५)

लोककल्पपुरुषाख्यायि साङ्ख्यम्

श्रीमद्भागवतमहापुराणे त्रिषष्टितमेऽध्याये चतुस्त्रिंशत्तमश्लोकतः समारभ्यैकोनचत्वारिंशत्तम श्लोकं यावद् बाणासुरश्रीकृष्णयोः सङ्ग्रामे श्रीरुद्रेण कृतायां श्रीकृष्णस्तुतौ समधिगतं लोककल्पपुरुषाख्यायिसाङ्ख्यमस्ति[2]।

तच्चेत्थमवबोद्धव्यम्—

भगवान् श्रीकृष्णो वेदमन्त्रेषु तात्पर्यत्वेन प्रतिपादित निगूढपरमज्योतिः स्वरूपं परमं ब्रह्मैव वर्त्तते। शुद्धस्वान्तकाः महात्मानः खमिव सर्वव्यापकं निर्विकारस्वरूपं तदेव ब्रह्म साक्षात्कुर्वन्ति। खं भगवन्नाभिर्वर्त्तते, अग्निर्मुखमस्ति, जलं वीर्यमस्ति, वर्गशिरः, दिशः कर्णौ, पृथिवी चरणौ, चन्द्रोमनः, सूर्यः नेत्रे, रूद्रोऽहङ्कारः, पाथोधिरूदरम्,

---

2. त्वं हि ब्रह्म परं ज्योतिर्गूढं ब्रह्मणि वाङ्मये।
यं पश्यन्त्यमलात्मान आकाशमिव केवलम्॥
नाभिर्नभोऽग्निर्मुखमम्बु रेतो,
द्यौः शीर्षमाशा श्रुतिरङ्घ्रिरुर्वी।
चन्द्रो मनो यस्य दृगर्क आत्मा,
अहं समुद्रो जठरं भुजेन्द्रः॥
रोमाणि यस्यौषधयोऽम्बुवाहाः।
केशा विरिञ्चो धिषणा विसर्गः॥
प्रजापतिर्हृदयं यस्य धर्मः।
स वै भवान् पुरुषो लोककल्पः॥
तवावतारोऽयमकुण्ठधामन्,
धर्मस्य गुप्त्यै जगतो भवाय।

इन्द्रो बाहू, धान्याद्यारोषधयः रोमाणि, मेघाः कचाः, ब्रह्मा बुद्धिः, प्रजापतयः लिङ्गम्, धर्मो हृदयमित्थं समस्तलोकै.लोकान्तरैश्च सह यस्य तुलना विधीयते, स परमेश्वरः परमपुरुषः स्वयं श्रीकृष्ण एव वर्त्तते। भगवत्प्रभावप्रभाविता एव शिवादयः भुवनानि पालयन्ति। भगवान् सजातीयेन विजातीयेन स्वगतभेदेन च शून्योऽस्ति। सह्येकोऽद्वितीयश्चाऽस्ति। मायाकृतासु जाग्रत्स्वप्नसुषुत्याख्यास्ववस्थास्वनुगतः ताभ्योऽतीतश्च तुरीयतत्त्वत्वेन सङ्ख्यातोऽपि भगवान् श्रीकृष्ण एव वर्त्तते। भगवान् केनापि तत्त्वान्तरेण प्रकाशयितुन्नैव शक्यते। भगवान् सर्वेषामपि कारणमस्ति। परं भगवतः किमपि कारणान्तरन्नास्ति, न चेह वस्तुतस्तस्मिन् कारणत्वमप्यस्ति। एवं सत्य पित्रयाणामपि गुणानान्नैकविधं वैषम्यं प्रकाशयितुं स्वमायया देव-मनुष्य-पशु-पक्ष्यादीनां शरीराण्यनुसृत्य विभिन्नेषु रूपेषु प्रतीयते। यथा सूर्यः स्वच्छायया मेघै-श्च्छन्नो भवति तथा च मेघसहितानि नैकविधानि रूपाणि प्रकाशयति। तथैव भगवान् स्वयं प्रकाशः सन्नपि गुणैश्च्छन्न इव प्रतीयते। तथा च गुणान् गुणाभिमानिनोः जीवाँश्च प्रकाशयति। वस्तुतो भगवाननन्तोऽस्ति।

उपर्युक्ते प्रसङ्गे लोककल्पपुरुषस्याऽऽख्यानमस्ति। इत्यतो वक्तुं शक्यते, यदत्र लोककल्पपुरुषाख्यायि साङ्ख्यमस्तीति।

वयं च सर्वे भवतानुभाविता,
विभावयामो भुवनानि सप्त।
त्वमेक आद्यः पुरुषोऽद्वितीय—
स्तुर्यः स्वदृग्घेतुरहेतुरीशः॥
प्रतीयसेऽथापि यथाविकारं,
स्वमायया सर्वगुणप्रसिद्ध्यै।
यथैव सूर्यः पिहितश्छायया स्वया,
छायां च रूपाणि च संचकास्ति।
एवं गुणेनापिहितो गुणांस्त्व—
मात्मप्रदीपो गुणिनश्च भूमन्॥

(स्क.१० अ. ६३ श्लो-३४—३९)

(११६)

प्रधानपुरुषेश्वरवादि साङ्ख्यम्

श्रीमद्भागवतमहापुराणे दशमे स्कन्धे पञ्चाशीतितमे ऽध्याये सप्तमश्लोकतः समारभ्य विंशतितमश्लोकं यावच्छ्रीवसुदेवमुखेन श्रीभगवत्तत्त्वप्रतिपादने श्रीबादरायणिना प्रोक्तं प्रधानपुरुषेश्वरप्रतिपादकं साङ्ख्यमस्ति[1] ।

तदित्थमवबोध्यम्—

चन्द्रज्योत्स्ना, वह्नेर्तेजः, सूर्यप्रभा, नक्षत्राणां विद्युताञ्च स्फुरणसत्ता, पर्वतानां स्थैर्यम्, पृथिव्याः शक्तिरूपावृत्तिः गन्धरूपो गुणश्चेत्यादीनि वस्तुरूपेण भगवान्नेवाऽस्ति । जले जीवनदायिनी, तृप्तिकारिणी शोधिनी च या शक्तिर्वर्त्तते तद्भगवत्स्वरूपमेवाऽस्ति । जलन्तथा तस्य रसोऽपि भगवान् एवास्ति । इन्द्रियशक्तिः, अन्तःकरणशक्तिः, शरीरशक्तिः, शरीरस्य गतिरित्यादिरूपाः वायुशक्तयश्चेति सर्वाः शक्तयो वस्तुतोऽत्र भगवच्छक्तय एव सन्ति । दिशस्तासामवकाशश्च भगवान् एव वर्त्तते । आकाशं तदाश्रयीभूतः स्फोटः (शब्दतन्मात्रं) अथ च परावाणी, नादः (पश्यन्ती) ओङ्कारः (मध्यमा) तथा वर्णानां पदार्थानाञ्च पृथक्-

---

1. कृष्ण-कृष्ण महायोगिन्, संकर्षण सनातन ।
जाने वामस्य यत् साक्षात् प्रधानपुरुषौ परौ ।।
यत्र येन यतो यस्य, यस्मै यद् यद् यथा यदा ।
स्यादिदं भगवान् साक्षात्, प्रधानपुरुषेश्वरः ।।
एतन्नानाविधं विश्वमात्मसृष्टमधोक्षज ।
आत्मनानुप्रविश्यात्मन्,प्राणो जीवो बिभर्ष्यजः ।।
प्राणादीनां विश्वसृजां शक्तयो याः परस्य ताः ।
पारतन्त्र्याद् वैसादृश्याद् द्वयोश्चेष्टैव चेष्टताम् ।।

पृथक्तया निर्देशनाय पदरूपा वैखरी वाण्यपि भगवत्स्वरूपमेवाऽस्ति । इन्द्रियाणि, तेषां विषयप्रकाशिनी शक्तिस्तथा तेषामधिष्ठातृदेवताश्च स्वयं भगवान् एवाऽस्ति। बुद्धेर्निश्चयात्मिका शक्तिः जीवस्य विशुद्धास्मृतिश्चापि भगवान् एव वर्त्तते। भूतेषु तेषाङ्कारणन्तामसोऽहङ्कारः, इन्द्रियेषु तेषाङ्कारणंतैजसो ऽहङ्कारः, इन्द्रियाधिष्ठातृदेवतास्तासाङ्कारणं सात्त्विकोऽहङ्कारस्तथा जीवानाङ्गमनागमनयोर्कारणभूता मायाऽपि भगवान् एव वर्त्तते । यथा मृदादीनां वस्तूनां विकारेषु घटवृक्षादिषु मृत्तिका नैरन्तर्येण तिष्ठति, वस्तुतः ते कारणस्वरूपेण मृत्तिकास्वरूपा एव सन्ति। तथैव यावन्तो विनाशवन्तः पदार्थाः सन्ति, तेषु भगवान् कारणस्वरूपेणाऽविनाशितत्त्वं भगवान् एव वर्त्तते। वस्तुतस्ते सर्वे भगवत्स्वरूपा एव सन्ति । सत्त्वरजस्तमांसीति त्रयोगुणास्तथा तेषां वृत्तयोः महत्तत्त्वादीनि परब्रह्मणिच परमात्मनि भगवति योगमायया

गुणप्रवाह एतस्मिन्नबुधास्त्वखिलात्मनः ।
गतिं सूक्ष्मामबोधेन संसरन्तीहकर्मभिः ।।
यदृच्छयानृतां प्राप्य सुकल्पामिह दुर्लभाम् ।
स्वार्थे प्रमत्तस्य वयो गतं त्वन्माययेश्वर ।।
असावहं ममैवैते देहे चास्यान्वयादिषु ।
स्नेहपाशैर्निबध्नाति भवान् सर्वमिदं जगत् ।।
युवां न नः सुतौ साक्षात् प्रधानपुरुषेश्वरौ ।
भूभारक्षत्रक्षपण अवतीर्णौ तथाऽऽत्थं ह ।।
तत्ते गतोस्म्यरणमद्य पदारविन्द—
मापन्नसंसृतिभयापहमार्तबन्धो ।
एतावतालमलमिन्द्रियलालसेन ।।
मर्त्यात्मदृक् त्वयि परे यदपत्यबुद्धिः ।।
सूतीगृहे ननु जगाद भवानजो नौ
संजज्ञ इत्यनुयुगं निजधर्मगुप्त्यै ।
नानातनूर्गगनवद् विदधज्जहासि
को वेदभूम्न उरूगाय विभूतिमायाम् ।।

(स्क. १०, अ. ८५, श्लो. ७—२०)

कल्पितानि सन्ति । अतएव यावन्ति जन्म-स्थिति-वृद्धि-परिणामादयो ये भाव-विकाराः सन्ति ते भगवति कल्प्यन्ते, तदा भगवान् विकारेष्वेतेष्वनुगत एव प्रतीयते । कल्पनानिवृत्तौ तु निर्विकल्पः परमात्मस्वरूपी भगवान् एवावशिष्यते । जगदेतत्सत्त्व-रजस्तमोगुणानां विकारभूतमस्ति । देहेन्द्रियान्तःकरणानि सुखदुःखादीनि रागलोभाद-यश्च तेषामेव गुणानाङ् कार्याणि सन्ति । एतेष्वज्ञानिनः सर्वात्मनः सूक्ष्मं रूपं नाव-गच्छन्ति, ते स्वदेहाभिमानिनः स्वाज्ञानपारवश्यात्कर्मप्रपञ्चे पतिताः भूयो भूयः जन्ममृत्युचक्रे भ्रमन्ति । शुभप्रारब्धवशादिन्द्रियादिसामर्थ्यमदत्यमदन्तन्दुर्लभन्मानुषं शरीरं समधिगम्यते । परं भगवन्मायया मुग्धः स्ववास्तविकस्वार्थपरमार्थयोः प्रमा-द्यतिपूर्णञ्चायुष्यं व्यर्थीकरोति । शरीरमेवास्त्यात्मा शरीरसम्बन्धिनश्च स्वीयाः सन्तीत्यहम्ममेति प्रपञ्चेन सर्वं जगत्प्रपञ्चितमस्ति । रामकेशवौ सर्वायाः प्रकृतेः जीवानाञ्चस्वामिनौ स्तः । भूभारभूतानां भूपानां नाशायैव भुव्यवतरितौ बलकेशवौ । वस्तुतोऽत्र भगवान् एकरसोऽनन्तश्चास्ति । भगवद्योगमायायाः रहस्यन्ने केनाऽपि पूर्णतया ज्ञातुं शक्यते । सर्वे जनाः भगवत्कीर्त्तिमेव गायन्ति ।

उपर्युक्ते प्रघट्टके प्रधानस्य पुरुषस्य ईश्वरस्य च निरूपणमस्ति । तथा एभिरेव सर्वं चराचरात्मकञ्जगद्व्याप्तमस्तीति वक्तुं शक्यते, यदत्र प्रधानपुरुषेश्वरवादि साङ्ख्यं वर्त्तत इति ।

—०—

(११७)

अविकृतपरिणामवादि साङ्ख्यम्

श्रीमद्भागवतमहापुराणे दशमस्कन्धस्य सप्ताशीतितमे ऽध्याये चतुर्दशे मन्त्रे श्रुतिसमुदीरितमविकृतपरिणामवादि साङ्ख्यमस्ति[1] ।

तच्चेत्थमवबोध्यम् ---

भगवान् सर्वेश्वरः सर्वश्रेष्ठः सर्वैश्चापि जेतुं सर्वथाऽनर्होऽस्ति । सः सर्वदा जयति । सः स्वभावत एव सर्वैश्वर्यपरिपूर्णोऽस्ति । स एव चराचरप्राणिप्रपञ्चिनीं मायां शमयितुमर्हति । गुणमयी माया दोषोत्पादनाय जीवानामानन्दादिमयं स्वाभाविकं स्वरूपमाच्छाद्य संसृतिबन्धने बद्धुमेव सत्त्वादीन् त्रीनऽपि गुणानुररीकरोति । जगति यावत्यः साधनाः यावन्ति ज्ञानानि यावत्यः क्रियाश्चेति शक्तयः सन्ति । ताः सर्वाः सर्वेश्वरानुग्रहेणैव विराजन्ते । अतएव भगवदनुग्रहं विना सा माया दूरीकर्त्तुन्नैव शक्यते । विषये ऽमुष्मिन् श्रुतयः स्वयं प्रमाणभूताः सन्ति । यद्यपि श्रुतयोऽपि भगवन्तं स्वरूपतो वर्णयितुं नैव शक्नुवन्ति । परन्तु भगवान् यदा कदाचित् मायया जगत्सृष्टौ सगुणो भवति स्वरूपस्थितिलीलां वा करोति, सच्चिदानन्दस्वरूपं श्रीविग्रहं प्रकटीकृत्य क्रीडति वा । तदा श्रुतयोऽपि भगवतो यत्किञ्चिदेव स्वरूपं वर्णयितुं प्रभवन्ति ।

उपर्युक्ते प्रघट्टकेऽविकृतपरिणामो वर्ण्यतेऽतोऽत्राऽविकृतपरिणामवादि साङ्ख्यमस्तीति ज्ञेयम् ।

---

१. जय जय जह्यजामजित दोषगृभीतगुणां,
त्वमसि यदात्मना समवरुद्धसमस्तभगः ।
अगजगदोकसामखिलशक्त्यवबोधक ते,
क्वचिदजयाऽऽत्मना च चरतोऽनुचरेन्निगमः ।
(स्क. १०, अ. ८७, श्लो. १४)

(११८)

सर्वकारणेश्वरवादि साङ्ख्यम्

श्रीमद्भागवतमहापुराणस्य दशमे स्कन्धे सप्ताशीतितमेऽध्याये पञ्चदशे श्लोके सर्वकारणेश्वरवादि साङ्ख्यं वर्त्तते[1]।

तदित्थमवबोध्यम्—

नात्र किमपि सन्दिग्धमस्ति यच्छ्रुतिभिरिन्द्रादीनान्देवानां वर्णनङ्क्रियते। परन्तु श्रुतीनां सर्वे मन्त्रास्तथा सर्वेऽपि ऋषयश्चैतज्जगद् ब्रह्मस्वरूपत्वेनैवोररीकुर्वन्ति। यतो यदा सर्वमपि जगल्लीयते तदाऽपि भगवानवशिष्यते। यथा घटादयो मृद्विकाराः मृद एवोत्पद्य मृद्येव लीयन्ते, तथैव सर्वस्याऽपि जगतः समुत्पत्तिलयौ भगवत्येव भवतः। स पृथिवीमिव विकारी नास्त्यपि तु सोऽपि निर्विकारोऽस्ति। इति कृत्वैव जगदेतद्भगवतः समुत्पन्नन्नास्त्यपितु केवलं प्रतीयमानमस्ति। यथा घटादीनां वर्णनमपि प्रकारान्तरेण मृदामेवाऽस्ति वर्णनम्। तथैवेन्द्रवरूणादीनामपि वर्णनं भगवद्वर्णनमेवाऽस्ति। एतदेवाऽस्ति बीजं यत्किञ्चिन्मनसा विचार्यते, वाचा प्रोच्यते च तद्भगवति स्थितं भगवतः स्वरूपत्वेनैव परिगृह्णन्ति दन्निवधाति मनुष्यो यथेष्टिकादिषु क्वापि पादं तु पृथिव्यामेव। यतस्तत्सर्वं पृथिव्यात्मकमेवाऽस्ति। अतएव श्रुतयः किमपि नाम किमपि रूपं वा स्तुवन्ति तत् सर्वं परमात्मनः परमेश्वरस्यैव भवति।

उपर्युक्ते प्रघट्टके सर्वेषामपि कारणत्वेन परमेश्वरस्य प्रतिपादनमस्तीति वक्तुं शक्यते, यदत्र सर्वकारणेश्वरवादि साङ्ख्यमस्तीति।

---

१. बृहदुपलब्धमेतदवयन्त्यवशेषतया यत,
उदयास्तमयौ विकृतेर्मृदि वाविकृतात्।
अत ऋषयो दधुस्त्वयि मनोवचनाचरितं
कथमयथा भवन्ति भुवि दत्तपदानि नृणाम्॥
(स्क. १०, अ. ८७, श्लो. १५)

(११९)

जीवेश्वरयोरंशांशिभाववादि साङ्ख्यम्

श्रीमद्भागवतमहापुराणे दशमे स्कन्धे सप्ताशीतितमेऽध्याये वेदस्तुतौ विंशतितमे श्लोके जीवेश्वरयोरंशांशिभाववादि साङ्ख्यमस्ति[1]। तच्चेत्थम्—

जीवो येषु शरीरेषु वसति, तानि शरीराणि जीवस्य कर्मभिरेव निर्मितानि भवन्ति। वस्तुतस्तु जीवः शरीराणाङ् कार्यकारणरूपैरावरणैः सर्वथा पृथग्भूतोऽस्ति। यतः तेषामावरणानां सत्ताऽपि वस्तुतस्तु नास्ति। तत्त्वज्ञानिनः प्रतिपादयन्ति, यत् सर्वशक्तिमतः परमात्मन एव तत्स्वरूपमप्यस्तीति स्वरूपित्वादंशाऽभावे ऽप्यंश एव निगद्यते। अनिर्मितमपि निमितमिति कथ्यते। अतएव बुद्धिमन्तो जीवस्य वस्तुस्वरूपं विचार्य पूर्णरूपेण विश्वस्ताः सन्तः भगवच्चरणारविन्दान्युपासन्ते। यतः भगवच्चरणकमलान्येव सर्वेषामपि वैदिकानाङ्कर्मणां समर्पणस्थानानि मोक्षस्वरूपाणि च सन्ति।

उपर्युक्ते प्रघट्टके जीवेश्वरयोरंशांशिभावस्य प्रतिपादनमस्तीति वक्तुं शक्यते, यदत्र जीवेश्वरयोरंशांशिभाववादि साङ्ख्यमस्तीति।

(१२०)

सदसदुभयाभाववादि साङ्ख्यम्

श्रीमद्भागवतमहापुराणे दशमे स्कन्धे सप्ताशीतितमेऽध्याये वेदस्तुतौ

---

१. स्वकृतविचित्रयोनिषु विशन्निव हेतुतया,
तरतमतश्चकास्स्यनलवत् स्वकृतानुकृतिः।
अथ वितथास्वमूष्ववितथं तव धाम समम्,
विरजधियोऽन्वयन्त्यभिविपण्यव एकरसम्॥
(स्क. १०, अ. ८७, श्लो. २०)

सदसदुभयाभाववादि साङ्ख्यं प्रतिपादितमस्ति[1] चतुर्विंशतितमे श्लोके । तच्चेत्थमवबोध्यम्—

भगवाननादिरनन्तश्चास्ति । यस्य जन्ममृत्युसमयः कालेन सीमितोऽस्ति, सोऽत्र भगवन्तञ्ज्ञातुङ्कथमर्हति । स्वयं ब्रह्मा, निवृत्तिपरायणाः सनकादयस्तथा प्रवृत्तिपरायणाः श्रीमरीच्यादयो ऽपि भगवत एव समुत्पन्नाः सन्ति । यदा भगवान् सर्वं संवृत्य शेते तदैतादृशङ्किमपि साधनन्नावशिष्यते येन भगवता सह सुप्तोऽपि जीवो भगवन्तं ज्ञातुं शक्नुयात् । यतस्तदाऽऽकाशाऽदिकं स्थूलञ्जगन्महत्तत्त्वादिकंसूक्ष्मंजगदपि च नावतिष्ठते एताभ्यान्निर्मितं शरीरं तन्निमित्तञ्चेति क्षणमुहूर्त्तादियोकालांशाश्चापि नावतिष्ठन्ते । प्रलयावस्थायान्न किमप्यवशिष्यते । शास्त्राण्यपि भगवत्येव तिरोधीयन्ते ।

उपर्युक्तप्रसङ्गे ऽसदः सज्जायते, सदेव सर्वमित्युभयोरपि सिद्धान्तयोरभावः प्रतिपादितोऽस्ति । अर्थात् केवलं सर्वेश्वरः सर्वदा तिष्ठति तस्मादेव सर्वा सृष्टिः जायते, तस्मिन्नेव च लीयत इति । अतोऽत्र वक्तुं पार्यते यदत्र सदसदुभयाभाववादि साङ्ख्यमस्तीति निश्चप्रचम् ।

(१२१)

वादाहवनिरोधि साङ्ख्यम्

श्रीमद्भागवतमहापुराणे सप्ताशीतितमेऽध्याये वेदस्तुतौ पञ्चविंशतितमे

---

१. क इह नु वेद बतावरजन्मलयोऽग्रसरं यत,
उदगादृषिर्यमनु देवगणा उभये ।
तर्हि न सन्न चासदुभयं न च कालजवः
किमपि न तत्र शास्त्रमवकृष्य शयीत यदा ।
(स्क. १०, अ. ८७, श्लो. २४)

श्लोकेवादाहवनिरोधि साङ्ङ्ख्यमस्ति । तच्चेत्थम्—

केचन मन्वतेयत्र असदेव जगदुत्पद्यते; केचन ब्रुवते च यत्-सद्रूपाणान दुःखानां नाशे मुक्तिर्भवति । अन्ये चाऽऽत्मानमनेकत्वेन मन्वते, केचन च कर्मणा प्राप्तव्यंल्लोकपरलोकव्यवहरणमेव सत्यत्वेन स्वीकुर्वते । नाऽत्र किञ्चिदपि सन्दिग्धं यदेता सर्वारपि वार्ताः भ्रान्तिमूलकाः सन्तीति । आरोप्यैव ते वस्तुत इत्थमुपदिशन्ति । पुरुषस्त्रिगुणमयोऽस्तीति भेदज्ञानङ्केवलमज्ञानवशत एव भवति । भगवान् तु सर्वथा ऽज्ञानतः परो वर्त्तते । अतएव ज्ञानस्वरूपिणि भगवति किमपि प्राकारिकं भेदज्ञानन्नास्ति ।

प्रस्तुतेऽस्मिन् प्रघट्टके समेषामपि मतमतान्तराणां भेदज्ञानं भ्रान्ति मूलकमस्तीति प्रतिपाद्य वादाहवाः सर्वथा निरूध्यन्त एवेति वक्तुं शक्यते, यदत्र वादाहवनिरोधि साङ्ख्यमस्तीतिशम् ।

(१२२)

मनःप्रतिष्ठजगद्वादि साङ्ख्यम्

श्रीमद्भागवतमहापुराणे दशमे स्कन्धे सप्ताशीतितमे ऽध्याये वेदस्तुतौ

---

(२) सदिव मनस्त्रिवृत्त्वयि विभात्यसदामनुजात्,
सदभिमृशन्त्यशेषमिदमात्मतयाऽऽत्मविदः ।
न हि विकृतिं त्यजन्ति कनकस्य तदात्मतया,
स्वकृतमनुप्रविष्टमिदत्मतयावसितम् ॥
(स्क. १० अ. ८७ श्लो. २६)

षड्विंशतितमे श्लोके मन: प्रतिष्ठजगद्वादि साङ्ख्यमस्ति[1]। तच्चेत्थमवबोद्धव्यम्। यत्—

त्रिगुणात्मकञ्जगदेतन्मनोकल्पनामात्रमस्ति। केवलमेतदेव नैव ह्यपितु परमात्मा तथा जगतः पृथक्तया प्रतीयमानो पुरुषोऽपि केवलङ्कल्पनैव। इत्थं वस्तुतोऽसत्यमपि स्वाधिष्ठानभूतस्य भगवतः सत्यत्वा-देतदपि सत्यमिव प्रतीयते। अतएव भोक्तृभोग्ययोः सम्बन्धसंसाधनशीलानीन्द्रियाणि, तादृशमेव च जगद् यावदस्ति तावदेवतत्। तत्सर्व-मात्मज्ञा निन आत्मरूपेण सत्यमेवेति मन्वते। स्वर्णनिर्मितानि कटककुण्डलादीनि स्वर्ण रूपाण्येवसन्ति।सुवर्णत्वेन ज्ञाता तानि नोजहात्यपितु स जानाति यदेतदपि सुवर्णमस्तीति। इत्यमेवैतज्ज-गदात्मन्येव कल्पितमात्मन्येव च व्याप्तमस्ति। अतएवाऽऽत्मज्ञानिनो जना एतदात्मरूपमेव मन्वते।

उपर्युक्ते प्रघट्टके सर्वञ्जगन्मनसि प्रतिष्ठमस्तीति प्रदिपादितमिति वक्तुं शक्यते, यदत्र मनः प्रतिष्ठजगद्वादि साङ्ख्यमस्तीतिशम्।

(१२३)

ईश्वरेक्षणवशाञ्जगदुत्पत्तिवादि साङ्ख्यम्

श्रीमद्भागवतमहापुराणे दशमे स्कन्धे सप्ताशीतितमेऽध्याये वेदस्तुतौ एको

---

१. जनिमसतः सतो मृतिमुतात्मनि येच भिदां,
विपणमृतं स्मरन्त्युपदिशन्ति त आरूपि तैः।
त्रिगुणमयः पुमानिति भिदा यदवबोधकृता,
त्वयि न ततः परत्र स भवेदवबोधरसे ॥
(स्क 90.अ ८७.श्लो 25)

नत्रिंशत्तमे श्लोके समधिगतं "ईश्वरेक्षणवशाज्जगदुत्पत्तिवादि साङ्ख्यमस्ति" तच्चेत्थम्—

नित्यमुक्तो भगवान् मायातीतोऽस्ति तथापि यदा सः स्वेक्षणात्मकव्यापारमात्रेण सङ्कल्पमात्रेण च मायया सह क्रीडति तदा जीवानां सूक्ष्मशरीराणि तेषां प्रसुप्ताः कर्म-संस्काराश्चप्रबुध्यन्ति, एवमेव चराचरप्राणिनामुत्पत्तिर्जायते। स भगवान् प्रभुर्वर्त्तते, सोऽत्र यथा तथा ऽन्यथा च कर्त्तुं समर्थो ऽस्ति, तथाप्यस्ति परमकारुणिकः। गगनमिव सर्वेष्वपि तस्य स्थितिरस्ति, तथापि समेष्वपि समं व्यवहरति। तस्मिन् स्वकीयत्व-परकीयत्व-विशिष्टा धीर्नैव वर्त्तते। वस्तुतस्तु भगवत्स्वरूपावधारणे मनोवचसां गतिर्नास्त्येव। भगवति कार्यकारणात्मकस्य प्रपञ्चस्या ऽभावोऽमस्तीति बाह्यदृशा भगवान् शून्यमिव प्रतीयते, परं तस्याऽपि दृशोऽधिष्ठानत्वाद् भगवान् परमं सत्यमस्ति।

अत्र भगवदवेक्षणमात्रमेव सर्वस्याऽपि मायामयस्य चराचरात्मकस्य जगत्प्रपञ्च-स्यसृष्टौ हेतुत्वेन निर्दिष्टमस्तीति वक्तुं शक्यते, यदत्र "ईश्वरेक्षणवशाज्जगदुत्पत्तिवादि-साङ्ख्यम्" प्रतिपादितमस्तीति।

(१२४)

सर्वान्तर्यामित्ववादि साङ्ख्यम्

श्रीमद्भागवतमहापुराणस्य दशमे स्कन्धे सप्ताशीतितमेऽध्याये त्रिंशत्तमे

---

१. यदि न समुद्धरन्ति यतयो हृदि कामजटा
दुरधिगमोऽसतां हृदि गतोऽस्मृतकण्ठमणिः।
असुतृपयोगिनामुभयतोऽप्यसुखं भगव—
न्नपगतान्तकादनधिरूढपदाद् भवतः॥
(स्क. १० अ. ८७ श्लो. ३९)

श्लोके वेदस्तुतौ समधिगतं सर्वान्तर्यामित्ववादि साङ्ख्यमस्ति[1]

तच्चैवम्——

भगवान् सर्वदा सर्वथैकरसत्वं भजते। चेज्जीवाः सङ्ख्यातीताः स्युः, सर्वेऽपि च नित्याः सर्वव्यापकाश्च स्युः, तदा तु ते जीवाः भगवत्समा एव भवेयुः, तस्यञ्च परिस्थितौ जीवाः शासिताः तथेश्वरश्चास्ति शासक इति वक्तुं नैव शक्यते, तथा च तस्यां परिस्थितौ भगवान् सर्वान् नियन्तुमपि नैव शक्नुयात्।

जीवान्नियन्तुं भगवान्त दैवार्हति, यदा भगवदुत्पन्नाः तस्मान्न्यून-स्तरीया स्युः। तथा च नास्त्यत्र सन्देहलेशोऽपि यदिमे सर्वेऽपि जीवाः साजात्यैकत्वं विभिन्नत्वं चेति भगवत एव उत्पन्नाः सन्ति। अतएव भगवान् सर्वेष्वपि कारणरूपेण सन्नपि तेषामस्ति नियामकः। वस्तुतस्तु भगवान् सर्वेष्वपि समभावेन विराजते। परमेतज्ज्ञातुं नैव शक्यते यत्तदस्य स्वरूपङ्कीदृशमस्तीति। यतोऽत्र ये जनाः मन्वते, यदस्माभिः भगवत्स्वरूपं सर्वथा ज्ञातमिति वस्तुतस्तैः ज्ञातमेव नहि। तैस्तु स्वबुद्धिविषया एव ज्ञाताः, येभ्योऽस्ति भगवान् परः। तथा च बुद्ध्या यानि वस्तूनि ज्ञायन्ते तानि सर्वाण्यपि बुद्धिवैसादृश्यत्वाद् विभिन्नान्येव भवन्ति। अतएव तेषान्दोषावहत्वं परस्परं मतवैसादृश्यत्वञ्च प्रत्यक्षमेवास्ति। भगवत्स्वरूपन्तु सर्वथाऽतिमतमस्ति।

उपर्युक्ते प्रघट्टके भगवान् सर्वेषामपि चराणामचराणाञ्च जीवानां पदार्थानां वस्तूनां वा वर्त्तते सर्वथाऽन्तर्यामी। इत्थमस्ति भगवति सर्वान्तर्यामित्वमित्यस्माद्धेतोः वक्तुं शक्यते यदत्र सर्वान्तर्यामित्ववादि साङ्ख्यमस्तीति।

---

१. अपरिमिता ध्रुवास्तनुभृतो यदि सर्वगता—
स्तर्हि न शास्य तेति नियमो ध्रुव नेतरथा।
अजनि च यन्मयं तदविमुच्य नियन्तृ भवेत्
सममनुजानतां यदमतं मतदुष्टतया॥
(स्क. १०, अ. ८७, श्लो. ३०)

(१२५)

प्रकृतिपुरुषोभयकारणता-निषेधकं साङ्ख्यम्

श्रीमद्भागवतमहापुराणे दशमे स्कन्धे सप्ताशीतितमे ऽध्याय एकत्रिंशत्तमे श्लोके वेदस्तुतौ प्रकृतिपुरुषोभयकारणतानिषेधकं साङ्ख्यं[1] समधिगम्यते।

तच्चेत्थम्—

यदुच्यते जीवो भगवतः जायत इति तस्यायमाशयो कथञ्चिदपि भवितुन्नार्हति यदयं भगवान् स्वयं जीवरूपेण परिणमतीति। प्रकृतिपुरुषयोरुभयोरपि वस्तुस्वरूपन्तु भगवान् सर्वेश्वर एवाऽस्ति। यः कर्हिचिदपि वृत्तिषु नावतरति। किन्त्व अज्ञानवशगां प्रकृतिं पुरुषत्वेन, पुरुषञ्च प्रकृतित्वेनाऽध्यस्यैव नैकविध-नामरूपाणि धारीयति। यथा जले बुद्बुदवलोक्यते, तत्रोपादानकारणत्वेन जलन्तथा निमित्तकारणत्वेन वायुश्च भवति, किन्तु जलवातातिरिक्तं बुद्बुदाख्यङ्किमप्यन्यद् वस्तु नास्ति केवलन्नामरूपे भवतः। वस्तुतस्तु जलवायू एव भवतः। तथैव वस्तुतस्तु प्रकृतिपुरुषावपि भगवत्स्वरूप एवान्तर्भवतो ऽजन्मानावपि तर्हिकुतो ऽयं सांसारिकवस्तुजातस्य नामरूपं सत्यं भवेत्। यथा समुद्रे सर्वाः नद्यः, मधुनि समेषामपि पुष्पाणां रसाः निलीयन्ते तथैव सर्वमपि जगद् भगवति परमे व्योम्नि लयमेति।

उपर्युक्ते प्रसङ्गे परमात्मन एव प्रकृतिपुरुषौ सर्वाण्यपि च वस्तुजातानि प्रादुर्भूतानीवाऽवलोक्यन्ते, नैकधा नामरूपैश्चाऽऽकार्यन्ते किन्तु वस्तुतस्तु तदतिरिक्तं

---

१. न घटत उद्भवः प्रकृतिपूरुषयोरजयो—
रूभययुजा भवन्त्यसुभृतो जल बुद्बुद्वत्।।
त्वयि तइमे ततो विविधनामगुणैः परमे
सरित इवार्णवे मधुनि लिल्युरशेषरसाः।।
(स्क. १०, अ. ८७, श्लो. ३१)

किमपि नास्ति। सर्वमपि तज्जं तस्मिन्नेवचलयमेति। इत्थम यथा सत्कार्यवादपुष्टिः स्यात्तथा समुद्रे जलानीव, मधुनि सर्वपुष्परसा व परमात्मनि निलीयन्त इति प्रतिपादनादत्र प्रकृतिपुरुषयोरुभयोरपि कारणतान्निषिध्य सृष्टिप्रक्रिया प्रतिपादितेति प्रकृतिपुरुषोभयकारणतानिषेधकं साङ्ख्यमत्रास्तीति वक्तुं शक्नुमः।

(१२६)

सद्वादविरोधि साङ्ख्यम्

श्रीमद्भागवतमहापुराणे दशमे स्कन्धे सप्ताशीतितमे ऽध्याये षट्त्रिंशत्तमसप्तत्रिंशत्तमयोः श्लोकयोः सद्वादविरोधि साङ्ख्यमधिगम्यते[1]। तच्चेत्थम्—

यथा मृत्तिका-निर्मितङ्कुम्भं मृत्तिकारूपमेव भवति, तथैव सतः समुत्पन्नं जगदपि सदेवेति कथनं युक्तियुक्तन्नो प्रतिभाति—यतः कार्यकारणयोः निर्देशनमेव तयोर्विभेदकमस्ति। तथा च चेद् भेदनिषेधायैवेत्थमुच्यते, तर्हि पिता-पुत्रयोः दण्ड-

---

१. सत इदमुत्थित सदिति चेन्ननु तर्कहतंव्य—
भिचरति क्व च क्व च मृषा न तथोभययुक्।
व्यवहृतये विकल्प इषितोऽन्धपरम्परया
भ्रमयति भारती त उरुवृत्तिभिरुक्थजडान्॥
न यदिदमग्र आस न भविष्यदतो निधनादनु,
मितमन्तरा त्वयि विभाति मृषैकरसे।
अत उपमीयते द्रविणजातिविकल्पपथै—
र्वितथमनोविलासमृतमित्यवयन्त्यबुधाः॥
(स्क. १०, अ. ८७, श्लो. ३६—३७)

घटनाशयोश्च कार्यकारणभावे सत्यपि पार्थक्यमस्त्येवेति सर्वत्र कारणकार्ययोरैक्यं नावलोक्यते। चेदत्र कारणशब्दत्वेन निमित्तकारणमपहायोपादानकारणमेव गृह्येत—यथा कुण्डलम्प्रति सुवर्णम्, तथापि कार्यस्यासत्यता यत्र—कुत्रावलोक्यत एव यथा रज्जौ सर्पत्वम् अत्रोपादानकारणस्य सत्यत्वेऽपि तत्कार्यं सर्पत्वं सर्वथाऽस्त्यसत्यम्। चेदुच्येत—यत् प्रतीयमानस्य सर्पस्योपादानकारणं रज्जुरेव नास्ति, तया सह अविद्या-संयोगोऽप्यस्त्युपादानकारणत्वेनाभ्युपगतमिति—तर्ह्येतन्मन्तव्यं यदविद्यया सह सद्-वस्तुनः संयोगेनैव जगदुत्पन्नमिति। अतएव यथा रज्जौ प्रतीयमानोऽहिः मिथ्याभूतोऽस्ति, तथैव सद्वस्तुना सहाऽविद्यायाः संयोगेन प्रतीयमानन्नामरूपात्मकञ्जगदपि मिथ्याभूतमेवाऽस्ति।

यदि व्यवहारसिद्ध्यर्थमेव जगतां सत्ताऽभीप्स्यते, तर्हि नात्र कश्चन विरोधः। यतः तन्नास्ति पारमार्थिकं सत्यम् तत्त्वस्ति व्यावहारिकं सत्यम्।

भ्रान्तिरेषा व्यावहारिके जगति मतस्य कालस्य दृशा ऽनादिर्वर्त्तते। अज्ञानिनश्चाऽविचार्यैव पूर्वपूर्वभ्रान्त्या प्रेरिताः सन्तोऽन्धपरम्परयैतन्मन्वते। एतादृश्यां परि-स्थितौ कर्मफलं सत्यमिति प्रतिपादनपराः श्रुतयः केवलन्तान् जनान् एव भ्रान्तौ निक्षिपन्ति, ये कर्मणि मूढाः सन्ति तथा नैतज्जानन्ति यदेतासां श्रुतीनामाशयः कर्मफलानान्नित्यताप्रतिपादने नास्त्यपि तु कर्माणि प्रशस्य कर्मसु प्रवर्त्तनमेवास्ति लक्ष्यम्।

वस्तुतस्त्वेतज्जगदुत्पत्तेः प्राङ्नासीत्तथा प्रलयान्तेऽपि न भविष्यति। अनेनैतत्सि-ध्यति, यन् मध्येप्येतत्परमात्मनि मृषैव प्रतीयते। इत्यस्मादेव श्रुतयः जगदेतदेतादृशीभि रूपमाभिः वर्णयन्ति याभिः ज्ञानशून्याः मूढाः तारुपमाः सत्यं मन्वानाः मुह्यन्ति। यथा मृत्तिकायाङ्घटः, अयसि शस्त्राणि, सुवर्णे कुण्डलादीनि नाममात्रेण सन्ति। वस्तुतस्तु मृत्तिकायःसुवर्णान्येव सन्ति। तथैव परमात्मनि वर्णितं जगदेतन्नाममात्रेणाऽस्ति। अन्यथा तु मिथ्याभूतं मनःकल्पितमात्रमेवाऽस्तीति सुस्पष्टम्।

उपर्युक्ते प्रघट्टके सम्यक्प्रकारेण प्रतिपादितं यदेतज्जगन्नासीन्न च भविष्यति। केवलन्तत्परमात्मन्येवावभासते। अनेन प्रकारेण कार्यं सदिति पक्षस्य विरोधो दरिदृश्यत एवेति वक्तुं शक्यते, यदत्र सद्वादविरोधिसाङ्ख्यमस्तीति।'

(१२७)

मायाकारणतावादि साङ्ख्यम्

श्रीमद्भागवतमहापुराणे दशमे स्कन्धे सप्ताशीतितमे ऽध्याये ऽष्टात्रिंशत्तमे श्लोके श्रुतिप्रतिपादितायां स्तुतौ मायाकारणतावादि साङ्ख्यमधिगम्यते[1]।

तच्चेत्थम्—

यदा जीवः मायया मुग्धः सन्नविद्यामुररीकरोति, तदा तस्य वस्तुस्वरूपभूताः परमानन्दऽऽदयो गुणाः सम्यक्प्रकारेणाऽऽवृत्ताः भवन्ति। तदनन्तरञ्जीवोऽयंत्रिगुणात्मिकासु वृत्तिस्वन्द्रियेषु शरीरेषु च प्रपञ्चितो भवतितै तान्येव स्वीयानीति मन्वानस्तान्येव भजते, ततश्च तेषाञ्जनने स्वीयञ्जननन्तेषांमृत्यो व स्वीयं मृत्युं मत्वा भ्रान्तो भवति।

उपर्युक्ते प्रसङ्गे मायाजवनिकाच्छन्नेनैव मायामोहितधियैव पुंसा जगदित्यनुभूयत इति प्रतिपादितमस्तीति जगताङ्कारणत्वेन मायायाः प्रतिपादनादत्राऽस्ति मायाकारणतावादि साङ्ख्यमिति वक्तुं सुशकम्।

—०—

१. स यदजया त्वजामनुशयीत गुणांश्च जुषन्
भजति सरूपतां तदनु मृत्युमपेतभगः।
त्वमुत जहासि तामहिरिव त्वचमात्तभगो
महसि महीयसेऽष्टगुणितेऽपरिमेयभगः॥
(स्क. १०, अ. ८७, श्लो. ३८)

श्रीमद्भागवतमहापुराणे

एकादशः स्कन्धः

(१२८)

सृष्टप्रविष्टवादि साङ्ख्यम्

श्रीमद्भागवतमहापुराण एकादशे स्कन्धे तृतीयेऽध्याये तृतीयश्लोकतः समारभ्य षोडशश्लोकं यावन्मायां वर्णयता ऽन्तरिक्षेण प्रतिपादितं सृष्टप्रविष्टवादि साङ्ख्यमस्ति[1]। तच्चेत्थम्—

भगवन्माया स्वरूपतोऽनिर्वचनीया वर्त्तते ऽतएव तस्याः कार्यैरेव तस्याः निरूपणं भवति। आदिपुरुषः परमात्मा यया शक्त्या सर्वभूतानां कारणम्भवति तेषां विषयोपभोगाय तथा मोक्षस्य सिद्धये ऽथवा स्वोपासकानामुत्कृष्टसिद्धये स्वनिर्मितैः पञ्चभूतैः नैकविधानि देवमनुष्यादिशरीराणि सृजति सैव शक्तिः मायाशब्देन व्यपदिश्यते। इत्थं

---

१. एभिर्भूतानि भूतात्मा महाभूतैर्महाभुज।
ससर्जोच्चावचान्याद्यः स्वमात्रात्मप्रसिद्धये॥
एवं सृष्टानि भूतानि प्रविष्टः पञ्चधातुभिः।
एकधा दशधाऽऽत्मानं विभजञ्जुषते गुणान्॥
गुणैर्गुणान् स भुञ्जान आत्मप्रद्योतितैः प्रभुः।
मन्यमान इदं सृष्टमात्मानमिह सज्जते॥
कर्माणि कर्मभिः कुर्वन् सनिमित्तानि देहभृत्।
तत्तत्कर्मफलं गृह्णन् भ्रमतीह सुखेतरम्॥

पञ्चमहाभूतैः सृष्टेषु प्राणिशरीरेषु भगवानन्तर्यामिस्वरूपेण प्राविशत्। तथा स्वात्मानमेव क्रमशः मनः ज्ञानेन्द्रियाणि कर्मेन्द्रियाणीत्येकादशरूपेषु व्यभजत्। तैः स्वरूपैश्च विषयभोगङ्कारयति। देहाभिमानी जीवोऽन्तर्यामिणा प्रकाशितैरिन्द्रियैः विषयोपभोगङ्करोति। पञ्चभूतात्मकं शरीरमेव स्वात्मस्वरूपमिति जानन् तस्मिन्नेवाऽऽसक्तो भवति। कर्मेन्द्रियैः जीवः सकामकर्माणि करोति तथा तदनुसृत्य शुभकर्मणां फलत्वेन सुखमशुभकर्मणां फलत्वेन च दुःखमनुभवति। शरीरधारी सन् जीवलोके भ्रमति। एतत् सर्वम्मायाकृतमेवाऽस्ति। एवमेव जीवः नैकविधाः माङ्गलिककर्मगतीस्तासां फलानि चाधिगच्छति, महाभूतानां प्रलयं यावच्च मृत्योर्जन्म, जन्मनःमृत्युं चाधिगच्छति एषैव भगवन्माया वर्त्तते। यदा पञ्चभूतानां प्रलयवेला समागच्छति, तदानाद्यनन्तका स्थूल-सूक्ष्म-द्रव्यगुणरूपात्मिका मायेयं सृष्टिमव्यक्तम्प्रत्याकर्षति तदा पृथिव्यां सततं शतं समारवृष्टिर्भवति, प्रलयकालशक्त्या सूर्यस्योष्णताऽभिवर्धते, तया सूर्यः त्रीनपि लोकान् परितापयति तथा च प्रलयवेलायां शेषनागस्य सङ्कर्षणस्य मुखादग्निज्वालाः निःसरन्ति, वायुप्रेरणया च ताः ज्वालाः निःसरन्ति वायुप्रेरणयैव च ताः ज्वालाः पातालेन ज्वालनमारभन्ते, तथा क्रमशः समुन्नताः सत्यः परितः

इत्थं कर्मगतीर्गच्छन् बह्वभद्रवहाः पुमान्।
आभूतसम्प्लवात् सर्गप्रलयावश्नुतेऽवशः।
धातूपप्लव आसन्ने व्यक्तं द्रव्यगुणात्मकम्।
अनादिनिधनः कालो ह्यव्यक्तायापकर्षति॥
शतवर्षा ह्यनावृष्टिर्भविष्यत्युल्बणा भुवि।
तत्कालोपचितोष्णार्को लोकांस्त्रीन् प्रतपिष्यति॥
पातालतलमारभ्य सङ्कर्षणमुखानलः।
दहन्नूर्ध्वशिखो विष्वग् वर्धते वायुनेरितः॥
सांवर्तको मेघगणो वर्षति स्म शतं समाः।
धाराभिर्हस्तिहस्ताभिर्लीयते सलिले विराट्॥

भ्रमन्ति । तदनन्तरं प्रलयकालिकः सांवर्त्तकाख्यो मेघव्यूहः गजशुण्डादण्डधारामिव धाराभिः शतं वर्षाणि यावदहर्निशं वर्षति, येन बृहद्ब्रह्माण्डञ्जलनिमग्नं भवति । तदा यथा ईन्धनं विना वह्निः प्रशाम्यति तथैव विराट्पुरुषो ब्रह्मा स्वब्रह्माण्डशरीरं विहाय स्वसूक्ष्मे स्वरूपे ऽव्यक्तात्मनि लीयते । वायुः पृथिव्याः गन्धङ् कर्षति, येन सा जलरूपा भवति । तथा स एव वायुः जलरसङ् कर्षति तदा जलमग्नित्वं भजते । यदान्धन्तमो ऽग्निस्वरूपं लुम्पति, तदा सोऽग्निः वायौ लीनो भवति । अथ चावकाशरूपं खं वायोः स्पर्शशक्तिं परिगृह्णाति, तदा वायुराकाशे लीनो भवति । तदनन्तरं कालरूपीश्वर आकाशस्य गुणं शब्दमपकर्षति, येन खं तामसे ऽहङ्कारे लीयते । इन्द्रियाणि बुद्धिश्च राजसे ऽहङ्कारे लीयन्ते । मनः सात्त्विकाहङ्कारजैः देवैः सह सात्त्विकेऽहङ्कारे प्रविशति । अहङ्कारोऽपि स्वकार्यैः सह महत्तत्त्वे लीनो भवति । महत्तत्त्वं प्रकृतौ प्रकृतिश्च ब्रह्मणि लीना भवति । तत्पश्चाद् विपरीतक्रमेण सृष्टिर्भवति । एषा सृष्टि-स्थिति-संहारकारिणी त्रिगुणमयी माया वर्त्तते ।

उपर्युक्ते प्रसङ्गे भगवान् त्रिगुणात्मिकया मायया सृजति पालयति संहरति च तथा स्वयं सृष्ट्वा तस्मिन्नेव जगति प्रविष्टो भवतीति प्रतिपादितमस्ति । इत्येतो वक्तुं शक्यते, यदत्र "सृष्टप्रविष्टवादि साङ्ख्यमस्तीति" ।

ततो विराजमुत्सृज्य वैराजः पुरुषो नृप ।
अव्यक्तं विशते सूक्ष्मं निरिन्धन इवानलः ।।
वायुना हृतगन्धा भूः सलिलत्वाय कल्पते ।
सलिल तद्धृतरसं ज्योतिष्ट्वायोपकल्पते ।।
हृतरूपं तु तमसा वायौ ज्योतिः प्रलीयते ।
हृतस्पर्शोऽवकाशेन वायुर्नभसि लीयते ।।
कालात्मना हृतगुणं नभ आत्मनि लीयते ।
इन्द्रियाणि मनो बुद्धिः सह वैकारिकैर्नृप ।।
प्रविशन्ति ह्यहङ्कारं स्वगुणैरहमात्मनि ।
एषा माया भगवतः सर्गस्थित्यन्तकारिणी ।
त्रिवर्णा वर्णितास्माभिः किं भूयः श्रोतुमिच्छसि ।

(स्क. ११, अ. ३, श्लो. ३—१६)

(१२९)

पुरुषाभिधानवादि साङ्ख्यम्

श्रीमद्भागवतमहापुराणस्यैकादशे स्कन्धे चतुर्थे ऽध्याये द्वितीयश्लोकतः पञ्चमं श्लोकं यावद्भगवतो ऽवताराणां वर्णनप्रसङ्गे श्रीद्रुमिलेन प्रतिपादितं पुरुषाभिधानवादि साङ्ख्यमस्ति[1]। तच्चेत्थमवबोध्यम्—

भगवान् तस्य गुणाश्चानन्ताः सन्ति। यस्तस्य गुणान्सङ्ख्यातुमीहते सोऽस्त्यज्ञः। पृथिव्याः रजःकणाश्चापि कर्हिचित्केनापि सङ्ख्यातुं शक्यन्ते, परन्तस्य

---

१. यो वाऽनन्तस्य गुणाननन्ताननुक्रमिष्यन् स तु बालबुद्धिः।
रजांसि भूमेर्गणयेत् कथंचित्
कालेन नैवाखिलशक्तिधाम्नः॥
भूतैर्यदा पञ्चभिरात्मसृष्टैः
पुरं विराजं विरचय्य तस्मिन्।
स्वांशेन विष्टः पुरुषाभिधान—
मवाप नारायण आदिदेवः॥
यत्काय एष भुवनत्रयसन्निवेशो
यस्येन्द्रियैस्तनुभृतामुभयेन्द्रियाणि।
ज्ञानं स्वतः श्वसनतो बलमोज ईहा
सत्त्वादिभिः स्थितिलयोद्भव आदिकर्त्ता॥
आदावभूच्छतधृतीरजसास्य विष्णु सर्गे
विष्णुः स्थितौ क्रतुपति र्द्विजधर्मसेतुः।
रुद्रोऽप्ययाय तमसा पुरुषः स आद्य—
रित्युद्भवस्थितिलयाः सततं प्रजासु॥
(स्क. ११, अ. ४, श्लो. २—५)

परमात्मनः गुणाः सङ्ख्यातुन्नैव शक्यन्ते । भगवान् एव पृथिव्यप्तेजोवाय्वाकाशात्मकानि पञ्चभूतानि स्वात्मना स्वात्मन्येव सृजति । यदा सो ह्यभिः विराट्शरीरं ब्रह्माण्डन्निर्माय तस्मिन् लीलया स्वांशेनाऽन्तर्यामिस्वरूपेण प्रविशति, न तु भोक्तृस्वरूपेण यतो भोक्ता तु स्वपुण्यफलमनुसृत्य जीव एव भवति । तदा स एवाऽऽदिपुरुषो नारायणः पुरुषश्चेति नाम्ना व्यपदिश्यते । एष-एव तस्य प्रथमोऽवतारो वर्त्तते । तस्यैव परमात्मनः विराजो ब्रह्माण्डशरीरे लोकत्रयं स्थितमस्ति । तस्येन्द्रियेभ्य एव देहधारिणां ज्ञानेन्द्रियेभ्य एव देहधारिणां ज्ञानेन्द्रियाणि कर्मेन्द्रियाणि च निर्मीयन्ते । तस्य स्वरूपत एव स्वतः सिद्धस्य ज्ञानस्य सञ्चारो भवति । तस्य श्वासप्रश्वासेभ्यः सर्वेष्वपि शरीरेषु बलसञ्चारो भवति तथा चेन्द्रियेष्वोजः कर्मकरणसामर्थ्यञ्चायाति । तस्यैव सत्त्वादिभिर्गुणैः जगतां सृष्टि-स्थिति-लयाः भवन्ति । विराट्शरीरस्य यः शरीरी वर्त्तते, स एवादिकर्ता नारायणो वर्त्तते । सर्वतः प्राक् जगतामुत्पत्तये तस्यैव रजोगुणस्यांशाद् ब्रह्मा प्रादुरासीत् । तदनन्तरं स आदिपुरुष एव जगतां स्थितये सत्त्वांशेन धर्मस्य ब्राह्मणानां रक्षको यज्ञपतिः विष्णुः समभूत् । तत्पश्चाच्च स एव जगतां संहरणाय तमोगुणस्यांशेन रुद्रो बभूव । इत्थन्नैरन्तर्येण तेनैव परिवर्त्तनशीलाः प्रजाः समुत्पद्यन्ते स्थाप्यन्ते संह्रियन्ते च ।

उपर्युक्ते प्रघट्टके पुरुषस्य पारमार्थिकं विवेचनं प्रस्तुतमस्ति । इत्यतो वक्तुं शक्यते, यदत्र पुरुषाभिधानवादि साङ्ख्यमस्तीति ।

(१३०)

ज्ञानसाधनशरीरविशेषनिरूपकं साङ्ख्यम्

श्रीमद्भागवतमहापुराणस्यैकादशे स्कन्धे सप्तमे ऽध्याये विंशतितमश्लोकतः समारभ्य त्रयोविंशतितमश्लोकं यावदुद्धवम्प्रति ज्ञानमुपदिशता भगवता श्रीकृष्णेनोक्तं

ज्ञानसाधनशरीरविशेषनिरूपकं साङ्ख्यमस्ति[1]। तच्चेत्थमवबोद्धव्यम्

समस्तप्राणिनामात्मा विशेषतः मनुष्यस्याऽऽत्माः स्वहिताहितोपदेशको गुरुरस्ति यतः मानवः स्वप्रत्यक्षानुभूतिभिरनुमितिभिश्च स्वहिताहिते निर्णेतुं पूर्णतः समर्थोऽस्ति। साङ्ख्ययोगविशारदाः धीराः पुरुषाः मनुष्ययोनौ मनःशक्तिरिन्द्रियशक्तिरित्यादीनामाश्रयभूतं भगवत्स्वरूपिणमात्मतत्त्वं पूर्णतः साक्षात्कुर्वन्ति। भगवान् पादवन्तं द्विपादवन्त त्रिपादवन्तं चतुष्पादवन्तं ततोऽप्यधिकपादवन्तं पादशून्यं च शरीरं सृष्टवान्। तेषु शरीरेषु मनुष्यशरीरमेव विशिष्टं भगवत्प्रियञ्च वर्त्तते। मनुष्यशरीरे ह्येकाग्रचित्तं तीक्ष्णबुद्ध्यादिकं गृहीतृभिः हेतुभिर्यैरनुमीयतेऽपि। अनुमानेनधग्राह्यमर्थादहंकारादिविपयेभ्यो भिन्नं सर्वप्रवर्त्तकमीश्वरं साक्षादनुभवन्ति।

उपर्युक्ते स्थले ज्ञानसाधने विशिष्टस्य मनुष्यशरीरस्य वैशिष्ट्येन निरूपणं कृतमस्तीति वक्तुं शक्यते यदत्र ज्ञानसाधनशरीरविशेषनिरूपकं साङ्ख्यमस्तीति।

(१३१)

कैवल्यस्वरूपनिरूपकं साङ्ख्यम्

श्रीमद्भागवतमहापुराणस्यैकादशे स्कन्धे नवमेऽध्याये षोडशश्लोकतः समारभ्यै-

---

१. आत्मनो गुरुरात्मैव पुरुषस्य विशेषतः।
यत् प्रत्यक्षानुमानाभ्यां श्रेयोऽसावनुविन्दते।
पुरुषत्वे च मां धीराः सांख्ययोगविशारदाः।
अविस्तरां प्रपश्यन्ति सर्वशक्त्युवबृं हितम्॥
एकद्वित्रिचतुष्पादो बहुपादस्तथाऽपदः।
बह्व्यः सन्ति पुरः सृष्टास्तासां मे पौरुषी प्रिया।
अत्र मां मार्गयन्त्यद्धा युक्ताहेंतुभिरीश्वरम्।
गृह्यमाणैर्गुणैलिङ्गैरग्राह्यमनुमानतः
(स्क. ११ अ. ७ श्लो. २०—२३)

कविंशतितमश्लोकं यावत् कुररादिसप्तगुरूवर्णनेऽवधूतोपाख्याने सम्प्राप्तम् कैवल्य स्वरूपनिरूपकं साङ्ख्यमस्ति[1] तच्चेत्थमवबोध्यम्—

ऊर्णनाभे: सर्वप्रकाशक:सर्वाऽन्तर्यामी सर्वशक्तिमान् भगवान् विना केनाऽपि साहय्येन केवलंस्वमाययैव समग्रं जगत्सृष्टवान् ।कल्पान्ते च कालशक्त्या सवस्मिनलीयत, तथा सजातीयविजातीयस्वगतभेदैश्च शून्य: केवलमवशिष्यते । भगवान् सर्वाऽधिष्ठानं सर्वाऽऽश्रयश्चाऽस्ति, परन्न कमप्यन्यं सभाश्रयतेऽपितु स्वाऽऽश्रित एवाऽवतिष्ठते । भगवान् प्रकृतिपुरुषयो: र्नियामको कार्यकारणाऽऽत्मकस्य जगतो ह्यादिकारणं परमात्मा स्वकालशक्त्या सत्त्वरजस्तमोगुणानां सर्वशक्तीनांसाम्यं विदधाति । स्वयमेकाक्यद्विती यो विराजते । परमात्मा केवलानुभवैकगोचर आनन्दधनस्वरूपी च वर्त्तते । न केनाप्युपाधिना सह तस्य सम्बन्धोऽस्ति । स एव प्रभु: स्वकालशक्त्या त्रिगुणमयीं मायाङ्क्षोभयति तथा सर्वत: प्राक् महत्तत्त्वमर्थात् क्रियाशक्तिप्रधानं सूत्रमुत्पादयति । महत्तत्त्वमेव त्रयाणामपि गुणानां प्रथमाभिव्यक्ति:वर्त्तते । तदेव च सर्वविधाया: सृष्टे: मूलकारणमस्ति । तस्मिन्नेव सर्वमेवेदञ्जगदोतञ्च प्रोतञ्च वर्त्तते, सूत्रेवस्त्रमिव । अस्माद्-

---

१. एको नारायणो देव: पूर्वसृष्टं स्वमायया ।
संहृत्य कालकलया कल्पान्त इदमीश्वर: ।
एक एवाद्वितीयोऽभूदात्माधारोऽखिलाऽऽश्रय: ।
कालेनाऽऽत्मानुभावेन साम्यन्नीतासु शक्तिषु ।।
सत्त्वादिष्वादिपुरुष: प्रधान पुरुषेश्वर: ।।
परावराणां परम आस्ते कैवल्यसंज्ञित: ।
केवलानुभवानन्दसन्दोहो निरुपाधिक: ।
केवलात्मानुभावेन स्वमायां त्रिगुणात्मिकाम् ।
संक्षोभयन् सृजत्यादौ तया सूत्रमरिंदम ।
तामाहुस्त्रिगुणव्यक्तिं सृजन्तीं विश्वतोमुखम् ।
यस्मिन् प्रोतमिदं विश्वं येन संसरते पुमान् ।
यथोर्णनाभिर्हृदयादूर्णां संतत्य वक्त्रत: ।
तया विहृत्य भूयस्तां ग्रसत्येवं महेश्वर: ।
(स्क. ११ अ. ९ श्लो १६—२१)

धेतोर्जीवः जन्ममृत्युचक्रे पतति । यथोर्णनाभिः स्वान्ततो मुखेन प्रपञ्चं विस्तारयति तस्मिन्नेव विहरति तथा तन् निगिरति । तथैव परमेश्वरोऽपि जगदेतत्स्वस्माद्दुत्पादयति जीवरूपेण च तस्मिन् विहरति ततश्च प्रलयवेलायां स्वस्मिन्नेव लीनयति ।

उपर्युक्ते प्रसङ्गे केवलं परमेश्वर एव मायया गुणान् विक्षोभ्य कालशक्त्या यथासमयंसृजति स्वयञ्जीवस्वरूपेण विहरति कल्पान्ते च स्वात्मनि लीनयतीति प्रतिपादितमस्ति। इत्यतो वक्तुं शक्यते यदत्र कैवल्यस्वरूपनिरूपकं साङ्ख्यमस्तीति । अर्थात् सर्वतः प्राक् केवलस्वरूपी भगवान् तिष्ठति मध्येऽपि केवलस्यैव नैकविधाः स्थितयो भवन्ति कल्पान्तेऽपि च केवलमेवावशिष्यत इति प्रतिपादनादत्र कैवल्यस्वरूपमस्तीति विज्ञेयम् । अतएवाऽत्र कैवल्य स्वरूपनिरुपकं साङ्ख्यमस्तीतिशम् ।

(१३२)

गुणकर्तृत्ववादि साङ्ख्यम्

श्रीमद्भागवतमहापुराणस्यैकादशे स्कन्धे दशमेऽध्याये ह्येकत्रिंशत्तमश्लोकतः समारभ्य चतुस्त्रिंशत्तमश्लोकं यावज्जगतां मिथ्यात्वप्रतिपादनावसरे श्रीकृष्णेनोद्धवम्प्रति प्रतिपादितङ् गुणकर्तृत्ववादि साङ्ख्यमस्ति[1] तच्चेत्थमवगन्तव्यम्—

---

१. गुणाः सृजन्ति कर्माणि, गुणोऽनुसृजते गुणान् ।
जीवस्तु गुणसंयुक्तो भुङ्क्ते कर्मफलान्यसौ ।।
यावत् स्याद् गुणवैषम्यं तावन्नानात्वमात्मनः ।
नानात्वमात्मनो यावत् पारतन्त्र्यं तदैव हि ।।
यावदस्यास्वतन्त्रत्वं तावदीश्वरतो भयम् ।
य एतत् समुपासीरंस्ते मुह्यन्ति शुचार्पिताः ।।
काल आत्माऽऽगमो लोकः स्वभावो धर्म एव च ।
इति मां बहुधा प्राहुर्गुण-व्यतिकरे सति ।।
(स्क. ११ अ. १० श्लो. ३१—३४)

सत्त्वरजस्तमांसीति विख्यातास्त्रयोगुणाः खानि स्वकर्मसु प्रेरयन्ति खानि च कर्माणि कुर्वन्ति । जीवोऽज्ञानपारवश्यात् सत्त्वरजस्तमसाख्यान् गुणानिन्द्रियाणि च स्व-स्वरूपत्वेनाऽवगच्छति । तथातत्कर्मणां फलं सुखं दुःखं वाऽनुभवति, यावद्गुणवैषम्यमच्छरीरादिष्वहं ममभावऽस्ति । तावदेवात्मन एकत्वं नानुभूयते । यावच्चानेकत्वं भवत्यात्मनस्तावत्तु कालकर्मणामाधिन्धं भवत्येव । यावच्च पारतन्त्र्यमस्ति तावदीश्वरतो भयमपि भवत्येव । योऽहम्मभावग्रस्तस्तिष्ठन्नात्मनो ऽनेकतां पारतन्त्र्यञ्चमन्यन्ते । तथाचाऽविरज्य बहिर्मुखानि कर्माण्येव सेवन्ते, ते शोकमोहौप्राप्नुवन्ति । यदा मायागुणाः क्षुब्धा भवन्ति तदा परमात्मानमेव कालः, लोकः, जीवः, वेदः, स्वभावः धर्मः इत्यादिभिर्नाभिमिः निरूपयन्ति, नामान्येतानि मायामयान्येव सन्ति । वस्तुतस्तु नामरूपहीनः शुद्ध आत्मा वर्त्तते ।

उपर्युक्ते प्रसङ्गे गुणेष्वेषु नैकविधा सृष्टिस्तेषां प्रेरणयैव चेन्द्रियादीनि सर्वङ् कुर्वन्तीति प्रतिपादितमस्ति । इत्यतो वक्तुं शक्यते यदत्र गुणकर्तृत्ववादि साङ्ख्य मस्तीति ।

(१३३)

जीवप्रसवनिरूपकं संसारतरुनिरुपकञ्च साङ्ख्यम्

श्रीभद्भागवतमहापुराणस्यैकादशे स्कन्धे द्वादशेऽध्यायेसप्तदशश्लोकतःसमारभ्य चतुर्विशतितमश्लोकं यावत् कर्मानुष्ठानकर्मत्यागव्यवस्थापनप्रसङ्गे श्रीकृष्णेनोद्धवम्प्रति समुपदिष्टं जीवप्रसवनिरूपकं संसारतरुनिरूपकञ्च साङ्ख्यमस्ति[१] तच्चेत्थमवगन्तव्यम्—

---

१. स एष जीवो विवरप्रसूतिः
प्राणेन घोषेण गुहां प्रविष्टः ।
मनोमयं सूक्ष्ममुपेत्य रूपं
मात्रा स्वरो वर्ण इति स्थविष्टः ।।
यथानलः खेऽनिल बन्धुरूष्मा
बलेन दारुण्यधिमथ्यमानः ।
अणुः प्रजातो हविषा समिध्यते

यः परमात्मा परोक्षरूपेण निरूप्यते, सः साक्षादेव वर्त्तते। स एव निखिलवस्तूनाञ्जीवनदोऽस्ति। स एवाऽनाहतनादस्वरूपेण परावाणीनामकेन प्राणेन मूलाधारं चक्रं प्रविशति-तदनन्तरं मणिपूरके चक्रेऽर्थान्नाभौ समागत्य पश्यन्ती वाण्याः मनोमयं सूक्ष्मं रूपं दधाति। ततश्च कण्ठदेशे स्थितं विशुद्धं चक्रमागच्छति तथा तत्र मध्यमवाणिरूपेणाऽभिव्यक्तोभवति। क्रमशः मुखमागत्य ह्रस्वदीर्घादिमात्रोदात्ताऽनुदात्तस्वरककारादिवर्णरूपं वैखरीवाणी स्वरूपं धारयति। अग्निः स्वविद्युत्स्वरूपेणाव्यक्तरूपेण स्थितोऽस्ति। यदा काष्ठमन्थनङ्क्रियते तदावातसाहाय्येन सूक्ष्माणुः स्वरूपेण प्रकटीभवति तथा हवने क्रियमाणे प्रचण्डरूपेण समिद्धते। तथैव परमात्माऽपि शब्दब्रह्मरूपतः क्रमशः परापश्यन्तीवैखरीति वाणीनां रूपेण प्रकटीभवति। इत्थं वचन-कर्म-चलन-उत्सर्ग-घ्राणन-रसन-दर्शन-स्पर्शन-श्रवणसङ्कल्पन-विकल्पन-अवबोधन-अभिमानमहत्तत्त्वरूपेण सर्वेषां स्थितिकरणादीनि तथा सत्त्वरजस्तमसां सर्वे विकाराश्चेति सर्वाश्चापि कर्ताकर्मकारणात्मिकाः परमात्मन एवाभिव्यक्तयः सन्ति। सर्वेषां जीवनदो परमेश्वर एव त्रिगुणमयस्य ब्रह्माण्डकमलस्य कारणमस्ति। असावादिपुरुषः पूर्वमेकाक्यव्यक्तश्चासीत्। यथोर्वरिते क्षेत्रे समुप्तं बीजं शाखा-पत्र-पुष्पादीनि नैकविधानि रूपाणि दधाति, तथैव कालगतिना मायामाश्रित्य शक्तिविभाजनेन परमेश्वर एव नैकविधरूपेषु प्रतीयते। यथा तन्तुविस्तरेवस्त्रमोतञ्च प्रोतञ्च भवति, तथैव जगदेतत्

तथैव मे व्यक्तिरियं हि वाणी ॥
एवं गदिः कर्मगतिर्विसर्गो
घ्राणो रसो दृक् स्पर्शः श्रुतिश्च।
संकल्पविज्ञानमथाभिमानः
सूत्रं रजः सत्त्वतमोविकारः ॥
अयं हि जीवस्त्रिवृदब्जयोनि—
रव्यक्त एको वयसा स आद्यः।
विश्लिष्टशक्तिर्बहुधेव भाति-
बीजानि योनिं प्रतिपद्य यद्वत् ॥
यस्मिन्निदं प्रोतमशेषमोतं
पटो यथा तन्तुवितानसंस्थः।

परमात्मन्योतञ्च प्रोतञ्च वर्त्तते । यथा तन्तुं विना वस्त्रस्याऽस्तित्वन्न भवति । किन्तु तन्तुस्तु वस्त्रं विनापि स्वास्तित्वं संरक्षति, तथैव जगदभावेऽपि परमात्मा तिष्ठति । जगदेतत्परमात्मस्वरूपमेवास्ति, परमात्मानमतिरिच्यास्य जगतो ऽस्तित्वन्नास्ति । जगत्तरूरसावनादिप्रवाहरूपत्वान्नित्योऽस्ति: । कर्मपरम्परैवास्य स्वरूपमस्ति तथा भोगमोक्षौच पुष्पफले स्त: । संसारतरो: पापपुण्यात्मकं बीजद्वयमस्ति । असङ्ख्येया: वासना: मूलानि सन्ति । गुणत्रयी च नालमस्ति । पञ्चभूतान्यस्य स्कन्धानि सन्ति । शब्दादयो विषया एव पञ्चरसा: सन्ति । एकादशेन्द्रियाणि शाखा: सन्ति । जीवेश्वराख्यौ पक्षिणावस्मिन् संसारतरौ कृतनीडौ निवसत: । वात-पित्त-श्लेष्मात्मकं त्रिधा बल्कलमस्ति । सुखदु:खात्मके द्विविधे फले भवत: । तर्वसौ सूर्यमण्डलं यावद्विस्तीर्णोऽस्ति । ये गृहस्था: शब्दस्पर्शरूपरसगन्धाऽऽत्मकेषु विषयेष्वासक्ता: सन्ति ते कामपारवश्याद् गृध्रानिव सन्ति । त एव संसारतरो: दु:खरूपं पाकं भुञ्जते । यतस्ते नैकविधकर्मबन्धनबद्धा: भवन्ति । ये ऽरण्यवासिन: परमहंसा: विषयेभ्यो विरक्ता: सन्ति । ते ऽस्मिन्वृक्षे राजहंसानिव सन्ति । तथा ते तस्य सुखरूपं फलं भुञ्जते । वस्तुतो

य एष संसारतरू: पुराण:
कर्मात्मक: पुष्पफले प्रसूते ।।
द्वे अस्य बीजे शतमूलस्त्रिनाल:
पञ्चस्कन्ध: पञ्चरसप्रसूति: ।।
दशैकशाखो द्विसुपर्णनीड—
स्त्रिवल्कलो द्विफलोऽर्कं प्रविष्ट: ।
अदन्ति चैकं फलमस्यगृध्रा,
ग्रामेचरा एकमरण्यवासा: ।
हंसा य एकं बहुरूपमिज्यै-
र्मायामयं वेद स वेद वेदम् ।।
एवं गुरूपासनयैकभक्त्या
विद्याकुठारेण शितेन धीर: ।
विवृश्च्यजीवाशयमप्रमत:
सम्पद्यचात्मानमथ त्यजास्त्रम् ।।
(स्क. ११ अ. १२ श्लो. १७—२४)

भगवान् एक एव वर्त्तते । भगवतो नैकविधं यद्रूपमस्ति तत्तु मायामयमस्ति । यस्तथ्यमेतद्गुरूभिरवगच्छति स एव वस्तुतः सर्ववेदानां रहस्यञ्जानाति । अतएव जीवः गुरूदेवोपासनारूपयाऽनन्यया भक्त्या ज्ञानकुठारन्तीक्ष्णङ्कुर्यात्तथा तेन ज्ञानकुठारेण सावधानतया धीरतया च जीवभावं छिन्द्यात् तदनन्तरं परमात्मत्वं भजन् ज्ञानवृत्तिरूपमस्त्रमपि त्यजेत्, स्वाखण्डस्वरूपे स्थितिङ्कुर्यादिति ।

उपर्युक्ते प्रसङ्गे जीवप्रसवस्य निरूपणमस्ति तथा संसारस्य तरूरूपकेणनिरूपणमस्तीति वक्तुं शक्यते, यदत्र जीवप्रसवनिरूपकं संसारतरूनिरूपकञ्च साङ्ख्यमस्तीति शम् ।

(१३४)

हंसोपदिष्टं साङ्ख्यम्

श्रीमद्भागवतमहापुराणस्यैकादशे स्कन्धे त्रयोदशेऽध्याये द्वाविंशतितमश्लोकतः समारभ्य चत्वारिंशत्तमश्लोकं यावद् ब्राह्मणाय ज्ञानमुपदिशता हंसेन प्रतिपादितं साङ्ख्यमस्तीति[1] तद्धंसोपदिष्टं साङ्ख्यम्भवति ।

तच्चेत्थमवगन्तव्यम्—

---

१. वस्तुनो यद्यनानात्वमात्मनः प्रश्न ईदृशः ।
कथं घटेत वो विप्रावक्तुर्वामेक आश्रयः ।।
पञ्चात्मकेषु भूतेषु समानेषु च वस्तुतः ।
को भवानिति वः प्रश्नो वाचारम्भो ह्यनर्थकः ।।
मनसा वचसा दृष्ट्या गृह्यतेऽन्यैरपीन्द्रियैः ।
अहमेव न मत्तोऽन्यदिति बुध्यध्वमञ्जसा ।।
गुणेष्वाविशते चेतो गुणाश्चेतसि च प्रजाः ।
जीवस्य देह उभयं गुणाश्चेतो मदात्मनः ।।
गुणेषु चाविशच्चित्तमभीक्ष्णं गुणसेवया ।

परमार्थवस्तु नानात्वतः सर्वथा भिन्नं वर्त्तते। मनुष्यदेवपशुपक्ष्यादिशरीराणि पाञ्चभौतिकत्वादभिन्नान्येवसन्ति एतादृश्यां स्थितौ कमऽपि शरीरिणं किमऽपि शरीरं वा लक्ष्यीकृत्य कोऽसाविति प्रश्नो केवलं व्याहारमात्रकमस्ति। मनसा वाचा दृशा इन्द्रियान्तरैश्च यत्किमपि गृह्यते, तत्सर्वं परमात्मस्वरूपमेव। तदतिरिक्तङ् किमपि नास्ति सिद्धान्तोऽयन्तत्त्वविचारदृशाऽवगन्तव्यः। चित्तञ्चिन्तने क्रियमाणे विषयाकारतामेति विषयाश्च चेतसि प्रविशन्ति। वान्त्तैषा सत्यास्ति तथापि विषयचेतसी भगवत्स्वरूपभूतस्य जीवस्योपाधी वर्त्तेते। अर्थादात्मनश्चेतसा विषयैश्च कोऽपि सम्बन्धो नास्ति। अतः भूयो भूयो विषयाणां सेवनेन यच्चेतो विषयेष्वासक्तो भवति, विषयाश्च चेतसि प्रविशन्ति। उभेऽपि स्थिती परमात्मसाक्षात्कारेण हेये। जाग्रत्स्वप्नसुषुप्त्याख्याः तिस्रोऽवस्थाः सत्त्वादिगुणाननुसृत्य भवन्ति, बुद्धेर्वृत्तयश्च सन्ति न तु सच्चिदानन्दघनस्याऽऽत्मनः

गुणाश्च चित्तप्रभवा मद्रूप उभयं त्यजेत्॥
जाग्रत् स्वप्नः सुषुप्तं च गुणतो बुद्धिवृत्तयः।
तासां विलक्षणो जीवः साक्षित्वेन विनिश्चितः॥
यर्हि संसृतिबन्धोऽयमात्मनो गुणवृत्तिदः।
मयि तुर्ये स्थितोजह्यात् त्यागस्तद्गुणचेतसाम्॥
अहंकारकृतं बन्धमात्मनोऽर्थविपर्ययम्।
विद्वान् निर्विद्य संसारचिन्तां तुर्ये स्थितस्त्यजेत्
यावन्नानार्थधीः पुंसो न निवर्त्तेत युक्तिभिः।
जागर्त्यपि स्वपन्नज्ञः स्वप्ने जागरणं यथा॥
असत्त्वादात्मनोऽन्येषां भावानां तत्कृता भिदा।
गतयो हेतवश्चास्य मृषा स्वप्नदृशो यथा॥
यो जागरे बहिरनुक्षणधर्मिणोऽर्थान्
भुङ्क्ते समस्तकरणैर्हृदि तत्सदृक्षान्।
स्वप्न सुषुप्त उपसंहरते स एकः,

स्वभावः।वृत्तीनां साक्षित्वाज्जीवो वैलक्षण्यवानस्ति । बुद्धिवृत्तिजमेतद्बन्धनमेवात्मनि त्रिगुणात्मिकाः वृत्तयो निक्षिपति । अतस्त्रिभ्योऽवस्थाभ्यो विलक्षणे तुरीये ह्यात्मतत्त्वे स्थितिङ्कुर्वन्बुद्धिबन्धनं परित्यजेत् । तर्हि विषयचेतसोर्युगपत्त्यागः सम्भवति । बन्धन मेतदाहङ्कारिकमेव । एतदेव चात्मनः परिपूर्णमखण्डं सत्यं ज्ञानं परमानन्दस्वरूपं तिरोदधाति, वार्तमिनां विज्ञाय विरज्येत । अवस्था त्रिकानुगते तुरीये तत्त्वे स्थितिङ्कुर्वन् सांसारिकीञ्चिन्तां परित्यजेत् । यावत्पुंसो विभिन्नेषु पदार्थेषु सत्यारहंममेतिबुद्धयश्च युक्तिभिर्न निरस्यन्ते । तावदज्ञानी जाग्रदपि वस्तुतः स्वपिति । यथा स्वप्नावस्थायां प्रतीयते, यदहं जागृतोऽस्मीति, तथैवाऽत्राप्यवबोध्यम् । आत्मातिरिक्तानान्देहादीनां प्रतीयमानानान्नामरूपादीनाङ्किमप्यस्तित्वन्नास्ति । इत्यतस्तानधिकृत्य जायमानाः वर्णाश्रमादयो भेदाः स्वर्गादीनि फलानि, तेषाङ्कारणभूतानि कर्माणि चेति सर्वाणि तथैवाऽऽत्मने मिथ्या, भवन्ति यथा स्वप्नदर्शिनः स्वप्ने दृष्टाः पदार्थाः ।यः जाग्रदवस्थायां सर्वेन्द्रियैः बहिर्दृश्यमानान् सर्वानपि क्षणभङ्गुरान्पदार्थाननुभवति । स्वप्नास्थायां हृदय एव जाग्रदवस्थायांदृष्टपदार्थानिमान्नेव वासनामयविषयाननुभवति, सुषुप्त्यवस्थायाञ्च सर्वविषयलयमप्यनुभवति, स आत्मा केवलमस्ति । जाग्रदवस्थायामिन्द्रियाणां स्वप्नाऽवस्थायां मनसः बुद्धेरपि च स्वामी सए व आत्मा वर्त्तते । यतः स आत्मा त्रिगुणमयीनां तिसृणामप्यवस्थानां साक्षी वर्त्तते । योऽहमस्वाप्सं येन मया स्वप्नो दृष्टः सएवाहं जागृतो ऽस्मीति स्मृतिबलेनैकस्यैवाऽऽत्मनः सर्वावस्थावं सिध्यति एवं विचार्य मनसः तिस्रोऽवस्थाः गुणैः भगवन्मायया तदंशे जीवे कल्पिताः सन्ति । आत्मनि त्वेताः सर्वथाऽ सत्याः सन्ति ।

स्मृत्यन्वयात्त्रिगुणवृत्तिदृगिन्द्रियेशः ।।

एवं विमृश्य गुणतो मनसस्त्र्यवस्था ।
मन्मायया मयि कृता इति निश्चितार्थाः ।
संछिद्य हार्दमनुमानसदुक्तितीक्ष्ण,
ज्ञानासिना भजत माखिलसंशयाधिम् ।।
ईक्षेत विभ्रममिदं मनसो विलासं
दृष्टं विनष्टमतिलोलमलातचक्रम् ।
विज्ञानमेकमुरूधेव विभाति माया,

जगदेतन्मनसः विलासमात्रं वर्त्तते । ज्ञाताज्ञेयभेदशून्यो ज्ञानस्वरूप्यात्मैव नैकविधो यथा स्यात्तथा प्रतीयते, तत्र स्थूलशरीरेन्द्रियान्तःकरणस्वरूपस्य त्रिप्रकारकस्य गुणानां परिणामात्मकस्य विकल्पस्य प्रभावोऽस्ति । स्वप्नमिवाऽज्ञानकल्पिता मायाः क्रीडाऽस्ति । अतएव देहादिरूपदृश्येभ्यः दृष्टिमपाकृत्य तृष्णारहितैरिन्द्रियव्यापारैः हीनः निरीहश्च सन् आत्मानन्दानुभूतो मग्नो भवति ।यद्यपिप्याहारादिवेलायां देहादिकः प्रपञ्चो दृश्यते तथाप्येतत्पूर्वमेवा ऽऽत्मवस्तुनो ऽतिरिक्तत्वेन मिथ्यात्वं परिकल्प्य त्यक्तम्भवति । अतो भूयो भ्रान्तिमूलके मोहे पातयितुं देहादिकं न समर्थीभवति । देहपातं यावत् केवलसंस्कारमात्रिका तस्य प्रतीतिर्भवति । यथा मदिरां पीत्वोन्मत्तः पुरुषः नैवैतदप्यवलोकयति,यन्मया धारितं "चैलं" शरीरे वर्त्तते पतितं वा, तथैव सिद्धो पुरुषः येन शरीरेण स्वीयः साक्षात्कारो विहितस्तच्छरीरं प्रारब्धवशादुत्तिष्ठत्युपविशतिगच्छत्यायाति वेतिनश्वरशरीरविषये ऽमुष्मिन् दृष्टिपातन्नैव करोति । प्राणेन्द्रियैः सह शरीरमपिप्रारब्धाऽऽधीनमस्ति । अतएव प्रारब्धकर्माणि यावत्सन्ति तावत् तानि प्रतीक्षते, परमात्म वस्तुनः साक्षात्कर्त्ता तथा समाधिपर्यन्तं योगारूढः पुमान् स्त्रीपुत्रधनादिप्रपञ्चेन सह शरीरं न कदापिस्वीकरोति, स्वीयञ्च मनुते, यथा जागृतः पुमान् स्वाप्निकं शरीरादिकं

स्वप्नस्त्रिधा गुणविसर्गकृतो विकल्पः ।।

दृष्टिं ततः प्रतिनिवर्त्य निवृत्ततृष्ण—
स्तूष्णीं भवेन्निजसुखानुभवो निरीहः ।
संदृश्यते क्व च यदीयमवस्तुबुद्ध्या
त्यक्तं भ्रमाय न भवेत् स्मृतिरानिपातात् ।।
देहं च नश्वरमवस्थितमुत्थितं वा,
सिद्धो न पश्यति यतोऽध्यगमत् स्वरूपम् ।
दैवादपेतमुत दैववशादुपेतं,
वासो यथा परिकृतं मदिरामदान्धः ।।
देहोऽपि दैववशगः खलु कर्म यावत्
स्वारम्भकं प्रतिसमीक्षत एव सासुः ।

याथातथ्यत्वेन नैव स्वीकरोति, तथैवासौ। एतदेव साङ्ख्यस्य योगस्य च गोपनीयं रहस्यं वर्त्तते। भगवान् स्वयं तत्त्वज्ञानोपदेशाय हंसरूपेणावततार। परमात्मैव योगस्थः साङ्ख्यस्य, सत्यस्य, ऋतस्य, तेजसः श्रियः, यशसः, इन्द्रियनिग्रहादीनाङ् परमगतिः परमधिष्ठानञ्चास्ति। परमात्मा सर्वगुणातीतः निरपेक्षश्चाऽस्ति। तथापि साम्याऽसङ्गतादयो गुणाःपरमात्मानमेव सेवन्ते, परमात्मन्येव प्रतिष्ठिताः सन्ति यतः परमात्मा सर्वहितैषी सुहृत्प्रियतम आत्मा चास्ति। वस्तुतस्तु साम्याऽसङ्गतादयो गुणाः नैव सन्ति, यतः ते सत्त्वादीनां गुणानां परिणामभूताः नैव सन्ति, सन्ति च नित्याः।

उपर्युक्ते प्रसङ्गे भगवता हंसस्वरूपेणाऽवतीर्य सर्षिकं ब्रह्माणमुपदिशता स्वयमेतत्प्रतिपादितं यत्-मयैतदुक्तं वो विप्रा! गुह्यं यत् साङ्ख्ययोगयोः अर्थात् साङ्ख्यस्य योगस्य च यद्गुह्यञ्ज्ञानं वर्तते, तदत्र मया हंसरूपेण सता प्रतिपादितमिति वक्तुं शक्यते, यदत्र हंसोपदिष्टं साङ्ख्यमस्तीति।

(१३५)

बहुप्रकृतिवादि साङ्ख्यम्

श्रीमद्भागवतमहापुराणस्यैकादशे स्कन्धे चतुर्दशे ऽध्याये तृतीयश्लोकतः

तं सप्रपञ्चमधिरूढसमाधियोगः
स्वाप्नं पुनर्न भजते प्रतिबुद्धवस्तुः ।।
मयैतदुक्तं वो विप्रा गुह्यं यत् सांख्ययोगयोः
जानीत माऽऽगतं यज्ञं युष्मद्धर्मविवक्षया ।।
अहं योगस्य साङ्ख्यस्य सत्यस्यर्तस्य तेजसः ।
परायणं द्विजश्रेष्ठाः श्रियः कीर्तेर्दमस्य च ।।
मां भजन्ति गुणाः सर्वे निर्गुणं निरपेक्षकम् ।
सुहृदं प्रियमात्मानं साम्यासङ्गादयोऽगुणाः ।।
(स्क. ११ अ. १३ श्लो. २२—४०)

एकादशश्लोकं यावद्भक्तियोगस्य महिमानं वर्णयता भगवता श्रीकृष्णेनोद्धवम्प्रति प्रतिपादितं बहुप्रकृतिवादि साङ्ख्यमस्ति । तच्चेत्थमवगन्तव्यम्—

वेदसंज्ञिता वागियं कालप्रभावतः प्रलयवेलायामलुप्यत । पुनः सृष्टिवेलायां भगवान् विष्णुः सङ्कल्पेनैव ब्रह्मणे समुपदिदेश । ब्रह्मा स्वज्येष्ठपुत्रं स्वायुम्भुवम्प्रति प्रोवाच । स्वयाम्भुवमनुश्च भृग्वङ्गिरामरीचिपुलहात्रिपुलस्त्यक्रतुभ्यः प्रतिपादयामास । एतेषामेव प्रजापतीनां ब्रह्मर्षिणां सन्ततयः देवदानव-गुह्यकमनुष्यसिद्ध-गन्धर्व-विद्याधर-चारण-किन्देव-किन्नर-नाग-राक्षस-किम्पुरूषादयः सन्ति । ते तेभ्यो ब्रह्मर्षिभ्य एव पपठुः। सर्वासामपि जातीनां सर्वासामपि व्यक्तीनाञ्च स्वभावाः तासां वासनाः सत्त्वरजस्तमांसि च पृथक् पृथग्भवन्तीति । तासु तासां बुद्धिवृत्तिषु च नैके भेदाः सन्ति । अतएव सर्वाः जातयः स्वां स्वां प्रकृतिमनुसृत्य वेदवाचां विभिन्नानर्थान् कुर्वन्ति । वेदवागप्येतादृश्येवाऽलौकिकी वर्त्तते, यस्याः नैकविधाना-मर्थानां स्फुरणं स्वाभाविकमेवाऽस्ति । एवमेव स्वभावभेदतः परम्परागतस्योपदेशस्य भेदतश्च मनुष्याणां बुद्धिषु भिन्नता समापतति । केचन तु किमप्यविचार्यैव वेद-

---

१. कालेन नष्टा प्रलये वाणीयं वेदसंज्ञिता ।
मयादौ ब्रह्मणे प्रोक्ता धर्मो यस्यां मदात्मकः ।।
तेन प्रोक्ता च पुत्राय मनवे पूर्वजाय सा ।
ततो भृग्वादयोऽगृह्णन् सप्तब्रह्ममहर्षयः ।।
तेभ्यः पितृभ्यस्तत्पुत्रादेवदानवगुह्यकाः ।
मनुष्याः सिद्धगन्धर्वाः सविद्याधरचारणाः ।
किन्देवाः किन्नरा नागा रक्षः किम्पुरूषाऽऽदयः ।
बह्व्यस्तेषां प्रकृतयो रजःसत्त्वतमोभुवः ।।
याभिर्भूतानि भिद्यन्ते भूतानां मतयस्तथा ।
यथा प्रकृतिः सर्वेषां चित्रा वाचः स्रवन्ति हि ।।
एवं प्रकृतिवैचित्र्याद् भिद्यन्ते मतयो नृणाम् ।

विरोधिनः पाखण्डमताऽवलम्बिनो भवन्ति। सर्वेषामऽपि बुद्धिर्भगवन्मायया मुग्धा भवति। अतएव सर्वेऽपि मनुष्याः स्वीयां स्वीयां रूचिमनुसृत्य कर्मसंस्कारान् आत्मकल्याणपन्थानश्च, नैकत्वेन प्रतिपादयन्ति। पूर्वमीमांसकाः धर्मम्, साहित्याचार्याः यशः, कामशास्त्रिणः कामम्, योगविदः सत्यशमदमादीन्, दण्डनीतिकृतो ह्यैश्वर्यम्, त्यागिनः त्यागम्, लोकायतिकाश्च भोगमेव मानवजीवनस्य परमलाभं मन्वते। कर्मयोगिनश्च यज्ञम्, तपः, दानम्, व्रतानि, यमनियमादीन् पुरुषार्थत्वेनाऽपि प्रतिपादयन्ति।

उपर्युक्ते प्रसङ्गे त्रिष्वऽपि लोकेषु समग्रायामऽपि सृष्टौ ये केचन जीवाः सन्ति। तेषां समेषामऽपि मतैक्यन्नाऽस्ति। यतः सत्त्वरजस्तमसां वैविध्यत्वेन स्थितिः तथा जातीनां व्यक्तीनाञ्च रूचिवैचित्र्यादेकमेव तत्त्वं पृथक्पृथक्तया गृह्णन्ति एकस्या एव वेदवाचः विभिन्नानर्थान् गृह्णन्तीत्यादिकप्रतिपादनादत्र बहुप्रकृतिवादि साङ्ख्यमस्तीति ज्ञेयम्।

पारम्पर्येण केषांचित् पारवण्डमतयोऽपरे ॥
यन्मायामोहितधियः पुरूषाः पुरूषर्षभ।
श्रेयो वदन्त्यनेकान्तं यथाकर्म यथारुचि ॥
धर्ममेके यशश्चान्ये कामं सत्यं दमं शमम्।
अन्ये वदन्ति स्वार्थं वा ऐश्वर्यं त्यागभोजनम् ॥
केचिद् यज्ञतपोदानं व्रतानि नियमान् यमान्।
आद्यन्तवन्त एवैषां लोकाः कर्मविनिर्मिताः ॥
दुःखोदर्कास्तमोनिष्ठाः क्षुद्रानदाः शुचार्पिताः ॥
(स्क ११ अ. १४ श्लो. ३-११)

(१३६)

भगवद्विभूतिनिरूपकं साङ्ख्यम्

श्रीमद्भागवतमहापुराण एकादशे स्कन्धे षोडशे ऽध्याये नवमश्लोकतः समारभ्य चतुश्चत्वारिंशत्तमश्लोकं यावद्भगवद्विभूतिवर्णनप्रसङ्गे श्रीकृष्णचन्द्रेणोद्धवम्प्रति प्रतिपादितं "भगवद्विभूतिनिरूपकं" साङ्ख्यं वर्त्तते' तदित्थमवगन्तव्यम्—

अव्ययात्मा भगवान् श्रीकृष्णः सर्वप्राणिहितैष्यात्मा सुहृदीश्वरो नियामकश्चास्ति सो ऽव्ययात्मैव सर्वप्राणीनां पदार्थानाञ्च स्वरूपेण विराजते । सर्वजगतामुत्पत्ति-स्थितिप्रलयानाञ्च कारणमपि स एव वर्त्तते । स चैव गतिमत्सु गतिः, कलयताङ्कालः, गुणेषु तेषां मूले भवा साम्यावस्था, गुणवत्सु स्वाभाविको गुणः, गुणयुक्तेषु वस्तुषु क्रियाशक्तिप्रधानम्प्रथमङ्कार्यं सूत्रात्मा, महत्सु ज्ञानशक्तिप्रधानम्प्रथमङ्कार्यं महत्तत्त्वम्, सूक्ष्मेषु जीवः, दुर्जयेषु मनो वर्त्तते, वेदानामभिव्यक्तिस्थानं हिरण्यगर्भः, मन्त्रेषु त्रितात्मको ह्योङ्कारः, अक्षरेष्वकारः, छन्दःसु त्रिपदागायत्री, देवेष्विन्द्रः, अष्टवसुष्वग्निः, द्वादशेष्वादित्येषु विष्णुः, एकादशसु रूद्रेषु नीललोहितनामको रूद्रः श्रीकृष्ण एव वर्त्तते । ब्रह्मर्षिषु भृगुः, राजर्षिषु मनुः, देवर्षिषु नारदः, गोषु कामधेनुः, सिद्धेश्वरेषु कपिलः, पक्षिषु गरूडः, प्रजापतिषु दक्षः, पितृष्वर्यमा, दैत्येषु प्रह्लादः, नक्षत्रेषु चन्द्रमा, औषधीषु सोमरसः, यक्ष-रक्षःसु कुबेरः, नागेन्द्रेष्वैरावतः, जलजीवेषु तेषाम् प्रभुः वरुणः, तप्यमानेषु दीप्तिमत्सु च सूर्यः, मनुष्येषु च नृपः, तुरङ्गेषूच्चैः

---

१. अहमात्मोद्धवामीषां भूतानां सुहृदीश्वरः ।
अहं सर्वाणि भूतानि तेषां स्थित्युद्भवाप्ययः ।।
अहं गतिर्मतिमतां कालः कलयतामहम् ।
गुणानांचाप्यहं साम्यं गुणिन्यौत्पत्तिको गुणः ।।
गुणिनामप्यहं सूत्रं महतां च महानहम् ।

श्रवा, धातुषु कनकम्, दण्डधारिषु यमः, सर्पेषु वासुकिः, नागराट्सु शेषः, दष्ट्रिषु सिंहः, आश्रमेषु संन्यासः, वर्णेषु ब्राह्मणः, तीर्थेषु नदीषु च गङ्गा, जलाशयेषु पयोधिः, शस्त्रास्त्रेषु धनुः, धनुर्धारिषु त्रिपुरारिः शङ्करः, वसतिषु सुमेरूः, दुर्गमेषु हिमाद्रिः, वनस्पतिषु पिप्पलः, धान्येषु यवः, पुरोहितेषु वसिष्ठः, वेदवेतृषु बृहस्पति सेनापतिषु स्वामी कार्त्तिकेयः, सन्मार्गप्रवर्त्तकेषु भगवान् ब्रह्मा, पञ्चमहायज्ञेषु ब्रह्मयज्ञः, व्रतेष्वहिंसा, शोधकेषु नित्यशुद्धो वायुरग्निः, सूर्यः जलं, वाणी, आत्मा चेति, अष्टाङ्गयोगे मनोनिरोध रूपः समाधिः, विजयेप्सुषु मन्त्रबलम्, कौशलेष्वात्मनो अनात्मनश्च विवेकरूपङ्कौशलङ्ख्यातिवादिषु च विकल्पः, स्त्रीषु मनुभार्याशतरूपा, पुरुषेषु स्वायम्भुवो मनुः, मुनीश्वरेषु नारायणः, ब्रह्मचारीषु सनत्कुमारः, धर्मेषु कर्मसंन्यासः, एषणात्रयत्यागेन सर्वप्राणिभ्यो ऽभयप्रदानस्वरूपः संन्यास, अभयसाधनेष्वा त्मस्वरूपानुसन्धानम्, अभिप्रायगोपनसाधनेषु मधुरा वागेव मौनम्, स्त्रीपुरुषयोः युग्मेषु प्रजापतिः, सावधनतया जाग्रत्सु संवत्सरस्वरूपी कालः, ऋतुषु कुसुमाकरः, मासेषु मार्गशीर्षः, नक्षत्रेष्वभिजित्, युगेषु सत्ययुगः, विवेकिषु महर्षिदेवलोऽसितः, व्यासेषु श्रीकृष्णद्वैपायनो व्यासः, कविषु शुक्राचार्यः, सृष्ट्युत्पत्तिलययोः प्राणिनां जन्मनः मृत्योश्च विद्यायाः अविद्यायाश्च ज्ञातृषु भगवत्सु वासुदेवः, प्रियभक्तेषूद्धवः, किम्पुरुषेषु हनूमान्, विधाधरेषु सुदर्शनः, रत्नेषु पद्मरागः, सुन्दरवस्तुषु पद्मकलिका, तृणेषु कुशा, हविष्येषु गोघृतम्, व्यापारिषु लक्ष्मीः, छद्मीषु द्यूतः, तितिक्षुःषु तितिक्षा, सात्त्विकेषु सत्त्वगुणः, बलवत्सूत्साहपराक्रमौ, भगवद्भक्तेषु भक्तियुक्तनिष्कामकर्म,

---

सूक्ष्माणामप्यहं जीवो दुर्जयानामहं मनः ॥

(स्क. ११ अ. १६ श्लो. ९—११)

ब्रह्मण्यानां बलिरहं वीराणामहमर्जुनः ।
भूतानां स्थितिरुत्पत्तिरहं वै प्रतिसंक्रमः ॥
गत्युक्त्युत्सर्गोपादानमानन्दस्पर्शलक्षणम् ।
आस्वादश्रुत्यवघ्राणमहं सर्वेन्द्रियेन्द्रियम् ॥

वैष्णवानां पूज्यासु वासुदेव-सङ्कर्षण-प्रद्युम्न-अनिरुद्ध,-नारायण-हयग्रीव-वराह-नृसिंह-ब्रह्माख्यासु-नवमूर्तिषु प्रथमा वासुदेवाख्यामूर्त्तिः, गन्धर्वेषु विश्वावसुः, अप्सरःसु पूर्वचित्तिः, पर्वतेषु स्थैर्यम्, पृथिव्यां शुद्धो गन्धः, जले रसः, तेजस्वीषु बह्निसूर्यौ, चन्द्रतारासु प्रभा, आकाशे शब्दः, ब्राह्मणभक्तेषु बलिः, वीरेष्वर्जुनः, प्राणिषु तेषामुत्पत्ति-स्थितिलयाः, चरणेषु गतिः, वाणीषु वाक्शक्तिः, पायुषूत्सर्गशक्तिः, हस्तेषु ग्रहणसामर्थ्यम्, जननेन्द्रियेषु आनन्दोपभोगशक्तिः त्वक्सु स्पर्शशक्तिः, नेत्रेषु दर्शनशक्तिः रसनासु रसनशक्तिः, कर्णेषु श्रवणशक्तिः, नासिकासु घ्राणशक्तिः सर्वेन्द्रियेष्विन्द्रियशक्तिः, पृथिवी, वायुः, खं, जलं, तेजो ऽहङ्कारः, महत्तत्त्वं, पञ्चमहाभूतानि, जीवो ऽव्यक्तः, प्रकृतिः, सत्त्वम्, रजः, तमः, सर्वेभ्यः परम्ब्रह्म, तत्त्वानाङ्गणना, लक्षणैर्तत्त्वज्ञानम् ईश्वरः, जीवः, गुणः, गुणी सर्वात्मा, सर्वस्वमित्येतानि सर्वाण्यप्युपर्युक्तानि भगवद्विभूतिस्वरूपाण्येव वर्त्तन्ते। भगवदतिरिक्तः कोऽपि पदार्थो क्वापि नास्ति। भगवान्स्वयमपि कर्हिचित्परमाणूश्चापि सङ्ख्यातुमर्हति किन्तु तद्विभूतीः सङ्ख्यातुन्नार्हति। भगवद्विरचिता-नामनन्तकोटिब्रह्माण्डानामपि गणना कर्त्तुन्नैव शक्यते तर्हि विभूतीनां गणना कुतः संभवेत्। यस्मिन्नपि तेजः श्रीः, कीर्तिः, ऐश्वर्यम्, ह्रीः त्यागः, सौभगम्, भगः, वीर्यम् तितिक्षा, विज्ञानादयो गुणश्रेष्ठाः भवन्ति तत्रैव भगवदंशत्वमेव। उपर्युक्ते प्रसङ्गे भगवद्विभूतीनां वर्णनं वर्त्तते। इत्यतो वक्तुं शक्यते यदत्र भगवद्विभूति—निरूपकं साङ्ख्यमस्तीति।

पृथिवी वायुराकाश आपो ज्योतिरहं महान्।
विकारः पुरूषोऽव्यक्तं रजः सत्त्वं तमः परम्॥
असमेतत्प्रसंख्यानं ज्ञानं तत्त्वविनिश्चयः।
मयेश्वरेण जीवेन गुणेन गुणिना विना॥
सर्वात्मनापि सर्वेण न भावो विद्यते क्वचित्॥

(स्क. ११ अ. १६ श्लो. ३५—३८)

(१३७)

अष्टाविंशतितत्त्ववादि ज्ञानविज्ञाननिरूपकञ्च साङ्ख्यम्

श्रीमद्भागवतमहापुराणे ह्येकादशे स्कन्ध एकोनविंशतितमे ऽध्याये चर्तुदशश्लोकतः समारभ्य सप्तदशश्लोकं यावद् भक्तेः साधनानां वर्णनङ्कुर्वता भगवता श्रीकृष्णेनोद्धवम्प्रति प्रतिपादितमष्टाविंशतितत्त्वादिज्ञानविज्ञाननिरूपकं साङ्ख्यमस्ति[1]। तच्चेत्थमवगन्तव्यम्

येन ज्ञानेन प्रकृतिः पुरुषः, महत्तत्त्वम्, अहङ्कारः, पञ्चतन्मात्राणि, पञ्चज्ञानेन्द्रियाणि पञ्चकर्मेन्द्रियाणि, मनः, पञ्चमहाभूतानि, त्रयो गुणाश्चेत्यष्टाविंशतितत्त्वानि, ब्रह्मादिस्तम्बपर्यन्तेषु वर्त्तन्ते तथैतेष्वप्यनुगतं परमात्मतत्त्वं वर्त्तत इत्याकारकञ्ज्ञानमेव विज्ञानशब्देन व्यवह्रियते। यदैकतत्त्वानुगतान्येकाऽऽत्मकानि तत्त्वानि पश्यति स्म, तानिन पूर्ववदवलोकयेत् परङ्केवलं परमङ्कारणं ब्रह्मैवावलोकयेत् तदैतदेव निश्चितं विज्ञानमुच्यते। शरीरादयो यावन्तस्त्रिगुणात्मकाः पदार्थाः सन्ति, सावयवपदार्थाः सन्ति तेषामुत्पत्तिस्थितिप्रलयान् विचारयेत्। यत्तत्त्ववस्तु सृष्ट्यादौ सृष्ट्यन्ते च कारणरूपेण तिष्ठति तदेव मध्येऽपि तिष्ठति। तदेव प्रतीयमानकार्यान्तिरमनुगच्छति कार्याणां प्रलये साक्षीरूपेणाऽधिष्ठानरूपेण वा

---

१. नवैकादश पञ्च त्रीन् भावान् भूतेषु येन वै।
इक्षेताथैकमप्येषु तज्ज्ञानं मम निश्चितम्॥
एतदेव हिं विज्ञानं न तथैकेन येन यत्।
स्थित्युत्पत्त्यप्ययान् पश्येद् भावानां त्रिगुणात्मनाम्॥
आदावन्ते च मध्ये च सृज्यात् सृज्यं यदन्वियात्।
पुनस्तत्प्रतिसंक्रामे यच्छिष्येत तदेव सत्॥
(स्क. ११ अ. १९ श्लो. १४—१६)

शिष्यते। तदेव वस्तुसत्यं परमार्थभूतञ्च वर्त्तत इति ज्ञेयम्। श्रुतिः प्रत्यक्षमैतिह्यम-नुमानञ्चेति चत्वारि प्रमाणानि मुख्यानि सन्ति प्रमाणनिकषे दृश्यप्रपञ्चमस्थिरत्वात् नश्वरत्वादविकारित्वाच्च सत्यमिति नैव सिध्यति। अतएव विवेकिनः नैकविधकल्पना-त्मकाच्छब्दमात्रात्प्रपञ्चाद्विरज्यन्ते।

उपर्युक्ते प्रसङ्गे प्रकृतिः पुरुषादीन्यष्टाविंशति तत्त्वानि सङ्ख्यातानि तथा तदनुसृत्य ज्ञानविज्ञानेऽपि प्रतिपादिते वर्त्तेते। इत्यतो वक्तुं शक्यते, यदत्र अष्टाविंशतितत्त्वनिरूपकं ज्ञानविज्ञान निरूपकञ्च साङ्ख्यमस्तीति।

(१३८)

अन्वयव्यतिरेकाभ्यां ज्ञाननिरूपकं साङ्ख्यम्

श्रीमद्भागवतमहापुराण एकादशे स्कन्धे विंशतितमे ऽध्याये द्वाविंशतितमे श्लोके ज्ञानकर्मभक्तियोगानां वर्णनप्रसङ्गे भगवता श्रीकृष्णचन्द्रेणोद्धवम्प्रति प्रतिपादितमन्वयव्यतिरेकाभ्यां ज्ञाननिरूपकं साङ्ख्यमस्ति[1]। तच्चेत्थम्—

साङ्ख्यशास्त्रे प्रकृतेः समारभ्य शरीरं यावद् यः सृष्टेः क्रमः निर्दिश्यते तमनुसृत्य सृष्टिचिन्तनं विधेयम्। येन क्रमेण च शरीरादीनां प्रकृतौ लयः प्रोच्यते तमनुसृत्यैव लयं चिन्तयेत्। क्रमो ह्येषस्तावदादृतव्यः यावन्मनः शान्तं स्थिरञ्च न भवेत्।

उपर्युक्ते प्रसङ्गे मनसः शान्तत्वस्थैर्यत्वाऽवाप्तये साङ्ख्यज्ञानं साङ्ख्य-

---

१. साङ्ख्येन सर्वभावानां प्रतिलोमानुलोमतः।
भवाप्ययावनुध्यायेन्मनो यावत् प्रसीदति॥
(स्क. ११ अ. २० श्लो. २२)

ज्ञानचिन्तनञ्च परमोपकारि विना साङ्ख्यज्ञानेन विना साङ्ख्यज्ञानानुध्यानेन च मनः स्थिरतां शान्ततां प्रसन्नताञ्च नाधिगच्छतीति प्रतिपादनादन्वयव्यतिरेकाभ्यां ज्ञाननिरूपकं साङ्ख्यमस्तीति ज्ञेयम् ।

(१३९)

शब्दब्रह्मनिरूपकं साङ्ख्यम्

श्रीमद्भागवतमहापुराण एकादशे स्कन्ध एकविंशतितमेऽध्याये पञ्चत्रिंशत्तम-श्लोकतः समारभ्य चत्वारिंशत्तमश्लोकं यावद्द्रव्यदेशादिगुणदोपवर्णनप्रसङ्गे भगवता श्रीकृष्णेन, प्रतिपादितं शब्दब्रह्मादिरूपकं साङ्ख्यं[1] वर्त्तते । तच्चेत्थम्—

वेदेषु काण्डत्रयमस्ति । कर्मकाण्डमुपासनाकाण्डञ्ज्ञानकाण्डञ्चेति । काण्डत्रितयेन ब्रह्मात्मनोरैक्यं प्रतिपाद्यते । सर्वेऽपि मन्त्रद्रष्टारः ऋषयः विषयमेनं गुप्तभावेनैव वोधयन्ति । भगवानपि तत्त्वमेनद् गुप्तरूपेणैव बोधयितुमीहते । वेदानां शब्दब्रह्मेति नामाऽस्ति । वेदाः भगवन्मूर्तयः सन्ति । अतएव तेषां रहस्यज्ञानं परमङ् कठिनम्भवति शब्दब्रह्म तत् परा, पश्यन्ती मध्यमवाणीनाञ्च रूपैःप्राणमयं मनोमयं इन्द्रियमयं ञ्चास्ति । पयोधिमिव निरवधिकं गहनञ्चास्ति । शब्दब्रह्मणः पारगमनं परमङ् कठिनमस्ति । भगवाननन्तशक्तिसम्पन्नमनन्तं ब्रह्म-वर्त्तते । भगवान् एव वेदवाणीं विस्तारयामास मृणालमिव वेदवाणी प्राणि-नामन्तःकरणेष्वनाहतनादरूपेण प्रकटीभवति । भगवान् हिरण्यगर्भः स्वयं वेदमूर्तिरमृतमयश्चास्ति । तस्योपाधिः प्राणो वर्त्ततेस्वयमनाहतनादत एव तस्याभि-व्यक्तिरभूत् । यथोर्णनाभिः स्वान्तःकरणा-

---

१. यथोर्णनाभिर्हृदयादूर्णामुद्वमते मुखात् ।
आकाशाद् घोषवान् प्राणो मनसा स्पर्शरूपिणा ॥
छन्दोमयोऽमृतमयः सहस्रपदवीं प्रभुः ।
ओङ्कारात् व्यञ्जितस्पर्शस्वरोष्मान्तःस्थभूषिताम् ॥

न्मुखेन जालकमुद्गिरति निगिरति च तथैव स्पर्शादिवर्णानां सङ्कल्पकम्मनःरूपिणो निमित्तकारणाद् हृदयाऽऽकाशात् नैकमार्गां वैखरीरूपां वेदवाचं स्वयं भगवान् एव प्रकटीकरोति । तथा च तां स्वस्मिन् लीनयति । सा वाक् हृदगतात् सूक्ष्मौङ्कारादभिव्यक्तैः स्पर्शसंज्ञकैः स्वरोष्मान्तःस्थसंज्ञकैर्वर्णैः विभूषिता वर्त्तते । तस्यामेतादृशि छन्दांसि सन्ति येषूत्तरोत्तर चतुर्चतुर्वर्णाभिवृद्धिर्भवति तैः विचित्रायां भाषायामेषा विस्तीर्णाऽभवत् ।

उपर्युक्ते प्रसङ्गे भगवता शब्दब्रह्मणः स्थितिःलयानां वर्णनङ् कृतमस्तीति वक्तुं शक्यते यदत्र शब्दब्रह्मनिरूपकं साङ्ख्यमस्तीति ।

(१४०)

विभिन्नान्येकादशसाङ्ख्यानि

श्रीमद्भागवतमहापुराण एकादशे स्कन्धे द्वाविंशतितमे ऽध्याय एकादशश्लोकतः समारभ्य पञ्चविंशतितमश्लोकं यावत्तत्त्वसङ्ख्यानिर्णयङ्कुर्वता भगवता श्रीकृष्णनोद्धवं प्रति प्रतिपादितमेकादशविधंसाङ्ख्यमस्ति। तच्च प्रेरणाप्रदं साङ्ख्यमिदमेव ज्ञानस्य मूलमिति शीर्षके ग्रन्थस्यास्य विभागे सप्रमाणं सविस्तरं वर्णितं वर्त्तते अतोऽत्र न भूयोऽपि प्रपञ्च्यते ऽपितु केवलन्नाम स्मरणमात्रेण स्मार्यते ।

यत् तत्र चत्वारि तत्त्वानि स्वीक्रियन्ते कैश्चित् कैश्चिच्चाष्टाविंशतितत्त्वानि चापि स्वीकृतानीति समन्वितानि तान्येकादशमतानि निर्दिष्टानि सन्ति ।

(१४१)

अविकल्पितज्ञानात्सृष्टिप्रतिपादकं साङ्ख्यम्

श्रीमद्भागवतमहापुराण एकादशे स्कन्धे चतुर्विंशतितमेऽध्याये] साङ्ख्य-

योगवर्णनप्रसङ्गे श्रीकृष्णचन्द्रेणोद्धवम्प्रति प्रतिपादितमविकल्पितज्ञानात्सृष्टिप्रतिपादकं साङ्ख्यमस्ति[1]। तच्चेत्थम्—

साङ्ख्यं प्राचीनर्षिभिः निर्णीतमस्ति। अस्य ज्ञानेन भेदबुद्धिमूलकं सुखदुःखादिरूपात्मकञ्चभ्रमन्तत्कालमेवजहाति। युगेभ्यः प्राक् प्रलयवेलायां सत्ययुगे च सम्पूर्णमेतद् दृश्यम्, द्रष्टा जगज्जीवो चेति विकल्पशून्यम्पदार्थभेदरहितः सर्वमपि केवलं ब्रह्मैव भवति। नास्त्यत्र सन्देहः यद्ब्रह्मणि कोऽपि विकल्पो नास्तीति मनसः वाचश्च ब्रह्मणि गतिर्नास्ति। ब्रह्मैव माया तथा तस्यां प्रतिबिम्बितस्य जीवस्य रूपेण दृश्य द्रष्टृरूपेणच विभक्तमिव भवति। तयोरेकं वस्तु प्रकृतिरुच्यते,तदेव जगति कार्यकारणरूपे दधाति। द्वितीयं वस्तु ज्ञानस्वरूपमस्ति तत्पुरुषशब्दन व्यवहरन्ति। भगवान् परमपुरुष एव जीवानां शुभाशुभकर्माण्यनुसृत्य प्रकृतिं शुद्धामकरोत्, तदा तस्याः सत्त्वरजस्तमांसीति त्रयोऽपि गुणाः प्रकटीबभूवुः। गुणेभ्यश्च क्रियाशक्तिप्रधानं सूत्रम्, ज्ञानशक्तिप्रधानं महत्तत्त्वञ्चेति प्रकटीबभूवतुः। ते परस्परं सम्पृक्ते वर्त्तेते। महत्तत्त्वे विकृतावहङ्कारः समजायत। अहङ्कारोऽयं जीवानां मोहकः। सोऽस्ति सात्त्विकराजसतामसभेदैस्त्रिविधः। अहङ्कारः पञ्चतन्मात्राणामिन्द्रियाणाञ्च कारणमस्ति, अतएवाहङ्कारः जडो चेतनश्चेत्युभयात्मको वर्त्तते। तामसादहङ्कारात्पञ्च-

---

१. अथ ते सम्प्रवक्ष्यामि साङ्ख्यं पूर्वैर्विनिश्चितम्।
यद् विज्ञाय पुमान् सद्यो जह्याद् वैकल्पिकं भ्रमम्॥
आसीज्ज्ञानमथो ह्यर्थ एकमेवाऽविकल्पितम्।
यदा विवेकनिपुणा आदौ कृतयुगेऽयुगे॥
तन्मायाफलरूपेण केवलन्निर्विकल्पितम्।
वाङ्मनोऽगोचरं सत्यं द्विधा समभवद्बृहत्॥
तयोरेकतरो ह्यर्थः प्रकृतिः सोभयात्मिका।
ज्ञानं त्वन्यतमो भावः पुरुषः सोऽभिधीयते॥
तमोरजः सत्त्वमिति प्रकृतेरभवन् गुणाः।
मया प्रक्षोभ्यमाणायाः पुरुषानुमतेन च॥
तेभ्यः समभवत् सूत्रं महान् सूत्रेण संयुतः।

तन्मात्राणां तेभ्यश्च पञ्चभूतानामुत्पत्तिः समजायत। राजसादहङ्कारादिन्द्रियाणि सात्त्विकादहङ्कारादिन्द्रियाधिष्ठातृदेवताः प्रकटीबभूवुः। सर्वेऽपि पदार्थाः भगवत्प्रेरणया सम्भूय मिलिताः। ब्रह्माण्डरूपकमण्डञ्च प्रकटयामासुः। तदण्डमेव भगवन्निवासभूः वर्त्तते। ब्रह्माण्डं यदा जले स्थिरमभवत्तदा परमपुरुषः नारायणरूपेणाऽस्मिन् विराजितो ऽभवत्। भगवन्नाभेः विश्वकमलस्योत्पत्तिः समभूत्। तस्मिन्नेव ब्रह्माविर्बभूव। विश्वसमष्टेरन्तःकरणस्वरूपेण ब्रह्मणा महत्तपस्तप्तम्। तदनन्तरं परमपुरुषप्रसादेन रजोगुणेन भूर्भुवः स्वरां सृष्टिमकरोत्। देवानान्निवासाय सुरलोकं, भूतप्रेतादिभ्यश्च भुवर्लोकं, मनुष्यादिभ्यश्च भूर्लोकं प्रतिष्ठापितवान्। लोकत्रियतादूर्ध्वं महर्लोकतपोलोकादीनि सिद्धानान्निवासस्थानानि संबभूवुः। सृष्टिकर्मणि समर्थेन ब्रह्मणाऽसुरेभ्यो नागेभ्यश्च पृथिव्यारधस्तादतलवितलसुतलतलातलमहातलरसातलपातालेतिसप्तलोकाः सृष्टाः भूर्भुवःस्वःस्वेव त्रिगुणात्मककर्माण्यनुसृत्य विविधाः गतयो भवन्ति व योगेन तपसा संन्यासेन च महर्लोकजनलोक-तपोलोक-सत्यलोक-प्राप्त्यात्मिकोत्तमा गतिर्लभ्यते। भक्तियोगेन भगवताम्परमन्धाम वैकुण्ठं समधिगम्यते। जगदेतत्कर्मभिः संस्कारैश्च युक्तमस्ति। भगवान् परमपुरुष एव कालरूपेण कर्माण्यनुसृत्य तेभ्यो फलव्यवस्थां करोति। गुणप्रवाहपतितोजीवः कर्हिचिच्च पततिकर्हिचिच्च तरति। जगति सर्वेऽपि पदार्थाः प्रकृतिपुरुषसंयोगसिद्धाः सन्ति। यस्यादावन्ते मध्ये चाऽस्तिसत्ता तदेव तत्त्वं सत्यतस्ति। विकृतयस्तु केवलं व्यवहाराय कृताः कल्पनाः सन्ति। यथा केयूरकटकादयः सुवर्णस्य विकाराः, घटादयो मृद्विकाराः पूर्वं सुवर्णमृत्तिकैवाऽऽस्तां पश्चादपि च सुवर्णमृत्तिकैव

पञ्चत्वाय विशेषाय कल्पते भुवनैः सह।
अन्ने प्रलीयते मर्त्यमन्नं धानासु लीयते।
धाना भूमौ प्रलीयन्ते भूमिर्गन्धे प्रलीयते॥
अप्सु प्रलीयते गन्ध आपश्च स्वगुणे रसे।
लीयते ज्योतिषि रसो ज्योती रूपे प्रलीयते॥
रूपं वायौ स च स्पर्शे लीयते सोऽपि चाम्बरे।
अम्बरं शब्दतन्मात्र इन्द्रियाणि स्वयोनिषु॥
योनिर्वैकारिके सौम्य लीयते मनसीश्वरे।

भविष्यतः। इत्यतो मध्येऽपि सुवर्णमृत्तिक एव स्तः। पूर्ववर्तिकारणमपि यत्परमङ् कारणमुपादाय कार्यवर्गं सृजति तदेव तदपेक्षयाऽपि परमं सत्यमस्ति। तात्पर्यमस्ति यत्- कार्यस्यादौ मध्येऽन्ते च यत्तत्वं सर्वथा तिष्ठति तदेव तत्त्वं सत्यं वर्त्तते। प्रपञ्चस्यास्योपादानकारणं प्रकृतिर्वर्त्तते। परमात्माऽधिष्ठानमस्ति। प्रकटीकर्त्ता च कालोऽस्ति व्यवहारकालिका त्रिविधिता वस्तुतो ब्रह्मस्वरूपिण्यस्ति। यावत्परमात्मन ईक्षणशक्तिः स्वीयङ्कार्यङ्करोति यावच्च पालनप्रवृत्तिस्तिष्ठति तावज्जीवानां कर्मभोगाय कार्यकारणरूपेण पितृपुत्रादिरूपेण च सृष्टिचक्रन्नैरन्तर्येण प्रचलति। यदा विराडेव जगतां सृष्टि-स्थितिलयानां लीलाभूः वर्त्तते, यदा च कालरूपेण परमपुरुषो व्याप्नोति, प्रलयञ्च सङ्कल्पते तदायं भुवनैः सह विनाशरूपविभागार्हो भवति। लीनप्रक्रियाचेत्थमस्ति यत् प्राणिनां शरीराण्यन्नेऽन्नं वीजे वीजं भुविभूश्च गन्धतन्मात्रे लीयते। गन्धः जले, जलं रसे, रसस्तेजसि, तेजश्च रूपे लीयते। रूपं वायौ, वायुः स्पर्शे, स्पर्शश्चाऽऽकाशे आकाशश्च शब्दतन्मात्रे लीयते। इन्द्रियाणि स्वकारणदेवता-स्वन्ततश्च राजसेऽहङ्कारे लीयन्ते। राजसोऽहङ्कारः स्वनियन्तरिसात्त्विकाऽहङ्-काररूपे मनसि, शब्दतन्मात्राणि पञ्चभूतकारणे तामसेऽहङ्कारे, त्रिविधो-ऽहङ्कारः महत्तत्त्वे लीयते। ज्ञानक्रियाशक्ती प्रधानं महत्तत्त्वञ्च स्वकारणभूतेषु गुणेषु

शब्दो भूतादिमप्येति भूतादिर्महति प्रभुः॥
स लीयते महान् स्वेषु गुणेषु गुणवत्तमः।
तेऽव्यक्ते सम्प्रलीयन्ते तत्काले लीयतेऽव्यये॥
कालो मायामये जीवे जीव आत्मनि मय्यजे।
आत्मा केवल आत्मस्थो विकल्पापायलक्षणः॥
एवमन्वीक्षमाणस्य कथं वैकल्पिको भ्रमः।
मनसो हृदि तिष्ठेत व्योम्नीवार्कोदये तमः॥
एष साङ्ख्यविधिः प्रोक्तः संशयग्रन्थिभेदनः।
प्रतिलोमानुलोमाभ्यां परावरदृशा मया॥

(स्क. ११ अ. २४ श्लो. १—२९)

लीयन्ते। गुणाश्चाऽव्यक्तायां प्रकृतौ, प्रकृतिश्च प्रेरकेऽविनाशिनि काले लीयते, कालश्च मायामये जीवे, जीवश्चाजन्मवति परमात्मनि लीयते। आत्मा न कस्मिंश्चिदपि लीयते। स निरुपाधिकः स्वरूपप्रतिष्ठितो भवति। जगतां सृष्टिलययोरधिष्ठानमवधिश्च वर्त्तते। य इत्थं विवेकदृशाऽवलोकयति तस्य चेतसि प्रपञ्चभ्रान्तिः स्थातुन्नार्हति। कार्यकारणयोः साक्षी परमपुरुषः परमात्मा वर्त्तते। अनया सन्देहग्रन्थिः श्लथते, पुरुषः स्वस्वरूपे च प्रतिष्ठितो भवति।

उपर्युक्ते प्रसङ्गे ऽव्ययाऽऽत्मना परमपुरुषेण भगवता श्रीकृष्णेनोद्धवम्प्रति यथातथ्येन साङ्ख्यविधिना केन प्रकारेण सृष्टिस्थितिलयाः भवन्तीति प्रतिपादितमित्यतो वक्तुं शक्यते यदत्रऽविकल्पितज्ञानात्सृष्टिप्रतिपादकं साङ्ख्यमस्तीति।

(१४२)

द्रव्यदेशाद्येकादशतत्त्वनिरूपकं साङ्ख्यम्

श्रीमद्भागवतमहापुराणे ह्येकादशे स्कन्धे पञ्चविंशतितमे ऽध्याये त्रिंशत्तमैकत्रिंशत्तमयोः श्लोकयोः सत्त्वादिगुणत्रयवृत्तिनिरूपणप्रसङ्गे भगवता श्रीकृष्णेनोद्धवम्प्रति प्रतिपादितं द्रव्यदेशाद्येकादशतत्त्वनिरूपकं साङ्ख्यमस्तीति[1] निश्चितम्।

तच्चेत्थम्—

---

१. द्रव्यं देशः फलं कालो ज्ञानं कर्म च कारकः।
श्रद्धावस्थाऽऽकृतिर्निष्ठा त्रैगुण्यः सर्व एव हि॥
सर्वे गुणमया भावाः पुरुषाव्यक्तधिष्ठिताः।
दृष्टं श्रुतमनुध्यातं बुद्ध्या वा पुरुषर्षभ॥
(स्क. ११ अ. २५ श्लो. ३०—३१)

द्रव्यम्, देशः, फलम्, कालः, ज्ञानम्, कर्म, कर्त्ता, श्रद्धा, अवस्था, देवमनुष्य-तिर्यगादीनि शरीराणि, निष्ठेत्येतानि सर्वाणि त्रिगुणात्मकानि सन्ति। प्रकृतिपुरुषाऽऽश्रिताः यावन्तो भावाः सन्ति, ते सर्वेऽपि गुणमयाः सन्ति। नेत्रादिभिरिन्द्रियैरनुभूताः शास्त्रेभ्यः लोकलोकान्तरसम्बन्धेषु श्रुताः बुद्ध्या विचारितावा, भवेयुः सर्वेऽपि त्रिगुणात्मका एव सन्ति।

उपर्युक्ते प्रसङ्गे द्रव्य-देश-फल-काल-ज्ञान-कर्म-कर्तृ-श्रद्धावस्था-शरीर निष्ठा-आत्मेत्येकादशतत्त्वानान्निरूपणमस्तीति वक्तुं शक्यते यदत्र द्रव्यदेशाद्येकादशतत्त्व-निरूपकं साङ्ख्यमस्तीति शम्।

—०—

श्रीमद्भागवतमहापुराणे

द्वादशः स्कन्धः

(१४३)

मनसा विश्वसृष्टिप्रतिपादकं साङ्ख्यम्

श्रीमद्भागवतमहापुराणे द्वादशे स्कन्धे दशमे ऽध्याय एकत्रिंशत्तमद्वात्रिंशत्तमयोः श्लोकयोः वरदं भगवन्तम्प्रति श्रीमार्कण्डेयेण प्रोक्तं मनसा विश्वसृष्टिप्रतिपादकं साङ्ख्यमस्ति । तच्चेत्थम्—

यथैन्द्रजालिको नैकविधाः क्रीडाः दर्शयति क्रीडाभिश्च तस्य प्रभावे न काऽपि भिदायाति । तथैव भगवान् स्वजनमोहिन्याः मायायाः वृत्तीः स्वीकृत्य कस्यापि वन्दनादिकङ्करोति, तेन भगवतः परममहिम्नि न काऽपि भिदायाति । भगवान् स्वप्नद्रष्टारमिव स्वमनसैव सम्पूर्णञ्जगत्सृजति, स्वयं जगति प्रविश्य कर्तृत्वाभावे ऽपि कर्मकर्तृत्ववद्भिर्गुणैः कर्त्तारमिव प्रतीयते ।

उपर्युक्ते प्रसङ्गे भगवान् मनसैव सम्पूर्णञ्जगत्सृजतीति प्रतिपादितमस्ति । इत्यतो वयं वक्तुंशक्नुमो यदत्र मनसा विश्वसृष्टिप्रतिपादकं साङ्ख्यमस्तीति ।

---

१. सृष्ट्वेदं मनसा विश्व मात्मनानुप्रविश्य यः ।
गुणैः कुर्वद्भिराभाति कर्त्तेव स्वप्नदृग्यथा ।।
तस्मै नमो भगवते त्रिगुणाय गुणात्मने ।
केवलायाद्वितीयाय गुरवे ब्रह्ममूर्तये ।।
(स्क. १२ अ. १० श्लो. ३१—३२)

(१४४)

मायादिनवतत्त्वसहितंषोडश विकारवादि साङ्ख्यम्

श्रीमद्भागवतमहापुराणे द्वादशे स्कन्धे ह्येकादशेऽध्याये पञ्चमे श्लोके भगवतः स्वरूपवर्ण प्रसङ्गे शौनकादिभ्यः श्रीसूतेन समुपदिष्टं मायादिनवतत्त्वसहितं षोडश-विकारवादि साङ्ख्यमस्ति[१]। तच्चेत्थम्—

भगवतो यस्मिन् चेतनाऽधिष्ठिते विराट्स्वरूपे त्रिलोकी दृश्यते, तद्विराट्स्व-रूपं प्रकृतिः सूत्रात्मा, महत्तत्त्वमहङ्कारः पञ्चतन्मात्राणीति नवतत्त्वैः सहैकादशैरि-न्द्रियैः पञ्चमहाभूतैश्चेति षोडशभिः विकारैः निर्मितमस्ति ।

उपर्युक्ते प्रसङ्गे त्रिलोकीमयं भगवतो विराट्स्वरूपं षोडशविकारसहितैः मायादिभिर्नवभिस्तत्त्वैः निर्मितमस्तीति प्रतिपादितमस्ति । अर्थादुपर्युक्तैः पञ्चविंशति-भिस्तत्त्वै त्रिलोकी निर्मीयत इति प्रतिपादितमस्तीति वक्तुं शक्यते, यदत्र मायादिनव-तत्त्व सहितं षोडशविकारवादि साङ्ख्यमस्तीति शम् ।

—०—

१. मायाद्यैर्नवभिस्तत्त्वैः स विकारमयो विराट् ।
निर्मिता दृश्यते यत्र सचित्के भुवनत्रयम् ।।
(स्क. १२. अ. ११ श्लो. ५)

वेदेषु प्रतिपादितं साङ्ख्यम्

साङ्ख्यदर्शनङ्केचन नास्तिकाऽऽस्तिकभेदाभ्यां द्विविधमिति प्रतिपादयन्ति। तथा चेह साङ्ख्यकारिकासु सृष्टिप्रक्रियायामीश्वरस्यानुपयोगित्वात्तत्रेश्वरप्रतिपादनन्नास्तीति समवलोक्य साङ्ख्यदर्शनमवेदन्निरीश्वरन्नास्तिकञ्चेति प्रतिपित्सन्ति। किन्त्वेषा मान्यता भ्रान्तिमूलका वर्त्तते। यतः साङ्ख्ये नैकधा सृष्टिप्रक्रिया वर्त्तते तथा चेहेश्वरस्य नामग्रहणन्नास्ति तेन साङ्ख्यन्नास्तिकदर्शनमिति कथनं सर्वथा वर्त्तते ऽसङ्गतम्।

यतोऽत्र वेदमूलकानि दर्शनानि सन्त्यास्तिकदर्शनानि वेदविरूद्धानि च दर्शनानि सन्ति नास्तिक दर्शनानीति वर्त्तते सिद्धान्तः। सिद्धान्तमेनमनुसृत्य चेद् विचारः क्रियते तर्हि स्पष्टीभवति, यदेतत्साङ्ख्यदर्शनं सर्वथा वर्त्तते ह्यास्तिकदर्शनमेवेति। यतः सर्वमपि साङ्ख्यं वेदमूलकमेवाऽस्ति। अतएवाऽस्य दर्शनस्याऽऽस्तिकदर्शनत्वं वेदमूलकताञ्च स्पष्टीकर्त्तुमेवेह वेदेषु साङ्ख्यमिति प्रकरणम्प्रस्तूयते।

तद् यथा-ऋग्वेदे साङ्ख्यतत्त्वानि-(१०।६४।५) ऋगस्ति—

दक्षस्य वादिते जन्मनि व्रते,
राजाना मित्रावरुणा विवाससि॥
अतूर्तपन्थाः पुरुरथो अर्यमा-
सप्त होता विषुरूपेषु जन्मसु।

अर्थात् भो अदिते पुरुषस्य व्यवस्थानुकूले जन्मनि दीप्तिमन्तौ मित्रवरूणौ परिचरसि। सुव्यवस्थितमार्गवान् विविधभोगयुक्तो विरोधसोढ़ा पुरुषो भवति एतेषु-विविधजन्मसु सप्तहोतृयुक्तः सो ऽस्ति।

यदा सृष्ट्यादौ सर्वप्रथमः पुरुष आविर्भवति, अर्थाज्जीवाख्यञ्चेतनतत्त्वं स्थूलशरीरेण सह संयुज्य प्रकाशीभवति। तदा तस्याऽऽविर्भावे ऽदितिः तेजः स्वरूपिणौ सेवते। सो ऽयं प्रथमः पुरुषः स्वनियमितगतिमनुसृत्य चलति। विविधान् भोगान् भुङ्क्ते स्वविरोधांश्च सहति। वैषम्यावस्थायाः नैकविधजन्मसु सप्तहोतारस्तेन सह वसन्ति।

मन्त्रे ऽमुष्मिन् प्रकृतिरदितिरस्ति, पुरुषश्च दक्षोऽस्ति। प्रकृतिविकृतितावानि महदहङ्कारपञ्चतन्मात्राणीति सप्तः तत्त्वान्येवात्र सप्त होतृत्वेन वर्णितानि सन्ति।

इत्थं मन्त्रेऽमुष्मिन् साङ्ख्यदर्शनमस्ति। अथ च मन्त्रो ऽसौ साङ्ख्यमूलकोऽस्ति। अदितित्वेन प्रकृतेर्वर्णनमस्ति-ऋग्वेदे (१।८९।१०) यत्—

अदितिर्द्यौरदितिरन्तरिक्षमदितिर्माता स पिता स पुत्रः।
विश्वे देवा अदितिः पञ्चजना अदितिर्जातमदितिर्जनित्वम्॥

तथैवाऽत्र पुरुषाऽतिरिक्तं सर्वं प्रकृतिमयमेवाऽस्तीति साङ्ख्यमतं वर्त्तत एव।

तदेव मन्तव्यमत्राऽदितिनाम्ना प्रतिपादितमस्तीति मन्तव्यम्भवति। अतोऽत्र वक्तुं शक्यते यददितिः प्रकृतिश्चेति द्वेऽपि नामनी तत्त्वस्यैकस्यैव वर्त्तेते। प्रकृतिप्रतिपादनादत्र साङ्ख्यम्प्रतिपादितमिति स्वीकार्यम्। यतोऽत्र प्रकृतिरेव सर्वस्यापि त्रिगुणाऽऽत्मकस्याऽस्वजगतः सदुपादानम्भवतीति निश्चितम्।

पुरुष तत्त्वमेव वेदे दक्षनाम्ना व्यपदिष्टमित्यपि प्रमाणान्तरैः प्रतिपाद्यते यदैतरेय ब्राह्मणे (१।१३)

"ऋतु दक्षं वरुण संशिशाधि" (ऋग्वेदः ८।४२।३)
मन्त्रस्य प्रतीकं प्रदाय लिखितमस्ति, यत् "इति वीर्यं प्रज्ञानं वरुण संशिशाधीति" इत्यनेन स्पष्टीभवति यदस्मिन् एतरेयब्राह्मणे दक्षपदस्यार्थः प्रज्ञानमिति क्रियत इति। प्रज्ञानं चेतनं चेति एकस्यैव तत्त्वस्य प्रतिपादकौ शब्दौ वर्त्तेते। इत्थमेव तैत्तिरीयसंहितायाम् (२।५।२।४)

तथैव जैमिनीय ब्राह्मणोऽपि वर्त्तते (१।१५१)

प्राणः दक्षनाम्ना व्यवहृतः। प्राणश्चाऽस्ति चैतन्यस्य प्रतीकः। चेतनतत्त्वस्य कृत एव दक्ष प्रज्ञानञ्चेतनम्प्राणादयः शब्दाः प्रयुक्ताः सन्ति किन्तु तत्त्वन्तु तदेकमेव पुरुषाख्यम् प्रतिपादितमस्तीति वक्तुं शक्यते वृत्तवैशिष्ट्यादीनामैक्याद् दक्षनाम्नाऽपि पुरुषतत्त्वमेवाऽस्ति प्रतिपादितमिति।

ऋग्वेदस्य दशममण्डले द्विसप्ततितमे सूक्तेऽपि सृष्टिप्रक्रिया वर्णिता वर्त्तते, साऽपि साङ्ख्यसिद्धान्तपोषिणीति ज्ञेयम्। सूक्तेऽस्मिन्नदितिस्वरूपायाः प्रकृतेः अष्टौ पुत्राः सन्तीति प्रतिपादितम्। ते पुत्राश्चाऽष्टौ महान्, अहङ्कारः, शब्दतन्मात्रम्, स्पर्शतन्मात्रम्, रूपतन्मात्रम्, रसतन्मात्रम्, गन्धतन्मात्रम्, षोडशको विकारसमुदायश्चेति सङ्केतिताः सन्ति।

असावेव मार्तण्डाख्यश्चराचरात्मको ऽखिलविकारसमुदायः तैत्तिरीयाऽऽरण्यके ऽष्टमाऽऽदित्यो कश्यपः। तत्र "काश्यप्य इमाः सर्वाः प्रजाः" इत्यनेन प्रकारेणसर्वमपि कार्यभूतमिदञ्जगत् कश्यपरूपमेवास्तीति प्रतिपादितमस्ति। एतदेव तत्त्वं ऋग्वेदे मार्तण्डनाम्ना प्रतिपादितम्। प्रकृतिविकृतिरूपाणि च सप्ततत्त्वानि तैत्तरीयाऽऽरण्यके सप्तादित्यारिति नाम्ना प्रतिपादितानि सन्ति ते सप्तादित्याश्चात्र महदादीनि तत्त्वान्येव नामान्तरेण वेदे प्रतिपादितानि सन्ति। त एवेह भगवत्यारदितेः सप्तपुत्राः सन्ति। अदितिरेव च प्रकृतिरस्ति प्राकृतानि महदादीनि सप्त प्रकृतिविकृतिभूतानि प्रकृतिपुत्रत्नेन स्वीकर्त्तु शक्यन्त एवेति साङ्ख्यम्।

उपर्युक्ते प्रसङ्गे स्पष्टीभवति यदत्र ऋग्वेदसूक्ते प्रकृतिः प्राकृतानि सर्वाणि तत्त्वानि च नामान्तरैः प्रतिपादितानि सन्तीति। वेदे ऽत्र साङ्ख्यमस्तीति निश्चितम्।

जगतां मूलकारणत्वेन निरूपितायै प्रकृत्यै वेदे ऽदितिशब्दमिव स्वधाशब्दस्यापि प्रयोगः समुपलभ्यते। ऋग्वेदस्य प्रसिद्धतमे नासदीयसूक्ते प्रकृतिस्थाने स्वधाशब्दोऽस्ति प्रयुक्तः।

स चेत्थम्—

> न मृत्युरासीदमृतं न तर्हि न रात्र्या अह्न आसीत् प्रकेतः।
> आनीदवातं स्वधया तदेकं तस्माद्धान्यन्न परः किञ्चनास।।

अर्थात् प्रलयवेलायां मृत्युः अमृतम् निशा, दिनानि च व्यक्तावस्थायान्नासन् तदा तु स्वधया (प्रकृत्या) सह निर्दुष्टा चेतनसत्ता अर्थात् केवलं पुरुषतत्त्वमासीत्। तदेवाऽस्ति परमन्तत्त्वम्।

एवमिह निर्दोषचेतनसत्तात्त्वेन पुरुषः, स्वधात्वेन च प्रकृतिः प्रतिपादितेति वक्तुं शक्यते, यदत्र साङ्ख्यसिद्धान्तो वर्त्तत एव तथा च वेदे प्रकृतिं स्वधानाम्नाऽपि व्यवहरन्तीति निश्चितम्।

नासदीयसूक्तस्यैव तृतीये मन्त्रे प्रकृतिस्वरूपिणे जगतां मूलोपादनकारणाय तमः शब्दस्याऽपि प्रयोगो वर्त्तते—

तम आसीत्तमसा गूढमग्रे अप्रकेतं सलिलं सर्वमा इदम्। तुच्छंयेनावाऽपिहितं यदासीत्तपसस्तन्महिम्ना जायतेकम्।

अर्थादेतज्जगत्सृष्टेः प्राक् लिङ्गरहितं मूलोपादानकारणेन सहऽविभागापन्नमासीत् । जगताम्मूलोपादानकारणमपि तमसाऽऽवृत्तमासीत् । यदेतज्जगदस्ति कार्यस्वरूपेण विद्यमानं तत्सर्वमपि मूलोपादानकारणस्याऽन्तर्लीनमासीत् । सर्गकाले च तेजोमयस्य चेतनतत्त्वस्य महिम्ना अर्थात् सान्निध्यतः साक्ष्येण सर्वमपि कार्यंजातङ् क्रमशः प्रकटीबभूव ।

माठरवृत्तावपि प्रकृतिवाचकः तमः शब्दोऽस्तीति प्रतिपादितमस्ति । तद् यथा तम एव खल्विदमग्रऽऽसीत्, तस्मिन् तमसि क्षेत्रज्ञो ऽभिवर्त्तते प्रथमन्तम इति प्रोच्यते प्रकृतिः । (माठरवृत्तौ तमाया आर्यायारवतरणिकायाम्)

इत्थमेव तत्त्वसमाससूत्रव्याख्यायां भावागणेशेनाऽपि प्रकृतिनामसु तमः शब्दस्याऽपि ग्रहणङ्कृतमस्ति । तद् यथा—

तथा प्रकृतिपर्यायाः—अव्यक्तं प्रधानं, ब्रह्म, अक्षरं, क्षेत्रं,

तमः माया, ब्राह्मी, विद्या, अविद्या, प्रकृतिः, शक्तिः, अजा इत्यादय इति ।

उपर्युक्तैः प्रसङ्गैः प्रतीयते यदत्र तमः शब्दोऽपि समग्रस्यापि कार्यभूतस्य चराचरात्मकस्य जगतः मूलोपादानकारणाय प्रधानाय प्रयुज्यत एवेति ऋग्वेदेऽपि तमः शब्दो प्रकृत्यै प्रयुक्त एवेति सुनिश्चितरूपेण वक्तुं शक्यते यदस्मिन् ऋग्वेदे साङ्ख्यम्मूलरूपेण समुपलभ्यतेतरामिति दर्शनमिदन्न कथञ्चिदपि नास्तिकदर्शनत्वेन स्वीकर्त्तुं शक्यत इति शम् ।

(३)

अथर्ववेदे साङ्ख्यतत्त्वानि

अथर्ववेदेऽपि साङ्ख्यतत्त्वानान्निरूपणमस्ति । तद् यथा—

पुण्डरीकं नवद्वारं त्रिभिर्गुणेभिरावृत्तम् ।

तस्मिन् यद् यक्षमात्मन्वत् तद्वै ब्रह्मविदो विदुः ।। (१० । ८ । ४३)

अर्थात् नवद्वारात्मकमेतच्छरीरं त्रिभिर्गुणैरावृत्तमस्ति । तस्मिन् आत्मनिभो यक्षस्तिष्ठति । तं ब्रह्मज्ञानिनः सम्यक्तया जानन्ति ।

अत्र शरीरस्यापि पुण्डरीकमिव नैकविधाः सुमनोहराः स्थितयो जायन्ते। पुष्पमिव म्लानता भुवि लीनता चापि समवलोक्यत एवेति साधर्म्याण्यवलोक्य शरीरं साक्षात्पुण्डरीकमेवेति पुण्डरीकशब्दः शरीरार्थन्नियोजितः। आत्मानमिवास्मिन् शरीरे यक्षाख्यं विशिष्टं तत्त्वान्तरं यन्निर्दिष्टमस्ति तत्सत्त्वन्तु परमात्मैव भवितुमर्हति। अथर्ववेदेऽप्येवमेव निरूपणात् (अ. १०। ८। १५)

> यतस्तत्तत्त्वं सूक्ष्मतमवस्तुभ्यः समारभ्य स्थूलतमवस्तूनि यावद् व्याप्तमस्ति।
> उपनिषत्स्वपि प्रतिपादितमस्ति, यत् प्रत्येकम्प्रयत्नशीलः पुमान् परमात्मानं स्वात्मनि साक्षात्कर्त्तुं शक्नोति। इत्यादि—

विषयेऽत्र चेद्विचार्यते तर्हि प्रतीयते यदस्मिन्नुपर्युक्ते मन्त्रे देहपर्यायः पुण्डरीकशब्दः समग्रस्यापि कार्यजातस्योपलक्षणीभूतोऽस्ति। यतः स्वरूपेण दृश्यमानं व्यक्तां दशामापन्नमखिलमेतद्ब्रह्माण्डं त्रिगुणमयं त्रिगुणःवृत्तञ्चाऽस्ति, प्राकृतमेतदखिलं, प्रकृतिश्च स्वयं त्रिगुणस्वरूपिण्येवास्तीति निश्चप्रचम्।

> जीवात्मपरमात्मत्वेनोपलभ्यमान—
> मात्मतत्त्वं पुरुषः भोक्तृत्वेन शुद्धबुद्धमुक्तत्वेन च वर्तमानमेवात्र मन्त्रे आत्मनाम्ना यक्षनाम्ना च निर्दिष्टोऽस्ति।

इत्थं मन्त्रे ऽमुष्मिन् समग्रस्याऽपि कार्यजातस्य मूलोपादनकारणानि सत्त्वरजस्तमांसि प्रतिपादितानि, तान्येव सन्ति प्रकृतिस्वरूपाऽऽत्मकानि। एवमिह प्रकृतिः, भोक्ता पुरुषः, सर्वनियन्ता परमपुरुषश्चाऽस्तीति स्पष्टीकृतमिति वक्तुं शक्यते, यदत्र साङ्ख्यस्य मूलसिद्धान्तः सिद्धान्तितोऽस्तीति।

> अथर्ववेदे अस्यवामीयसूक्तेऽपि मन्त्रोऽस्ति।
> अस्यवामस्य पलितस्य होतुस्तस्य भ्रातृमध्यमो अस्त्यश्नः
> तृतीयो भ्राता धृतपृष्टो अस्यात्रापश्यं विश्पतिं सप्तपुत्र॥
> अत्राऽपि साङ्ख्यस्य मूलसिद्धान्तः सुस्पष्टतया प्रकटीभवति। तद्यथा—
> होतृत्वेन सर्वनियन्तुः परमपुरुषस्य, अश्नत्वेन भोक्तुः
> पुरुषस्य, धृतपृष्टत्वेन च सर्वोपादानकारणस्य प्रधानस्य। तथा विश्वपतिस्वरूपायाः प्रकृतेः, सप्तपुत्रत्वेन महतोऽहङ्कारस्य पञ्चतन्मात्राणाञ्च

निरूपणमस्तीति । सर्वं वर्णनमेतत् साङ्ख्यस्य सिद्धान्तानुगमेवाऽस्तीति । वेदेषु स्थाने स्थाने त्रिधातुपदस्य प्रयोगः समुपलभ्यते जगतां मूलोपादान-कारणाय । अथर्ववेदेऽपि (२० । ८३ । १)

त्रिधातुशब्दः सत्त्वरजस्तमःस्वरूपिण्याः प्रकृतेः वाचको वर्त्तते ।

(ख)

यजुर्वेदे साङ्ख्यतत्त्वानि

वेदेषु सर्वेष्वपि सृष्टिविधायाः निरूपणमस्ति, किन्तु पुरुषसूक्तेषु मुख्यतः सृष्टिविधैवाऽस्ति प्रतिपादिता । पुरुषसूक्तं यजुर्वेदस्यैकत्रिंशत्तममध्यायमेव कथयन्ति । इत्थमेव ऋग्वेदे (१० । ९०) अथर्ववेदे (१९ । ६) च पुरुषसूक्ते स्तः ।

पुरुषसूक्तमनुसृत्य जगत्सृष्टिरेकन्देवयजनं वर्त्तते । अर्थाद् देवेन परमपुरुषेण प्रारब्धो महायागो वर्त्तते । परमं पुरुषमेनं दर्शनशास्त्रेषु ब्रह्म, ईश्वरः, पुरुषश्चेति वर्ण-यन्ति । अयमेव जगताङ्कर्ता, भर्ता, संहर्ता चाऽस्ति । तद्दिव्यतत्त्वमनन्तशक्ति-सम्पन्नं तत्त्वमस्ति । तस्य समस्ताः शक्तयो देवरूपेण महायज्ञस्यास्य सञ्चालनङ् कुर्वन्ति । ताः देवशक्तयो महायज्ञमेनं वितन्वन्ति । जीवाख्यः पुरुषो यज्ञेऽमुष्मिन् हविर्भ-वति । इत्थमिह समग्राश्चापीमे साधनभूताः सन्ति । पूर्वं तत्र विद्यमान एव जीवं पुरुषं संस्कृत्य प्रस्तूयते । यागस्याऽस्य प्रारम्भिकयां सम्पन्नतायां जातायां समग्रस्यापि प्राकृतस्य जगतोऽर्थाद् भूतानां भौतिकपदार्थानां प्राणिवर्गस्य च प्रादुर्भावो भवति । तदैव वेदाः सूर्यः, शशी, लोकलोकान्तराणि च प्रकटीभवन्ति । सामाजिकी व्यवस्था सम्पद्यते । सर्वाण्यऽपि च सांसारिकाणि कार्याणि प्रारभ्यन्ते । देवैः विस्तारितेऽस्मिन् यज्ञे जीव-पुरुषरूपी पशुः बध्यते । एतत् सत्यं सनातनञ्च यागकर्माऽनादिकालतः निरन्तरं प्रसृत-मस्ति । व्यवस्थैषा श्रेष्ठा नियता चाऽस्ति यस्याः सुदृढतटैर्युक्तो ऽयं जगन्नदो ऽजस्रन्निर्बाधगतिर्वहति ।

वेदानामेतेषु प्रसङ्गेषु जगत्सृष्टेर्वर्णनं परमं मनोरमं वर्त्तते । सुस्थूलरूपेण

रूपरेखाऽत्र प्रस्तुताऽस्ति । सृष्टिविधाविषयकं वैदिकं वर्णनं वस्तुतो ऽनवगाह्यमगाधमुदधिमिवाऽस्ति ।

यजुर्वेदस्यैकत्रिंशत्तमो ऽध्यायः पुरुषसूक्तमेवाऽस्ति । तद्यथा—

सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात् स भूमिथ्ः सर्वतस्पृत्वाऽत्यतिष्ठद्दशाङ्गुलम् ।

अर्थात् सहस्रशः शिरांसि सहस्रशो ऽक्षीणि सहस्रशः पादाश्चात्र दृश्यादृश्ये चराचरात्मके जगति सन्ति, तानि सर्वाण्यपि विभुत्वात् सर्वेषां नियन्तृत्वाच्च परमपुरुषस्य परमात्मन एव सन्तीति । स परमात्मा भुवं व्याप्याप्यवशिष्ट एव भवत्यर्थात् परमात्मा न केवलं भुवं व्याप्नोत्यपि तु सर्वमपि लोकजातं व्याप्नोति व्याप्यत्वाच्च लोकजातमपि न्यूनम्भवति व्यापकत्वाच्च परमपुरुषः महान् भवतीति ।

पुरुष एवेदंः सर्वं यद्भूतं यच्च भाव्यम् । उताऽमृतत्वस्येशानो यदन्नेनातिरोहति ।

अर्थात् पुरो दृश्यमानं वर्तमानं भूतकालिकं भविष्यत्कालिकं वा यत् किञ्चिदपि वर्त्तते तत्सर्वं पुरुष एव । अन्नादेन जीवात्मना ऽमृतत्वस्य स्वामी परमपुरुषः सर्वथा विशिष्टतमोऽस्ति ।

एवमेव षोडशष्वपि मन्त्रेषु भगवतः परमपुरुषस्य परमात्मनः स्तवनं वर्त्तते । अस्मिन् परमपुरुषकारणतावादिसाङ्ख्यस्य मूलतत्त्वानि सन्तीति सुस्पष्टम् ।

संहिताः, ब्राह्मणाः, आरण्यकानि, उपनिषदश्चेति सर्वमपि साहित्यमेतत् सुविज्ञैर्विद्वद्भिः समैश्चापि श्रुतित्वेन सर्वथा स्वीक्रियतेतरामिति श्रुतित्वेन स्वीकृतासूपनिषत्सु चाऽपि यत्साङ्ख्यमुपलभ्यते तदपि स्थालिपुलाकन्यायेन सुसङ्क्षिप्तरूपेणाऽध्यायेऽस्मिन्नेव प्रस्तूयते । यद्यपीहोपनिषत्साहित्यमपि सुविपुलमस्ति, परमत्र प्राधान्येन तु श्रीमद्भागवतीयं साङ्ख्यमेव प्रतिपिपित्सितमासीत् तच्च सम्यक्तया प्रतिपादितमेव केवलन्दर्शनस्याऽस्याऽऽस्तिकदर्शनत्वसिषाधयिषया गवेषकाणाङ्कृते दिग्दर्शनार्थञ्च वेदेषु साङ्ख्यमिति प्रकरणम्प्रस्तूयते ऽतएवाऽत्र सुप्रसिद्धास्वपि काश्चनोपनिषद एवाधिकृत्य लिख्यते ।

—०—

श्रीमद्भागवतीयं साङ्ख्यम्

(च)

मैत्र्युपनिषदि साङ्ख्यम्

उपनिषदो ऽस्याः षष्ठे प्रपाठके दशम्याङ्कण्डिकायां भोक्तृभोग्ययोः वर्णनङ्कृतमस्ति । तद्यथा—

पुरुषश्चेता प्रधानान्तःस्थः स एव भोक्ता "प्राकृतमन्नं भुङ्क्त इति"…… तस्मात् त्रिगुणं भोज्यं भोक्ता पुरुषो अन्तःस्थः ।

प्रधानसम्पर्कमधिगतश्चेता पुरुषो भोक्ता वर्त्तते प्रकृतिं तद्विकारांश्च भुङ्क्ते इत्थमेषा प्रकृतिर्भोग्या भवति, पुरुषश्च भोक्तेति साङ्ख्यसम्मतो ऽयं सिद्धान्त इति स्पष्टमेव प्रतीयते ।

ग्रन्थस्याऽस्य प्रकरणाऽन्तरे प्रकृतेर्वैदिकन्नाम अदितिरिति समभिहितम् । तत्र प्रकृतेर्भोग्यत्वं भोगसाधनत्वञ्चाऽन्तर्निहितमस्ति । अद्यत इति अदितिः भक्षणार्थकाद् अद् धातोः शब्दस्यास्य निर्वचने प्रकृतेर्भोग्यता स्पष्टीभवति । कस्यचिदपि वस्तुनो नैकविधनाम्नां प्रवृत्तेर्निमित्तानि पृथक्-पृथग् भवन्ति । जगतां मूलकारणत्वात् प्रकृतेः प्रलयकाले सर्वञ्जगत् तस्यॉल्लीयते, तस्मात् प्रधानमिति, जीवचेतनेनेयमद्यते तस्मादियमदितिरितिसमभिधीयते ।

कथनस्यास्यास्त्याशयोऽयं यदियं प्रकृतिः भोग्या पुरुषश्च जीवचेतनो भोक्तेति प्रतिपादितम् । तच्चाऽस्ति सर्वथा साङ्ख्यसिद्धान्तानुगमिति वक्तुं शक्यते । यदत्र साङ्ख्यमस्तीति ।

एवमेव साङ्ख्यसिद्धान्तप्रतिपादकानि, कथनस्यास्य पोषकाणि च वचनानि स्थाने स्थाने तत्र समुपलभ्यन्ते । येषु सन्ति कानिचिदत्थम्—

१. तस्माद्भोक्ता पुरुषो भोग्याप्रकृतिस्तत्स्थो भोक्ता । प्राकृतमन्नं त्रिगुणभेदपरिणामत्वान्महदाद्यं विशेषान्तँल्लिङ्गम् ।

२. एवं व्यक्तमन्नमव्ययक्तमन्नमस्य निर्गुणो भोक्ता भोक्तृत्वाच्चैतन्यं प्रसिद्धन्तस्य ।

३. "एवं प्रधानस्य व्यक्तताङ्गतस्योपलब्धिर्भवति, तत्र बुद्ध्यादीनि खादीनि च भवन्ति ।

४. साङ्ख्यप्रक्रियामनुसृत्य त्रयोदशकरणानि पञ्चतन्मात्राणि चेति सूक्ष्म शरीरमुच्यते । सर्गादौ चास्य सम्बन्धो पुरुषेण सह भवति तथा स च प्रलयं यावत्तथा विवेकज्ञानं यावत्तिष्ठति । तथा चेह गुणानां साम्याऽवस्था, प्रकृतिरित्युच्यते, तेषाङ् गुणनां विषमावस्था सृष्टिशब्देन व्यपदिश्यते ।

मैत्र्युपनिषदः पञ्चमे प्रपाठके प्रथमायाङ्कण्डिकायां वाक्यमस्ति "अऽयो ह खलु वावास्य तामशोंऽशो असौ स ब्रह्मचारिणः । यो अयं रूद्रः अथ यो ह खलु वावास्य सात्त्विको अंशो असौ स ब्रह्मचारिणो योऽयं विष्णुः" इत्यत्र विष्णु-ब्रह्म-रूद्राणां सत्त्वरजस्तमोभिः ताद्रूप्यं प्रतिपादिमस्ति। सत्त्वरजस्तमसाङ् कार्याण्येव विष्णुब्रह्मरूद्राणाङ् कार्याणि शास्त्रेषु प्रतिपादितानि सन्तीति साङ्ख्यविचारपरम्परापरिचितानाङ् कृते नास्ति दिग्दर्शनमपि कर्तुमावश्यकम् । वस्तुतस्तु यथा साङ्ख्यप्रक्रियायां सत्त्वेरजस्तमसां प्राधान्येन स्थिति-सृष्टि-लयाः कार्याणीति प्रतिपादितमस्ति तथैवोपनिषत्सु चाऽपि विष्णु-ब्रह्म-रूद्राणां प्राधान्येन स्थिति-सृष्टि-लयाः प्रतिपाद्यन्त एवेति नास्ति कोऽपि भेदः ।

(छ)

मण्डलब्राह्मणोपनिषदि साङ्ख्यम्

मण्डलब्राह्मणोपनिषदि जीवः पञ्चविंशकः स्वकल्पितचतुर्विंशतित्वं परित्यज्य षर्डविंशः परमात्माहमिति निश्चयाज्जीवनमुक्तो भवति इति पाठः समुपलभ्यते, तेन वक्तुं शक्यते, यदत्र साङ्ख्ययोगसम्मतिः सम्यक्तया प्रतिपादिता वर्त्तत इति । तद् यथा अत्र जीवशब्देन पुरुषो गृह्यते । तस्य साक्षित्वस्य परमावश्यकत्वात्कर्तृत्वारोपोऽत्र दृश्यते । प्रकृतिः, प्रकृतेर्विकाराश्च पुरुषस्य भोग्यत्त्वेनोपतिष्ठन्तीति सविकारायाः प्रकृतेर्वर्णनमस्ति । तथा क्लेशकर्मविपाकाशयैरपरामृष्टः पुरुषविशेष ईश्वरः इति योगसूत्रप्रतिपादितषड्विंशतितमस्य परमात्मनो ऽत्र तत्त्वज्ञानदशायां जीवन मुक्तित्वं प्रदिपादितमिति स्पष्टीभवति, यदत्र मण्डलब्राह्मणोपनिषद्यपि साङ्ख्यमस्तीति सुनिश्चितम् ।

(ज)

श्वेताश्वतरोपनिषदि साङ्ख्यम्

बहूनां विदुषां मतमस्ति यदियं द्वैततत्त्वप्रतिपादिकोपनिषद् वर्त्तत इति। द्वैतमतप्रतिपादनाच्चास्याः साङ्ख्येन सह भूयान् सम्बन्धो ऽप्यस्तीति। कपिलविषये श्वेताश्वतरोपनिषदि लिखितमस्ति—

ऋषिं प्रसूतं कपिलं यस्तमग्रे,
ज्ञानैर्बिभर्ति जायमानंच पश्येत।

न केवलङ् कपिलस्य प्रशंसैव कृता, अपि तु कापिलानां सिद्धान्तानामपि प्रतिपादनङ् कृतम्। मूलभूतयोश्चेतनाऽचेतनयोस्तत्त्वयोः सर्वथा पृथग्रूपेणोपनिषद्यस्यां वर्णनं समुपलभ्यते। प्रथमाऽध्याये कण्डिकायाम्—

ज्ञाऽज्ञौ द्वावजावीशानीशावदाह्यावेकौ भोक्तृभोगार्थयुक्तौ। अनन्तश्चात्मा विश्वरूपो ह्यकर्ता त्रयं सदा विन्दते ब्रह्ममेतदिति सर्वज्ञो ऽनादिः परमात्मा ऽल्पज्ञो भोक्ता जीवः, आद्यन्तरहिता भोग्या प्रकृतिश्चेति तत्त्वानां सुस्पष्टं निरूपणमस्तीति परमात्मजीवात्मनोः चेतनत्वेन, प्रकृतेरचेतनत्वेन च वर्णनं साङ्ख्यसम्मतमेवाऽस्ति तत्र प्रतिपादितम्।

इत्थमेव द्वादशे मन्त्रे "ह्येतज्ज्ञेयं नित्यमेवाऽऽत्मसंस्थन्नातः परं वेदितव्यं हि किञ्चित्। भोक्तारं भोग्यं प्रेरितारञ्च मत्वा सर्वं प्रोक्तं त्रिविधं ब्रह्मं तत्" इत्यत्र भोक्तृत्वेन च परमपुरुषस्य परमात्मनः निरूपणमस्ति।

चतुर्थाऽध्याये—

य एको वर्णो बहुधा शक्तियोगाद्,
वर्णाननेकान् निहिताऽर्थो दाधति।
निचेति चान्ते विश्वमादौ स देवः।
स नो बुद्ध्या शुभया संयुनक्तु॥

तथा तदेवाऽग्निस्तदादित्यस्तद्वायुस्तदु चन्द्रमाः तदेव शुक्रं तद्ब्रह्म तदापस्तत् प्रजापतिः।

इत्येतयोः मन्त्रयोः परब्रह्मणः परमपुरुषस्य परमात्मनो वर्णनमस्ति तथैव

त्वं स्त्री त्वं पुमानसि, कुमार त्वं उत वा कुमारी ।
त्वं जीर्णो दण्डेन वञ्चसि, त्वं जातो भवसि विश्वतोमुखः ।
नीलः पतङ्गो हरितो लोहिताक्षस्तडिद्गर्भ ऋतवः समुद्राः ।
अनादिस्त्वं वित्वेन वर्त्तसे, यतो जातानि भुवनानि विश्वा ।
इत्येतयोः मन्त्रयोः जीवात्मनः वर्णनमस्ति ।

तथा च—

अजामेकां लोहितशुक्लकृष्णां,
बह्वीः प्रजाः सृजमानां सरूपाः
अजो ह्येको जुषमाणो ऽनुशेते
जहत्येनां भुक्तनांगामजोऽन्यः ॥

इत्यत्र प्रकृतेश्च निरूपणं वर्त्तते, अनेन सिध्यति, यदत्र श्वेतरोपनिषदश्चतुर्थे ऽध्याये चाऽपि साङ्ख्यदर्शनमस्तीति—

पञ्चमाऽध्यायस्य प्रथमषण्मन्त्रेषु परमात्मनो वर्णनमस्ति । तत्र परमात्मनः सर्वाऽधिष्ठातृत्वं प्रतिपादितम् । तदनन्तरं जीवात्मनः प्रकृतेश्चापि निरूपणमस्ति षष्ठाऽध्याये तूपसंहरणवेलायां प्रतिपादितम्—

नित्यो नित्यानां चेतनश्चेतनाना—
मेको बहूनां विदधाति कामान् ।
तत्कारणं साङ्ख्ययोगाऽधिगम्यं,
ज्ञात्वा देवं मुच्यते सर्वपाशैः ॥

एवं नामग्रहणपुरःसरमपि साङ्ख्यस्य महिमानं प्रतिष्ठापितमेव—

तमेकनेमि त्रिवृतं षोडशान्तं,
शतार्धारं विंशतिप्रत्यराभिः ।
अष्टकैः षड्भिर्विश्वरूपैकपाशं,
त्रिमार्गभेदं द्विनिमित्तैकमोहम् ॥
पञ्चस्रोतोऽम्बुं पञ्चयोन्युग्रवक्रां,
पञ्चप्राणोर्मि पञ्चबुद्ध्यादिमूलाम् ।
पञ्चावर्त्तां पञ्चदुःखौघवेगां
पञ्चाशद्भेदां पञ्चपर्वामधीमः ॥

इत्येतयोः मन्त्रयोश्चापि रूपकेण सर्वतत्त्वजातन्निरूपितमस्ति। इत्यतो वक्तुं शक्यते, यदस्यां श्वेताश्वतरोपनिषदि चाऽपि बहुत्र साङ्ख्यदर्शनं विराजत एव तथा श्वेताश्वतरोपनिषत् स्वयं साङ्ख्यसम्मतोपनिषद् वर्त्तत एवेति निश्चप्रचम्।

(झ)

कठोपनिषदि साङ्ख्यम्

उपनिषद्यस्यां साङ्ख्यप्रक्रियामनुसृत्य कृतन्तत्त्वनिर्देशनं समुपलभ्यते। रथरथिनोः रूपकं सङ्कल्प्याऽऽत्मनः, स्थूलशरीरस्य, बुद्धेः, मनसः, इन्द्रियाणां, इन्द्रियविषयाणाञ्च स्पष्टमेवाऽस्ति निरूपणम्। तच्च प्रथमाऽध्यायस्य तृतीयायां वल्ल्यां तृतीयचतुर्थयोः मन्त्रयोरित्थमस्ति, यत्—

आत्मानं रथिनं विद्धि शरीरं रथमेव तु।
बुद्धिं तु सारथिं विद्धि मनः प्रग्रहमेव च॥
इन्द्रियाणि हयानाहुर्विषयांस्तेषु गोचरान्।
आत्मेन्द्रियमनोयुक्तं भोक्तेत्याहुर्मनीषिणः।इति॥

इत्थमेव प्रथमाऽध्यायस्य तृतीयायामेव वल्ल्यां दशमैकादशयोः मन्त्रयोश्चाऽपीन्द्रियाणां, सूक्ष्मभूतानाभर्थात् तन्मात्राणां, मनसो ऽहङ्कारस्य महत्तत्वस्यप्रकृतेः पुरुषस्य च वर्णनमस्ति।

तच्चेत्थं वर्त्तते यत्—

इन्द्रियेभ्यः परा ह्यर्था अर्थेभ्यश्च परं मनः।
मनसस्तु परा बुद्धिर्बुद्धेरात्मा महान् परः॥
महतः परमव्यक्तमव्यक्तात् पुरुषः परः।
पुरुषान्न परं किञ्चित्सा काष्ठा सा परा गतिः। इति॥

उननिषद्यस्यां तत्त्वानां वर्णनक्रमः, एतेषाङ् कार्यकारणभावः, आविर्भूतेः पौर्वापर्यास्थितिश्च निर्दिष्टाऽस्ति यस्याः वर्णनं साङ्ख्यस्य प्रतिपाद्यमस्ति।

द्वितीयाऽध्यायस्य तृतीयायां वल्ल्यां सप्तमाष्टमयोः मन्त्रयोरपि इन्द्रियमनोऽहङ्कारमहदव्यक्त-पुरुषाणां वर्णनमस्ति । तदपि साङ्ख्यप्रतिपादित क्रमानुगमेवाऽस्ति । तद् यथा—

इन्द्रियेभ्यः परं मनो मनसः सत्त्वमुत्तमम् ।
सत्वादधि महानात्मा महतोऽव्यक्तमुत्तमम् ।।
अव्यक्तात्तु परः पुरुषो व्यापको ऽलिङ्ग एव च ।
यं ज्ञात्वा मुच्यते जन्तुरमृतत्त्वञ्च गच्छति ।।

उपर्युक्तैः प्रमाणैः सुस्पष्टमुद्घोष्टुं शक्यते, यदत्र कठोपनिषद्यपि साङ्ख्यदर्शनमस्त्येवेति वक्तुं सुशकमिति ।

(ञ)

मुण्डकोपनिषदि साङ्ख्यम्

मुण्पकोपनिषदि आत्मनो परमात्मनः प्रकृतेश्च पृथक्पृथङ् निरूपणमस्ति । पुरुषत्वेन जीवात्मपरमात्मानौ गृह्येते, तथा प्रकृतित्वेन प्रतिपादितमचेतनजातङ् गृह्यते । आलङ्कारिकप्रणाल्या विषयस्याऽस्य निरूपणङ् कृतमस्ति । तद्यथा—

द्वा सुपर्णा सयुजा सखाया,
समानं वृक्षं परिषस्वजाते ।
तयोरन्यः पिप्पलं स्वाद्वत्त्य,—
नश्नन्नन्यो अभिचाकशीति

इत्यत्र जीवात्मपरमात्मनौ पक्षिणौ स्तः, प्रकृतिः प्राकृतं शरीरञ्च वृक्षमस्ति । इत्थमत्र रूपकेण प्रकृतिपुरुषौ वर्णितौ स्तः । (पुरुषत्वेनाऽत्र जीवात्मपरमात्मनौ ग्राह्यौ)

तद्यथा—यथोर्णनाभिः सृजते गृह्णते च,
यथा पृथिव्यामोषधयः संभवन्ति ।

यथा सतः पुरुषात् केशलोमानि,
तथाऽक्षरात् संभवतीह विश्वम् ।।

यथा जालकसृष्टिसंहरणयोः ऊर्णनाभेः, औषधीनामुत्पत्त्यर्थं पृथिव्याः केशानामुत्पत्तौ च पुरुषस्याऽऽवश्यकत्त्वेन सम्बन्धो भवति । तथैव जगदुत्पत्तौ चाप्यक्षर ब्रह्मणः पुरुषस्य सम्बन्धः समपेक्ष्यत एव ।

अर्थात् यथा पृथिवी स्वयं नैव गृह्णाति ओषधिरूपम्, ऊर्णनाभिः स्वयं नैव गृह्णाति जालकस्वरूपम् पुरुषश्चेतनतत्वं स्वयन्नैव गृह्णाति केशस्वरूपमपि तु पृथिवी-मान्निध्येन यथा बीजादोषधिः, ऊर्णनाभिसान्निध्येन तस्य शरीराज्जालकम्, तथैव चेतन-स्य सान्निध्येन शरीराज्जायन्ते केशास्तथैवाऽक्षरब्रह्मणः सान्निध्येन प्रकृतेः जायते समग्रा चाऽपीयं सृष्टिरिति । साङ्ख्येऽपि च पुरुषसान्निध्यादेव प्रकृतेः सृष्टिर्भवतीति प्रतिपा-दितमेवाऽस्तीति वक्तुं शक्यते, यदत्र मुण्डकोपनिषद्यपि साङ्ख्यमस्तीति ।

(ट)

छान्दोग्योपनिषदि साङ्ख्यम्

छान्दोग्योपनिषदः षष्ठे प्रपाठके प्रारम्भ एव तेजसामपामन्नस्य च निरूपण-मस्ति । तेजोऽबन्नानि चेह यथाक्रमं रजस्सत्वतमसां प्रतीकानि सन्ति । प्रकरणे ऽमुष्मिन् स्पष्टीकृतमस्ति यद्रजः सत्त्वतमसां सङ्घातमेव नैकधा परिणमतीति ।

छान्दोग्योपनिषदः षष्ठेऽध्याये तृतीये प्रपाठके तृतीयचतुर्थयोः मन्त्रयोः प्रतिपादितमस्ति यत्-सर्गस्याऽऽदिवेलायां सत्त्वाऽऽदयो गुणाः प्रत्येकं त्रिवृत्ताः भवन्ति अर्थादन्यो ऽन्यमिथुनवृत्तितः संयुक्ताः भवन्ति । परस्परं संयुज्यैव च जगत्सृजन्ति, अर्थात् नैकधा रूपाणि धारयन्ति गुणानामन्योऽन्यमिथुनवृत्तितामेव त्रिवृत् शब्देनोपनिषदि प्रतिपादयामासुः ।

तदित्थम्—

षष्ठे ऽध्याये सप्तमे प्रपाठके स्पष्टीकृतमस्ति यत्—यदग्ने रोहितं

रूपञ्च तेजसस्तद् रूपञ्च यच्छुक्लं तदपां यत्कृष्णं तदन्नस्यापामग्नेरग्नि र्वाचारम्भणं विकारो नामधेयं त्रीणि रूपाणीत्येव सत्यम् (इति)

तथा च षष्ठाध्यायस्यैव चतुर्थप्रपाठके सप्तम्यां कण्डिकायां स्पष्टीकृतमस्ति यदेतज्जगदखिलं केवलं त्रयाणामेव विकारजातं वर्त्तते। देवतारूपकेण वर्णनमवलोक्यताम्। तत्रास्ति लिखितं यत्—यद्विज्ञातमिवाभूदित्येतासामेव देवतानां समास इति—इमास्तिस्रो देवताः पुरुषं प्राप्य त्रिवृत्त्रिवृदेकैका भवति। इति प्रतिपादनादिह स्पष्टीभवति। यत्त्रयाणामपि साम्याऽवस्थामापन्नानां गुणानां समवायरूपेण स्थितिः प्रकृतिशब्देन प्रोच्यते। तदनन्तरं पुरुषेण सह संयोगे जाते सति पुरुषसान्निध्यतः गुणेषु क्षोभः सञ्जायतेऽर्थादन्योऽन्यम्मिथुनीभूयः नैकरूपतासासाद्य जगदिति नाम धारयन्ति।

एषैवाऽस्ति सर्वथा साङ्ख्यदर्शनसम्मता सृष्टिप्रक्रिया सैवाऽत्र प्रतिपादितेति वक्तुं शक्यते यदत्र छान्दोग्योपनिषद्यपि साङ्ख्यमस्तीति।

(ठ)

बृहदारण्यकोपनिषदि साङ्ख्यम्

बृहदारण्यकोपनिषदो द्वितीयाऽध्यायस्य चतुर्थब्राह्मणस्यैकादश्याङ्कण्डिकायान्द्वादशकरणानान्तेषां विषयाणाञ्च वर्णनमस्ति। इत्थमत्र यद्यपि करणानां साङ्ख्यशास्त्रे त्रयोदशत्वेन प्रसिद्धिरस्ति किन्तु वार्षगण्यपतञ्जलिनोः मतमनुसृत्याऽहङ्कारबुद्ध्योरेकत्वमुररीकृत्य द्वादशसङ्ख्याऽपि साङ्ख्यसम्मतैवेति बोध्यम्।

अस्मिन् ब्राह्मणे ह्यात्मनः परमात्मनश्च पृथक्पृथङ् निरूपणङ्कृतमस्ति। तत्राऽन्तिमं वाक्यमेतेभ्यो भूतेभ्यः समुत्थाय तान्येवानुविनश्यतीति विचारणीयम्भवति। वाक्यस्याऽर्थः स्पष्टतो प्रकटीभवति यत्—सर्वेभ्योऽपि भूतेभ्यः पृथक् सन्नपि परमात्मा एतेषु भूतेष्वन्तर्निगूढोऽस्ति। यतः सोऽस्त्यन्तर्यामी सर्वनियन्ता च। इत्थमत्र नियन्तृनियम्ययोः भित्प्रकटीभवति।

अग्रेऽपि लिखितमस्ति यत् "न प्रेत्य संज्ञाऽस्ति" अर्थात् यदा जीवात्मा आत्मज्ञानमधिगत्य समधिष्ठितं शरीरं त्यजति तदा किमपि ज्ञातव्यं नाऽवशिष्यते । चैतन्यस्वरूपसाम्यादेवास्यज्ञाने जाते सति तत्साजात्यत्वात् परमात्मनो ज्ञानमपि सुलभमेव भवतीति निश्चप्रचम् ।

इत्थं प्रकरणे ऽमुष्मिन् जिज्ञासुन आत्मनः, नियन्तुः परमात्मनः, नियम्यायाः प्रकृतेश्च पृथक्पृथङ्निरूपणङ्कृतमस्तीति वक्तुं शक्यते यदत्र साङ्ख्यसम्मतं तत्त्वजातमेवाऽस्ति मूलरूपेण वर्णितम् । तद्यथा पुरुषो जीवात्मा, परमपुरुषः परमात्मा नियम्या च प्रकृतिरिति । सुस्पष्टीभवति यदत्राऽस्ति साङ्ख्यमिति ।

इत्थमेव तृतीयाध्यायस्य सप्तमे ब्राह्मणे आरुणियाज्ञवल्क्ययोः संवादे च साङ्ख्यसम्मतमस्ति वर्णनम् ।

इत्थं बृहदारण्यकोपनिषदः नैकेषु प्रसङ्गेषु चेतनाऽचेतनयोः सत्ता पृथक् पृथक् स्वतन्त्ररूपेण प्रतिपादिताऽस्ति । भोक्तुर्जीवाऽऽत्मनः जगन्नियन्तुः परमात्मनश्चास्तित्वं पृथक्पृथक् स्वीक्रियते । प्रकृतिश्चाऽचेतनत्वेन प्रतिपादिता वर्त्तत एवेति । मान्यतैषा साङ्ख्यसिद्धान्तानुगा वर्तत एव । तस्माद् वक्तुं शक्यते यदत्र बृहदारण्यकोपनिषद्यपि स्थाने स्थाने साङ्ख्यसिद्धान्तानुगवर्णनेन प्रतिभाति यदत्र ग्रन्थे चाऽपि साङ्ख्यदर्शनं वर्त्तत एवेति शम् ।

—·०—

महाभारते प्रतिपादितं साङ्ख्यम्

महाभारतस्य बहुषु प्रकरणेषु स्थाने स्थाने प्रसङ्गमनुसृत्य वर्णनङ् कृतमस्ति । शान्तिपर्वणि नैकेषां प्राचीनाचार्याणां मतान्युल्लिखितानि वर्त्तन्ते । तेषामननाऽऽधायकेषु संवादेषु यानि दार्शनिकानि तत्त्वानि सुविचार्यं प्रकटीकृतानि तैः स्पष्टीभवति यत् तानि साङ्ख्यग्रन्थान् साङ्ख्यपरम्पराश्च समाश्रित्य वर्णितानि सन्तीति ।

संवादेषु तेषु कपिलाऽऽसुर्योः संवादःप्रथिततमोऽस्ति । तस्मिन् प्रतिपादिताः सिद्धान्ताः सङ्क्षिप्येत्थं वर्णयितुं शक्यन्ते यत् —

१. सत्त्वरजस्तमांस्येव प्रकृतिरस्ति ।

२. प्रधानान्महदुत्पद्यते ।

३. महतो ऽहङ्हंकारः समुद्भवति ।

४. अहङ्कारादेकादशेन्द्रियाणि पञ्चमहाभूतानि च जायन्ते ।

५. प्रकृतिराद्यापदेन व्यवह्रियते ।

६. बुद्ध्यादीनि त्रयो विंशतितत्त्वानि मध्यमशब्देन व्यपदिश्यन्ते ।

७. एतेषाञ्चतुर्विंशतितत्त्वानां ज्ञानेन प्रकृतौ स्थितिः समभिधीयते ।

८. पञ्चविंशतितमम्पुरुषतत्त्वन्निर्दिष्टमस्ति ।

९. प्रकृतिपुरुषयोरर्थात् पञ्चविंशतितत्त्वानां सम्यग्ज्ञानेनाऽपवर्गो भवतीति प्रतिपादितमस्ति । अयमेवास्ति सर्वत्र साङ्ख्यशब्देन प्रथितस्य दर्शनस्याऽपि सृष्टिप्रक्रिया प्रक्रमः । इति स्पष्टीभवति यदत्र साङ्ख्यमस्तीति ।

महाभारते नैकत्र पञ्चशिखाचार्यस्याप्युल्लेखोऽस्ति । शान्तिपर्वणि विंशत्युत्तर-द्विशततमे ऽध्यायेह्यासुरेः शिष्यत्वेन पञ्चशिखाचार्यस्य वर्णननमस्ति । शान्तिपर्वण्येव विशंत्युत्तरद्विशततमादध्यायादारभ्य द्वाविंशत्युत्तरद्विशतमायध्यायं यावत् पञ्चशिखा-

चार्यं जनकयोः संवादस्य वर्णनमस्ति तत्र ये सन्ति प्रतिपादिताः साङ्ख्यसिद्धान्तास्ते प्रकारेणानेन प्रकटीकर्तुं शक्यन्ते यत्—

१. सत्त्वरजस्तमांसीति गुणाः सन्ति ।
२. प्रत्येकस्मिन् वस्तुनि त्रयाणामप्येतेषाङ्गुणानां स्थितिरवलोक्यते ।
३. सत्त्वस्य प्रीतिप्रहर्षा ऽऽनन्दाऽऽख्याः धर्माः सन्ति ।
४. रजसोऽप्रीत्यतुष्टि-परितापशोकलोभक्षमाऽऽख्याः धर्माः सन्ति ।
५. तमसो विषादाऽविवेकमोहप्रमादस्वप्नतन्द्राऽऽख्याः धर्मा' सन्ति ।
६. बुद्धिरहङ्कार एकादशेन्द्रियाणीति त्रयोदशसङ्ख्याकानि करणानि सन्ति ।
७. मनसः सम्बन्धः कर्मेन्द्रियैः ज्ञानेन्द्रियैः सह भवति ।
८. पञ्चभूतानि सन्ति ।
९. शरीरस्योत्पत्तिः पञ्चभूतैर्भवति ।
१०. ज्ञानान्मुक्तिर्भवतीति ।
स्पष्टीकृतम्मतमेतदपि साङ्ख्यमेवेति ज्ञेयम् ।

महाभारतस्य शान्तिपर्वण्यष्टोत्तरत्रिशततमादध्यायादारभ्य चतुर्दशोत्तरत्रिशततमध्यायं यावद् वशिष्ठजनकयोः संवादस्य सुविस्तृतरूपेण वर्णनमस्ति । संवादेऽमुष्मिन् ये सन्ति निरूपिताः सिद्धान्तास्तेषामपि सङ्क्षिप्ततमं वर्णनमित्थङ्कर्तुं शक्यते यत्—

१. प्रकृतिस्त्रिगुणाऽऽत्मिकाऽस्ति ।
२. अव्यक्तायाः प्रकृतेर्महत्तत्त्वमुद्भवति ।
३. महतो ऽहङ्कारो ऽहङ्काराच्च पञ्चभूतानि ।
४. एतारष्टौ प्रकृतयः षोडशसङ्ख्याकाश्च विकाराः सन्ति ।
५. पञ्चमहाभूतान्येकादशेन्द्रियाणीति षोडशविकाराः सन्ति ।
६. प्रकृतेरधिष्ठाता चेतनः पुरुषोऽस्ति ।
७. प्रलयाऽवस्थायां प्रकृतिरेकरूपेणाऽव्यक्ताऽवस्थायान्तिष्ठति ।
८, सर्गकाले तस्याः प्रकृतेर्बहुधा परिणतिर्भवति ।

९. प्रकृति-पुरुषौ पृथक्पृग्रथवर्त्तेते ।
१०. पुरुषोऽयम्प्रकृतिरियमिति यदाभेदञ्जानाति तदा विमुच्यते । अर्थात् विवेकख्यातिम धिगत्य मुक्तो भवतीति ।

इत्थमेव महाभारतस्य शान्तिपर्वणि पञ्चदशोत्तरत्रिशततमादध्यायादारम्य त्रयोशत्युत्तरत्रिशततममध्यायं यावन्नवस्वध्यायेषु याज्ञवल्क्यदेवरातिजनकयोः संवादविवरणमस्ति । तत्र सिद्धान्तिताः सिद्धान्ताः सङ्क्षेपत इत्थं वर्णयितुं शक्यन्ते यत्—

१. अव्यक्त-महदहङ्कार-पञ्चसूक्ष्मभूतानीत्यष्टौ प्रकृतयः सन्ति । एतासु महदाद्याः सप्तप्रकृतयः व्यक्ताः सन्ति ।

२. एकादशेन्द्रियाणि पञ्चमहाभूतानीति षोडश विकाराः सन्ति ।
३. अव्यक्तान्महत उत्पत्तिर्भवति ।
४. महतोऽहङ्कारः समुद्भवति ।
५. अहङ्कारान्मनस्तत्त्वमिन्द्रियाणि भूतानि चोत्पद्यन्ते ।
३. त्रिगुणात्मकञ्जगदेतत् प्रकृतेः परिणामभूतमस्ति ।
७. सत्वरजस्तमसामानन्द-दुःखा-प्रकाशादीनि स्वरूपाणि सन्ति ।
८. प्रकृतिस्त्रिगुणाऽऽत्मिका वर्त्तते ।
९. पुरुषाः नैके सन्ति ।

उपर्युक्तसंवादसारांशत्वेन स्पष्टीभवति यदिमे सिद्धान्ताःसाङ्ख्यसिद्धान्ता एव सन्ति । इत्थमेव नैकत्र महाभारते साङ्ख्यसिद्धान्ताः समुपवर्णिताः सन्तीति वक्तुं शक्यते यन्महाभारते साङ्ख्यमस्ति ।

तथा च ये केचन दुराग्रहिणः साङ्ख्य न्निरीश्वरमिति मन्वते, तैः महाभारतस्य शान्तिपर्वणि षडुत्तरत्रिशततमे ऽध्याये विश्वावसुयाज्ञवल्क्ययोः संवादः समवलोकनीयस्तत्र याज्ञवल्क्येन महात्मना सुस्पष्टं समुपदिष्टं यत्साङ्ख्येऽपिषड्विंशतितमत्त्वं परमात्मसञ्ज्ञकं वर्त्तत एवेति । तद् यथा—

यदा तु मन्येत अन्योऽनन्य एष इति द्विजः,
तदा स केवलीभूतः षड्विंशमनुपश्यति ।।

तथा च—अन्यश्च राजन्नवरस्तथान्यः पञ्चविंशकः ।

तत्स्थत्वादनुपश्यन्ति एक एवेति साधवः
जन्ममृत्युभयाद्भीता योगाः साङ्ख्याश्च काश्यय ।
षड्विंशमनुपश्यन्ति शुचयस्तत्परायणाः ।

उपर्युक्तैः श्लोकैः महाभारते सुसाधितं यत्साङ्ख्ये षड्विंशतितमन्तत्त्वमपि वर्त्तते । तच्चाऽस्ति परमेश्वराऽऽख्यमेवेति साङ्ऽऽख्यमस्ति सेश्वरम् ।

—०—

पुराणान्तरेषु प्रतिपादितं साङ्ख्यम्

सर्वेष्वपि पुराणेषु सृष्टि-प्रक्रियायाः वर्णनमस्ति । जगतां सर्गसम्बन्धे पुराणानां प्रवृत्तिः स्पष्टीकरोति यत् पुराणेषु विषयेऽमुष्मिन् साङ्ख्यदर्शनस्य प्रभावातिशयोऽस्ति । त्रिगुणाऽऽत्मिका प्रकृतिः प्रकृतेर्महादादीनां कार्याणामुत्पत्तिस्तेषाङ् क्रमश्चाऽपि साङ्ख्यानुगो वर्त्तते । प्रकृति-पुरुषयोः जडत्वचेतनत्वकृतं पार्थक्यं पुराणेषु स्पष्टतया प्रतिपादितमस्ति । पुरुषः (चेतनतत्त्वम्) द्वयो स्वरूपयोः वर्णितोऽस्ति । अर्थात् भोक्तृत्वेन सर्वजगतामधिष्ठातृत्वेन च पुरुषः द्वैविध्यम्भजते । इत्थमेव केषाञ्चित् पुराणानाङ् कानिचित्स्थलानि निदर्शत्वेनाऽत्रोपस्थाप्यन्ते । तदित्थम्

(ङ)

विष्णुपुराणे साङ्ख्यम्

विष्णुपुराणे १, २, १९, २३, श्लोकेषु प्रकृतिपुरुषयोर्वर्णनमस्ति । प्रकृतिस्वरूपं तत्र प्रतिपादितमस्ति । यत्—

अव्यक्तं कारणं यत्तत् प्रधानमृषिसत्तमैः ।
प्रोच्यते प्रकृतिः सूक्ष्मा नित्यं सदसदात्मकम् ।
शब्दस्पर्शविहीनं तद् रूपादिभिरसंहतम् । त्रिगुणं तज्जगद्योनिः

ऋषिप्रवराः प्रधानाऽऽख्यं यदव्यक्तं प्रतिपादयामासुः, सैवाऽस्ति सूक्ष्मा प्रकृतिः साऽत्र नित्यासदसद्रूपा च विराजते । अर्थात् त्रिगुणाऽऽत्मकतया कारणरूपत्वेन च सर्वदा स्थितिमत्वमस्ति प्रकृतेः सद्रूपत्वम् । कार्यरूपेण च सर्वदा स्थायित्वेनाऽनवस्थानमेव चाऽस्त्यसद्रूपत्वम् । श्रीधरस्वामिभिः कार्यकारणशक्तियुक्तमिति विष्णुपुराण-टीकायां व्याख्यातम् । प्रकृतिशब्दः स्पर्शादिभ्यो व्यक्तरूपेभ्यः पृथगस्ति । साम्याऽवस्था

प्रकृतिरिति सूचितमेवाऽस्ति। अर्थाद् व्यक्तावस्थायां यथा शब्दस्पर्शादयाः प्रकृतौ भासन्ते तथा साम्याऽवस्थायां कथञ्चिदपि भासयितुं न शक्यन्ते। प्राकृतावस्थायान्तु तस्याः वस्तुस्वरूपं त्रिगुणात्मकमेव भासते। तदेव भवति जगतामुपादानकरणम्। अत्र जगतामुपादानकारणत्वेन नास्ति चेतनत्वङ् गृहीतम्। त्रयोविंशतितमे श्लोके सृष्टेः प्राक् प्रलयावस्थायाः वर्णनमस्ति यत्—

नाहो न रात्रिर्न नभो न भूमि—
र्नासीत् तमो ज्योतिरभून्न चान्यत्
श्रोत्रादिबुद्ध्याऽनुपलभ्यमेवं
प्राधानिकं ब्रह्म पुमांस्तदाऽऽसीत् ।।

वर्णनमेतन्नासदीयेत्याख्यस्य ऋग्वेदसूक्तस्य वर्णनमिव वर्त्तते। प्रलयावस्थायां अहोरात्रादिकङ् किमपि नासीत्। अर्थाछ्रोत्रादिभिरिन्द्रियैरनुपलभ्यमानं प्रधानपुरुषाख्यं तत्त्वद्वयमेवाऽऽसीत्। तत्रापि पुरुषतत्त्वस्याऽवस्थाद्वयं जीवात्मपरमात्मसंज्ञकम् तथा प्रकृतिरिति। प्रकृतेर्कार्यभूतमिदंञ्जगत्तदा कार्यरूपेण नासीत्किन्तु केवलङ्कारणावस्थायामेवासीदित्यवबोध्यम्। यतोऽस्ति साङ्ख्यस्य सत्यकार्यवादिता अतः यन्नासीत्ततु कदापि कथञ्चिदपि भवितुन्नैव शक्नोति न च शक्ष्यतीति कारणभूतायां प्रकृतौ बीजे वृक्षमिव मृत्तिकायां घटमिव काष्ठे कपाटादिकमिवाऽव्यक्तदशायां सर्वमासीत् न तु व्यक्तायान्दशायामिति।

विष्णुपुराणे समग्रस्याऽपि कार्यजगतः मूलभूताप्रकृतिः अनन्ता पऽसङ्ख्येयस्वरूपिणी चाऽस्तीति प्रतिपादितम्। तद् यथा—

महान्तञ्च समावृत्य प्रधानं समवस्थितम्।
अनन्तस्य च तस्यान्तः सङ्ख्यानं चापि विद्यते ।।
तदनन्तमसङ्ख्यात प्रमाणं व्यापि वै यतः।
हेतुभूतमशेषस्य प्रकृतिः सा परा मुने ।।
अण्डानां तु सहस्राणां सहस्राण्ययुतानि च।
ईदृशानाम्तथा तत्र कोटिकोटिशतानि च ।।

जगतां स्थितिकालपरिसमाप्तौ प्रलयवेलायां प्रतिलोमक्रमेण प्रत्येकङ्कार्यं स्वे-स्वे कारणे लीनं भवति। एवमेव क्रमशः महत्तत्त्वमपि सर्वञ्जगदात्मनि लयमानीय स्वयमपि प्रकृतौ लीनं भवति। यथा पृथिव्याः मृत्तिकामानीय कुम्भकारः कपालौ निर्माति तौ च संयोज्य घटसञ्ज्ञान्ददाति वियोज्य च पृथिव्यां पुनःस्त्यजति त्यक्तश्चासौ घटः खण्डशः पृथिव्यां लयमेति तदनन्तरमवशिष्यते केवलं पृथिवी। आदौ केवलं पृथिवी आसीन्मध्ये घटस्य नामरूपे धृतेऽन्ते च पुनः पृथिव्येवावशिष्टा यत्यस्मात्कारणात् घटम्प्रति पृथिव्येवोपादानकारणमिति वक्तुं शक्यते। तथैव सर्वमपि जगत् महत्तत्त्वतः समारभ्य पुरोदृश्यमानं चराचरात्मकमखिलं प्रकृतेरेव समुदेति। प्रकृतावेव च लयमेतीति जगतां मूलोपादानकारणं प्रकृतिरेवाऽस्तीति।

विष्णुपुराणे ऽपि षड्विंशतितमं परमपुरुषतत्त्वं सिद्धान्तितमस्ति। तत्र प्रलयावस्थायामपि त्रीणि तत्त्वानि तिष्ठन्तीति, प्रतिपादितम्। यत्र प्रधानं पुरुषः (जीवात्मा) सर्वान्तर्यामी सर्वेश्वरः परमात्मा चेति त्रयाणामपि तत्त्वानामुल्लेखोऽस्ति। प्रधानपुरुषौ विष्णुस्वरूपिणस्तस्य परमात्मनो वशगौ वर्त्तेते। तद् यथा—

प्रधानञ्च पुमांश्चैव, सर्वभूतात्मभूतया।
विष्णुशक्त्या महाबुद्धे वृत्तौ संश्रयधर्मिणौ॥
तयोः सैव पृथग्भावः कारणं संश्रयस्य च।
क्षोभकारणभूता च, सर्गकाले महामते॥

(वि० पु० २ ७ २९ ३०)

एवं विष्णुपुराणोक्तप्रसङ्गोद्धरणेन सुस्पष्टमभूद् यदस्मिन् पुराणेऽपि साङ्ख्यमस्ति, तदपि च सेश्वरं साङ्ख्यमिति।

(ढ)

कूर्मपुराणे साङ्ख्यम्

कूर्मपुराणस्य पूर्वार्द्धे प्रथमे ऽध्याये सप्तविंशतितमश्लोकतः समारभ्याऽ

ष्टत्रिंशत्तमश्लोकं यावत् समुद्रमन्थनतः प्रादुर्भूतां श्रियं सर्वजगत्प्रसूतिः त्रिगुणाऽऽत्मिका प्रकृतिरिति वर्णयामासुः ।।

पुराणेषु समुद्रमन्थनस्य नैकत्रोल्लेखः समुपलभ्यते । परन्तु कूर्मपुराणस्योपर्युक्तं वर्णनं साङ्ख्यसिद्धान्तविषये परममहत्त्वपूर्णमस्ति । परमात्मनः प्रेरणया प्रकृतेः प्रत्येकं परमांशो यदा क्षुब्धो भवति तामेव स्थितिं समुद्रमन्थननाम्ना व्यपदिशन्ति । प्रकृतिः स्वयम्पाथोधिस्वरूपिणी वर्त्तते । पाथोधिकल्पायाः प्रकृतेः परमाणु यदाधप्रेरणया सुतीव्ररूपेण गतिमान् भवति सैव स्थितिः मन्थनमित्यभिधीयते । पूरुषाणां शुधामुभकर्माण्येव सुरासुराः सन्ति । सांसारिकाः भोगा एव रत्नानि मोक्षाख्यमेवास्ति सुधाफलम् । सर्वजगतामुपादानकारणत्वेन च परमपुरुषो भगवान् विष्णुः प्रतिपादितः । परमेश्वरस्य प्रेरणयैव प्रकृतौ प्रवृत्तिः भवतीति (कूर्मपुराणे ४ १३) इत्यत्र प्रतिपादितं यदत्र चेतनमधिष्ठातारमतिरिच्य ब्रह्माण्डस्योत्पत्तिर्भवितुन्नार्हति । अर्थात् अविनाभावसम्बन्धेन वर्त्तते कारणसाक्षित्वकारणता जगदीश्वर इति । कूर्मपुराणस्य पूर्वार्द्धे चतुर्थाध्याये पञ्चत्रिंशत्तमे श्लोके प्रतिपादितमस्ति । तथा तस्मिन्नेवाऽ ऽध्याये सप्तमश्लोकतः समारभ्यैकादशश्लोकं यावत् परमात्मप्रकृति-पुरुषयोः । पृथक्त्वस्य निरूपणमस्ति ।

प्रपञ्चतोऽयं परमात्मा तमसः प्रकाशमिव सर्वथा पृथग्वर्त्तते । प्रकृति पुरुषावपि छायाया आतपमिव परस्परं भिन्नौ वर्त्तते । कूर्मपुराणस्योत्तरार्द्धे सप्तमे ऽध्याये षड्विंशतितमे श्लोके प्रकृतिः

सत्त्वं रजस्तमश्चेति गुणत्रयमुदाहृतम् ।
साम्याऽवस्थितिमेतेषामव्यक्तां प्रकृतिं विदुः ।।

इत्यनेन प्रकारेण सर्वथा साङ्ख्याऽनुमोदितप्रकारेण प्रतिपादिताऽस्ति ।

इत्थं कूर्मपुराणे चऽअपि स्थाने-स्थाने साङ्ख्यसिद्धान्तानान्निरूपणं समुपलभ्यत एवेति वक्तुं शक्यते यत् कूर्मपुराणे ऽपि साङ्ख्यमस्तीति ।

(ण)

अग्निपुराणे साङ्ख्यम्

अग्निपुराणस्य षट्सप्तत्युत्तरत्रिशततमे ऽध्याये द्वादशत्रयोदशश्लोकयोः सूक्ष्मशरीरस्य वर्णनमस्ति । तद् यथा—

तिष्ठेत स्वात्मनि विज्ञान आनन्दे ब्रह्मणीश्वरे ।
मलिनो ह्यादर्श आत्मज्ञानाय न क्षमः ।।
सर्वाश्रयान्निजे देहे देही विन्दति वेदनाम् ।
योगयुक्तस्तु-सर्वेषां योगान्नाप्नोति वेदनाम् ।।

तद्घटकानां सङ्ख्याऽपि निर्दिष्टा वर्त्तते । सा चेत्थम्

अपञ्चीकृतभूतानि, तत्कार्यंल्लिङ्गमुच्यते ।
संयुक्तं सप्तदशभि—र्हिरण्यगर्भसंज्ञितम् ।।
शरीरमात्मनः सूक्ष्मं लिङ्गमित्यभिधीयते ।।

यतः प्रकृतिर्जडा वर्त्तते, पुरुषश्चास्ति चेतन इति-तद्-यथा—

आत्यन्तिकं लयं वक्ष्ये ज्ञानादात्यन्तिको लयः ।
आध्यात्मिकादिसन्तापं ज्ञात्वा स्वस्य विरागतः ।
आध्यात्किादिसन्तापं ज्ञात्वा स्वस्य विरागतः ।।
आध्याऽऽत्मिकश्च सन्तापः शारीरो मानसो द्विधा ।।

शारीरो बहुभिर्भेदैस्तापो ऽसौ श्रूयतां द्विज

त्यक्त्वा जीवो भोगदेहङ् गर्भमाप्नोति कर्मभिः ।।
आतिवाहिकसञ्ज्ञस्तु देहो भवति वै द्विज ।।

इत्यत्राऽपञ्चीकृ तभूतानीति सूक्ष्मभूतानि साङ्ख्यसम्मतानि तन्मात्राणि गृह्यन्ते । सप्तदशतत्त्वानि च पञ्चतन्मात्राणि, पञ्चज्ञानेन्द्रियाणि पञ्चकर्मेन्द्रियाणि, मनश्चेति षोडशतत्त्वानि तथा बुद्ध्यहङ्कारयोरेकत्वेन ग्रहणङ्क्रियते प्रकारेणानेन सप्तदशतत्त्वानि भवन्तीति ज्ञेयम् ।

यद्यपि साङ्ख्यग्रन्थेषु सूक्ष्मशरीरेऽष्टादशतत्त्वानामेवाऽस्ति निरूपणङ्किन्तु ब्रह्मपुराणादिषु साङ्ख्यनिरूपणावसरे बुद्ध्यहङ्कारावेकमेव तत्त्वमिति प्रतिपाद्य सप्तदशतत्त्वान्येव सूक्ष्मशरीरत्वेन निरूपितानीति विशेषः।

सर्गस्याऽऽदित एव प्रत्येकस्याऽऽत्मनः सूक्ष्मशरीरेण सह सम्बधो भवति यः मोक्षपर्यन्तं तिष्ठति। स्थूलं शरीरं भूयो भूयः गृह्णन् त्यजन्नपि तेन सूक्ष्म-शरीरेण शरीरीति सञ्ज्ञामात्मा लभते। साङ्ख्ये शरीरस्याऽस्य नामान्तरमातिवाहिकम् इत्यस्ति। यतो ह्येतच्छरीरमात्मानं सर्वदा वहतीति। वेदान्ते ह्यातिवाहिकेषु तत्त्वेषु पञ्चप्राणानाङ् गणना क्रियते, ये प्राणाः वत्तय एवेति साङ्ख्ये सूक्ष्मभूतानामेव गणना क्रियते। अग्निपुराणे ऽपिचापञ्चीकृतभूतानीति पदेन सूक्ष्मभूतानामेव गणना कृतेति वक्तुं शक्यते, यदत्र साङ्ख्यानुमोदनमेवास्ति। अग्निपुराणे ह्येकाशीत्युत्तर-त्रिशततमे ऽध्याये तृतीयश्लोकतः समारभ्य दशमश्लोकं यावत् केषाञ्चन साङ्ख्याचार्याणां विशिष्टविचाराणामुल्लेखोऽस्ति। तेषान्नामानि सन्ति, कपिलः, पञ्चशिखः, जनकः, जैगीषव्यः, देवलः, सनकश्चेति।

उपर्युक्तप्रकारेणाऽग्निपुराणे चाऽपि साङ्ख्यसिद्धान्तानामस्ति निरूपणमिति वक्तुं शक्यते यदत्राप्यस्ति साङ्ख्यमिति।

(त)

ब्रह्मपुराणे साङ्ख्यम्

ब्रह्मपुराणस्य प्रथमे ऽध्याये लिखितमस्ति यत्—

अव्यक्तं कारण यत्तन्, नित्यं सदसदात्मकम्,
प्रधानं पुरुषस्तस्मान्, निर्ममे विश्वमीश्वरः। इति।

अनेन स्पष्टीभवति यदयमीश्वरः सदसदात्मकमव्यक्तं प्रधानमुपादानकारण-त्वादुपादाय जगत्सृजति। अव्यक्तं त्रिगुणात्मकमुपादानकारणं सदसदात्मकत्वेन साङ्ख्ये चाऽपि प्रतिपादितमेवास्ति। श्लोके चात्र पुरुषपदेन सहैव ईश्वरपदस्यापि निर्दिष्ट-त्वात् स्पष्टीभवति। यदत्राऽपि सेश्वरं साङ्ख्यमस्तीति।

तद् यथा—

न चाप्ययं संसरति, न संसारमय: प्रभु: ।
नायं पृथ्वी न सलिलं, न तेज: पवनो नभ: ।।
न प्राणो न मनो ऽव्यक्तं, न शब्द: स्पर्श एव च ।
न रूपरसगन्धाश्च, नाहं कर्त्ता न वागपि ।।
न पाणिपादौ नो पायुर्न चोपस्थं द्विजोत्तमा: ।
न च कर्त्ता न भोक्ता वा प्रकृति: पुरुषोऽपि वा ।।
न माया नैव च प्राणा न चैव परमार्थत: ।
यथा प्रकाशतमसो:, सम्बन्धो नोपपद्यते ।।
तद्वदैक्यं न सम्बन्ध: प्रपञ्चपरमात्मनो ।
छायातपौ यथा लोके परस्परविलक्षणौ ।।
तद्वत् प्रपञ्चपुरुषौ, विभिन्नौ परमार्थत: ।।

एवं सर्वाऽन्तर्यामिण: परमपितु: परमपुरुषस्य परमेश्वरस्योपर्युक्तेभ्यस्तत्त्वेभ्यो वैलक्षण्यं प्रतिपादयता प्रसङ्गाऽऽगतं प्रकृतिप्रपञ्च: परमात्मन: पुरुषाच्च सर्वथा भिन्नोऽस्तीति प्रतिपादितम् ।

पुरुषपदेन सह ईश्वरपदस्य निर्देशेन स्पष्टीभवति यदत्र जगद्रचयितु: ईश्वरपुरुषातिरिक्तोऽपि पुरुषोऽस्ति, य: जगद्रचयिता नास्ति ।अनेन पुराणकर्त्तु: मतेऽपि जीवपुरुषस्याऽस्तित्वं स्पष्टीभवति । तथा चानेनैतदपि सिध्यति, यद् ईश्वर: स्वयं जगद्रूपेणनैव परिणमति, प्रत्युत मूलोपादानेनाऽव्यक्तेन प्रधानेन जगत् सृजतीति । नैकत्र ईश्वरोऽयं निमित्तकारणं, प्रकृतिरियमुपादानकारणञ्चेत्युभयोरैक्येनापि निर्देश: क्रियते । तत्रोमेऽपीमे शक्ती पूर्णदेहदेहित्वयुक्ते वर्तेते । अर्थात् प्रकृतिरियं जडाऽस्ति पुरुषश्चायं मूलोपादानं विना न किमपि कमर्त्तुर्हति । अत: उभावपि प्रकृतिपुरुषौ परस्परापेक्षिणौ वर्त्तेते मिलित्वा च जगत् कर्तुं भर्तुं संहर्तुं च प्रभवत इत्यस्ति संयुक्तयोरेव वैशिष्ट्यमिति कृत्वैव कैश्चिदनयो: सम्भूयस्थितयोरेवोपासना विधीयते स्वीक्रियते चैक्यम् । वस्तुतस्तु उभेऽपि तत्त्वे पृथक्पृथग्वर्त्तेते । ब्रह्मपुराणेऽपि लिखितमस्ति यत्—

द्विधा कृत्वात्मनो देहमर्धेन पुरुषोऽभवत् ।
अर्धेन नारी तस्यां तु सोऽसृजद् विविधा: प्रजा:

ब्रह्मपुराणस्याऽष्टत्रिंशदुत्तरद्विशततमैकोनचत्वारिंशत्तमयोरध्याययोः कपिलः कापिलसाङ्ख्यञ्चेत्युभावपि बहुधा प्रशंसितौवर्त्तेते। कानिचिद्वचनानीत्यत्र प्रस्तूयन्ते—

साङ्ख्यं वै मोक्षदर्शनम् २३८।५।।
साङ्ख्या : शास्त्रविनिश्चयाः २३७।७।।
मार्गज्ञा : कापिलाः साङ्ख्या २३९।५१।।
साङ्ख्या विप्रा ! महाप्राज्ञा : ।२३९।५८, ९७।।
कापिलानां महात्मनाम् २३९।८२।।
साङ्ख्याश्चामितदर्शनात् ।२३९।१०२।।

उपर्युक्तैरुद्धरणै : सर्वथा स्पष्टीभूतमेवाऽस्ति, यदत्र ब्रह्मपुराणे साङ्ख्यमस्ति तथा सुप्रशंस्य प्रतिष्ठापितमस्तीति।

(थ)

गरुडपुराणे साङ्ख्यम्

गरुड़पुराणस्य सप्तत्रिंशत्युत्तरद्विशततमेऽध्याये ऽष्टाविंशत्युत्तरद्विशततमेऽध्याये तथैकोनत्रिंशदुत्तरद्विशततमेऽध्याये च साङ्ख्यस्य सुविस्तृतं निरूपणमस्ति २२७तमाध्यायस्य षोडशे श्लोके लिखितमस्ति 'साम्यावस्थागुणकृता-प्रकृतिः' अर्थात् गुणानां साम्यावस्थैव प्रकृतिनाम्ना व्यपदिश्यते। लक्षणमेतदेव साङ्ख्यदर्शनेऽपि प्रकृतेः समुपलभ्यते।

गरूड़पुराणस्य पूर्वखण्डे प्रथमे ऽध्याये ऽष्टादशे श्लोके प्रतिपादितमस्ति, यद् विष्णो : पञ्चमावतारभूतः कपिलः सुविज्ञऽआसीत्। सः स्वशिष्याय श्रीमते आसुरयेऽखिलतत्वानां सुनिश्चितन्निर्णायकं साख्यदर्शनमुपदिदेश। यत्पूर्वङ्कालविप्लुतमासीत्। तत्साङ्ख्यम् सर्वतः प्राक् भगवान् कपिल एव प्रोवाच इति। तत्राऽस्ति श्लोकः—

पञ्चमः कपिलो नाम, सिद्धेशः कालविप्लुतम्।
प्रोवाचाऽऽसुरये साङ्ख्यम् तत्वग्रामविनिर्णयम्।।

इत्थं साङ्ख्यसूत्रपातङ् कृत्वा प्राप्ते ऽवसरे साङ्ख्यस्य साङ्गोपाङ्गमपि निरूपणङ् गरुड़पुराणं कृतमस्तीति वक्तुं शक्यते यदत्र गरुडपुराणेऽपि साङ्ख्यमस्तीति ।

(द)

ब्रह्मवैवर्त्तपुराणे साङ्ख्यम्

ब्रह्मवैवर्त्तपुराणस्य ब्रह्मखण्डे तृतीये ऽध्याये चतुर्थपञ्चमयोः श्लोकयोः जगत्कारणत्वेन त्रयाणामपि गुणानामुल्लेखोऽस्ति। तस्मात्त्रिगुणाऽऽत्मकान्मूलकारणान्महत्तत्त्वञ्जायते महतो ऽहङ्कारोऽहङ्कारात् पञ्चतन्मात्राणीत्यादिकङ् क्रमशः समग्रमपि साङ्ख्य सम्मतं त्तत्वजातं वर्णितम् । ब्रह्मखण्डस्यैव त्रिंशत्तमे ऽध्यायेएकादशश्लोकतः समारभ्य त्रयोदशश्लोकं यावज्जगताम्मूलोपादानकारणभूता प्रकृतिः वर्णिता वर्त्तते । सुस्पष्टमेव तत्र प्रतिपादितमस्ति यत् प्रकृतिं विना परमात्मा जगतां सृष्टिङ्कर्तुमशक्तो भवतीति । प्रकृतिखण्डस्य प्रथमे ऽध्याये चतुर्थश्लोकतः समारभ्य द्वादशश्लोकं यावत् प्रकृतिः सुविशिष्य प्रतिपादिता वर्त्तते । तत्र प्रकृतिपदस्थितास्त्रयोऽपि वर्णाः क्रमशः सत्वरजस्तमांसि द्योतयन्तीति प्रतिपादितम् ।

तद् यथा—

प्रकृष्टवाचकः प्रश्चकृतिश्च सृष्टिवाचकः ।
सृष्टौ प्रकृष्टा या देवी प्रकृतिः सा प्रकीर्तिता ।।
गुणे प्रकृष्ट सत्वे च प्रशब्दो वर्त्तते श्रुतो
मध्यमे रजसि कृश्च तिः शब्दस्तमसि स्मृतः ।
त्रिगुणाऽऽत्मस्वरूपा च सर्वशक्तिसमन्विता
प्रधानञ्च सृष्टिकरणे प्रकृतिस्तेन कथ्यते ।
प्रथमे वर्त्तते प्रश्च कृतिश्च सृष्टिवाचकः ।
सृष्टेराद्या च या देवी प्रकृतिः सा प्रकीर्त्तिता ।।

एषा सर्वशक्तिसम्पन्ना त्रिगुणात्मिका प्रकृतिः सृष्टिरचनायां प्रधानसाधनभूता

वर्त्तते। ऽतएव एषा प्रकृष्टङ् क्रियते यया सा प्रकृतिरिति प्रथममङ्करोति सृष्टिं सा च सर्वथा बिभर्त्यन्वर्थनामताम्।

प्रसङ्गेनानेन स्पष्टसेव प्रतीयते यदत्र ब्रह्मवैवर्त्तेऽप्यस्ति साङ्ख्यमिति।

(घ)

वायुपुराणे साङ्ख्यम्

वायुपुराणस्य सृष्टिप्रकरणे चतुर्थपञ्चमाध्याययोः साङ्ख्यदर्शनमनुसृत्य सुविस्तृतं सर्गोत्पत्ति-निरूपणङ् कृतमस्ति। अनयोरध्याययोः प्रकृतेरधिष्ठातृत्वेन परमेश्वरः स्वीकृतोऽस्ति। अस्मिन् प्रसङ्गे चतुर्थाऽध्यायस्य त्रयोविंशतितम षड्विंशतितमचतुसप्ततित मनवतितमश्लोकाः तथा पञ्चमाध्यायस्य द्वादश-त्रयोदशैकविंशतितम-द्वाविंशतितमश्लोकाः विशिष्टाः सन्ति।

इत्थमेव वायुपुराणस्य त्र्युत्तरशततमे ऽध्याये ऽपि सृष्टिप्रक्रियायाः निरूपणं साङ्ख्यमिव विहितमस्ति।

इत्थमुभयत्र साङ्ख्यप्रक्रियया सृष्टिप्रसङ्गनिरूपणेन सुस्पष्टीभवति, यदत्र-वायुपुराणे ऽपि साङ्ख्यसिद्धान्ताः सम्यक्तया निरूपिताः सन्तीति वक्तुं शक्यते, यदत्र साङ्ख्यमस्तीति।

(न)

मत्स्यपुराणे साङ्ख्यम्

मत्स्यपुराणस्य तृतीये ऽध्याये चतुर्दशश्लोकतः समारभ्यैकोनत्रिंशत्तमश्लोकं यावदस्ति साङ्ख्यसम्मतञ्च सृष्टिप्रक्रियानिरूपणम्। प्रसङ्गेऽस्मिन् साङ्ख्यशास्त्र

प्रवर्त्तकत्वेन कपिलस्यास्त्युल्लेखः । अत्र पञ्चविंशः पुरुषः जीवात्मा वर्त्तते षड्विंशश्चायमीश्वरो वर्त्तत इति निर्दिष्टमस्ति ।

पुराणेषु साङ्ख्यस्य प्रतिपादनञ्च कुर्वद्भिः प्रकृतेरधिष्ठातृत्वेनेश्वरः स्वीकृतोऽस्ति । वस्तुतः कापिलसाङ्ख्ये जगदीश्वरः एवमेव स्वीक्रियते स्म । यदनुसृत्य पुराणेषु ईश्वरप्रतिपादकानि वर्णनानि समुपलभ्यन्ते साङ्ख्यप्रक्रियासु । साङ्ख्यानां सिद्धान्ते ऽमुष्मिन् बौद्धैः परिवर्त्तनं विहितञ्च शाङ्करसाम्प्रदायिकैश्च । परिणामतः साम्प्रतलोकाः मन्वते यदिदङ् कापिलं साङ्ख्यान्निरीश्वरसाङ्ख्यमस्तीति । किन्तु विचारधारैषा निर्मूला भ्रान्ता चाऽस्तीति पुराणानां प्राचीनतमेन वर्णनेनानेन स्पष्टी भवति ।

इत्थमत्र मत्स्यपुराणेऽपि कपिलस्य साङ्ख्यप्रवर्त्तकत्वमुररीकृत्य तदनुमोदितानां सिद्धान्तानां निरूपणङ् कृतमित्यस्ति साङ्ख्यमित्यवबोध्यम् ।

(प)

पद्मपुराणे साङ्ख्यम्

पद्मपुराणस्याऽऽदिखण्डे द्वितीयेऽध्याये षष्ठश्लोकतः समारभ्य पञ्चविंशतितमंश्लोकं यावत् साङ्ख्यदर्शनानुगं सृष्टिप्रक्रियायाः निरूपणमस्ति । तत्र प्रधानस्याऽधिष्ठातृत्वेन पुरुषस्योल्लेखोऽस्ति । सः पुरुष एवाऽस्ति परमपुरुषः ।

तथैव सृष्टिखण्डस्य द्वितीयाऽध्याये सप्तमाष्टमश्लोकयोः सदसदात्मकमव्यक्तमुपादानकारणमादाय परमात्मा महत्समारभ्य महाभूतपर्यन्तञ्च तद्विकारपर्यन्तञ्च सृजति । तत्राऽस्तिश्लोकः—

अव्यक्तञ्च कारणं यत्तन्, नित्यं सदसदात्मकम् ।
महदादिविशेषान्तं, सृजतीति विनिश्चयः ।।

इत्थमत्र महादादिविशेषान्तमिति लेखेन स्पष्टीभवतियदत्राऽस्ति सर्वाऽपि प्रक्रिया साङ्ख्यानुगैवेति । यतः विशेषशब्देन साङ्ख्यशास्त्रे महाभूतानि आकाश-वायु-तेज जल-पृथिवीति व्यपदिश्यन्ते ।

इत्थमुद्धरणेनानेन सिद्धम्, यदत्र पद्मपुराणेऽप्यस्ति साङ्ख्यमिति ।

(फ)

स्कन्दपुराणे साङ्ख्यम्

स्कन्दपुराणस्य माहेश्वरखण्डान्तर्गत कौमारिकाखण्डे सप्तत्रिंशत्तमे ऽध्याये षष्ठश्लोकतः समारभ्यैकादशश्लोकं यावत् प्रकृतिपुरुषयोः वर्णनमस्ति । प्रकृतेः सृष्टिक्रमः साङ्ख्यदर्शनानुगोऽस्ति । पुरुषस्य प्रकृतेश्च पृथक् पृथक् स्वीकरणेन स्पष्टीभवति, यदत्रापि जडचेतनयोः सर्वथा पार्थक्येन स्थितिरस्तीति प्रतिपादिमम् । जगद्रचनायां प्रकृतिः उपादानकारणत्वेन विराजते परमात्मा च तस्याः प्रेरकत्वेन । अनेनैतदपि सिद्धं यदत्र सृष्टिप्रक्रियायाञ्चेतनः पुरुषः स्वयं जगद्रूपेण परिणतः सन् जडीभवतीति नैव बोध्यम् ।

प्रभासखण्डस्य सप्तषष्ट्युत्तरशततमे ऽध्याये वर्णनमस्ति यत्- शङ्करेण सह पार्वत्याः विवाहे जाते सति दिव्यसहस्रवर्षाणियावत्पार्वतीशङ्करौपक्रीडताम् । तदनन्तरं पार्वत्याः रजसा नार्यः शङ्करस्य वीर्येण च पुरुषाः समजायन्त इति । पुराणेऽस्मिन् भवानीशङ्करौ वर्णितौ तेन प्रतीयते । यदत्राऽस्ति वर्णनमालङ्कारिकरीत्या विहितमस्ति । पार्वती प्रकृतिः शङ्करश्च परमात्मैवास्तीति प्रतीयते । जडचेतनतत्त्वे नैकत्र वर्णिते स्तः । नामरूपयोरेव कश्चन भेदो प्रतीयते, किन्तु वस्तुतस्तु प्रकृतिपुरुषावेव सर्वथा वर्त्तेते इत्येव बोध्यम् । अनयोः विवाहस्तु संयोग एव येन पुरुषसंयोगेनाऽर्थात् परमात्मप्रेरणया प्रकृत्या महदादिविशेषान्तं सृज्यते । जातेऽपि तत्त्वग्रामे लक्षशः वर्षाणीत्थमेव व्यतीयुस्तदनन्तरं प्राणिनां सम्भूतिः समजायत, इत्येवास्ति दिव्यसहस्रवर्षसम्पादिता भगवतोः क्रीडा । तदनन्तरं सूर्यचन्द्रताराभूमण्डलादीनां सुव्यवस्थायां जातायां नरस्य नार्याश्च समुत्पत्तिः समजायत । प्रकृतेः नारी शङ्कराच्च पुरुषश्चेति कथनस्यास्त्याशयो यत्प्रकृतेः प्रतीकरूपेण नारी, शङ्करस्य प्रतीकरूपेण च पुरुषः समजायत इति । नरनार्योः सम्बन्धेन सृष्टिः प्रचलतीति स्पष्टमेवाऽस्ति ।

इत्थमालङ्कारिकशैल्या कृतानि वर्णनानि पुराणेषु प्रचुरमात्रायां समुपलभ्यन्ते पुराणकारः जगदुपादानकारणन्निमित्तकारणञ्च सर्वथा पृथक्पृथङ् मनुते। मूले वर्तमाने द्वेऽपि तत्त्वे परस्परं सापेक्षे वर्त्तेते तन्मूलकतयैव कैश्चित्तु तत्त्वमेकमेवेति कल्पितम्। किन्तु तयोः पार्थक्यङ् कथञ्चिदप्यपाकर्त्तुन्नैव शक्यते। यतस्तयोः प्रतीकरूपेण स्त्रीपुरुषौ वर्त्तेते। यथात्र दृश्यमानौ स्त्रीपुरुषौ वर्त्तेते तथैव मूलेऽपि प्रकृतिपुरुषौ द्वावेव वर्त्तेते इत्थमऽस्ति निश्चप्रचम्।

प्रभासखण्डे हीश्वरराज्ञयोः संवादस्वरूपेण साङ्ख्यतत्त्वानां सुस्पष्टतया प्रतिपादनङ्कृतमस्ति तच्चेत्थम्—

ईश्वरः—

पञ्चविंशतितत्त्वानि यदा जानन्ति योगिनः।
मुच्यन्ते पातकैः सर्वैः सप्तजन्मकृतैरपि ॥

राजोवाच—

कानि तत्त्वानि को देही किं ज्ञेयं योगिनां वद।
उत्पन्नज्ञानसद्भागो योगयुक्तः कथं भवेत् ॥

ईश्वर उवाच—

प्रकृतिश्च ततो बुद्धिरहङ्कारस्ततोऽभवत्।
तन्मात्रपञ्चकं तस्मात् एषा प्रकृतिरष्टधा ॥
बुद्धीन्द्रियाणि पञ्चैव पञ्च कर्मेन्द्रियाणि च।
एकादशं मनो विद्धि महाभूतानि पञ्च च ॥
गणः षोडशकः साङ्ख्ये विस्तरेण प्रकीर्त्तितः।
चतुर्विंशतितत्त्वानि पुरुषः पञ्चविंशकः ॥
देहीति प्रोच्यते देहे स चात्मानं च पश्यति।
विदन्ति परमात्मानं षष्ठं तं विंशतेः परम् ॥

इत्थमत्र प्रकृतेः समारभ्य चतुर्विंशतितत्त्वानि प्रतिपादितानि पञ्चविंशः पुरुषः षड्विंशश्च परमात्मेति परमात्मनः स्वतन्त्ररूपेण निरूपणङ्कृतमस्ति ।

पुराणस्य लक्षणमस्ति—
सर्गश्च प्रतिसर्गश्च वंशो मन्वन्तराणि च ।
वंश्यानुचरितं चैव पुराणं पञ्चलक्षणम्। ।

पुराणेषु लक्षणस्यास्य समन्वयः सुतरां समपेक्ष्यत एवेति सर्वेष्वपि पुराणेषु पञ्चलक्षणानि निरूपितानि सन्ति । तत्राऽस्ति चमत्कृतिरियं यत्सर्वेष्वपि पुराणेषु सर्ग-प्रतिसर्गनिरूपणावसरे साङ्ख्यप्रक्रियैव समाश्रितेति, सर्वेष्वपि पुराणेषु साङ्ख्यदर्शनं समुपलभ्यते बहुत्र, किन्त्वत्र केवलन्तद्विषये दिग्दर्शनमेव क्रियते ।

(ब)

लिङ्गपुराणे साङ्ख्यम्

लिङ्गपुराणस्य प्रथमे भागे ऽष्टाविंशतितमे ऽध्याये सप्तमाष्टमयोः श्लोकयोः साङ्ख्यतत्त्वानान्निरूपणमस्ति । तच्चेत्थमस्ति यत्—अव्यक्तं, महत्तत्त्वम्, अहङ्कारः, पञ्चतन्मात्राणि, पञ्चज्ञानेन्द्रियाणि, पञ्चकर्मेन्द्रियाणि, पञ्चमहाभूतानीति चतुर्विंशतितत्त्वानि सन्ति । तदनन्तरं पञ्चविंशतितमं तत्त्वं पुरुषाख्यमस्ति यद्ध्यातृत्वेनाऽत्र निरूपितमस्ति तथा षड्विंशतितमञ्च परमात्मसञ्ज्ञकं शिवतत्त्वमत्राऽस्ति स्वीकृतमिति ।

एतत्सर्वमपि वर्णनं साङ्ख्यशास्त्रसम्मतमेवाऽस्तीति पुराणेषु साङ्ख्यदर्शनं, तस्य प्रभावः, साङ्ख्यस्य सेश्वरवादिता चेति सर्वं सुसिद्धम् ।

प्रकरणे ऽमुष्मिन् विभिन्नेषु पुराणेषु प्रतिपादिताः साङ्ख्यसिद्धान्ताः सङ्क्षेपतः एवं प्रतिपादयितुं शक्यन्ते, यत्—

१. जगतः मूलोपादानकारणं त्रिगुणात्मिका प्रकृतिरस्ति या नित्यमव्यक्ता सदसदाऽऽत्मिका चाऽस्तीति ।

२. त्रिगुणात्मिका प्रकृतिर्जडा वर्त्तते। तस्याः प्रेरकञ्चेतनतत्त्वं परमात्मा वर्त्तते, यो नित्यः जगन्नियन्ता, अन्तर्यामी, सर्वशक्तिमान् सर्वोत्कृष्टश्चास्तीति।

३. प्रकृतिपरमात्माऽतिरिक्तं पुरुषतत्त्वमन्यदस्ति, यः कर्मानुगो भवति।

४. प्रलयानन्तरं यदा सृष्टिर्भवति, तदा प्रकृतेमहांस्ततोऽहङ्कारो ऽहङ्कारात्पञ्चतन्मात्राणि ह्येकादशेन्द्रियाणि च जायन्ते, पञ्चतन्मात्रेभ्यश्च स्थूलभूतानि जायन्ते।

५. त्रयोदशकरणानि पञ्चतन्मात्राणि च सम्भूयाऽष्टादशतत्त्वानि सूक्ष्मशरीरसञ्ज्ञामधिगच्छन्ति। सूक्ष्मशरीरञ्च सर्गादिकालत एव प्रत्येकेनाऽऽत्मना सह सम्बद्धो भवति। आधारेणाऽनेनैवात्मानं देहीति व्यपदिशन्ति।

६. सत्त्वरजस्तमांसि परस्परम्मिथुनीभूय कार्यं सम्पादयन्ति।

७. त्रिगुणात्मिकायाः प्रकृतेः समुत्पन्नंसमग्रमचेतनञ्जगत्त्रिगुणात्मकमस्ति। जगदेतत्कस्यचिदपि चेतनतत्त्वस्य विकारभूतन्नास्ति।

सिद्धान्तैरेभिः स्पष्टीभवति यदत्र पुराणेषु साङ्ख्यदर्शनमस्तीति दिक्

—०—

पञ्चविंशतितत्त्वविवेचनम्

श्रीमद्भागवतमहापुराणे पञ्चत्रिंशत्तत्त्वानि चाऽपि प्रतिपादितानि सन्ति प्रतिपादितानि च तत्रैव चत्वारि तत्त्वानि चापि । परन्तत्रैव सुस्पष्टीकृतं यदिह प्राधान्येन पञ्चविंशतितत्त्वान्येव स्वीक्रियन्ते तेषामेव पञ्चविंशतितत्त्वानामन्तर्विभागान् विधाय अष्टाविंशतितत्त्वानि पञ्चत्रिंशत्तत्त्वानि चापि निर्दिश्यन्ते । तथैव पञ्चत्रिंशत्तत्त्वानामेव व्यूहान् विधाय चत्वारि तत्त्वानि चापि सम्पद्यन्ते । परमिह साङ्ख्यदर्शनस्य यावन्ति पुस्तकानि समुपलभ्यन्ते, तेषु सर्वेष्वपि निर्विवादरूपेण पञ्चविंशतितत्त्वानि स्वीकृतानि सन्तीति श्रीमद्भागवते, वेदेषु महाभारते पुराणान्तरेषु च प्रतिपादितं साङ्ख्यं प्रस्तूय यदि प्रत्येकशः तत्त्वानाममीषां विवेचनन्न क्रियते तर्हि भवेन्न्यौन्यमेवेति विचार्य तत्त्वविवेचनात्मकोऽयमध्यायश्चापि प्रस्तूयते ।

अध्यायेऽमुष्मिन् तत्त्वानां स्वरूपावबोधकं विवेचनं विधीयते । तत्र न केवलं साङ्ख्यकारिकादिशैवापि तु विषयस्फोरणात्मकतया तत्त्वानां व्याख्यानङ्क्रियते । मन्ये कर्मणामुना तत्त्वजिज्ञासूनाम्महत्युपकृतिः सम्पत्स्यते दर्शनाध्येतॄणाङ्कृतेऽपि ग्रन्थस्यास्य परमोपयोगिता च भविष्यतीति क्रमशस्तानि सर्वसाङ्ख्या-चार्यैर्निर्विवादरूपेण स्वीकृतानि पञ्चविंशतितत्त्वानि विविच्यन्ते ।

पुरुष-विज्ञानम्

पुरुषस्य सम्बन्धे श्रुति-स्मृति-पुराणादीनि समाश्रित्यर्षि-मुनि-वैज्ञानिकैः निरूपिताः समेऽपि ज्ञातव्याः सिद्धान्ताः सर्वाश्चाऽपि ज्ञातव्याः वाचः वार्त्तालापाश्च यावन्न सम्यक्तया समवबुद्धाः स्युस्तावन्नेदं वक्तुं शक्यते, यत् साङ्ख्यस्य सिद्धान्ताः सर्वथा निर्विवादरूपेण निर्भ्रान्तेन चेतसा च समवबुद्धा इति, साङ्ख्यकारिकायां "पुरुषस्य दर्शनार्थम्" कारिकयाऽनया प्रकृति-पुरुषयोः संयोगेन सृष्टेः सर्जनमिति प्रतिपादितम् । "सङ्घातपरात्वात्" इत्याद्यया कारिकया पुरुषस्य सिद्धिः प्रतिपादिता । "जन्म-

मरणकरणानाम्, कारिकया चाऽनया पुरुष-बहुत्वं साधितम् । "तस्माच्च विपर्य्यासात्" कारिकया ऽनया च पुरुष-धर्मान् साधयित्वा एकधा कदाचित् सन्तोषोऽपि समुररीकृतो भवेत् परमेतज्ज्ञानन्तु केवलं शाब्दिकमेव सर्वथा ऽपूर्णञ्चास्ति । नानेन ज्ञानेन पुरुषस्य स्वरूपाऽनुभूतिः सम्यक्तया भवति न चाऽखिलदर्शनशास्त्राणामपि समन्वय एव जायते, तथैव मोक्षोपयुक्तो भवबन्ध-विनिर्भेदक्षमः सत्यज्ञान-विकासोऽपि कर्त्तुं शक्यते । अतोऽत्र पुरुष-विषयको पूर्णविज्ञाना ऽवबोधोऽपि वर्त्तते परमावश्यकः । चेदेतत् पुरुष-विज्ञानं ज्ञातम्भवेत् तर्हि साङ्ख्यस्य निरीश्वरतायाश्चापि भ्रान्तिः सर्वथा व्यपगच्छेत् । पेराचेञ्ज मनस्विनः एतत्तु विचारयन्तु यदत्र यस्य-पुरुष-तत्त्वस्य संयोगेन साङ्ख्यशास्त्रे सृष्टेः समुद्गोमो प्रतिपाद्यते किमत्र सोऽयं व्यष्टिचैतन्यस्वरूपोऽस्ति, यश्चात्र नृ-पशु-पक्षि-कीट-शलभादिक्षुद्र-जीवाणुषु तथा वृक्षादिषु नैकधा भासते । भूयो भूयश्च जन्ममरणयोः भ्रमौ-भ्रान्तः सर्वथा विमुक्तयेऽत्यन्तं सतृष्णः सस्पृहस्तिष्ठति, एतत् परिणाहमन्तो पृथिवि-जल तेजो-वाताकाशास्तथा चैतेषां पञ्चीकरण-परिणामभूताः सूर्य-चन्द्रग्रह-नक्षत्र-तारादि-भौतिक-पदार्थाः, तेषां चतुर्दशभुवनानाञ्च सर्जनन्न कथञ्चिदपि क्षुद्रतमेन जीवाणुना पुरुषेण भवितुमर्हति । तथा चेत् केऽपि सर्वथा एवमेव मन्वते तर्हि वार्तामन्येषान्तु परित्यजन्तु, परमत्र ईश्वरान्नातिन्यूनमिवाऽऽत्मानम्मन्यमानः मानवशरीरे विराजमा-नोऽपि कश्चन पुरुषः स्वयं प्रकृत्या प्राकृतैः पदार्थैश्च संयुज्य लघुतमस्यापि जगतो नि-र्माणङ् कृत्वा दर्शयेत् । परन्नैवमस्ति । वयमपि सर्वथा मन्महे यन्मानवस्य बुद्धि-बलेन वाष्पयानानि टङ्कणयन्त्राणि जलयानानि स्थलयानानि, दूरभाष-यन्त्राणि आकाशवा-णीयन्त्राणि, सचित्रसूचनाप्रसारणप्रकृष्टयन्त्राणि तथा चेत्थमेव बहूनि लघूनि बृहन्ति कलाकर्मस्थलानि कारखानेति प्रथितानि रचितानीति संसारेऽमुष्मिन् वैचित्र्यमिव समानीतम्। यान्त्रिकी विरचनाऽपि सर्वथैतादृशी वर्त्तते यां सम्यक्तया ज्ञातुमपि महतो प्रयत्नस्य सुविपुलस्य समयस्य चाऽपि परमावश्यकता भवति । परमाणूनां विस्फोटनेन तु तादृशीं लीलां कर्त्तुं प्राभवत् यां सर्वेऽपि जानन्त्येव, या समभूत् जापानदेशे यया हिरोशिमानागासाकीति प्रान्तयोः विध्वंसनं समभूत् । प्रकारेणानेन मानवः स्वीयामभिमानपूर्णाङ्कृतिमपि परीक्षयामास । किन्त्वेतत् सर्वमपि कर्म-कलापं वर्त्तते प्राकृतमेव ।

ईश्वरस्तु कृत-त्रेता-द्वापर-कलिसञ्ज्ञकान् चतुर एव युगान् निर्मातुमशक्नोत् । किन्तु मनुष्यस्तु यान्त्रिकार्थिकानुसन्धानाविष्कारकादीन् बहून् युगान् प्रचालयन् नैकविधान् युगान्तरान् विरचयितुमुत्क इव समवलोक्यते । परन्नास्ति तन्महत्त्वमेतेशङ्-तल्पितानाम्नाममात्रेण युगत्वेन व्यव-ह्रियमाणानां युगानाम् ।

वस्तुतस्तु सोऽद्याऽपि न नूतनङ् किमपि विरचयते केवलं पूर्वतः स्थितान्येव भौतिकानि तत्त्वानि तथा तथा संयोजयन् वियोजयन् वा रूपान्तरतां समापादयन् वा तानि-तानि सर्वथैहिकानि वस्तूनि विरचमानमिवाऽऽत्मानम्मन्यमानः जालसमापन्नमिवाऽऽत्मानं विदधाति। स्वयं तथा-तथा विचरिणमयिताऽपि बद्धो भवति सर्वान् अन्यान् अपि जनान् मृगतृष्णायुक्तान् मृगान् इव व्यर्थमेव तथा-तथा समाकर्षन् सुबद्धान् विदधाति। परमसौ किमपि तत्त्वान्तरं विरचितुं लोकान्तरं वा विरचयितुन्नाशक्नोत् न च किमपि तत्त्वं विध्वंसयितुमेव प्राऽभवत्।

तर्हि कोऽयं विशिष्टो पुरुषः पुरुषोत्तमोवा विराजते, यस्य संयोगे जाते सति प्रकृतिः सर्वमपि सृजति पालयति संहरति च। अर्थात् समान्यपि तत्त्वजातानि स्वशरीरात् कूर्मस्यांगानीव निःसारयति स्वस्मादेव। अथ च तन्तूनिव पटेषु संसारे समेष्वपि तत्त्वेष्वनुस्यूता विराजते। सर्वोऽप्ययम्महिमा तस्यैव परम-पुरुषस्य परमात्मनः समवलोक्यते समैश्चापि सर्वथा सर्वत्र। तस्यैवांशभूतोऽयं क्षुद्रतमो भागो जीवात्मसंज्ञां समधिगच्छति।

तस्य परमात्मनः सर्वथा तात्त्विकं ज्ञानं समधिगम्य सर्वेऽपि मानवाः सर्वथा विमुक्ताः भवितुमर्हन्ति। तथा च जागतिक्यः सर्वाश्चापि समस्याः समादध्युः। विषयस्यास्य बहून् प्रश्नान् सर्वथा समाधातुं सर्वथा सामर्थ्यशून्यताभाजः तान् प्रश्ननिचयान् सर्वथा ऽसमाधेयान् मन्वानाः केन प्रकारेण सृष्टिर्भवति, केन प्रकारेण च स्थितिरस्ति, केन प्रकारेण चाऽस्य सर्वस्याऽपि जगतो लयो भवतीति विषयेऽमुष्मिन् पलायनपरताम्भजन्ते। तेषान्दार्शनिकबन्धूनामपि बहुतरं समाधानं सम्भवेत्।

भगवता श्रीकृष्णेन गीतायामुद्घोषितमेवाऽस्त्यव्यक्ताऽऽत्मत्वम्—

तद्यथा—

अजोऽपि सन् अव्ययात्मा भूतानामीश्वरोऽपि सन्।
प्रकृतिं स्वामधिष्ठाय सम्भवाम्यात्म-मायया॥

अस्यैवाऽऽव्ययाऽऽत्मनः स्पष्टीकरणम्भगवता श्रीकृष्णेन पञ्चदशाऽध्याये कृतमस्ति। तद् यथा…

द्वाविमौ पुरुषौ लोके क्षरश्चाक्षर एव च।
क्षरः सर्वाणि भूतानि कूटस्थोऽक्षर उच्यते॥

उत्तमः पुरुषस्त्वन्य परमात्मेत्युदाहृतः ।
यो लोकत्रयमाविश्य विभर्त्यव्यय ईश्वरः ।।
यस्मात् क्षरमतीतोऽहमक्षरादपि चोत्तमः ।
अतोऽस्मि लोके वेदे च प्रथितः पुरुषोतमः ।।

अत्र प्रस्तुतेऽस्मिन् प्रकरणे क्षराक्षराऽव्ययाऽऽत्मनां त्रयाणाम्पुरुषभेदानान्निरूपणङ्कृतमस्ति। पुरुषशब्दस्यास्त्यर्थः पुरि शेते सोऽयम्पुरुषः। जगति याः पाञ्चभौतिक्यो मूर्त्तयः समवलोक्यन्ते ताः सर्वाः पुरः सन्ति। तासु-तासु च शेते यत् तत्त्वं तस्याऽस्ति नाम पुरुष इति। चेदेतासाम् समुपादानभूतन्तत्त्वमेतासु न स्यात्तर्हि सुनिश्चितरूपेण नैतासां स्थितिर्भवितुमर्हति। उदाहरणत्वेन एका दीपशिखा पूः तस्यान्तैलं पुरुषः। यदि तैलम्प्रतिक्षणं तन्निर्मापयन् न तिष्ठेत् तर्हि तस्याः स्थितिः क्षणमात्रेणैव विलुप्ता स्यात्। वृक्षेषु चेन्न भवेद्रसस्तर्हि ते शुष्काः स्युः। तस्मादेव रसस्थैर्यार्थमेवैतेषाम्मूलेषु भूयो-भूयो दीयते नीरम्। एवमेवास्माकं शरीराणां रक्षार्थं परमावश्यकमन्नपानादिकमपि रसरूधिरादीनां रूपेण परिणमय्य शरीराणि स्थिरतामापादयति। मृत्-प्रस्तरादीनामेषैव गतिरस्ति। एषा गतिरेव वर्त्तते यज्ञनामधेया ह्येकविधा।

यज्ञाऽऽश्रितैवास्ति समेषामपि पदार्थानां स्थितिः। पञ्चप्रकारिका-क्रियैवाऽत्र यज्ञ- नाम्ना प्रसिद्धा वर्त्तते। भेदाश्चेमे सन्ति १ आदानक्रिया, २ दानक्रिया, ३ उत्सर्गक्रिया ४ भैषज्यक्रिया, ५ विकासक्रिया, इति। अन्यवस्तुभ्यः स्वोपकारकमन्नमादाय स्वरूपे प्रवेशनमादानम्। यथाऽत्र वयं सर्वेऽन्नपानादिकङ्गृह्णीमो वृक्षाः जलादिकञ्च गृह्णन्ति। दीपकाः तैलादिकङ्गृह्णन्ति। स्वस्मादन्यस्मै सदन्नस्वरूपेण तस्य सुरक्षार्थं समर्पणं दानम्। तद् यथा—

दीपकाः प्रकाशं ददति। वृक्षाः फलानि ददति।

एतदुपर्युक्तन्दानमेव चेद् विश्वात्मने स्यान्न भवेत्तत्र वैयक्तिकत्वन्तर्हि तदेव दानमुत्सर्गनाम्ना व्याह्रियते। तद्यथा वृक्षाः स्वीयं सौगन्ध्यं जगदुवाताय समर्पयन्ति। तथैव वृक्षाः स्वनिभमेवाऽन्यं वृक्षमुत्पादयितुं स्वबीजमाध्यमेन जगदुपकर्त्तारं समुत्पादयन्ति। इत्थमेव समेऽपि प्राणिनः स्वात्मनिभान् सन्तानान् समुत्पादयितुं प्रयतन्ते साफल्यमपि चाधिगच्छन्ति।

भैषज्यन्तद्वस्तु समभिधीयते यद्गृहीतमन्नादिकं तदर्क-प्राणादिष्ववस्थासु परिवर्तितं सद् गृहीतृ-समधिष्ठितशरीरस्य क्षीणानि वस्तून्याप्यायति, तथैव केन्द्रशक्तिञ्चापि सम्यक् प्रकारेणाऽऽप्यायति ।

तेनैवान्नेव तस्य वस्तुनः नियतावधिकपरिणामात्मिका वृद्धिर्भवति तस्याःवृद्धेरेव विकास इति नाम भवति। समेषामपि प्राणिनां वृक्षादीनाञ्च शारीरिकी वृद्धिः पठनेनाऽभ्यासेन च बुद्धेर्वृद्धिर्भवतीति सन्ति बहूनि विकासक्रियोदाहरणानि। यज्ञोऽयं सर्वदा-सर्वथा सर्वत्र नैरन्तर्य्येण प्रचलत्येव। आस्माकीनाः धार्मिकाश्चापि यज्ञाः प्राकृतं यज्ञमेनमेव समलम्बन्ते। यद्यपि मृत्प्रस्तरादिषु जडवस्तुषु जायमानाः क्रियाः प्रत्यक्षमवलोकयितुं स्फुटत्वेन तु नैव शक्यन्ते, किन्तु भवन्त्यवश्यमेव तत्रास्ति प्रमाणत्वेन समुपलब्धमनुमानम्। जडवस्तून्यपि क्रमशो जीर्णानि शीर्णानि च भवन्ति। अर्पणापेक्षया समधिकतराऽऽदानेन समेष्वपि वस्तुषु स्थौल्यं जाजायते। आदानाऽपेक्षया समधिकतरार्पणेन कृशता क्षीणता च जाजायते। तथा चादान-प्रदानयोः सर्वथा भावे तु सर्वाण्यपि वस्तूनि सूर्यात्तेजः, मेघेभ्यो जलम्, पृथिव्याश्च जीवनङ्गृह्णन्ति, तथा च यथोचितं भागं सूर्याय वायवे पृथिव्यै च ददत्यपि। अयसि जल-प्रभावः नीरे झागआना प्रस्तरे आवरणागमनम् (पपड़ी आना) मृत्तिकायाञ्च दौर्गन्ध्यादीनि सन्ति बहूनि समादान-प्रदानक्रिययोः स्फुटतराणि सदुदाहरणानि। यज्ञेनानेन यानि पृथक् पृथक् पदार्थानामुपादानानि निर्मीयन्ते तानि सर्वाणि क्षरपुरुषस्वरूपाणि सन्ति। तानि स्वयं क्षीणानि भूत्वा पुनर्निर्मान्ति, तथैव तानि क्षरपुरुषत्वेनऽभिधीयन्ते तत्त्वानि। चाऽस्याः याग-प्रक्रियायाः प्रवर्तकाः प्रेरकाश्च ये सन्ति, यैश्च क्षरपुरुषाणां परिणामः कार्यते, सन्ति ते क्षरसञ्ज्ञकाः पुरुषाः। एते पुरुषाः क्षरपुरुषाणां परिणामेषु निमित्ततां यन्ति। परन्न स्वयं विकृताः भवन्ति। अतएवाक्षरशब्देन व्यवह्रियन्ते। एते परिणामिनो पदार्थाः, परिणामस्वरूपिणी यज्ञ-क्रिया, परिणामस्य निमित्तानि च यमाश्रयन्ति सः सर्वाधारः कार्यकारण-भाव-शून्यः निर्विकारतत्त्वरूप्यऽव्ययपुरुषरित्युच्यते।

उपर्युक्तान् त्रींश्चापि पुरुषान् सृष्टः प्रविष्टो-विविक्तश्चेति तथा च विश्व विश्वचर- विश्वातीतश्चेति प्रतिपादयन्ति। भाषायामपि कथयन्ति यदेषा परिस्थिति-र्वर्त्तते ह्येतादृशी यत्—(रचा हुआ, रचे हुए में जंचा हुआ और इन दोनों से भी बचा हुआ।) क्षर-पुरुषस्य भवति नैकधा सृष्टिरिति समुदीर्यते सर्जनमिति वर्त्तते सृष्टः। तथा च अक्षर-पुरुषो वर्त्तते तस्मिन्नेव प्रविष्टः। अव्यय- पुरुषश्च सर्वेष्वपि तत्त्वेषु सन्नपि विविक्तो निर्लिप्तश्च तिष्ठति स एव वर्त्तते विविक्तः।

एतदेव तथ्यं भूयोऽपि स्पष्टीक्रियते-वेदो नित्यमनुकूलैस्तर्कैः साधयति, यदेतेषां पविर्तनशीलानां विकृतिमतां सर्वथाऽनित्यानां परस्परन्नानात्वेन दृश्यमानानां पदार्थानां व्यूहभूतानाञ्जगताम्मूलमेकमेव नित्यञ्चिरन्तनन्तत्त्वं वर्त्तते। विकार-परिच्छेद-गुण-धर्मादयः सर्वेऽपि सन्ति असत्यान्येव तन्मूलादेवैतेषां सम्भूतिः। तन्मूलन्तु वर्त्तत इन्द्रियातीतम् मनो ऽतीतम्, वागतीतम्, सत्तामात्रन्निर्विशेषं चेत्युच्यते। यद्यपि निर्धर्मकत्वान्निर्गुणत्वाच्च तस्य किमपि नाम न भवितुमर्हति, तथापि व्यवहारार्थं तच्छुद्धं ब्रह्म निर्विशेषः रसः इत्यादिभिः शब्दैः व्यवहर्तुं शक्यते। रसस्याऽस्य या शक्तिः सा शक्तिः समस्तस्याऽपि जगतः समुत्पत्तिस्थितिसंहृतीनां कारणम्भवति, तां शक्तिं बलमिति व्याहरन्ति। बलस्य सन्ति तिस्रोऽवस्थाः। ताश्चैताः—अव्यक्ताऽवस्था, यदा तत् प्रसुप्तम्भवति तावद् बलशब्देन व्यवह्रियते यदा कार्य—संलग्नम्भवति, तदा प्राण-सञ्ज्ञां समुपलभते, तथा च यदा कार्यस्वरूपतामधिगच्छति तदनन्तरं विनासोन्मुखताम्प्राप्नोति तदा क्रियानाम्ना व्यपदिश्यते। तस्य बलस्य शुद्धो रसः निर्विशेष-नाम्ना व्यवहर्तुं शक्यते। प्रसुप्ताऽवस्थाऽवस्थितो बलसहितः परात्परशब्देन व्यवह्रियते। एतावु भावपि रसौ विश्वातीतौ स्तः। सृष्टौ ह्येतौ कमपि भागङ् गृहीतुन्नैव शक्नुतः, न चैतयोः किमपि लक्षणमेवाऽस्ति। यदैतद् बलञ्जागृतमर्थात् कार्योन्मुखम्भवति। तदा सर्वतः, प्रागसीम्नि रसे सीमानम्परिच्छेदं वा विदधाति। यतोऽत्र बलं स्वयमपि परिच्छिन्नं भवति, असौ यत्र स्थास्यति तत्र रसोऽयमपि परिच्छिन्नत्वेनैव व्यक्तो भविष्यति। यथा—घटपटमठाऽऽकाशादिकं परिच्छिन्नत्वेनैव द्योतयन्ति। एतद् बलममितस्यापि रसस्य मानं सीमानं वा विदधाति। अतएव विद्वांसस्तत्त्वमेतन्मायानाम्ना व्याहरन्ति। मानकारणमिति, अमितम् मिमीते सा वर्त्तते माया। अथ च मिमिते मितमिति माया। निःसीम्ना पदार्थेन सह ससीमायाः मायायाः सम्बन्धः केन प्रकारेण समजायत इति। अथ च निःसीम्नि तत्त्वे ससीम्नस्तत्त्वस्य सम्मेलनङ् केन प्रकारेण समजायत, असीम्ना तत्त्वेन ससीम्नस्तत्त्वस्य सम्बन्धो कथमभूदितिः अथ च निर्विकारे, शुद्धे, एके, रसे, विकारिणस्तत्त्वस्य सम्प्राप्तिः केन प्रकारेण जायत इत्ये एता नि नैकविधानि तत्त्वानि विकारीणि परिच्छिन्नानि बलानि कुतः सम्प्राप्तानी त्यादिकाः वार्त्ताः बुद्धेरगम्याः सन्ति। एतद्बलतत्त्वम् मायानामधेयन्तत्त्वं वा वर्त्तते सर्वथाऽनिर्वचनीयम्।

मायया सीमाबद्धः सन् माया-विशिष्टो रसः सदाऽव्ययनाम्ना व्यवह्रियते यद्यप्यव्यये पुरुषे बलेन परिच्छेदस्तु समजायत, तथापि तत्र ग्रन्थिर्नास्ति, अर्थात्

बलतत्त्वन्तद् बद्धुन्नैव शक्नोति । अतएवाऽयं परमपुरुषो रसः, अव्ययपुरुषः, सृष्टेः समुपादानकारणन्निमित्त-कारणं वा न भवति । केवलमालम्बनत्वेनैव तिष्ठति । यतो ह्ययं विकाराऽत्मिकायाः सृष्टेः परस्माद् विराजते । अतएव तत्त्वमेनद् पुरुषः परमपुरुषः पुरूषोत्तमश्चेत्यादिभिर्नामभिः समभिदधति ।

उपर्युक्तमव्ययाऽऽत्मानमेव वेदान्तिनो माया-शबलितं ब्रह्मे ति व्याहरन्ति पञ्चदश्यां तत्त्वमेनदेव घट्टितवस्त्रेण समुपमितञ्चक्रुः, संसारस्वरूपिणे चित्राय सदाऽऽधारभूतमिति । तत्त्वेऽमुष्मिन् द्वौ भागौ स्तः, यौ रस-बले, ज्ञान-कर्मणी, अमृतमृत्यू वा वक्तुं शक्येते । श्रुतिरेनद् वर्णयति—

न तस्य कार्यङ् करणञ्च विद्यते, न तत् समश्चाभ्यधिकश्च दृश्यते ।
परास्य शक्तिर्विविधैव श्रूयते, स्वाभाविकी ज्ञान-बल-क्रिया च ।।
श्वेताश्वतरोपनिषदि ८६ ।

मन्त्रस्याऽस्य चतुर्थेन चरणेन बलस्याऽनिर्वचनीयतायाः भूयोऽपि समर्थनं जायते यतोऽत्राऽव्यये पुरुषे ज्ञान-बले स्वाभाविके वर्णिते । स्वभावश्च भवत्यचिन्त्यः स्वभावोऽ चिन्त्यः प्रोच्यते । अचिन्त्य-वस्तुभ्यश्च तर्क-प्रयोगो वैयर्थ्यं तामाप्नोति । यतस्त्र महाभारते लिखितमस्ति——

अचिन्त्याः खलु ये भावाः न तांस्तर्केण योजयेत् ।
महाभारते भी० ५ १२ ।।

श्रीमद्भगवद्गीतायामपि पञ्चमाऽध्यायस्य चतुर्दशे श्लोके लिखितमस्ति यत्—

"न कर्तृत्वं न कर्माणि लोकस्य सृजति प्रभुः"

असावेवाऽस्ति पुरुषोऽव्ययः समुपवर्णितोऽत्रेति स्पष्टीभवति

बलेन कृते परिच्छेदे, परिच्छिन्ने रसे केन्द्रमेकं सञ्जायते । तस्मिन्नेव केन्द्रे ऽत्र ईच्छाशक्तिः समुत्पद्यते । ईच्छाशक्तिमेनां श्रुतिरेवम्प्रतिपादयति—

"एकोऽहं बहुस्याम् प्रजायेय"

अर्थात् परमात्मनो ऽव्ययात्मनो ह्येतादृशी सदीच्छा जायते, यदहमेव सर्वथैकः सन्नऽपि नैकेषु रूपेषु प्रकटीभूयाम् इति। अर्थात् सृष्टिङ्कुर्यामिति समपेक्षा समजायत। कृतया ऽनयेच्छया मायाबले, कामाश्रयः तपश्चैतन्नामधेयानि त्रीणि बलानि भूयोऽप्युत्पद्यन्ते। यानि श्रुतिः प्रतिपादयति सोऽत्रकामयत "सोऽत्राऽश्राम्यत सोऽत्र तपोऽतप्यत" इति।

यथा भवन-निर्माण-वेलायामिष्टिकायामिष्टका निधीयते तथैव बले बलं निधीयते। यद्यपि प्रत्येकम्बलन्न भवति परस्परमाधारभूतङ् क्षणिकत्वात्। तथापि स्थिरस्य रसस्य समाश्रयेण धाराप्रवाहि सत् स्थिरमिव जायते। तथा चानेन प्रकारेण बले बलम्बलेबलमित्याकारकञ्चयनञ्जायते। बले बलस्य संसर्गरूपिणी सम्बन्ध-रूपिण्येव सृष्टिरस्ति। संसृष्टिशब्दे समित्यस्य लोपे सति सृष्टि वावशिष्यते। बलानाम् प्रक्रियया ऽनया निष्कलेऽव्यये पुरुषे पञ्चकलाः प्रकटीभवन्ति। समुत्पन्नायाञ्च शक्तौ तस्याः नाम मनो भवति। परमेतन्मनो भूतात्मनो मनसः, इन्द्रियात्मनो मनसश्च सर्वथा भिन्नम्भवति। चितेः कारणेनैनज्जनाः चिद्युत्पुरुषश्चिदात्मा वा व्याहरन्ति। चितिः भवति द्विविधा, ऽन्तश्चितिर्बहिश्चितिश्चेति। या चितिः सृष्टिम्प्रति प्रेरयति, तथा यया चित्या कर्मणां प्राबल्यम्भवति रसस्य चाऽऽवरणञ्जायते तस्याः नाम बहिश्चितिरस्ति। चितिरेषा ग्रन्थि-ग्रन्थिन्येव भवति।

यथा चिति—शक्त्या कर्म-ग्रन्थिर्भिद्यते कर्माणि च भवन्ति लीनानि तया च रसस्य विकासो जायते, तस्याः नामान्तरञ्चितिरित्यस्ति। ग्रन्थि-ग्रन्थनम्भेदनं चाऽप्युभेऽपि कर्मणी कर्मणां विपाकभूते वर्त्तेते, अतोऽत्रद्वेऽपि चितिबलस्यैव। अन्तः चिति कारणताङ्गच्छति मोक्षस्य, तथा च बहिश्चितिः कारणताङ् गच्छति सृष्टेः। बहिश्चितेः प्राणवाचौ प्रकटिते भवतः। अन्तश्चितेश्च विज्ञानाऽऽनन्दाख्ये बले विकसतः। एवं चाऽव्ययेपुरुषे पञ्चकलाः प्रकटीभवन्ति तासान्नामानीपीत्थम्भूतानि वर्त्तन्ते। आनन्द-कलाः, विज्ञानकला, मनोकला, प्राणकला, वाक्कला चेति। एता एव कलाः तैत्तरीयोपनिषदि पञ्चकोशनाम्ना व्यपदिष्टाः सन्ति। तत्र वाक्कलायाः नाना ऽन्नमस्ति। कोषशब्दस्यार्थो भवति निधानन्निधिरिति। अक्षर-क्षर-पुरादीनि यानि तत्त्वानि समुद्भवन्ति तेषान्तेषां समेषामऽपि तत्त्वानां समालम्बनन्निधानं वैताः सर्वाः कलाः सन्ति। एताभिरव्ययपुरुषस्य पञ्चभिः कलाभिर्विना न कथञ्चिदपि जगतां सृष्टि-स्थिति लयाः सम्भवन्ति।

परिच्छिन्नं सीमाबद्धं वा तत्त्वम्भवति सर्वथाऽपूर्णम् । तथा च तत् स्वभावत एव पूर्णत्वाय प्रवर्त्तते । यत्तत्त्वं यस्मात्तत्त्वान्निःसरति तत्तत्त्वम् तस्मिन्नेव तत्त्वे लयमेति । तथा च यद् भवति यस्यावयवम्, तत् प्रति भवति गतिमत् । यथा-भूत मृत्खण्डम्पृथिवीम्प्रति । जलवाष्पं गगनम्प्रति । जलविकारो धूम्रश्चाकाशम्प्रति । तेजः सूर्यम्प्रति, भवति सर्वथा गतिमत् । अपूर्णस्य वाऽपेक्षया पूर्णम्प्रति जिगमषैव आकर्षण-सिद्धान्तः, स च वर्त्तते साम्प्रतिकैः वैज्ञानिकैश्चाऽपि समनुमोदितो । उक्तमेवास्ति, यत् सो ऽयमव्ययो पुरुषो रस-बलोभयात्मको भवति, तथा चैवमप्य-भिधातुं शक्यते, यदसौ ज्ञान-कर्मोभयात्मको ऽस्तीति । सोऽत्र यद्यपि रसरूपेण पूर्णोऽस्ति तथापि बलरूपेण सीमानिबद्धोऽपि वर्त्तत एव । अतो पूर्णम्बलम्पूर्णम्प्रति जिगमिषति । यतस्तस्याऽपि विकासो पूर्णादेवाऽजायत ।

पूर्णत्वाय चैतद् भवति समपेक्षितं यत्-स्वस्माद्भिन्नानि यानि सन्ति तत्त्वानि तानि समान्यपि स्वायत्तीकुर्यात्, समुररीकुर्याद्वाः । तानि तानि स्वान्नत्वेन परिणयमय्य समशनङ् कुर्यात् । अस्याः प्रवृत्तेरेव श्रुतौ बलत्वेन प्रतिपादनमस्ति, यत् 'अशनायालब,म्'' मृत्युनैवेदमावृतमासीत्, ''अशनायया, अशनाया हि मृत्युः'' बृहदा-रण्यकोपनिषद् १-२-१ श्रुतिरियं सृष्टेः प्रारम्भावस्थायामेवाऽशनायाबलस्य स्थितिं द्योतयति । उक्तमेवात्र बलस्य नाम मृत्युश्चापीति । यतस्तद्बलम्मरणधर्मि वर्त्तते । अशनायाबलमन्येषु बलेषु समाक्रमणङ् कृत्वा तानि बलानि स्वात्मसात् करोति । प्रक्रियैषा आदानक्रियेति नाम्ना व्यवह्रियते । अनया प्रक्रियया सहैव प्रदानक्रियायाश्-चापि प्रारम्भणम्भवति । उभे हीमे आदान-प्रदानक्रिये चेदनवरतगतिकतया प्रचलिते स्याताम्, तदा तु पदार्थस्य स्थितिरपि न कथञ्चिदपि भवितुमर्हति । अतएवैतयोः सहैव प्रतिष्ठाबलमपि तिष्ठति । प्रतिष्ठाबलं चाऽऽदान-प्रदानक्रिययोः सत्तायामपि वस्तुनः सत्तामादधाति । आदानक्रियाबलं, प्रदानक्रियाबलं, प्रतिष्ठाबलञ्चेति त्रीण्यपि बलान्यव्यय-पुरुषस्य प्राणकलायाः समालम्बनतो प्रकटितानि भवन्ति । तथा चैतान्यक्षरनाम्ना व्यवह्रियन्ते । यद्यपि पूर्वोक्त-प्रकारकाः पुरुषाः अक्षर-पुरुषाः बलाऽऽत्मकाः सन्ति । परमत्र रसाधारं विना बलस्य स्थितिरेव नास्तीति रसात्मकोऽ व्ययः पुरुषः समेष्वेतेषु समन्वितः समनुस्यूतो व्याप्तोऽन्तःप्रविष्टश्चास्ति । अतएवैतेषाम्बलानामाधारभूतो ऽव्ययोपुरुष विराजते । इत्येतस्मादेव कारणादक्षरो-ऽप्यऽयम्पुरुषो वर्त्तते ।

अक्षरपुरुषस्याऽपि पञ्चकलाः सन्ति, ताश्चैवम्—

ब्रह्मकला, विष्णुकला, इन्द्रकला, अग्निकला, सोमकला चेति। पूर्वोक्तेन प्रतिष्ठानामकेन बलेन समवच्छिन्नो रसो विष्णुः, उत्क्रान्ति-त्याग-विसर्ग-प्रदानबलाऽवच्छिन्नो रस इन्द्रनाम्ना समभिधीयते। पौराणिकास्तत्त्वमेनदेव रुद्रनाम्नाऽपि व्यवहरन्ति यदा दानबलमन्यानि बलानि स्वायत्तीकरोति, तदा तत्राऽन्नमन्नादभावौ जायेते। एवं चैकं वस्तु वस्त्वन्तरेण स्वायत्तीकृतम्भवति। यद्वस्तु वस्त्वन्तरस्यान्तर्गञ्जायते तस्य नाम भवत्यन्नमिति, तथा च यद् वस्तु वस्त्वन्तरमात्मसात् करोति वस्तुनस्तस्य नामाऽन्नादमिति जायते।

तदन्नमेव सोमनाम्ना व्यवह्रियते। तथा च सोऽन्नाद एवाऽग्निनाम्ना समभिधीयते। एतासाम्पञ्चदेवतानामेवाऽवान्तरभेदेष्वन्तर्भवन्ति सर्वाः देवताः श्रुतौ च प्रतिपादितमस्ति—

यदक्षरम्पञ्चविधं समेति युजो युक्ता अभि यत् संवहन्ति
सत्यस्य सत्यमनु यत्र युज्यते तत्र देवाः सर्व एकीभवन्ति ।।

ऐतरेयोपनिषद् आ० २, ३, २०,

उपर्युक्तासु पञ्चकलासु ब्रह्म-विष्णु-रूद्राख्याः तिस्रो कलाः हृदये तिष्ठन्ति। हृदयम्भवति केन्द्रम्। अतएवैताः कलाः हृद्यारित्युच्यन्ते अग्निसोमाऽऽख्ये कले बाह्ये वर्त्तेते। हृदये ऽपि ह्येते त्रयो ऽक्षयाः सन्ति। अस्मिन् हरणे आदानयज्ञस्योद्बोधको वर्त्तते हृ नामको ऽक्षरः एनदेव तत्त्वं हरिः, विष्णुश्चेति प्रतिपादयन्ति। द दानस्य विसर्गस्य सूचको भूत्वा इन्द्रस्योद्बोधको भवति, एतदेव तत्त्वं रुद्रनाम्नाऽपि व्याहरन्ति। य यमनस्य प्रतिष्ठायाः सूचको भूत्वा ब्रह्मसञ्ज्ञां समधिगच्छति, ययाऽव्ययस्य प्राणकलायामक्षरपुरुषस्य विकासः समजायत। तथैवाऽक्षरस्याग्निसोमात्मके कले ऽग्निसोमाख्ये वर्त्तेते। उभेऽपीमे कले क्षरपुरुषनिर्माणे बाह्यपिण्डाऽऽत्मनो भूताऽऽत्मना वा निर्माणे समुपयोगिन्ये भवतः। अथ च प्रधान्येन स्वयमेव तन्निर्माणं विदधतः। यतो वैदिकं विज्ञानमनुसृत्य शक्ति-रूपादक्षरपुरुषादेव भूतरूपो क्षरो विकसितो भवति। प्राण एव रयिनामधेयस्य तत्त्वस्य समुत्पादको वर्त्तते। आधुनिकं विज्ञानमनुसृत्याऽपि "फोर्स" इत्याख्यं तत्त्वमेव मेटरनामधेयन्तत्त्वन्निर्मीति श्रुतिश्चाऽस्ति—

"अर्द्धंवै प्रजापतेरात्मनो मर्त्यमासीदर्द्धममृतम्"

अर्थादक्षररूपस्य प्रजापतेरर्धभागो मर्त्यङ्क्षरतत्त्वम्भवति, तथा चार्धऽभागो भवेत्यक्षरतत्त्वममृतम्। अस्य क्षरपुरुषस्याऽऽलम्बनमव्ययपुरुषस्य पञ्चमी कला वाङ् नाम्नी वर्त्तते। अतएव श्रुतावपि प्रतिपादितमस्ति यत्—

"अथो वागेवेदं सर्वम्" (ए० आ० ३—१६)

क्षरपुरुष एव समस्तायाः सृष्टेरुपादान-कारणमस्ति। अतएव सोऽयमनेकेषु भावेषु समवलोक्यते। क्षरपुरुषस्याऽपि पञ्चकलाः सन्ति। परन्तु प्रत्येकस्मिन् भावे तस्य पञ्च-पञ्चकलानाम्पृथक् पृथङ्नामानि सन्ति, तानि चेत्थमत्राऽवधेयानि आत्मक्षरस्य कलानान्नामानि ब्रह्म-विष्णु-इन्द्र-अग्नि-सोमेति सन्ति। एतानि समान्यपि सन्त्यक्षर-पौरूषेयाण्यपि। परमत्र मर्त्य-क्षरदशायान्तु सर्वासामपि ह्येतासामेव पञ्चानामपि कलानाङ् क्रमशः-प्राणकला, वारिकला, वाक्कला, अन्नकला अन्नादकला चेति नामभिर्भवति विकासः। एतेषां मर्त्याऽक्षराणां वेदान्तस्य पञ्चीकरण प्रक्रियामनुसृत्य पञ्चीकरणाऽऽत्मको यागो भवति। प्रक्रियया चाऽनया पश्चात् पञ्चपिण्डानां समुत्पत्तिर्भवति। यस्याऽस्ति विवरणमित्थम्—

१— यत्रार्धो भागो भवति प्राणस्य तथा चार्धो भागो भवति वारि-वागन्नाऽन्नादानाम्। तत्प्राण-प्रधानम्मण्डलम्, स्वयम्भूमण्डलनाम्ना व्यवह्रियते।

२— यस्मिन् मण्डले भागार्धो भवत्यपाम्, तथा चार्धो भागो भवति तदतिरिक्तानां प्राणवागन्नाऽन्नादानाम्, तन्मण्डलम्परमेष्ठीमण्डलनाम्ना व्यवह्रियते।

३— यस्मिन् मण्डले भागार्धो भवति वाचाम्, तथैव च भागार्धो भवति प्राण-वाग्-अन्न-अन्नादानाम्, तन्मण्डलम् वाक्प्रधानम्भवति, तस्य नामनी इन्द्रमण्डलं सूर्यमण्डलञ्चेति वर्त्तेते।

४— इत्थमेव यस्मिन् मण्डले भागार्धो भवत्यन्नस्य तथा च भागार्धो भवति प्राण-वागबन्नान्नादानान्तन्मण्डलम्, भवत्यन्नप्रधानं तस्मात्तन्मण्डलञ्चन्द्र-मण्डलमिति व्याहरन्ति।

५— एवमेव यस्मिन् मण्डले भागार्धो भवत्यन्नादस्य भागार्धश्च भवति प्राण-अप्-वाग्-अन्नानाम्, तन्मण्डलम् अन्नादप्रधानम्मण्डलम्भवति तस्मात्तत् पृथिवीति नाम्ना व्यवह्रियते।

प्रकारेणाऽनेन यज्ञ-क्षरस्य पञ्चकलाः स्वयम्भूः परमेष्ठी, इन्द्रः सूर्यो वा चन्द्रो पृथिवीति नामभिः सुप्रथिताः सन्ति। यासाङ्कलानां वर्णनमस्ति मनुस्मृतौ। तद्यथा—

ततः स्वयम्भूर्भगवान् अव्यक्तो व्यञ्जयन्निदम्।
महाभूतादि वृत्तौजाः प्रादुरासीत्तमोनुदः ।।
योऽसावतीन्द्रियग्राह्यः सूक्ष्मोऽव्यक्तः सनातनः।
सर्वभूतमयोऽचिन्त्यः स एव स्वयमुद्बभौ ।।
सोऽभिध्याय शरीरात् स्वात् सिसृक्षुर्विविधाःप्रजाः।
अप एव ससर्जादौ तासु बीजमवासृजत् ।।
तदण्डमभवद्धैमं सहस्रांशु-समप्रभम्।
तस्मिन् जज्ञे स्वयम्ब्रह्मा सर्वलोकपितामहः ।।
तस्मिन्नण्डे स भगवान् उषित्वा परिवत्सरम्।
स्वयमेवाऽऽत्मनो ध्यानात् तदण्डमकरोद् द्विधा ।।
ताभ्यां स शकलाभ्यां च दिवं भूमिं च निर्ममे।
मध्ये व्योम दिशश्चाष्टावपां स्थानञ्च शाश्वतम् ।।

(मनुस्मृति १, ६, ९, १२, १३)

अत्र हैमाण्डशब्दाभ्यामप्राथमिक्यामवस्थायां सूर्यमण्डलमस्तीति सूचितम्भवति। अस्मिन् इन्द्रप्राणस्य प्राधान्यमस्ति यथाग्निगर्भा पृथिवी, यथा द्यौरिन्द्रेण गर्भिणी, तथा मण्डलस्यास्य चाऽनयोर्भागयोर्वर्त्तमानः सूर्यो दिव् शब्देन बोधितो भवति। अत्र ब्रह्मा सूर्यमण्डलस्थो प्रजापतिः; व्योमाऽन्तरिक्षस्थश्चन्द्रः। एषा पञ्चमण्डलरचना लोक-सृष्टिः, भुवनसृष्टिर्वा समभिधीयते।

मण्डलेष्वेतेषूत्तरोत्तरम्मण्डलम्पूर्वपूर्वमण्डलस्य व्याप्तौ समुत्पद्यते तथा च पूर्वेणैव बद्धः सन् तस्यैव वशे तिष्ठति। यदा चन्द्रो पृथिव्याः व्याप्तावन्तर्गतो भवति। तथा चानयैवाऽऽबद्धः सन् अस्या एव परितो परिक्रामति। सूर्यो परमेष्ठि-मण्डलव्याप्तावन्तर्गतो भवन् तेनैव बद्धः सन् तदेव परिक्रामति। परमेष्ठी स्वयम्-भूमण्डलस्य व्याप्तावन्तर्गतः सन् तेनैव सुसम्बद्धः तदेव परिक्रामति। एतानि पञ्च-मण्डलानि विश्वस्यैकवत्शानाम्ना व्यपदिश्यन्ते। तद्विषये चाऽस्ति लिखितम् यत्- "पञ्चपुण्डीरा प्रजापत्यवत्शा-शाखा" इति। तथैवानेकाः वत्शाः नैकाः शाखाः गगने व्याप्ताः सन्ति। एतेषु पञ्चषु क्षरमण्डलेषु ह्येकैकस्य अक्षरप्राणस्य प्राधान्य-

मस्ति । अतएवैते ऽक्षरनामभिश्चाऽपि प्रोच्यन्ते । स्वयम्भूमण्डले ब्रह्मा, परमेष्ठिमण्डले विष्णुः, सूर्यमण्डले इन्द्रः, पृथिवीमण्डले ऽग्निः, चन्द्रमण्डले च सोमो प्राधान्यम्भजन्ते । अतएवैतानि मण्डलानि ब्रह्ममण्डलम्, विष्णुमण्डलम्, रुद्रमण्डलम्, अग्निमण्डलम्, सोममण्डलमित्यऽपि समुदीर्य्यन्ते । एतेषु पञ्चमण्डलेषु पृथिवी-सूर्यस्याऽन्तरिक्षे वर्तमानं चन्द्रमण्डलञ्चेति मण्डलगणनायां सङ्ख्यायेते । परमत्र सूर्यमण्डल-परमेष्ठिमण्डलयोरन्तरिक्षे वर्तमानं ब्रह्मणस्पति-मण्डलं वरुणमण्डलम्, तथैव परमेष्ठि-स्वयम्भूमण्डलयोर्मध्ये वर्त्तमानं विश्वकर्मामण्डलञ्चाऽपि नैवगण्यतेमण्डलगणनाऽवसरे । इत्थमेव सन्ति बहूनि मण्डलान्येतादृंशि यानि नैव गण्यन्ते मण्डलगणनायाम् । तत्राऽस्ति बीजं यत्तैस्तैर्मण्डलैः सह नास्ति पृथिव्याः कश्चन सम्बन्धः साक्षात् । किञ्च चन्द्रमण्डलेन वर्त्तते साक्षात् सम्बन्ध इति तस्य गणना क्रियते । चेत्तयोरन्तरिक्षयोर्गणना क्रियेत, तर्हि सप्तलोकानां सङ्ख्यापूर्त्तिर्जायते । येषाञ्च नामानि भूर्लोक-भुवर्लोक-स्वर्लोक-महर्लोक-जनोलोक-तपोलोक-सत्यलोकश्चेत्येतानि सन्ति । भूर्लोकेति नाम पृथिव्यारस्ति । भुवर्लोकेति नामान्तरिक्षस्याऽस्ति । स्वर्लोकेति नाम द्युलोकस्य सूर्यलोकस्य वा वर्त्तते । महर्लोकेति नाम द्वितीयस्याऽन्तरिक्षस्य वर्त्तते । जनोलोकेति नाम परमेष्ठिमण्डलस्य वर्त्तते । तपोलोकेतिनाम तृतीयस्याऽन्तरिक्षस्य वर्त्तते । सत्यलोकेति च स्वयम्भूमण्डलस्य नामाऽस्ति । एतेषु तिस्रो पृथिव्य स्त्रीण्यन्तरिक्षाणि त्रयश्च द्युलोकाः सन्ति । प्रकारेण चानेन नवलोकाः स्युः; किन्तु मध्ये स्थानयोर्द्वयोः दिवम्पृथिवी चेति परस्परमेकरूपे भवतः । अतएवोच्यते लोकाः सप्तैव सन्तीति । उदाहरणरूपेण—

अस्मत्पृथिव्यपेक्षया सूर्यो दिवमिति व्यवह्रियते । परमत्र दिवम्पृथिवीम्मन्वानस्य परमेष्ठिमण्डलं दिवम्भवति । तथैव परमेष्ठिमण्डलं पृथिवीत्वेन परिकल्प्येत तर्हि तत् कृते स्वयम्भूमण्डलन्दिवम्भवति । प्रकारेण चानेन सूर्यपरमेष्ठिनौ पृथिवीरूपिणावपि दिव्रूपिणौ चापि वर्त्तेते । परमत्राऽन्तरिक्षाणि त्रीण्यऽपि पृथक् पृथगेव तिष्ठन्ति । लोकव्यवहारे प्रसिद्धा त्रिलोक्यऽपि एभिरेव भवति । श्रुतावऽपि च तिसृणामऽपि पृथिवीनान्त्रयाणामऽपि द्युलोकानां वर्त्तते बहुत्र वर्णनम्---

"तिस्रो मातृस्त्रीन् पितृन् बिभ्रदेकः ।"

(ऋग्वेदे १ । १६४ । १० ।)

तिस्रो द्यावो निहिता अन्तरस्मिन् तिस्रो भूमीरपरा षड्विधानाः ।
(ऋग्वेदे ५ । ६ । ६ ।)

विषयस्यास्य स्पष्टीकरणार्थं निम्नाङ्किते चित्रे समवधेयम्—

पृथिवी[1] **अन्तरिक्षम्[1]** **दिव्[1] सूर्यः पृथिवी[2]**
भूः **भुवः** **स्वः**

रोदसी त्रितोकी

2 अन्तरिक्षम् 2 दिव्परमेष्ठिपृथिवी 3अन्तरिक्षम् दिव्स्वयम्भूः
महः जनुः तपः सत्यम्

क्रन्दसीत्रिलोकी

संयती त्रिलोकी

एते स्वाम्भुवादिपञ्चयज्ञाः क्षराः अधिदैवतक्षरावेंति समुदीर्य्यन्ते। एभ्यो क्रमशो पञ्च आध्यात्मिकाः क्षराः सञ्जायन्ते, ये हि प्रत्येकस्मिन् प्राणिनि वर्त्तमानाः सन्ति । नामानि चैतेषान्निम्नाङ्कितेन प्रकारेण सन्ति । तानि चेत्थम् —

१ अव्यक्तम्, २ महान्, ३ विज्ञानम्, ४ प्रज्ञानम्, ५ शरीरम्, इत्येतानि सन्ति।अत्रशरीरशब्देन स्थितं दृश्यमानं शरीरङ् गृह्यते।इन्द्रियसहितम्मनो प्रज्ञानमिति व्यपदिश्यते। बुद्धिस्तु विज्ञानेति नाम्ना समभिधीयते। महतस्त्रयो भेदाः जायन्ते। आकृतिमहान्, प्रकृतिमहान्. अहङ्कृतिमहांश्चेति। आकृतिमहान्तमनुसृत्यैव प्रत्येकस्य प्राणिन आकृतिर्जायते। अर्थादत्र समेषामपि प्राणीनामवयव-सन्निवेशनानि कुत्रचित् स्थौल्यम्, कुत्रचित् कार्श्यम्, कुत्रचिदायतिः, कुत्रचिच्च कनीयस्त्वानि जायन्ते। यथा च गीतायामपि प्रतिपादितम्—

सर्वयोनिषु कौन्तेय मूर्त्तयः सम्भवन्ति याः ।
तासां ब्रह्ममहद्योनिरहं बीजप्रदो पिता ॥"

प्रकृतिमहान्तं समनुसृत्य प्रत्येकस्य स्वभावो विनिर्मीयते । इत्यमेवाऽहङ्कृति-महतश्चाहङ्कारस्वरूपञ्जायते । प्रज्ञानं विज्ञानं महांश्चेति मिलित्वा सूक्ष्मशरीरमिति सञ्ज्ञानं समधिगच्छन्ति । अव्यक्तमस्ति कारणशरीरम् । यस्मादुभयोरपि स्थूल-सूक्ष्मयोः स्वरूपयोर्विकासो भवति ।व्यष्टेः नैकविधानां व्यक्तीनामथ चैतेषां पञ्चा-नामाध्यात्मिकानाङ्क्षराणां समष्टिरूपयुक्ताः पञ्चसङ्ख्याकाःसन्त्याधिदैविकाः क्षराः । यतस्तेषाम्पञ्चानामपि मण्डलानां रसेभ्य एवैते क्रमशः समुत्पद्यन्ते ।

आध्यात्मिकस्य क्षरपुरुषस्य पञ्चकलाः प्रकारान्तरेणाऽपि सन्ति प्रतिपादिताः । ताश्चेत्थम्—

१. बीजमिति कारणशरीरम् ।
२. देवचितिः सूक्ष्मशरीरम् ।
३. भूतचितिः स्थूलशरीरम् ।
४. प्रजापुत्रादिरूपा ।
५. वित्त-सम्पत्तिरूपा चेति ।

प्रक्रियायामस्यां यावत् क्षरात्मनो व्याप्तिरस्ति, तावत् समेषामपि बाह्यपदा-र्थानां सङ्ग्रहोऽपि भवति । मतान्तरे तान् पशुशब्देनाऽपि व्यपदिशन्ति । किन्तु नैते त्रिपुरुषगणनायाङ् गण्यन्ते ।

सारांशोऽयमस्ति, यत् सम्पूर्णस्याऽपि जगतः पादानकारणङ्क्षरपुरुषस्तस्मिन् सर्वथा ऽव्यक्तेन स्वरूपेण तिष्ठन् शक्ति-विशेष-रूपेण तत् चालयन् तन्निमित्तकारणं "अक्षरो पुरुषः" तथा चैतयोः क्षराऽक्षरयोः समालम्बनीभूतो कार्य-कारण-भावातीतोऽव्ययः पुरुषः समुदीर्य्यते । यद्यप्ययमव्ययो पुरुषः सृष्टौ न किमपि कार्यङ्करोति । 'सर्वथा निर्विकारणरूपेण' निष्क्रियरूपेण चाऽवतिष्ठते, परमसौ वर्त्तते रसमय-स्तस्यैव रजसो क्षराऽक्षरयोः समनुस्यूतः, समन्वितोऽभिव्याप्तश्च वर्त्तते । अव्यय-पुरुषरसाऽऽश्रयेणैव क्षराऽक्षरयोः पुरुषयोः स्थितिरस्ति । रसं विना न कथञ्चिदपि क्षराक्षरौ स्थातुं शक्नुतः । अतएव समन्वयात्मकत्वात् सर्वथाऽ यमव्ययपुरुष एव समस्तायाश्चाऽपि सृष्टेः मूलङ्कारणमिति व्यपदिशन्ति ।

वार्त्तैषा दृष्टान्तेनाऽपि स्पष्टीकर्त्तुं शक्यते—

यथा समुद्रादिषु जलाशयेषु क्रियाः वीचिनामेव भवन्ति वीचय एव च फेना-

दीनि सृजन्ति । परमेतासां वीचीनां सर्वथा समाश्रयभूतं जलमेव न स्यात्तर्हि न कथञ्चिदपि वीचयः स्थातुमर्हन्ति, नचोद्भवितुमेव शक्नुवन्ति ।

यथा च जलाधारको भवति घटो किन्तु चेदाकाशो न स्यात्तर्हि जलाधारो घटस्तथा च जलमपि कुत्र स्थितिङ्करोतु । सदुदाहरणाभ्यामेताभ्यां स्पष्टीभवति यदत्राऽवान्तरकारणानि भवन्ति सर्वथा मूलकारणमूलकानि ।

अतोऽत्र ये केचन सर्वथैकदेशीयाः साङ्ख्याः केवलम ऽव्यक्तङ्क्षरमेव सृष्टि-कारणत्वेन समुररीकुर्वन्ति, तथा च तदेवाऽस्ति परमन्तत्त्वमिति मन्वते । ताभ्यां भगवता श्रीकृष्णेन भगवद्गीतायाम्भर्त्सनङ्कृतमस्ति ।
तद् यथा—

अव्यक्तं व्यक्तिमापन्नम्मन्यन्ते मामबुद्धयः ।
परम्भावमजानन्तो ममाऽव्ययमनुत्तमम् ।।

(श्रीमद्भगवद्गीतायाम् ७—२४)

अर्थात् केचन अबुद्धयः—

गम्भीर-विज्ञान-बुद्धिहीनाः, लोकाः, माम्पुरुषोत्तमम्परमतत्त्वम्परमात्मानम्, अव्यक्तमर्थादक्षरं शक्तिविशेषरूपङ्कथयन्ति । तथा तस्यैव व्यक्तिं प्रकटतां जगदिति मन्वते । ते सुनिश्चितरूपेण मे परमोत्तमं सर्वोत्कृष्टं परभावन्नैव जानन्ति । परमपुरुषो परमात्माऽकर्त्ता ऽव्ययश्च सन्नपि वर्त्तते कर्त्ता भर्त्ता संहर्त्ता । गीतायामेव प्रतिपादितमस्ति, यत्—

"तस्य कर्त्तारमपि मां विद्ध्यकर्त्तारमव्ययम्"

(श्रीमद्भगवद्गीतायाम् ४ ।१३ ।)

उपर्युक्ताः पञ्चकलाः क्षरपुरुषस्य, पञ्चकलाश्चाक्षरपुरुषस्य तथैव पञ्च-कलाश्चाव्ययस्य पुरुषस्याऽपि भवन्ति । एताः सम्मेल्य भवन्ति पञ्चदशकलाः । तासां सर्वासामपि कलानान्निष्कले सर्वथाव्यये मायाविशिष्टे रसे परात्परे वा तत्त्वे लीनत्वं श्रुतिः प्रतिपादयति । तद् यथा—

गताः कलाः पञ्चदशप्रतिष्ठां देवाश्च सर्वे प्रतिदेवतासु ।
कर्माणि विज्ञानमयश्च आत्मा परेऽव्यये सर्व एकीभवन्ति ।
(मुण्डको ३ । २ । ७ ।)

अयमव्ययो पुरुषः सर्वेष्वपि समनुस्यूतः समन्वितश्च सन्नऽपि निःसङ्गो भवति । सङ्गस्यैव नामान्तरमासक्तिरित्यस्ति । तथा चैनमेव बन्धनाम्नाऽपि व्यपदिशन्ति ।

यथा कस्मिंश्चिदपि पात्रे तैलन्निःक्षिप्यते तर्हि तस्य पात्रस्य तैलेन सह सङ्गो जायते, तथैव पात्रेण तैलस्य सङ्गोऽपि भवत्येव, वस्त्रे च रञ्जनस्य मालिन्यस्य वा सङ्गो भवति । किन्तु यथा दर्पणे प्रतिबिम्बितस्य वस्तुनः सङ्गो दर्पणेन सह नैव भवति, तथैवाऽव्ययस्य पुरुषस्याऽव्यक्षरेण क्षरेण तदन्वितेन समस्तेन जगताऽपि च सह सङ्गो नैव भवति ।

स तु सर्वथा निर्लिप्तः शुद्धो बुद्धो निर्विकल्पकश्च भवति, परमात्माऽ यं सनातनो विराजतेतराम् ।

उपर्युक्तासु पञ्चदशष्वपि कलासु सर्वत्रानुस्यूतो निष्कलो परात्परो रसोऽपि कलात्वेन सम्मेल्येत तर्हि सामञ्जस्येन कलाः षोडशसङ्ख्याकाः भवन्ति । ईश्वरे जीवे चैताः कलाः सन्ति । अतएवैतौ शास्त्रविदः शोडशिनाविति कथयन्ति । परमियानस्ति भेदो यत्-षोडशिन्यव्ययात्मनि परमेश्वरे क्षरेणाऽऽवरणन्नैव भवति । परमत्र जीवेऽव्ययपुरुषस्याऽऽनन्द-विज्ञानाद्याः कलाः क्षरेणाऽऽवृत्ताः भवन्ति । आवरण-कर्त्ता चास्ति कामः, बलम् । जीवे च कामस्यैव भवति प्राधान्यम् । अतो जीवेऽ व्ययात्मा ऽऽवृत्तस्तिष्ठति । यद्यपि "सोऽ कामयत" इत्यादिभिः श्रुतिभिः परमेश्वरेऽपि कामः सिध्यति, तथा च यदि परमेश्वरे कामो न स्यात्तर्हि स सृष्टिमपि केन प्रकारेण कर्त्तुमर्हति । इत्थं यद्यपि तस्मिन् कामो वर्त्तते, तथा च नास्ति काचिदपि भोग-कामना किन्तु वर्त्तते केवलं सर्जनात्मिका मनो विनोदनेहा । आप्तकामत्वादात्मारामत्वाच्च स सुखदुःखादीन्युपभोक्तुन्नेहते । अतएव कामस्तस्याऽव्ययात्मनो समावरणं कर्त्तुन्न प्रभवति । अनावृत्तस्याऽव्ययाऽऽत्मनः प्राधान्यत्वादेव परमेश्वरोऽव्ययस्वरूपेण व्यपदिश्यते । अक्षरस्य ब्रह्म-विष्णु-रूद्राख्याः कलाश्चापि सन्तीश्वरस्वरूपिण्यरिति मन्वते । वस्तुतस्त्वेताः कलाः जीवात्माऽपेक्षयैव परमेश्वरताम्भजन्ते,

अतएवैता: सन्त्यापेक्षिकरूपेणेश्वरा:, इतश्च जीवात्मा स्वयमक्षर: सन्नपि क्षराऽनुगामित्वात् स्वात्मानमपि क्षरमिति मनुते। क्षरस्य पूर्वोक्तासु पञ्चस्वाध्यात्मिकासु कलासु यस्य विज्ञानस्याऽस्ति नाम, तदेवाऽस्ति जीवात्मनोवस्य बन्धमोक्षयो: प्रधानङ्कारणम्। तस्य द्वे रूपे स्त:। एकं स्वरूपं बन्धनस्य हेतुभूतमस्ति। तदेवावरणं दूरीकृत्याऽव्ययाऽऽत्मना प्रकाशङ्करोति। मोक्षस्य हेतुभूतं विज्ञानं व्यवसायात्मिकाबुद्धिरिति नाम्नापि व्यपदिशन्ति। तथा च बन्धनस्य हेतुभूतं विज्ञानमऽव्यवसायाऽऽत्मिका बुद्धिरिति नाम्ना व्यवहरन्ति। कामस्तथा तदुद्भवानि कर्माणि, तथा चैतयो: वासना: सम्भूय यद् रूपं यत्र समावृण्वन्ति तद्रूपं व्यवसायाऽऽत्मकं भवति। तथा च यत्र काम: तदुद्भवानि कर्माणि च नैव भवन्ति तत्र तद्रूपम्भवति व्यवसायाऽऽत्मकम्।

अव्यवसायाऽऽत्मिकाया: बुद्धे: सन्ति चत्वारो भेदा:। ते चेमे—

१—अधर्म:
२—अज्ञानम्
३—अवैराग्यम्
४—अनैश्वर्य्यम्।

एते सर्वेऽपि भेदा: पूर्वोक्तेभ्यो धर्म—ज्ञान—वैराग्यै—श्वर्येभ्यो विपरीता: सन्ति। एतान्येव पञ्चक्लेशनाम्नाऽपि समुदीर्य्यन्ते। तेषाञ्च नामानि योगदर्शने सन्ति। तानि चेत्थम्—

अविद्या-अस्मिता-राग-द्वेषाऽभिनिवेशारिति सन्ति। एतेषां दुष्प्रभावेणैव जीवो बद्धो भवति। तथा चैतेषामसम्पर्केणैव जीवो मुक्ति समधिगच्छति।

इत्थमत्र सङ्क्षेपत: पुरुष तत्त्वस्य निरूपणं सम्पन्नम्भवतीति शम्।

ईश्वरकृष्णेनाऽपि साङ्ख्यकारिकाऽऽख्ये प्रसिद्धतमे ग्रन्थे पुरुषतत्त्वस्योभेऽपि स्वरूपे प्रतिपादिते वर्त्तते। यद्यपि विषयेऽत्र सर्वेषामपि दार्शनिकानामैकमत्यन्नास्ति। परमिह तथ्यमेतदेवास्तीति मे द्रढीयान् विश्वास:।

यत: साङ्ख्यकारिकायाङ्कारिके स्त:
"हेतुमदनित्यमव्यापि सक्रियमनेकमाश्रितंलिङ्गम्।
सवयवं परतन्त्रं व्यक्तं विपरीतमव्यक्तम्॥"
त्रिगुणमविवेकि विषय: सामान्यमचेतनं प्रसवधर्मि।
व्यक्तन्तथा प्रधानं तद्विपरीतस्तथा च पुमान्॥

एतयोः कारिकयोः पुमासन्निर्दिशता लिखितन्तद्विपरीतस्तथा च पुमान् इति। तत्र वैपरीत्यन्तदेव निर्दिश्यते, यत्र विषये व्यक्ताऽव्यक्ततत्त्वेषु परस्परं साम्यं वर्त्तते। अर्थादेतानि तत्त्वानि त्रिगुणानि, अविवेकीनि, विषयताङ्गतानि, सामान्यानि, अचेतनानि च भवन्ति परमेतद्विपरीतः पुरुषस्तु निर्गुणः, ज्ञः, भोक्ता, असामान्यः: चेतनश्च भवतीति।

"तथा च पुमान्" इत्यस्य भावोऽयमस्ति यदत्राऽव्यक्ततत्त्वे यद्व्यक्ततत्त्वेभ्यो-वैपरीत्यं वर्त्तते, तदेवास्मिन् पुरुषेऽपीति पुरुषोऽयमपि प्रकृतिमिव भवतीति तथा-त्वम्प्रतिपाद्यते।

तद्यथा—

यथा प्रकृतिः सर्वेषामपि त्रिगुणात्मकानान्तत्त्वानां मूलोपादानकारणभूता सर्वथाऽहेतुमती भवति, नित्या वर्त्तते, सर्वत्र व्याप्नोति, साम्याऽवस्थापन्नाऽव्यक्तत्त्वेन च निष्क्रियाऽस्ति, एकाकिनी, न किमपि तत्त्वान्तरं समाश्रयते, न च कदाचिदपि कस्मिं-श्चिदपि तत्त्वे लयमेतीत्थमेव पुरुषोऽपि कस्माच्चिदपि नोत्पद्यतेऽतोऽत्राऽस्त्यहेतुमान्, यदुत्पद्यते तदेव विनश्यति यन्नोत्पद्यते न तद्विनश्यतीत्यजत्वादेव नित्योऽपि। यथा प्रकृतिः व्याप्नोति सर्वत्र, तथैव पुरुषोऽपि व्यापको भवति, निरिन्द्रियत्वान्निर्गुणत्वा-च्च भवति निष्क्रियः। एकोऽहंबहुस्याम्प्रजायेयेत्यादि श्रुतिप्रामाण्यादेकत्वमेवास्ति पुरुषस्यापि प्रकृतिमिव। न किमपि तत्त्वान्तरं समाश्रयते, न च कदाचिदपि तत्त्वाऽन्तरे लयमेतीति निराश्रयो निर्लिङ्गश्च भवति। निरवयवः स्वतन्त्रश्चास्ति चेतनः।

इत्थमिह पुरुषस्यैकत्वम्प्रतिपाद्यते।

अन्यत्र च—

जन्ममरणकरणानाम्प्रतिनियमादित्यादिकया कारिकयेश्वरकृष्णेन ताथ च "जन्मादिव्यवस्थातः पुरुषबहुत्वम्" इति सूत्रमनुसृत्य कपिलेन चाऽपि पुरुषबहुत्वं संसा-धितम्। परमिह सर्वथा तथ्यमेतन्न विस्मरणीयं यदयम्पुमानिहाऽजत्वेन स्वीक्रियते।

अजामेकां लोहितशुक्लकृष्णां
बह्वीः प्रजाः सृजमानां सरूपाः।
अजो ह्येको जुषमाणोऽनुशेते
जहात्येनां भुक्तभोगामनुमस्तान्॥

अनया श्रुत्या चाऽपि पुरुषबहुत्वं स्पष्टीकृतमेव। परन्तु अजस्य परमात्मनः पुरुषस्य जन्म भवतीति स्वीकर्त्तुन्नैव शक्यते । यस्य च जन्मैव नैव भवति, तस्य करणानि कुतः, निर्गुणत्वान्नि-रिन्द्रियत्वाच्च करणान्यपि पुरुषस्य नैव भवन्ति, न च "प्रकाशप्रवृत्तिनियमार्थाः" कारिकया च स्पष्टीभवति यदत्र प्रवृत्तिश्चापि रजोगुणं विना न भवति कदाचिदपीति पारमार्थिकरूपेण जन्मादिव्यवस्था पुरुषे नोपपद्यते । अथ च "सिद्धानां कपिलो मुनिः" इति गीतामनुसृत्य श्रीमद्भागवतञ्चानुसृत्य कपिलः स्वयम्भगवतो विष्णोरवतारभूतः समभूदिति तत्प्रतिपादितम्मिथ्याऽपि भवितुन्नार्हति । अतएव शास्त्रेषु प्रतिपादितं जीव स्वरूपमेव निर्दिशता पुरुषबहुत्वमत्र साधितं केवलं व्यावहारिकदृशा । पारमार्थिकदृशा तु पुरुषस्यैकत्वमेव परमात्मत्वेन स्वीकर्त्तव्यम्भवतीति निश्चितम् ।

इत्थमिह साङ्ख्यदर्शनमपि शास्त्रान्तराणीव पुरुषस्यैकत्वं बहुत्वञ्चेत्युभयमपि प्रतिपादयतीति सर्वैः शास्त्रैः सह पुराणैः सहापि च सर्वथा दर्शनस्यास्य समन्वयो जायते तराम् । न चाऽस्य दर्शनस्य नास्तिकदर्शनत्वङ्कथञ्चिदपि सिध्यतीति शम् ।

—०—

प्रकृतिः

साङ्ख्यदृशा मूलतत्त्वत्वेन द्विविधे तत्त्वे स्वीकृते वर्त्तेते । चेतनतत्त्वमचेतनतत्त्वञ्चेति । चेतनतत्त्वस्य विवेचनन्तु पुरुषतत्त्वविवेचनाऽध्याये कृतमस्ति । प्रस्तुतप्रकरणे अचेतनतत्त्वस्य वर्णनं प्रस्तूयते । तत्त्वमेनत् साङ्ख्ये प्रकृतिः प्रधानमव्यक्तमिति नामभिः सङ्गृह्यते । तत्त्वस्यास्य त्रीण्यपि नामानि साङ्ख्यस्य कांश्चन विशिष्टान् सिद्धान्ताननुसृत्य निर्धारितानि वर्त्तन्ते । निखिलमप्येतज्जगत् साङ्ख्यधारणामनुसृत्याऽचेतनस्य तत्त्वस्य विकारभूतमस्ति । यत्किञ्चिद् वयमवलोकयामस्तत् सर्वमनादिकालतोऽनन्तङ्कालं यावदित्थमेव वर्त्तमानन्तिष्ठतीति नैवापित्वेका स्थितिर्भवति यस्याञ्जगदेतद्दृश्यमानं सर्वं स्वरूपातीतमव्यक्ताऽवस्थापन्नं भवति । तदनन्तरङ् क्रमशः कारणात्कार्याणामुत्पत्तिर्भवति । अर्थादव्यक्तात् प्रधानाद् व्यक्तानि महदादीनि तत्त्वानि प्राप्ते काले व्यक्तीभवन्तीत्यर्थः । तथा च प्राप्ते काले तानि सर्वाण्यपि व्यक्तानि तत्त्वानि क्रमशः स्वं स्वङ्कारणमनुप्रविश्याव्यक्तानि सन्ति प्रकृतौ लीयन्ते । अव्यक्ताऽवस्थायास्तत्त्वानां व्यक्तावस्थापरिणतिं सर्गनाम्ना व्यवहरन्ति, तथा व्यक्तावस्थायास्तत्वानामव्यक्तावस्थापरिणतिं प्रलयनाम्ना व्यवहरन्ति तथा प्रलीनानान्तत्वानां स्थितिमव्यक्तनाम्ना व्यवहरन्ति ।

एवमुपर्युक्तानि प्रकृतेस्त्रीण्यपि नामानि प्रकृतिः प्रधानमव्यक्तमिति सार्थकानि सन्ति । तत्र प्रकृतिशब्दः सर्वतः प्राक् सोपपत्तिको व्यपदिश्यते, प्रकर्षेण क्रियते सर्वञ्जगदनयेति प्रकृतिः, प्रश्च कृश्च तिश्चेति समाहारद्वन्द्वे प्रकृतिः अर्थात् सत्त्वरजस्तमसां समवायः प्रकृतिः । यतोऽत्र सत्त्वरजस्तमःप्रकृतिकं सर्वमपि जगत्परिलक्ष्यते । नास्ति पुरुषाऽतिरिक्तङ्किमपि वस्त्वन्तरमेतादृशं यत् सत्त्वरजस्तमोभिः सर्वथा भवेदसम्पृक्तमपि तु वर्त्तते सर्वमपि वस्तुजातन्त्रयाणामपि गुणानान्नैकविधसम्मिश्रणैः नैकविधस्वरूपममिति कृत्वैव प्रकर्षेण क्रियतेऽनयेति व्युत्पत्त्या सर्गस्थितिः संसूच्यते ।

प्रधानम्-प्रकर्षेण धीयतेऽन्तर्लीयते सर्वञ्जगद् यस्मिन् तत्त्वे तत्तत्वम् प्रधानमिति व्यपदिश्यते । निखिलमपि जगज्जालभूतन्तत्त्वजातं स्वदृश्याऽवस्थायाः यत्र परिणमति तच्चेदन्तत्त्वम्प्रधानम्भवति । इत्थं प्रधाननाम्ना तत्त्वस्याऽस्य प्रलयस्थितिः संसूच्यते ।

अव्यक्तम्—

"आसीत् सर्वन्तमोभूतं प्रसुप्तमिव सर्वत" रित्यादिकैर्वचनैर्वर्ण्यमाना मूलोपादानकारणभूता जगतः स्थितिः सर्वेषामपि तत्त्वानामदृश्यरूपेण स्थितिर्भवतीति संसूचकं तत्त्वमव्यक्तनाम्ना व्यवह्रियते। तथा चेदन्तत्त्वं सर्वेष्वपि स्थितिवेलायां स्थितेषु नैकविधस्वरूपवत्सु तत्त्वेषु सर्वथा भवत्यनुस्यूतं त्रिगुणात्मकम्मूलतत्त्वमदृश्यमानस्वरूपेण वर्तमानमिति चाऽव्यक्तनाम्ना तत्त्वमेतद् व्यपदिश्यते।

प्रकृतेः नामान्तराण्यपि समुपलभ्यन्ते साङ्ख्यग्रन्थेषु तानि चेत्थमवबोध्यानि प्रसवधर्मिणी, परिणामिनी, तमस्, अक्षरम्, ब्रह्मा, माया, अविद्या, शक्तिः, अजा, क्षेत्रमित्यादीनि। परन्तु नामान्येतान्युपर्युक्तानां प्रकृतिप्रधानाऽव्यक्तानां व्याख्यानेनैव गतार्थानि भवन्ति। अर्थात् तस्यैवैकस्य तत्त्वस्य विभिन्नस्वरूपकं वैशिष्ट्यं समुपलभ्याऽऽचार्यैस्तानि तानि नामान्तराणि निर्धारितानि। लक्ष्यभूतं वर्णनीयत्वेनोररीकृतं मूलोपादानकारणमेवाऽस्ति नाऽन्यत् किञ्चिदित्यस्ति निश्चप्रचम्।

जगतां मूलोपादानकारणमचेतनतत्त्वमस्ति। साङ्ख्यस्यैष एवास्ति परमः सिद्धान्तः। मूलोपादानकारणविचारवीचिषु सर्वतः प्रागवलोकनीयम्भवति यत्संसारस्य स्वरूपङ्कीदृशमस्ति। जगत्यस्मिन् तत्त्वद्वयमेतादृशं समुपलभ्यते यत् परस्परं सर्वथा भिन्नमस्तीति ज्ञायते। प्रथमन्तत्राऽस्ति प्रकाशस्वरूपकमेकमन्यच्च तमःस्वरूपकम्। प्रकाशस्वरूपकन्तत्त्वञ्चेतनतत्त्वमस्ति, तमः स्वरूपकन्तत्त्वञ्चाचेतनतत्त्वमस्ति। प्रकाशस्वरूपकञ्चेतनतत्त्वमेव पुरुषनाम्ना व्यवह्रियते तथा तमःस्वरूपकमचेतनतत्त्वमेव प्रकृतिनाम्ना व्यवह्रियते।

प्रथमम्पुरुषतत्त्वन्तु प्रथमे प्रकरणे वर्णितमेवाऽस्ति, साम्प्रतन्द्वितीयस्य प्रकृतितत्त्वस्य स्वरूपविचारः प्रस्तूयते—

"सत्त्वरजस्तमसां साम्याऽवस्था वर्त्तते प्रकृतिः। इति सूत्रणेन ज्ञायते यद् भगवता कपिलेन प्रकृतित्वेन साम्यावस्थाङ्गताः सत्त्वरजस्तमः स्वरूपाऽऽत्माकास्त्रयोऽपि गुणाः स्वीकृताः सन्ति। सैवाऽवस्था गुणानां साम्याऽवस्था कथ्यते यस्यां सर्वेऽपि सर्गोन्मुखताविरहिताः भवन्ति। अवस्थैषा च सर्वस्याऽपि जगतः प्रलीनावस्थैव भवति, यत्र निरवधिकं सर्वतो भवति, यद्यपि मूलोपादानकारणन्तु सर्वेष्वपि कालेषु भूत-वर्तमान-भविष्येषु तिष्ठत्येव, किन्तु सर्गकाले कार्यरूपेण दृश्यमानं भवति प्रलयकाले च कारणरूपेणाऽव्यक्तस्वरूपकं भवति। सर्गावस्थायां गुणेषु वैषम्यमुपजायते, यज्जगतान्नैकविधत्वस्य भवति वीजम्। सृष्टौ सत्त्वरजस्तमसां परस्परन्न्यूनताऽऽधिक्ये जगद्वैचित्र्यस्य बीजे स्तः। कस्मिंश्चिद्वस्तुनि सत्वस्याऽऽधिक्यं भवति रजस्तमसोश्च भवति

न्यूनता । तथैव कस्मिंश्चित् पदार्थे रजसो भवत्याधिक्यं, भवति च न्यूनता सत्त्व-तमसोः । इत्थमेव कस्मिंश्चिद् भवति तमसः प्राधान्यं सत्त्वरजसोश्च भवति न्यूनता । अनेनैव प्रकारेण किञ्चित्किञ्चिद्व्यत्यासेन गुणानां स्थितिरेव सर्गे नैकविधताम्भजते । वस्तुतस्तु सर्वमपि स्वरूपजातन्त्रिगुणमयं त्रिगुणात्मिकप्रकृतिमयञ्चास्ति ।

सत्त्वादयो गुणाः किंस्वरूपाः सन्तीति साङ्ख्यषडध्याय्याङ्कपिलेन सूत्रितं यत्-सत्त्वरजस्तमांसि क्रमशः प्रीत्यप्रीतिविषादस्वरूपाणि वर्त्तन्ते । एभिः पदैः जगतां मूलोपादानकारणस्य किंस्वरूपमिति केन प्रकारेण प्रकटीभवतीति ज्ञातव्यमस्ति । सूत्र-कृता यत्र सूत्रे प्रीत्यादिभिर्पदैः सत्त्वादीनां स्वरूपन्निरूपितम्, तत्र प्रीत्यादिभिः सह-आत्मकपदस्यापि प्रयोगो विहितः । येन ज्ञायते यत् प्रीत्यादयः पदाः सत्त्वादीनां वास्त-विकीं स्थितिं प्रकटीकुर्वन्ति । नैकविधाश्चान्येऽपि भावाः प्रीत्यादिभिः सह वर्त्तन्तेऽतएव आत्मकपदस्य सह प्रयोगो विहितः । तैरपि यथा कथञ्चित्सत्त्वादीनां स्वरूपज्ञाने साहा-य्यं समुपलभ्यते ।

साङ्ख्यव्याख्याविद्भिः सत्त्वादीनां प्रत्ययादिषु येषां भावानां समावेशो विहितः तेभ्यः केषाञ्चन निर्देशो ऽधो विधीयते-सत्त्वम्-प्रीतिः, लघु, प्रकाशनम्, सुखम्, ऋजुता, मृदुता, सत्यम्, शौचम्, ह्रीः, बुद्धिः, क्षमा, दया, ज्ञानम्, प्रसादः तितिक्षा, सन्तोषश्चेत्यादिस्वरूपकम्भवतीति बोध्यम् ।

अप्रीतिः उपष्टम्भः, प्रवर्त्तनम्, चलम्, दुःखम्, द्वेषः, ध्रुक्, मत्सरः, निन्दा, स्तम्भः, उत्कण्ठा, तिरस्कृतिः, शठता, वञ्चना, बन्धनम्, वधः, छेदनम्, शोकः, शान्तिः, युद्धम्, आरम्भरुचित्त्वं, तृष्णा, सङ्गः, कामः, क्रोधः, लोभः, मोहः, मदोऽहङ्कारश्चेत्यादिस्वरूपकं रजो भवति । अर्थात् अप्रीत्या सहैवोपष्टम्भनप्रभृतीनि स्वरूपाण्यपि रजोगुणस्वरूपाणि सन्तीति ज्ञेयम् । विषादः, गुरुः, आवरणम्, मोहः, अज्ञानम् मदो, आलस्यम्, भयम्, दैन्यम्, अकर्मण्यता, नास्तिक्यम्, स्वप्नम्, निद्रा, तन्द्रेत्यादिस्वरूपाणि तमोगुणस्याऽभिव्यञ्जकानि भवन्तीति स्मरणीयम् ।

सूत्रकारेण सत्स्वेतेषु वैशिष्ट्येषु गुणस्वरूपाऽवबोधनाऽवसरे प्रीत्यप्रीति विषादानामेव ग्रहणङ् कथङ् कृतमिति चेतन्न, आद्यपदेनान्येषामपि ग्रहणं भवत्येव तथा च सत्त्वगुणस्वरूपाऽवबोधकमखिलमपि वैशिष्ट्यजातं प्रीतावन्तर्भवतीति ज्ञेयमर्थात् लघ्वादयः सर्वेऽपि प्रीतिवर्धकाः प्रीतिजनकाः प्रीतिपोषकाश्च भवन्ति । अन्ततोगत्वा तेषां समेषामपि परिणामत्वेन प्रीतिरेव जायत इति प्रीतिमुख्यतामवलोक्य तत्

स्वरूपावबोधकत्वेन सूत्रे प्रीतिशब्दस्यैव सत्त्वगुणाऽभिव्यञ्जकत्वेन ग्रहणङ् कृतम्। तथैवाऽप्रीतिजनकत्वर्वधकत्व-फलकत्वादुपष्टम्भनादीनामऽप्रीतिशब्देनैव रजोगुणाभिव्यञ्जकत्वं ज्ञेयम्। इत्थमेव विषादस्यापि गुर्वादयो गुणाः विषादजनकाः, विषादनवर्धकाः, विषादफलकाश्चेति विचार्य तदभिव्यञ्जकत्वेन विषादोऽङ्गीकृतः।

पुनश्च भावसूच्यामस्माभिश्चाऽपि आदिपदस्य प्रयोगो विहितः यतः सर्वेऽपि भावाः केनापि सनामग्रहणं व्याख्यातुन्नैव शक्यन्ते ऽनन्तायां सृष्टौ भावानामप्यानन्त्यात्। अत्र केषाञ्चनैव भावानान्निर्देशोऽपि कथङ् कृत इति चेत्? न, उपर्युक्तानां भावानां वर्णनेन स्पष्टीभवति यत्- तत्तद्वर्गस्थाः सर्वेऽपि भावाः स्वं स्वं साजात्यत्वमवलम्ब्य तस्मिन् वर्गे सङ्ख्यातुं शक्यन्त एवेति वर्गीकरणसौकर्यार्थम्परमाऽपेक्षितत्वात् समुचितमेवाऽस्ति। उपर्युक्तप्रकारेण केषाञ्चन भावानामपि नामग्रहणमिति।

इत्थं सर्वस्यापि जगतः सर्वेऽपि भावाः त्रिषु वर्गेषु विभक्ताः भवन्ति। तत्त्वविवेचने भावानामेतेषामुपयोगस्तदा भवति, यदा सत्त्वादीन् गुणान् समाश्रित्य मानवानाममानवानाञ्च पृथक्पृथग्विश्लेषणङ्कुर्मः। यथा एकैव रूपयौवनसम्पन्ना कुलाङ्गना स्वस्वामिने सुखदायिनी भवति यतस्तस्याः सुखस्वरूपकः सात्त्विकांशः स्वामिसुखायैव भवति। सैव सपत्नीभ्यो दुःखदायिनी भवति, यतस्ताः प्रति तस्याः दुःखस्वरूपिणी रजोगुणप्रवृत्तिर्भवति। तथैव सैव तस्याः प्राप्तौ विफलप्रयत्नाय परपुरुषाय मोहोत्पादिका विषादव्यापिनी भवति यतस्तस्याः तम्प्रति मोहस्वरूपकस्तमोगुणः समुद्भवति। एवं सैव कुलाङ्गना सुख-दुःखमोह-जननी अथ च प्रीत्यप्रीतिविषादाऽऽत्मिका। जगत् त्रिगुणमयमेव भवति, तथा सर्वाण्यपि च सांसारिकाणि वस्तून्यपि गुणानां प्रीत्यप्रीतिविषादाऽभिव्यञ्जकानि मूलोपादनकानि च कथं सन्तीति स्पष्टीकर्तुमाधुनिकभौतिकीमनुसृत्य निर्धारितैः मूलतत्वैः सह गुणानां विचारणमस्त्यावश्यमिति प्रथममाधुनिकभौतिक्याः मूलतत्त्वानि प्रस्तूयन्ते, तदनन्तरञ्च सत्त्वादिभिः सह तेषान्तुलनाऽपि प्रस्तोष्यते।

आधुनिक्याः भौतिक्याः मूलतत्त्वानि

जगतान्तथाकथितानि मूलतत्त्वानि अणुः, प्रोटोन्, इलेक्ट्रान् न्यूट्रांश्चेति समाऽऽख्यातानि सन्ति। इत्थमुच्यते यद्—एतान्येकधा विद्युत्कणाः विद्युत्तरङ्गाः वा

सन्ति । वस्तुतोऽणोः रचना परमरहस्यमयी वर्त्तते । एतत् स्वस्मिन्नपि संसारमिव परिकल्प्य तिष्ठति । एतदस्ति विचित्रायाः शक्तेः पुञ्जम् । अस्मिन् प्रोटोन्तत्त्वस्य परितः इलेक्ट्रानाख्यन्तत्त्वन्तीव्रतरम्परिभ्रमति । प्रोटोन् तत्त्वमेव पॉजिटिव्नाम्ना इलेक्ट्रोनाख्यन्तत्त्वमेव च नेगेटिव् नाम्ना व्यवह्रियते । प्रोटोनतत्त्वं स्वभावतः स्वयमितरत्तत्त्वं समाकर्षति तथा द्वितीयमिलेक्ट्रोन समाख्यन्तत्त्वञ्चलत्वात् परिभ्रष्टुमर्हति किन्तु प्रोटोन्तत्त्वस्याकर्षणवशाद् इलोक्ट्रोन्तत्त्वन्नाऽपयाति । तथा चलस्वभावशीलत्वाद्-दूरीभवितुमीहमानः प्रोटो-नित्याख्यन्तत्त्वञ्चाऽऽकर्षणापकर्षणात्मकत्वशून्यमुदासीनं भवति । तथाप्येतत्तत्त्वं प्रोटोनित्यस्य नान्तर्भवति । तृतीयं न्यूट्रोनित्याख्यं तत्त्वमाकर्षणाऽऽपकर्षणात्मत्वशून्यमुदासीनं भवति । तथाप्येतत्तत्त्वं त्रिकेऽमुष्मिन् भवति सर्वथौदासीन्यमत् किन्तु तत्त्वमेनत् समाश्रित्य प्रोटोन् इलेक्ट्रोन् समाख्ये तत्त्वे स्वं स्वं स्वभावमनुसृत्य क्रीडापरे भवतः ।

भौतिक्याः मूलतत्त्वैः सह सत्त्वादीनाङ्गुणानां तुलनात्मकं विवरणम्—

यद्यपि सत्त्वादिभिः सह प्रोटोनित्यादीनां सन्तुलनं केवलं साहसिकमेवाऽस्तिकर्म । सम्भवतोऽत्र सत्त्वादीनां परममूलोपादानप्रकृतिस्वरूपताऽस्ति तथा चैतेषां प्रोटोनादीनां तन्मात्रसमकक्षीया स्थितिर्वर्त्तते । तथाऽपि सर्वमऽपि जगत्त्रिगुणात्मकमेवास्तीति एतेषु त्रिष्वऽपि तत्त्वेषु सत्त्वरजस्तमसाङ् क्रमशोऽस्ति प्राधान्यमिति वक्तुं शक्यते, यत्—एतान्यऽपि तत्त्वानि सत्त्वरजस्तमांसीति वक्तुं शक्यन्त इति । इत्थं प्रोटोन् सत्त्वस्थानीयम्भवति । इलेक्ट्रान् रजःस्थानीयम्भवति । भवति च न्यूट्रान् तमः स्थानीयमिति । यतः सत्त्वं रजः समाकर्षतीत्येतावानस्याऽस्ति प्रीतिस्वभावः । सत्त्वस्याऽऽकर्षणाऽऽत्मकः स्वभाव एव प्रीतिशब्देन व्यपदिश्यते । यतः प्रीतौ समाकर्षणं सम्भवति । आकर्षणं प्रीतेरन्तरात्मानं प्रकटीकरोति । सत्त्वं यथा रजः समाकर्षति तद्विपरीतं रजो ऽपकर्षति, अर्थाद् ऽपकृष्टो भवितुञ्चेष्टते चलस्वभावकत्वाद् भवति गतिमान् । समाकर्षणशीलत्वात् सत्त्वगुणादपकर्षशीलं रजो भवतीत्येतावानस्याऽप्रीतिस्वरूपकः स्वभावः । तथापि स्वं स्वं स्वभावं प्रत्येकमनुवर्त्तत एवेति सत्त्वं सर्वथा समाकर्षति रजश्च सर्वथाऽपगन्तुं प्रयतत एवेति भवत्युभयोः सान्निध्यं तथा रजःसत्त्वं परिक्रामति । तथैव इलेक्ट्रोन्तत्त्वं प्रोटोन् तत्त्वस्य परितः भ्रमति । एवमेव यथा तमो नियमयत्यौदासीन्येन च तिष्ठतीति तत्त्वं समाश्रयीभूतमाकर्षणापकर्षणाभ्यां विरहितमौदासीन्येन वर्तमानं स्थितिमद् भवतीति वर्त्तते सत्त्वरजस्तमोभिः प्रोटोन् इलेक्ट्रोन् न्यूट्रान्

तत्त्वानां साम्यमिति। एतेषां तत्त्वानामेषैव स्थितिः परस्परं मिथुनवृत्तितां प्रकटीकरोति। एतदेवाऽस्ति वैषम्यम्। एतादृश्यामेव परिस्थितौ सर्गारम्भो भवतीति ज्ञेयम्।

साङ्ख्यसिद्धान्तमनुसृत्य प्रकृतिरेव जगतां मूलोपादानकारणमस्ति। निखिलमपि जगदेतत् प्रकृतेः कार्यमस्ति किन्तु प्रकृतिरेषा नास्ति कस्यचिदऽपि कारणभूतस्य पदार्थस्य कार्यभूता। इति कृत्वैव प्रोच्यते "मूलप्रकृतिरविकृतिरिति" "मूलेमूलाभावादमूलम्मूलमिति" च साङ्ख्यकारिका कापिलसूत्राभ्याञ्च प्रकृतेः सर्वथा मूलोपादानकारणत्वम्।

प्रकृतावाह्यप्रेरणा—

प्रकृतिः परिणामिनी वर्त्तत इति साङ्ख्यस्याऽस्ति सिद्धान्तः। अस्यां परिणामः परिवर्तनं, वैपरीत्यञ्च जायते। विषयेऽमुष्मिन् साङ्ख्ये द्विविधो विचारः समधिगम्यते। तत्र प्रथमोऽस्ति विचारो यत्—

प्रकृतौ परिणामः परिवर्त्तनं वा स्वत एव जायत इत्यस्ति प्रकृतेः स्वभावः, अस्यां प्रक्रियायान्नास्ति कस्यचन तत्त्वान्तरस्य हस्तक्षेपः।

द्वितीयोऽस्ति विचारो यत्—प्रकृतिः स्वभावत एव जडाऽस्ति तस्याङ्काऽपि क्रिया कोऽपि परिणामश्च स्वतो भवितुन्नार्हति। प्रकृतेः परिणामाय परिवर्त्तनाय वाऽन्यस्य चेतनस्यास्त्यावश्यकता। यदि चेतनो प्रकृतिवज्जडः स्यात्तर्हि कल्पनेयन्निरर्थका भविष्यति, एतादृश्यां स्थितौ प्रकृतिः स्वतः प्रवृत्तिशीलेति मान्यता विशिष्टाऽस्ति प्रामाणिकी। अतश्चेतनो ह्ययं प्रकृतेः सर्वथा भिन्नोऽस्तीति कल्पितम्। तथा विचारकैः प्रोक्तं यत् कस्यचिदेकस्य चेतनस्य सत्तायाः प्रेरणया च प्रकृतौ सर्वे परिणामाः सम्भवितुमर्हन्ति।

द्वावपि विचारकौ मूलतश्चेतनजडतत्त्वयोः पृथक्तया स्वतन्त्रां सत्तामुररीकुरुतः। परन्तु प्रथमे विचारकाः कस्यचिदप्येतादृशः चेतनस्यास्तित्वन्नोररीकुर्वन्ति यः सकलः समग्रस्याऽपि जगतः नियन्ता भवेत् विषयेऽमुष्मिन् विचारणीयमस्माभिर्यदत्र कपिलस्य मान्यता कीदृश्यस्तीति।

प्रकृतिप्रेरणाविषयको कपिलस्य विचारः—

समुपलब्धकापिलसाङ्ख्यसूत्रेषु त्रीणि स्थलान्येतादृंशि सन्ति, यत्र विषयस्यास्य विवेचनं समुपलभ्यते। प्रथमं स्थलं प्रथमाऽध्यायस्य सप्तपञ्चाशत्तमसूत्रप्रभृत्येकषष्टितमं सूत्रं यावद् वर्त्तते। सङ्क्षेपतः सूत्रेष्वेतेषु प्रतिपादितमस्ति यत्—सर्वस्यापि जगतोऽधिष्ठाता नियन्ता च परमेश्वरो ऽस्तीति। साङ्ख्ये जगतामुपादानभूतस्येश्वरस्य प्रतिषेधोऽस्ति। कपिलः कमप्येतादृशञ्चेतनतत्त्वं ब्रह्मनामकमीश्वरनामकं वा नैव स्वीकुरुते, यत् स्वयमेव परिणम्य जगद्रूपेण परिवर्त्तितो भवेदिति। अथवा रूपेऽस्मिन् विवर्त्तेण प्रतीयते। कपिलस्तु सर्वस्याऽपि जडजगतः सदुपादानत्वेन जडाम्प्रकृतिमेव मन्यते। चेतनमीश्वरं तस्याः नियन्तारमधिष्ठातारञ्च स्वीकरोति। प्रसङ्गस्याऽस्य विस्तारः पुरुषप्रकरणे द्रष्टव्यः।

द्वितीयमस्ति स्थलन्तृतीयाऽध्यायस्य पञ्चपञ्चाशत्तमसूत्रतः सप्तपञ्चाशत्तमंसूत्रं यावद् वर्णितम्। प्रसङ्गेऽमुष्मिन् जगदीश्वरस्य परिणामो नास्ति किन्तु वर्त्तते तदधीनर्मिति प्रतिपादितम्। जगतामीश्वराधीनत्वाज्जगताङ्कर्त्ता स्वान्तर्यामी परमेश्वर एव वर्त्तत इति। सः प्रकृतिरूपमुपादानकारणमुपादाय विश्वं सृजतीति कपिलस्य लेखोऽयमर्थमेनम्पुष्णाति, यदिह ईश्वरप्रेरणां विना प्रकृतौ काऽपि क्रिया भवितुन्नैव सम्भवति। प्रसङ्गस्यास्योपसंहारकेषु सूत्रेषु स्पष्टीकृतं यत्—तादृशं नियन्तारं प्रेरयितारमधिष्ठातारञ्चेश्वरं साङ्ख्यं स्वीकरोति। जगदुपादानभूतमीश्वरञ्चाऽसिद्धम्मनुते।

तृतीयमस्ति स्थलं पञ्चमाध्यायस्य प्रारम्भे द्वितीयसूत्रतो द्वादशसूत्रं यावत् प्रसङ्गस्यास्योल्लेखोऽस्ति। पूर्वपक्षोत्तरपक्षप्रदर्शनपूर्वकमेतन्निश्चितं यत्—प्राणिभिः विहितानां कर्मणां फलप्रदातृत्ववान् सन्नपीश्वर रागादिदोषो[1]प्लुतो नैव भवति। स्वयमीश्वरः कर्हिचिदप्यचेतनरूपेण नैव परिणमते। किन्तु समग्रस्याऽपि लोकस्य चतुर्दशभुवनानान्नियन्त्रणं सञ्चालनञ्च विदधाति। अखिलस्याऽपि ब्रह्माण्डस्योपादानं प्रकृतिरेवास्तीति शब्दप्रमाणेनाऽपि पुष्टिर्भवति।

प्रकरणेनानेन सिध्यति यत्—कपिलः स्वयं प्रकृतौ स्वतो प्रवृत्तिन्नैव स्वीकरोत्यपि तु चेतनसापेक्षामेव प्रवृत्तिं स्वीकरोतीति निश्चप्रचम्।

प्रकृतिप्रेरणाविषये पञ्चशिखः—

यद्यपि पञ्चशिखस्य कोऽपि ग्रन्थः साम्प्रतन्नोपलभ्यते, तथापि साङ्ख्यस्य-व्याख्याग्रन्थेष्वन्यग्रन्थेष्वपि च यत्र तत्र सदुद्धरणरूपेण यानि वचनानि पञ्चशिखस्य समुपलभ्यन्ते तेषु स्पष्टरूपेण सङ्केतितमस्ति, यत्—सृष्टिरेषा ज्ञानपूर्विका भवति। चेतनस्याऽधिष्ठातृत्वे प्रकृतेः प्रवृत्तिर्भवति, तत्राऽस्ति लिखितम्—

"पुरुषाधिष्ठितं प्रधानं प्रवर्त्तते"

अत्र पुरुषपदेन साधारणो जीवात्मा गृहीतुन्नैव शक्यते। यतोऽल्पज्ञे स्वल्पशक्तिमति च जीवे तादृशं सामर्थ्यङ्क्वाऽस्ति येन प्रकृतेरधिष्ठातृत्वन्निर्वहेत्। अतो ह्ययं पुरुषविशेषो योगप्रतिपादितः पुरुषः ईश्वर एवेति सम्भाव्यते।

सङ्गृहीतपञ्चशिखसन्दर्भस्य चतुर्दशे प्रकरणे लिखितमस्ति यत्—

"महदादिविशेषान्तः सर्गो बुद्धिपूर्वकत्वादुत्पन्नकार्यकरणस्तु, माहात्म्यशरीर एकाकिनमात्मानमवेक्ष्याभिध्यायतियदहं पुत्रान् स्रक्ष्ये ये मे कर्म करिष्यन्ति ये मां परञ्चाऽपरञ्च ज्ञास्यन्ति।···अतएव तस्माद् ब्रह्मणोऽभिध्यानादुत्पन्नस्तस्मात् प्रत्ययसर्गः। स विपर्ययाख्यः, अशक्त्याख्यः, तुष्ट्याख्यः सिद्ध्याख्यश्च"

अग्रे ह्यालङ्कारिकभाषायां वर्णितमस्ति यत् तत् सर्वोत्कृष्टं सर्वान्तर्यामि चेतनतत्त्वं सङ्कल्पते, यत्—आत्मैकलोऽस्ति, सृष्टिः करणीयेति। तदध्यात्मस्याधिभूतस्य च सृष्टिङ्कृत्वा विपर्ययाशक्तितुष्टिसिद्धिरूपस्वरूपेण प्रत्ययसर्गं सृजति। सर्गोऽसौ ब्रह्मणोऽभिध्यानेन प्रेरणया वा भवति। अनेन स्पष्टीभवति, यत् प्रकृतेः सर्वमपि सर्गजातञ्चेतनस्य प्रेरणा वा भवितुन्नार्हति।

मन्तव्यमेतद्दृश्यानुमानकल्पितमस्ति। संसारेऽमुष्मिन् द्विविधानि सन्ति तत्त्वानि। कानिचित् सन्ति जडतत्त्वानि कानिचिच्च चेतनानीति। कस्मिंश्चिदपि जडतत्त्वे स्वतः प्रवृत्तिर्नाऽवलोक्यते यत्र। कुत्रचित् प्रवृत्तिः समुपलभ्यते, तत्र तत्र चेतनतत्त्वस्य सत्ता स्वीक्रियते। यतस्तत्र चेतनस्य साक्षादनुभूतिर्भवति। यथा लोके प्रत्यक्षमनुभूयते तथैव समष्टिप्रवृत्तावपि सर्वशक्तिसर्वान्तर्यामिचेतनतत्त्वमनुमीयते। इत्थं समष्टिरूपेण प्रकृति-प्रवृत्तौ चेतनेश्वरस्याऽपेक्षा

साङ्ख्यैः स्वीकृता। चेदीश्वरस्य प्रेरणयैव सृष्टिर्भवति, तर्हि कथमत्रोच्यते प्रकृतिः सर्वङ्करोतीति चेत् ? श्रूयताम्-वस्तुतः प्रकृतिः स्वयं सर्वङ्करोति विकरोति च किन्त्वहङ्कारतो ह्याऽऽत्मा अविद्याकलुषीकृताऽऽत्मज्योतिः मनुते यद्-अहङ्करोमीति एषोऽस्ति साङ्ख्यस्य समुत्कृष्टः सिद्धान्तो यत्-बुद्ध्यादिभिः प्राकृतसाधनैर्विना भोगादिकङ्किमप्यात्मनि नैव युज्यते। आत्माऽयं बुद्ध्यादिभिः साधनैः भोक्तृत्वन्निर्वहति। एतानि साधनानि भोगायैवाऽऽत्मानं संवृण्यन्ति। साधनेषु चैतेषु स्वकार्यकरणसामर्थ्यमात्मनः सान्निध्यवशाद्भवितुमर्हति। इत्थमात्मा सर्वाण्यपि करणानि नियमयते। स्वभोगसम्पादनाय तानि स्वभावतः प्रेरयति च।

साङ्ख्यकारिकायाः द्विषष्टितमायाङ्कारिकायां—आर्यायां भावनास्त्यभिव्यक्ता। तस्याः स्वरूपमेवमेव ज्ञातुं शक्यते यत् चेतनोऽयमात्मा स्वभावतोन बद्धो भवति न मुक्तः, न च स्वतो नैकविधयोनिषु संसरति। प्रकृतिसम्पर्कवशादेवायं बद्ध इति कथ्यते। तथा प्रकृतेः पृथग्भूतः मुक्त इत्युच्यते। नैकविधयोनिषु संसरणन्नकेवलमात्मा विदधाति बुद्ध्यादीनि त्रयोदशकरणानि पञ्च तन्मात्राणि च सम्भूय भवति सूक्ष्मशरीरम्। सूक्ष्मशरीरेणाऽऽवेष्टितः सन् नैकविधयोनिषु परिभ्रमति यतोऽत्राऽऽत्मनः समस्तभोगापवर्गादयः प्रकृतिं विना प्रकृतिसाधनानिविना वा समुपलब्धुं संसाधयितुञ्च नैव शक्यन्ते। इत्येतस्मादेव कारणात्साङ्ख्यग्रन्थेषु प्रकरणानीदृशानि समुदीरितानि सन्ति।

कथनस्यास्याऽऽशयो कदाचिदपीत्थं भवितुन्नार्हति यद्भोगापर्गावात्मानं विहाय केवलायां प्रकृतौ वस्तुतः प्रकृतावेव वा भवितुमर्हतरिति। इत्थं प्रकृतिरियम्प्रतिपादिता भवतीति शम्।

—०—

महत्तत्त्वम्

साङ्ख्यशास्त्रे सर्वमपि सर्गजातमध्यात्मत्वेनाऽधिभूतत्वेन च वर्णितमस्ति। अध्यात्मन्तत्र प्रथममाविर्भवति तदनन्तरञ्चाऽधिभूतम् प्रकटीभवति। साङ्ख्यदृशा ऽध्यात्मे त्रयोदशकरणानि भवन्ति। तानि चेत्थमवबोध्यानि—

१—महत्तत्त्वम्, बुद्धिः।
२—अहङ्कारः।
३—मनः
४—श्रोत्रेन्द्रियम्
५—त्वगिन्द्रियम्
६—चक्षुरिन्द्रियम्
७—रसनेन्द्रियम्
८—घ्राणेन्द्रियम्
९—वागिन्द्रियम्
१०—पाणिरिन्द्रियम्
११—पादेन्द्रियम्
१२—पाय्विन्द्रियम्
१३—उपस्थेन्द्रियञ्चेति

तदनन्तरमधिभूत-सर्गः समारभ्यते। तत्र सर्वतः प्राक् तन्मात्राणि जायन्ते। त्रिगुणाऽऽत्मकम्मूलतत्त्वन्तन्मात्ररूपेण परिणमते, तामसादहङ्कारात्तन्मात्राणि समुद्भवन्ति। सत्यान्तन्मात्रसृष्टौ सूक्ष्मशरीरं समारभ्यते। तत् सूक्ष्म-शरीरं सर्गकालीनानामधिवासभूर्वर्त्तते। तन्मात्रेभ्यश्च स्थूलभूतानि प्रकटीभवन्ति। तदनन्तरं स्थूलशरीराणि जायन्ते। तदा जडचेतनात्मकं सर्वमपि जगत् प्रकाशते। स्थूलशरीरत्वेनाऽत्र कोष्ठमात्राऽऽत्मकादमीबानामकाज्जीवाऽऽत्मनः समारभ्यस्थूलभूतानि स्थूलशरीराणि, यावत् सर्वाणि शरीराणि सुनिश्चितरूपेण सङ्गृह्यन्ते। अर्थात् प्रकटीभूतानि तत्रापि चर्मचक्षुदर्शनार्हाणि च सर्वाण्यपि शरीराणि स्थूलशरीरत्वेन गृह्यन्ते।

प्रकृतेः प्रथमङ् कार्यम्महत्तत्त्वमस्ति। यस्याऽस्ति मुख्यरूपेण परिगृह्यमाणो ऽर्थः समवबोधनम्, अध्यवसायो निश्चयश्चेति। अनेनैतत् प्रकटीभवति यत्—प्रकृतेराद्यङ् कार्यम्महत्तत्त्वमस्ति, तच्चाऽस्ति निश्चयात्मकाऽध्यवसायस्वरूपकम्। इति कृत्वैव तत्त्वस्यास्य नामान्तरम्बुद्धिरस्ति।

कथनेनानेन नैतत्तथ्यं सर्वथा स्पष्टीभवति, यदेतत्तत्त्वङ् कीदृशमस्ति किं स्वरूपकञ्च। विषयोऽयङ्गाम्भीर्य्यपूर्णो रहस्ययुक्तश्चाऽस्ति। यद्बुद्ध्याख्यस्य महत्तत्त्वस्य रचना केन प्रकारेण भवति। तथापि तद्विषये कानिचिद् वाक्यानि प्रस्तूयन्ते- आदिसर्गे यदा सत्त्व-रजस्तमोगुणानां साम्याऽवस्थायाम्प्रकृतौ नियन्तुश्चेतनस्य प्रेरणया क्षोभो भवति। क्षोभात् प्राक् सर्वेगुणाः साम्यावस्थायां प्रशान्तास्तिष्ठन्ति। सूक्ष्मातिसूक्ष्मारनन्ताश्च सत्त्वरजस्तमोगुणाः मूलतत्त्वस्वरूपायाः महाशक्तेः पुञ्जाः परस्परं विलक्षण-स्वभावयुक्ताः सन्तोऽपि यावत् कालपर्यन्तं कस्मिंश्चिदपि स्वरूपे परिणन्तुं सर्वथा प्रवृत्तिराहित्यम्भजन्ते, तेषां सा ऽवस्थैव प्रकृतिरिति नाम्ना समपदिश्यते। यदा चेतनस्य प्रेरणया ते गुणाः विक्षुब्धाः सन्तः वैषम्यमधिगन्तुं प्रवर्त्तन्ते, तदा क्रमशः सर्वोऽपि विकारव्यूहो प्रकटीभवति। तस्मिन् विकारव्यूहे सर्वतः प्राक् महत्तत्त्वं प्रकटीभवति। तदेव तत्त्वं सर्वतः प्राक् प्रकटीभवतीति किमेतदेव? कथङ्केन प्रकारेण चेति भवति सर्वं विचारणीम्, प्रकृतिगुणाः महत्तत्त्वादिकञ्च न सम्यक्तया चित्रादिभिः द्योतयितुं शक्यन्ते।

सर्वतः प्रगस्माभिरवधेयं यत्—सत्त्वरजस्तमःसु विक्षोभे जाते सति, यदा तेषु सर्गोन्मुखी च प्रवृत्तिर्भवति, विकासोन्मुखी वा प्रवृत्तिर्भवति, तदा विक्षोभे तत्कालमेव महत्तत्त्वमाविर्भवति वा विक्षोभस्य स्थितेः समारम्य महत्तत्त्वोत्पत्तिं यावदन्तरालेऽपि च कश्चन क्रमानुक्रमो भवति। अति-प्राचीनकालतः समारम्यार्वाक्तनर्षिभिश्च यदस्ति विचारितन्तदत्र यथाज्ञानम् प्रस्तूयते। केचन महर्षयः केचनाऽऽचार्याश्च प्रतिपादयामासुर्यत्गुणविक्षोभस्य बुद्धिप्रादुर्भावस्य चान्तराले मूलतत्त्वेष्ववश्यमेवैतादृंशि परिवर्त्तनानि जायन्ते, यानि कारणावस्थायाः साम्यावस्थायां सुपारयामासुः परन्तु तावत् सुनिश्चितङ्कार्यरूपं वा नाधिजग्मुः। तत्त्वानां स्थितिमेनां प्रकटीकर्त्तुमाचार्य्यैः विभिन्नानि नामानि दत्तानि सन्ति। युक्तिदीपिकायारष्टोत्तरशतसङ्ख्याके पृष्ठे लिखितमस्ति यत्—

केचिदाहुः—प्रधानादनिर्देश्यस्वरूपन्तत्त्वान्तरमुत्पद्यते ततो महानिति।
कैश्चित् साङ्ख्याचार्यैः प्रतिपादितं यत्—

प्रधानादनिर्देश्यस्वरूपिणस्तत्त्वान्तरस्योत्पत्तिर्भवतीति । तदनन्तरं महान् समुद्भवति। सत्त्वरजस्तमःसु विक्षोभतो महत् तत्त्वस्योत्पत्यन्तराले मूलोपादान स्यैतादृश्याः स्थितेः सङ्केतोऽस्ति । यद् विषये इदमित्थमिति वक्तुन्नैव शक्यते । वस्तुतः सैवाऽस्ति प्रकृतेस्तादृशी स्थितिः यस्यां प्रकृतेः साम्यावस्थाऽपि नैव भवति, न च महत् स्वरूपमपि स्पष्टीभवति इति । निरुक्ते,१४-४, एषा स्थिति र्वर्त्तते वर्णिता । मनुस्मतौ, १, ८, शतपथब्राह्मणे, ११, १६, १, तैत्तरीयब्राह्मणे, १, १, ६, ५, बृहदारण्यकोपनिषदि१, २, ऋग्वेद, १०, १५१, ७, ८, आप, इति तथा च भगवद्गीतायाम्, ७, ४, मन इति यजुर्वेदे, २३, ५४, । दयानन्द-भाष्ये च विद्यु द् इति नाम्ना प्रतिपादितमस्ति ।

स्थितिरेषा वर्त्तते ह्येतादृशी । यदा मूलकारणङ् कस्मिंश्चिदपि विशेषे कार्यंरूपे परिणन्तुन्नार्हति । साङ्ख्येनैनत् कारणरूपस्यान्तर्भावितम् । आचार्यैश्चान्यैः केवलं व्यवहारायैव नैकधा नामानि कृतानि । तदनन्तरञ्च यद् विशिष्टङ् कार्यम्भवति प्रकटितम् । तदेव मूलकारणस्य प्रधानस्याद्यङ्कार्यमिति समुदीर्य्यते । तत्त्वस्यास्य बहव आचार्याः नैकधा नामकरणं विदधति, तानि च सन्ति नामानि—मनः, मतिः, ब्रह्मा, बुद्धिः , ख्यातिः, प्रज्ञा, स्मृतिः, उपलब्धिः, विष्णुः, मनुः महान् इत्येतानि ।

बुद्धिरचनायां सत्त्वाऽऽधिक्यम्—

सत्त्वरजस्तमसां स्वरूपन्त्रैगुण्यप्रकरणे प्रतिपादितमेवास्ति । साङ्ख्यविचारपद्धतिं समनुसृत्य बुद्धिरचनायां सत्त्वगुणस्याधिकम्भवत्युपयोजनम् । यद्यपि जगत्सु प्रत्येकं वस्तु त्रिगुणात्मकमस्ति, निर्माणे त्रयाणामपि गुणानान्योन्याधिक्येन भवति समुपयोजनम्, तदेव चाऽस्ति वस्तु वैलक्षण्यस्य वस्तु वैचित्र्यस्य च मूलं बीजम्। अतएव न किमपि वस्तु केनापि गुणेनैकेन समुत्पत्तुमर्हतीति । वस्तुतस्तु गुणानां परमविशुद्धं स्वरूपन्तेषां साम्यावस्थाऽस्ति । सैव चाऽस्ति कारणावस्था । जगन्निर्माणे चैतेषामस्ति परस्परम्मैन्थुन्यम्परमावश्यकम् । अतएव बुद्धि-तत्त्वस्य रवनायामपि त्रयाणामेवगुणानां सामञ्जस्यमस्ति । तथापि तत्र सत्त्वगुणस्यैव भवति प्राधान्यम् । रजस्तमसोः स्वल्पतरं स्वल्पतमं वास्त्युपयोजनम् । एतदस्ति वस्तुरचनावैलक्षण्यम् ।

वस्तुतोऽत्र महत् तत्त्वस्य रचनायाङ् कियत् सत्त्वङ्, कियद् रजः, कियच्चतमो गृह्यत इति सुनिश्चितरूपेण सुनिर्धारितमात्रावच्छेदेन वा व्यपदेष्टुन्नैव शक्यते । क्रमशः

सत्त्वादीनाङ् गुणानाम्भवति न्यौन्यम् । अर्थात्तत्र सर्वाधिकोम्भवति सत्त्वगुणः । सत्वगुणाऽपेक्षया स्वल्पतमस्तमो गुणापेक्षया च भवत्यधिकतर रजोगुणः । सत्त्वगुणाऽपेक्षया रजोगुणाऽपेक्षयाऽपि च भवति तमो गुणो न्यूनतमः ।

आधुनिकं विज्ञानमपि विषये ऽमुष्मिन् न किमपि निर्णेति । यद् विज्ञानमाधिभौतिकरचनाविषये तद् विश्लेषणावसरे चाऽऽश्चर्योत्पादिकाश्चमत्कृतयो प्रस्तौति परमद्यावधि नावलोक्यते काचिदपि प्रगतिराध्यात्मिक-विचार-सरण्याम् । सर्वेषामपि रसायनानां भौतिकशास्त्राणाञ्च विषयसीम्नि नैतत् समायाति ।

महत् तत्त्वमेवाऽऽद्यङ्कार्यंङ्कथमिति चेत्—

बुद्धिरचनाविषये ऽस्माभिरेतदवगतं यत्-सत्त्वगुणप्रधानन्त्रिगुणङ् कतिपयपरिवर्त्तनानन्तरं बुद्धिरूपेण परिणमति । अव्यक्तम्मूलकारणमत्र प्रथममव्यक्तम्भवति, तदा प्रकृतिरिति नामकं भवति, किन्तु तदेव तत्त्वं सत्त्वप्रधानेन स्व स्वरूपेण व्यक्तं सत् महत्-तत्वसञ्ज्ञांल्लभते । रचनायां सूक्ष्मतत्त्वं स्थूलतत्वम्प्रति गच्छतीति वर्त्तते वस्तुस्वभावः । नाऽत्र किमपि परिवर्त्तनं परिवर्धनं वा कर्त्तुं शक्यते । वस्तुस्थितिरेवात्र समाख्यातुं शक्यते ।

अव्यक्तं यदा रचनाम्प्रति प्रवर्त्तते, तदा तदेव व्यक्तरूपताम्भजते । सर्वस्मिन्नपि कार्यरूपे व्यक्तसमूहे महत्तत्त्वमेवास्ति सूक्ष्मतमन्तत्त्वम् । रचनायाः समभिवृद्धौ क्रमशः स्थौल्यम्प्रवर्धते । तथा चाऽध्यात्मरचना तिष्ठति, सूक्ष्मावस्थायाम् । यतोऽत्र सेयमध्यात्मसृष्टिः सर्वथाऽतीन्द्रियतायाः पारन्नाधिगच्छति । इत्येतस्माद्धेतोः सर्वथैतन्निश्चप्रचमस्ति, यदध्यात्मसृष्टिरधिभूतसृष्टेः प्राग् भवेदिति वर्त्तते परमावश्यकमिति। अध्यात्म-सृष्टौ त्रयोदश-करणानां समावेशो वर्त्तते । तानि सर्वाण्यपि करणानि सर्वथा भवन्त्यतीन्द्रियाणि । तेष्वपि च वर्त्तते महत्-तत्वं सर्वाधिकं सूक्ष्मम् । व्यक्ते ऽस्मिन् तत्वग्रामे व्यक्तायां सृष्टौ नास्ति किमप्येतादृक् तत्त्वान्तरं यद् भवेन्महत्तत्त्वतोऽपि सूक्ष्मं स्यात् । अतएवाऽव्यक्ताऽवस्थायाः व्यक्तावस्थायाम्परिणतौ व्यक्तीभूतम्प्रथमन्तत्त्वमेतदेव वर्त्तते । एतन्महत्तत्त्वमेवास्ति सर्वप्रथमङ्कार्यम् । सम्भवतोऽत्रैतस्मादेव कारणात् तत्त्वमेतन्महत्तत्त्वनाम्ना व्यवह्रियते ।

वस्तुस्थितेरस्याः व्याख्याने वार्त्तकेत्थमपि वक्तुं शक्यते यद्-रचनैषा समग्राऽपि वर्त्ततेऽत्राऽऽत्मनो प्रयोजनम्पूरयितुमेवेति साङ्ख्यम् । आत्मनश्च प्रयोजनत्वेन वर्त्तते भोगापवर्गौ। यद्वस्तु यच्च तत्त्वमात्मनो यावन्निकटतमं विराजते तथा च तत्प्रयोजनसिद्धौ यद् यावदधिकमुपयोगिभवति । भोगापवर्गौ चाऽपि सम्पादयति । तत् तत्त्वन्तावदेवास्ति महन्महत्त्वशालि । परममहत्त्वशालित्वाच्च रचनाक्रमेऽपि तस्य भवति प्राथम्यम् । महत्तत्त्वमेव च तत्त्वान्तरापेक्षया ऽऽत्मनो ऽधिकतममन्तिकं वसन् निष्पादयति भोगापवर्गौ। इत्यस्मादपि हेतोः सर्वप्रथममव्यक्ततो व्यक्तरचनायाम्प्रथमतमङ्कार्यं बुद्धितत्त्वमेव वर्त्तत इति । तत्त्वानां समुत्पत्तिक्रमश्च योऽत्र साङ्ख्यशास्त्रे निर्दिष्टोऽस्ति, सोऽपि नियममेनमेवानुसरतीति वक्तुं शक्यते । अथ चैतदपि वक्तुं शक्यते यद्-वस्तुस्वभावमनुसृत्य तत्त्वरचनायां यानि क्रमप्राप्तानि सन्ति, तानि तत्त्वानि साङ्ख्यदर्शनं यथार्थरूपेण प्रस्तौति । प्रसङ्गेनानेन स्पष्टीभवति यद्-बुद्धितत्त्वमाद्यमेव कार्यमस्तीति ।

आदिसृष्टावनन्तबुद्धीनां सृष्टिः

त्रिगुणस्य सत्त्वप्रधानो ह्याद्यो परिणामो बुद्धिरस्तीति ज्ञाते ऽपि ज्ञाने, तद्विषये किञ्चिदन्यदपि ज्ञातव्यमवशिष्यते । सर्वप्रथममेतदेव शङ्क्यते, यत् किमत्र बुद्धितत्वमेकमेवोत्पद्यते ऽथवा नैकानि तत्त्वानि तथा च यदि सन्ति बुद्धि-तत्वानि नैकानि तर्हि तेषां वर्त्तते किङ्काऽपि निर्धारिता सङ्ख्या, तथा च किं सर्वाण्यपि बुद्धि-तत्वान्यादिसर्ग एव समुद्भवन्ति अथवा आवश्यकतामनुसृत्य काले काले जायन्त इति। इत्यादिकाः प्रश्नाः समुपतिष्ठन्ते ।

साङ्ख्यदृशा ह्यात्मनः समनुसृत्य बुद्धि-सर्गः सञ्जायते । तथा व सन्त्यात्मानो ह्यनन्ताः। अतएवादिसर्गे बुद्धिश्चापि समुद्भवत्यनन्ता । प्रत्येकेनाऽऽत्मना सह भवति बुद्धितत्त्वमपि परमावश्यकम् । प्रलयानन्तरं यदा आत्मा सर्वप्रथमं शरीरबन्धनमधिगच्छति, तदा तस्य सहयोगाय सर्वप्रथममन्निर्मिता बुद्धिः समुपतिष्ठते । आदिसर्गे वा यदा कदा प्रथमं शरीरवत्त्वं समधिगतेनात्मना सह यस्याः बुद्धेः सहयोगो भवति तेन सह तस्याः ग्रन्थिरेषा समान्यतस्तु प्रलयं यावत्तिष्ठति । न केवलं प्रलयं यावदेवाऽपि तु विवेकख्यातिपूर्वकं मोक्षप्राप्ति यावद् भवति । परं यदि कश्चन आत्मा स्वस्वरूपं साक्षत्कु-

र्थात् तर्हि स आत्मा तु सुनिश्चितरूपेण बुद्ध्यादिभ्यो पृथग्भूय विमुक्तो भवति। अज्ञानावस्थायान्तु भूयो भूयः जनन-मरणादीनि समधिगच्छन् नैकशो कर्माशयैः भोग्यान् भोगान् जुषति। आत्मना सह बुद्धि-संसर्गोऽपि भोगापवर्गयोः सिद्धये भवत्येवेति निश्चप्रचम्। आत्मनः साक्षात्कारे जाते सति लक्ष्यमेतद्भवति परिपूर्णमिति लक्ष्यपूर्तौ न भवति ग्रन्थेरस्यारावश्यकता। आत्मा तत्त्वज्ञाने ग्रन्थिशून्यो भवति। विमुक्तौ बुद्धितत्त्वन्तथा चाऽन्यानि समान्यपित त्वानि क्रमशो मूलकारणे प्रकृतौ लयमधिगच्छन्ति।

बुद्धितत्त्वानां रचनायां साम्यम्

बुद्धितत्त्वानि यद्यपि सन्ति नैकानि, किन्तु तेषां समेषामपि यदस्ति मूलकारणन्न तत्राऽस्ति किमपि वैलक्षण्यम्। अनन्तानां बुद्धितत्त्वानां संसर्गः समैः कारणैर्भवतीति रचनादृशा प्रत्येकं बुद्धितत्त्वन्तदतिरिक्तेभ्यो बुद्धितत्त्वेभ्यो न भवति विलक्षणम्। यतोऽत्र यदुपादाय समुद्भवति बुद्धितत्त्वमेकन्तदेवोपादाय समुद्भवन्ति समान्यपि बुद्धितत्त्वानि।

आधुनिकेन भौतिकेन विज्ञानेन मूलोपादानतत्वविवेचनसम्बन्धीनि यानि यानि विवेचनान्यद्य यावत्-प्रस्तुतानि, तानि तानि समनुसृत्य वक्तुं शक्यते। यत्—समग्रस्यापि ब्रह्माण्डस्य मूलोपादानकारणतत्वानि त्रीण्येव सन्ति। तानि चाङ्गलभाषायाम्—प्रोटॉन्, इलैक्ट्रोन्, तथा व न्यूट्रान्, इति समुदीर्य्यन्ते। तानि च सत्व-रजस्तमांसीति वक्तुं शक्यन्ते। विषयस्यास्य वर्णनं पूर्णतस्तु प्रकृतिवर्णनावसरे कृतमेवास्ति।

सत्व-प्रधान-मूलतत्वतो बुद्धि-सृष्टिर्भवति। अर्थात् प्रोट्रान् तत्वमेव प्राधान्येन बुद्धि-तत्वस्य भवति समुपादानमित्यस्ति निश्चितम्।

साम्प्रतं युगेऽमुष्मिन् साम्प्रतिकैः भौतिकं विज्ञानमेव बहुमन्वानैः बुद्धितत्वमेव चेतनतत्वत्वेन समुररीक्रियते। परमेतदस्ति चेतनतत्वं भारतीयदर्शनशास्त्रस्य चरमंल्लक्ष्यम्। यतोऽत्र जगति सुप्रसिद्धमेवास्ति यदिमानि प्राकृतानि तत्वानि तथा चैतेषान्ते ते विकारव्यूहाः न सन्ति चेतनानि, किन्त्वेतेषामपि चेतनवद् आभासयिता

कश्चन लोकातीतोऽस्ति पुरुषः। स एव पञ्चविंशतितमं तवत्त्मिति समपदिश्यते। पुरुषतत्वं वस्तुतोऽस्ति सूक्ष्मातिसूक्ष्मम्। नास्ति किमपि तत्वन्ततोऽपि परमं सूक्ष्मतमम्। तदेवास्ति च दर्शनशास्त्रदर्शनीयन्तत्त्वम्। तदेवास्ति सर्वस्याऽपि दर्शनशास्त्रस्य स्वारस्यम्। चेतनत्वेनैतत्तत्त्व प्रायशः समैश्चाऽपि दर्शनैः समुररीकृतम्। चेतनतत्त्वन्तु भवति जडतत्त्वेभ्यः सर्वथा पृथग्भूतम्। तथा च बुद्धितत्वमपि जडायाः प्रकृतेः समुद्भवति ह्येतस्मादपि च हेतोः कारणगुणाः कार्यगुणानारभन्ते, सिद्धान्तेनानेन च सिद्ध्यति यत्—तदेव तत्त्वञ्चेतनम् भवितुमर्हति, यत्तत्त्वञ्चेतनोपादानकम्भवेत्। नास्ति महत्तत्त्वञ्चेतनोपादानकमित्यपि नास्ति तच्चेतनम्।

यद्यपि बुद्धि-तत्त्वं स्वयं जडतत्त्वमस्ति, तथापि चैतन्याधिष्ठितं भोग्यान् भोगान् भोक्तुङ् करोति चैतन्यस्य साहाय्यम् चिच्छायापत्त्या। वस्तुतस्तु भोगाश्चापि प्रकृतेः बुद्धे र्वा सन्ति, यतोऽयमात्मा तु नित्य-शुद्ध-बुद्ध-मुक्तस्वभाव-श्चास्ति।,, परमत्र बुद्धेः परमसान्निध्यवशात्, स्वयं बुद्धिव्यवहारान् एवाऽहङ्कारपारवश्यात् स्वकर्मत्वेन स्वीकरोति। तथा चानेन प्रकारेण बद्धो भवति समान्यपि वस्तून्येतानि सन्ति प्राकृतानि कर्मण्यपि च सन्ति सर्वाणि प्रकृतान्येव नास्ति मामकीनो कश्चन नित्यः सम्बन्धो ह्येभिरित्येव सेन्द्रियम्बुद्धि-तत्त्वमध्यवसाय समान्यपि कर्माणि करोति तथैव च विकरोति।

बुद्धिसाम्ये ऽपि व्यवहारबुद्धौ भेदो कथमिति चेत्?

यदि बुद्धिरचनानान्न भवति वैलक्षण्यम्, शास्त्रज्ञाना ऽवसरे लोकव्यहाराऽवसरे च तर्हि किमिति वैलक्षण्यम् समवलोक्यते। कुत्रचिदवलोकयामो वयं यदत्र बुद्धौ वर्त्तते तीव्रता, यथा च कुत्रचित् समवलोकयामो यदत्र वर्त्तते मान्द्यमिति। इत्थमेव कस्यचिद् बुद्धौ समवलोक्यते सात्त्विकता, कस्यचिद् बुद्धौ समवलोक्यते रजोगुणवैशिष्ट्यम्, कस्यचिद् बुद्धौ भवति तमोगुणवैशिष्ट्यमपि च। प्रत्यक्षेणानेनानुभवेन स्पष्टीभवति, यदत्र बुद्धिसृष्टौ वस्तुतो वर्त्तते किमपि वैलक्षण्यमवश्यमेव। समये समये च नैकविधानि परिवर्त्तनान्यपि सम्भाव्यन्ते, यथाऽत्र समवलोक्यते यत् कश्चिन्मन्दमतिरपि तैस्तैरूपायैः तीव्रबुद्धितां समधिगच्छति। तथा च बहवस्तीव्र-बुद्धयोऽपि नैकस्यामेव परिस्थितौ सर्वदा भवन्ति तेषां धियःस्वपि परिवर्त्तनानि जायन्ते। तेष्वपि कदाचिततोऽपितु विशिष्टा तीव्रता समापतति,त था च कर्हिचित् बहुतरम्मान्द्यमेवात्र जायते।

र्यात् तर्हि स आत्मा तु सुनिश्चितरूपेण बुद्ध्यादिभ्यो पृथग्भूय विमुक्तो भवति । अज्ञानावस्थायान्तु भूयो भूयः जनन-मरणादीनि समधिगच्छन् नैकशो कर्माशयैः भोग्यान् भोगान् जुषति । आत्मना सह बुद्धि-संसर्गोऽपि भोगापवर्गयोः सिद्धये भवत्येवेति निश्चप्रचम् । आत्मनः साक्षात्कारे जाते सति लक्ष्यमेतद्भवति परिपूर्णमिति लक्ष्यपूर्तौ न भवति ग्रन्थेरस्यारावश्यकता । आत्मा तत्त्वज्ञाने ग्रन्थिशून्यो भवति । विमुक्तौ बुद्धितत्वन्तथा चाऽन्यानि समान्यपित त्वानि क्रमशो मूलकारणे प्रकृतौ लयमधिगच्छन्ति ।

बुद्धितत्त्वानां रचनायां साम्यम्

बुद्धितत्त्वानि यद्यपि सन्ति नैकानि, किन्तु तेषां समेषामपि यदस्ति मूलकारणन्न तत्राऽस्ति किमपि वैलक्षण्यम् । अनन्तानां बुद्धितत्त्वानां संसर्गः समैः कारणैर्भवतीति रचनादृशा प्रत्येकं बुद्धितत्त्वन्तदतिरिक्तेभ्यो बुद्धितत्त्वेभ्यो न भवति विलक्षणम् । यतोऽत्र यदुपादाय समुद्भवति बुद्धितत्त्वमेकन्तदेवोपादाय समुद्भवन्ति समान्यपि बुद्धितत्त्वानि ।

आधुनिकेन भौतिकेन विज्ञानेन मूलोपादानतत्वविवेचनसम्बन्धीनि यानि यानि विवेचनान्यद्य यावत्-प्रस्तुतानि, तानि तानि समनुसृत्य वक्तुं शक्यते । यत्—समग्रस्यापि ब्रह्माण्डस्य मूलोपादानकारणतत्वानि त्रीण्येव सन्ति । तानि चाङ्ग्लभाषायाम्—प्रोटॉन्, इलैक्ट्रोन्, तथा व न्यूट्रान्, इति समुदीर्य्यन्ते । तानि च सत्व-रजस्तमांसीति वक्तुं शक्यन्ते । विषयस्यास्य वर्णनं पूर्णतस्तु प्रकृतिवर्णनावसरे कृतमेवास्ति ।

सत्व-प्रधान-मूलतत्वतो बुद्धि-सृष्टिर्भवति । अर्थात् प्रोट्रान् तत्वमेव प्राधान्येन बुद्धि-तत्वस्य भवति समुपादानमित्यस्ति निश्चितम् ।

साम्प्रतं युगेऽमुष्मिन् साम्प्रतिकैः भौतिकं विज्ञानमेव बहुमन्वानैः बुद्धितत्वमेव चेतनतत्वत्वेन समुररीक्रियते । परमेतदस्ति चेतनतत्वं भारतीयदर्शनशास्त्रस्य चरमंल्लक्ष्यम् । यतोऽत्र जगति सुप्रसिद्धमेवास्ति यदिमानि प्राकृतानि तत्वानि तथा चैतेषान्ते ते विकारव्यूहाः न सन्ति चेतनानि, किन्त्वेतेषामपि चेतनवद् आभासयिता

कश्चन लोकातीतोऽस्ति पुरुषः। स एव पञ्चविंशतितमं तवत्त्मिति समपदिश्यते। पुरुषतत्वं वस्तुतोऽस्ति सूक्ष्मातिसूक्ष्मम्। नास्ति किमपि तत्वन्ततोऽपि परमं सूक्ष्मतमम्। तदेवास्ति च दर्शनशास्त्रदर्शनीयन्तत्त्वम्। तदेवास्ति सर्वस्याऽपि दर्शनशास्त्रस्य स्वारस्यम्। चेतनत्वेनैतत्तत्त्व प्रायशः समैश्चाऽपि दर्शनैः समुररीकृतम्। चेतनतत्त्वन्तु भवति जडतत्वेभ्यः सर्वथा पृथग्भूतम्। तथा च बुद्धितत्वमपि जडायाः प्रकृतेः समुद्भवति ह्येतस्मादपि च हेतोः कारणगुणाः कार्यगुणानारभन्ते, सिद्धान्तेनानेन च सिद्ध्यति यत्—तदेव तत्त्वञ्चेतनम् भवितुमर्हति, यत्तत्त्वञ्चेतनोपादानकम्भवेत्। नास्ति महत्तत्त्वञ्चेतनोपादानकमित्यपि नास्ति तच्चेतनम्।

यद्यपि बुद्धि-तत्त्वं स्वयं जडतत्त्वमस्ति, तथापि चैतन्याधिष्ठितं भोग्यान् भोगान् भोक्तुङ् करोति चैतन्यस्य साहाय्यम् चिच्छायापत्त्या। वस्तुतस्तु भोगाश्चापि प्रकृतेः बुद्धे र्वा सन्ति, यतोऽयमात्मा तु नित्य-शुद्ध-बुद्ध-मुक्तस्वभाव-श्चास्ति।,, परमत्र बुद्धेः परमसान्निध्यवशात्, स्वयं बुद्धिव्यवहारान् एवाऽहङ्कारपारवश्यात् स्वकर्मत्वेन स्वीकरोति। तथा चानेन प्रकारेण बद्धो भवति समान्यपि वस्तून्येतानि सन्ति प्राकृतानि कर्माण्यपि च सन्ति सर्वाणि प्रकृतान्येव नास्ति मामकीनो कश्चन नित्यः सम्बन्धो ह्येभिरित्येव सेन्द्रियम्बुद्धि-तत्त्वमध्यवसाय समान्यपि कर्माणि करोति तथैव च विकरोति।

बुद्धिसाम्ये ऽपि व्यवहारबुद्धौ भेदो कथमिति चेत् ?

यदि बुद्धिरचनानान्न भवति वैलक्षण्यम्, शास्त्रज्ञाना ऽवसरे लोकव्यहाराऽवसरे च तर्हि किमिति वैलक्षण्यम् समवलोक्यते। कुत्रचिदवलोकयामो वयं यदत्र बुद्धौ वर्त्तते तीव्रता, यथा च कुत्रचित् समवलोकयामो यदत्र वर्त्तते मान्द्यमिति। इत्थमेव कस्यचिद् बुद्धौ समवलोक्यते सात्त्विकता, कस्यचिद् बुद्धौ समवलोक्यते रजोगुणवैशिष्ट्यम्, कस्यचिद् बुद्धौ भवति तमोगुणवैशिष्ट्यमपि च। प्रत्यक्षेणानेनानुभवेन स्पष्टीभवति, यदत्र बुद्धिसृष्टौ वस्तुतो वर्त्तते किमपि वैलक्षण्यमवश्यमेव। समये समये च नैकविधानि परिवर्त्तनान्यपि सम्भाव्यन्ते, यथाऽत्र समवलोक्यते यत् कश्चिन्मन्दमतिरपि तैस्तैरूपायैः तीव्रबुद्धितां समधिगच्छति। तथा च बहवस्तीव्र-बुद्धयोऽपि नैकस्यामेव परिस्थितौ सर्वदा भवन्ति तेषां धियःस्वपि परिवर्त्तनानि जायन्ते। तेष्वपि कदाचिततो ऽपितु विशिष्टा तीव्रता समापतति,त था च कर्हिचित् बहुतरम्मान्द्यमेवात्र जायते।

बुद्धिनैर्मल्याय शास्त्रेषु यम-नियमादयः शम-दमादयश्च सन्ति, बहवः सदुपायाः समुपदिष्टाः। अतएव तैस्तैर्वैलक्षण्यैर्विलक्षणता जायते। तैस्तैः कर्माशयैस्तास्तान् भोगान् तथा तथा चोपभोक्तुं तादृश्यस्तादृश्यः स्थितयो जायन्ते बुद्धिषु। किन्तु मूल-तत्त्वपादानमेकमेवाऽस्ति प्रकृतिः। तेन बुद्धिमात्रस्य सृष्टिः समभावेन भवतीति स्पष्टीभवति। आत्मनो भोगादीनि निष्पादयितुं बुद्धिरेवैकं स्थूलं क्षेत्रभूतं शरीर-मस्ति। आत्मनः समान्यपि भोगापवर्गादीनि शरीरेणैव सम्पद्यन्ते। स्थूलशरीरस्य रचना बुद्धेः स्वव्यापारपूर्त्तौ सर्वथानुकूल्येन प्रातिकूल्येन वा जायते। शरीरसृष्टि-श्चास्ति रहस्यपूर्णा। परन्तु तद् विषये प्रशंशार्हं समभूत् समनुसन्धानम्। तदनु-सृत्य वक्तुं शक्यते, यदत्र—शरीरे मस्तिष्कस्य नैकग्रन्थीनां चेत्थम्भूता वर्त्तते रचना या बुद्धिकार्येष्वनुकूलानि वातावरणानि प्रस्तौति।

मस्तिष्कमेवाऽस्ति बुद्धि-वासभूः। मस्तिष्कस्याऽऽनुकूलेन प्रातिकूल्येन वा यादृशी स्याद् रचना, तादृश्येव सा रचना बुद्धेः तीव्रत्वम्, मन्दत्वम्, निर्मलत्वम्, मलीनत्व-ञ्च व्यापारेषु समभिव्यनक्ति। तादृशं तादृशञ्च प्रभुत्वमभिव्यनक्ति। मस्तिष्कस्य रचना ऽऽधिभौतिकी वर्त्तते। तदुपादान-तत्त्वानां वैलक्षण्येन नैकधा रचना सर्वथोपपन्ना। उपादानवैलक्षण्ये स्वरूपवैलक्षण्येन सहैवाऽऽत्मनाङ्कुशलानि कर्माण्यि-कुशलानि च कर्माणि तत्र निमित्तीभवन्ति। मर्यादैषा शास्त्रेषु प्रतिपादिता वर्त्तते। मस्तिष्कानन्तरं शरीरे काश्चन ग्रन्थयो भवन्ति यासान्निर्माणं बुद्धिव्यापार-सहयोगायैव भवति। तासु सर्वश्रेष्ठा ग्रन्थिर्वर्त्तते, यस्याः नाम भाग्यग्रन्थिरस्ति, तामेव केचन ज्ञानग्रन्थिनाम्नाऽपि व्यपदिशन्ति। अस्याः नाम साम्प्रतिके चिकित्सा-शास्त्रे "पिट्-यूटरी बोडी" इति वर्त्तते। ग्रन्थेरस्याः स्थानं नासिकामूलस्योपरि भ्रूमध्यस्य पृष्ठतश्च वर्त्तते। एषा ग्रन्थिः शरीरे तादृशान् रसान् निर्माति यादृशाः रसाः बुद्धि-कार्येषु समुपयुज्यन्ते। एषा नराणां स्वत एवाऽऽधिभौतिकीं सृष्टिमनुसृत्य स्वरसान् यत्र पर्य्याप्तमात्रायान्निर्माति, तद्रसयुक्तबुद्धयो जनाः समाजस्य राष्ट्रस्य चेन्नायकाः स्युः, तर्हि तेषां बुद्धि-बलंसुपर्य्याप्तम्भवति तथा चैते प्रोच्यन्ते धीमन्तः। बुद्धेः स्वकार्यं सञ्चालयितुञ्च समुपयुक्तम्भवति वातावरणम्। परमाऽऽनुकूल्यपूर्णेऽस्मिन् वातावरणे स्थितिमन्तो धीमन्तः सुनिश्चितरूपेण भवन्ति महान्तः। तेष्वेव भवन्ति प्रायशो दार्श-निकाः, वैज्ञानिकाः, क्रान्तदर्शिनः, कूटनीतिज्ञाः, ऋषयो मुनयश्च। पिट्यूटरीतिनाम्न्याङ् ग्रन्थौ दौर्बल्ये जाते सति भवति बुद्धिदौर्बल्यम्। इत्थमेव ग्रन्थेरस्याः रुग्णतायां

जायन्ते बहवो बुद्धिरोगाः। तेषामभिवृद्धौ च जायते बुद्धिनाशः। क्रमशश्चैवमेव जनाः भवितुमर्हन्ति, विक्षिप्ताः। अव्यवस्थितञ्च स्वीयञ्जीवनं हापयन्तो व्यर्थीकुर्वन्तश्च स्वीयञ्जीवनन्निधनमधिगच्छन्ति। तदतिरिक्तमेका ग्रन्थिरस्ति परमविशिष्टा सा बुद्धिं बहूपकरोति। ग्रन्थेस्तस्याः नाम वर्त्तते—"चुल्लिका" इति। आधुनिके चिकित्साशास्त्रे तस्याः नाम 'थाईराड् ग्लैण्डस्' इति वर्त्तते। ग्रन्थिरेषा पूर्वोक्तया ग्रन्थ्या भवति नियन्त्रिता। स्थानञ्चाऽस्याः कण्ठस्य नीचैः ग्रीवाऽस्थनश्च पृष्ठतो वर्त्तते।

ग्रन्थीमे-चुल्लिकायामिष्टिके यथा स्यात्तथा निहिते वर्त्तेते। अतएव संस्कृते ह्येतयोरवबोधकन्नाम चुल्लिकाग्रन्थिरिति वर्त्तते। उभाभ्याङ्ग्रन्थिभ्याम्मानवस्य प्रतिभा प्रकटीभवति। यदा चेमे ग्रन्थी रसान् न सम्यक् प्रकारेण निर्मीतस्तदामुखमण्डलेऽज्ञानता प्रकटीभवति तथा च गलगण्डादयो रोगाश्चाऽपि जायन्ते।

प्रकारेण चानेन बुद्धीनामुत्कर्षाऽपिकर्षणे समुत्कर्षकापकर्षकैः कारणैः समवलोक्य वयं वक्तुं शक्नुमो यदत्र बुद्धिषु, यदस्ति वैलक्षण्यम्, तद्वैलक्षण्यन्नास्ति मूलतोऽपि तु तैस्तैर्कारणैः समुपलभ्यते तद्वैलक्षण्यम्। तत्र सन्ति हेतवः सामुकर्षकाऽपकर्षकानि-कारणान्येव। आत्मनाम्पूर्वजन्मसंस्कारैश्चापि समवलोक्यते तत्र तत्र नैकधा वैलक्षण्यानि। अतएवात्र वक्तुं पारयामो यत्—सत्स्वपि बहुषु स्वरूपेषु मूलतो बुद्धितत्त्वमेकोपादानकमेवाऽस्तीति सुनिश्चितम्।

बुद्धिसृष्टौ सत्त्वाधिक्यङ् कथमिति चेत्?

सत्त्वनामको गुण एव वर्त्तते ज्ञानस्य मुख्यतमं साधनम्। सत्त्वोत्कर्षेणैव मानव आत्मज्ञानशक्तिं समधिगच्छति। अतएव सर्वोत्कृष्टं सत्त्व-प्रधानन्तत्त्वमेव चेतनस्य पुरुषतत्त्वस्य समधिकं सम्पर्कमधिगन्तुमर्हति। ह्येतादृशे सम्पर्काय तत्त्वस्यास्य परम सूक्ष्मत्वं सर्वेष्वपि व्यक्ततत्त्वेषु। परमावश्यकम् प्रलयंयावन्मुक्तिप्राप्ति-पर्य्यन्तं वा यानि सन्ति समुपलब्धानि समुपलभ्यानि च साधनानि तानि सर्वाण्यपि भजन्ते सत्त्वस्य प्राधान्यम्। चेद् वयं स्थूलभूतेभ्यो बाह्येन्द्रियेभ्यो वा समारभ्य महत् तत्त्वं यावत् तत्त्वानां

सृष्टि-प्रक्रियाविषयेऽवदधीमस्तदा प्रतीमो यदत्र तत्त्वान्तरापेक्षयेन्द्रियादिषु वर्त्तते सत्त्वस्य प्रकृष्टता । किन्तु तत्रापि पुनर्वर्त्तते सूक्ष्मातिसूक्ष्मेषु तत्त्वेषूत्तरोत्तरं सत्त्वोत्कर्षता ।

उपर्युक्तेन वर्णनेन स्पष्टीभवति यदेतन्महत्तत्त्वमस्ति प्रकृतेः प्रथमङ् कार्यम् । तथाच बुद्धिश्चेतनाऽतिरिक्ता वर्त्तते, तत्त्वमेतदपि वर्त्तते त्रिगुणात्मकम्, व्यक्तेषु समेष्वपि वर्त्तते सूक्ष्मातिसूक्ष्मन्तत्त्वम् । व्यक्तेषु वर्त्तते सर्वोत्कृष्टन्तत्त्वम् तत्वमेतत्, सत्त्वप्रधानमात्मनश्च भोगापवर्गसाधने वर्त्तते परमोपकारकम् । नेदीयस्तत्त्वमेतत्, सर्गादावेव नैकशः समुद्भवति कर्माशयानु शरीरबन्धनप्राप्तौ चात्मानङ् गृह्णाति । तथा च स्थूले शरीरे विनष्टेऽपि आतत्त्वज्ञानं सूक्ष्मशरीरे स्वाधिष्ठात्राऽऽआत्मना सह तिष्ठति । देहाद्देहान्तरञ्च प्रयाति । जाते च तत्त्वज्ञाने आत्मा मुक्तो भवति तथा चैतत्तत्वमपि स्वकारणभूतायाम्मूलप्रकृतौ लयमेति ।

—०—

बुद्धे-रष्टौ रूपाणि

अध्यवसायो बुद्धिर्धर्मो ज्ञानं विराग ऐश्वर्यम् ।
सात्त्विकमेतद् रूपं तामसमस्माद् विपर्यस्तम् ।।

अध्यवसाय एव बुद्धेर्लक्षणमस्ति—जगति कश्चिदपि पदार्थः सर्वतः प्रागिन्द्रियसन्निकर्षे समापतति तदनन्तरन्तद्विषये पदार्थो ऽयमित्थम्भूतोऽस्ति तथा चेत्थम्भूतो नास्तीति ज्ञायते, तदनन्तरम्मयेत्थमाचरणीयमथवा नेत्थमाचरणीयमिति सन्दिह्यते, अन्ततो गत्वा सर्वथैतन्निश्चीयेत यदेतन्मया समाचरणीयमिति निश्चितम् । तदनन्तरम्मानवो कानिचित्कर्माणि करोति, कानिचिच्च विजहाति। एषा चरमनिर्णयाऽऽत्मिका शक्तिरेव बुद्धितत्त्वनाम्ना समभिधीयते यस्य लक्षणत्वेनाध्वसायशब्दः प्रयुक्तोऽस्ति ।

यथा बीजे पश्चात्प्रकटीभविता ऽङ्कुरकः सुनिश्चितरूपेण भवत्येव । तथा चासौ घट एव वर्त्तते तथा चायम्पट एव वर्त्तत इति तथा चैवमेव सर्वेषामपि पदार्थानामवबोधने निश्चयोऽयं यया शक्त्या भवति, येन च तत्त्वेन निश्चयोऽयम्भवति तदेव तत्त्वं बुद्धिरित्यभिधीयते ।

बुद्धिश्चेयं सात्त्विकी-तामसीतिभेदाद्द्विविधा भवति। सात्त्विकी बुद्धिश्चतुर्विधा भवति तथा चेत्थमेव तामसी बुद्धिश्चाऽपि चतुर्विधा भवति। सात्विक्यास्तामस्याश्च बुद्धेः सर्वान् भेदान् सम्मेल्याऽष्टौ-रूपाणि जायन्ते । तत्र च बुद्धेः सात्विकाः भेदाः सन्ति धर्मो ज्ञानं वैराग्यमैश्वर्यञ्चेति । एतेष्वपि धर्मो-यथा-दया-दान-यम-नियमात्मको भवति । तत्रापि चाऽहिंसा-सत्याऽस्तेय-ब्रह्मचर्याऽपरिग्रहाः । तत्र चाऽपि शौचसन्तोष-तपः-स्वाध्याय-ईश्वर-प्रणिधानानीत्येतदाख्याः सन्ति एवं पञ्चविधो भवति नियमः । ज्ञानमपि प्रकाशाऽवगमनाऽपरपय्र्यायात्मकम्भवति तदपि च पुनर्द्विविधम्भवति बाह्यमाभ्यन्तरञ्चेति ।

बाह्यं शिक्षा-कल्प-व्याकरण-निरूक्त-छन्दो ज्यौतिषञ्चेति षड्वेदाङ्गाश्चत्वारो वेदाः, अष्टादश-पुराणानि न्याय-मीमांसा-धर्मशास्त्राऽऽत्मकम्भवति । आभ्यन्तरञ्ज्ञानं - प्रकृतिपुरुषयोर्ज्ञानमस्ति । तच्चैषा प्रकृतिः सत्त्व-रज-स्तमसां साम्याऽवस्थेत्थम्भूता वर्त्तते, तथा चासौ पुरुषो निर्गुणो व्यापकः शुद्धो बुद्धः मुक्तश्चेति सर्वथा सुनिश्चित-न्तात्त्विकञ्ज्ञानं यदस्ति तदेवाऽऽभ्यन्तरिकं ज्ञानं समभिधीयते । बाह्यं ज्ञानं सर्वस्यापि लोकव्यवहारस्य भवति परमोपकारकं सञ्चालकञ्च । मोक्षदायकम्मुक्ति-स्वरूपकञ्च भवत्याभ्यन्तरञ्ज्ञानम् ।

वैराग्यमपि द्विविधम्भवतिबाह्यमाभ्यन्तरञ्चेति । विषयाणाम्प्रत्यक्षीकरणम्, तेषाम्प्राप्तौ तेषां रक्षणम्, रक्षितानामपि च क्षये विरक्तिश्चेति बाह्यं वैराग्यम्भवति । प्रकृतिश्चाऽपि स्वप्न-निभेन्द्रजालमिव वर्त्तते । अस्यामेव वर्त्तमानायाम्परिस्थितौ सर्वथा-सर्वदा स्थायिनी नास्ति । सुनिश्चितरूपेण प्रकृतिरियं साम्यावस्थाम्प्राप्स्यति । एतानि समान्यपि प्राकृतानि वस्तूनि केवलं बाह्यासक्ति-जनकानि वर्त्तन्ते । वास्तविकं सुखमेतेषु नास्ति । नास्ति चैतेष्वात्यन्तिक-दुःख-निवृत्तिता । इत्थम्प्राकृतेभ्यो या भवति विरक्तिः, सैव चेह परमं वैराग्यमाभ्यन्तरं वैराग्यमित्यभिधीयते ।

ईश्वरस्य भावो वर्ततेऽत्रैश्वर्यम् । तद्भवत्यष्टविधम् । तस्य भेदाश्च सन्ति अणिमा, महिमा, गरिमा, लघिमा, प्राप्तिः, प्राकाम्यम्, ईशित्वम्, वशित्वम्, यत्र कामा-वसायित्वञ्चेति । यस्मिन् ऐश्वर्य्ये समधिगते पुरुषः सूक्ष्मातिसूक्ष्मीभूय विचारिन्तुं शक्नोति, तदैश्वर्य्यमणिमानाम्ना समभिधीयते । यदैश्वर्य्यं समधिगत्य महत्त्वं समधिगच्छति तदैश्वर्य्य मानाम्ना म्महि व्यवह्रियते । यस्यैश्यर्य्यस्य प्रभावेण परमलघुतां तूलपरमलवमिव समधिगच्छति तस्य नाम लघिमा वर्त्तते । स्वेप्सितं वस्तु यत्र कुत्रचिदपि स्यात् किन्तु तद्वस्तु सम्मुखं स्वेप्सित-स्थाने समधिगन्तुं सर्वथा समुप-लभते सामर्थ्यन्तस्य सामर्थ्यन्तस्यैव नाम प्राप्तिरस्ति । यदैश्वर्य्यं समधिगत्य सुविस्तृत-मपि यद्यत्कार्य ञ्चिकीर्षति तत्तत्कार्यं सुखेन कर्तुं शक्नुयात् तद् भवति प्राका-म्यम् ।

त्रिष्वपि लोकेषु स्वाऽऽकार-सिध्यर्थं पर्य्याप्त-सामर्थ्य-स्वरूपि यदैश्वर्य्यञ्जायते तस्याऽस्ति नाम ईशित्वमिति । यस्यैश्वैर्य्यस्य परमेण प्रभावेण सर्वानपि वशीकरोति तदैश्वर्य्यं वशित्वमिति सञ्ज्ञां समधिगच्छति । तथा च यस्य परमैश्वर्य्यस्य प्रभावेण आब्रह्म-स्तम्ब-पर्य्यन्तं यत्र तत्र यथेच्छं विहर्तुं स्वेप्सितानि समान्यपि च कार्याणि

कर्तुं स्थातुमुपवेष्टुञ्च शक्नोति तस्याऽस्ति नाम यत्र कामावसायित्वमिति। एतावताबुद्धेश्चत्वारि सात्त्विकानि स्वरूपाणि संसाधितानि। यदा सत्त्वं रजस्तमसी पराभूय समभिवर्धते। तदैतानि बुद्धेः सात्त्विकानि स्वरूपाणि धर्म-ज्ञान-वैराग्यैश्वर्य्याख्यानि प्रकटीभवन्ति। तथा च यदा तमः सत्त्वरजसी पराभूय समभिवर्धते तदा बुद्धेस्तामसानि अधर्म-अज्ञान-अवैराग्य-अनैश्वर्याख्यानि प्रकटीभवन्ति।

इत्थं सात्त्विकैस्तामसैश्च स्वरूपैरष्टौरूपाणि धारयन्ती बुद्धिस्त्रिगुणात्मकादऽव्यक्तात्प्रादुर्भवतीति साङ्ख्यकारिका-प्रभृतिभिः साङ्ख्यग्रन्थैः संसाधित-मेवास्तीति निश्चप्रचम्। प्रकारेणा-नेन च सुस्पष्टीभवति महत्त-त्वमिति शम्।

—०—

अहङ्कारः

साङ्ख्यदर्शने लिखितमस्ति यन्महत्-तत्त्वतो ऽहङ्कारस्योत्पत्तिर्भवतीति । तथा चान्यत्रा ऽपि निर्दिष्टमस्ति, यत्- बुद्धेरनन्तरमहङ्कारः समुद्भवति, बुद्धेरनन्तर-जातङ् कार्यमहङ्कार एवेति । बुद्धेरहङ्कारः, बुद्धेरनन्तरमहङ्कारश्चेति कथने नास्ति कश्चन भेदः । यैरुपादानतत्त्वैः बुद्धिः समुद्भवति, तेष्वेव रजस्तत्त्वस्य वैशिष्ट्ये सति भवत्यहङ्कारस्य समुद्भवः । बुद्धेरुपादानत्वे च भवति सत्त्वगुणस्याऽऽधिक्यमिति बुद्धितत्त्वनिरूपणे प्रतिपादितमेव । कैश्चिद्दार्शनिकैः नगण्यमस्ति बुद्ध्यहङ्कारयोरन्तरमिति मन्वानैः विचार्य्यते यत्- वस्तुतोऽत्र महत्तत्त्वमहङ्कारतत्त्व-मिति न वर्त्तेते पृथक् पृथक् तत्त्वेऽपि तु तत्त्वस्यैकस्यैव परिस्थितिद्वयमस्तीति प्रतीयत इति । तत्त्वञ्चै तद् दर्शनेष्वन्तःकरणमिति प्रथितमस्ति । तदेवान्तःकरणं यदा निश्चयाऽऽत्मकज्ञानस्य तथाऽध्यवसायस्य च भवति साधनन्तदा बुद्धिरिति नाम्ना समपदिश्यते । तथा च तदेवान्तःकरणं यदा ऽभिमानवृत्तेः साधनं भवति, तदा तदेवाऽहङ्कार इति नाम्ना व्यवह्रियते । इत्थमन्तःकरणस्यैकस्यैव वृत्तिभेदतो पृथक् पृथङ् नामनी वर्त्तेते, वस्तुतस्तु वर्त्तते ह्येकमेव तत्त्वम् । इत्थमेव मन्वते विद्वांसः । एतदेवान्तःकरणंसङ्कल्पात्मिकायां वृत्तौ मनः सञ्ज्ञां समभिगच्छति । इत्थमिह मनो नामकमपि तत्त्वान्तरं नास्तीति द्योत्यते । इत्थमेकमेव तत्त्वं वृत्तिभेदतो महदहङ्कारमनश्चेति प्रोच्यते ।

समुपलब्धकापिलसूत्रात्मके साङ्ख्यदर्शने लिखितमस्ति, यद्—वृत्तिभेदस्य नियामकः कोऽपि मूलाधारोऽवश्यमेव भवेत् । कारणवृत्तिषु व्यवस्थैषा समवलोक्यते । यद्—यस्य करणस्य या वृत्तिरस्ति सा तस्यैव कथम्, तत्र समवगम्यते यदत्र कस्यचिद् गुणस्य भवत्याधिक्यन्तथा च कयोश्चिद् भवति न्यौन्यम् । आधिक्यन्यौन्ये एव वर्त्तेते हेतुभूते । सत्त्वगुणप्राधान्यादेव समवलोक्यते बुद्धेरध्यवसायात्मकङ् कर्मवृत्तित्वमेव तथा च रजोगुणस्य प्राधान्यादेव समवलोक्यते ऽहङ्कारस्याऽभिमानाऽऽख्या वृत्तिः । तमोगुणस्य प्राधान्यादेव समवलोक्यते मनसः सङ्कल्पाऽऽत्मिका वृत्तिः ।

बाह्येन्द्रियेषु स्वरूपमेतत् स्पष्टतो ऽवलोकयितुं शक्यते । तद् यथा—

श्रोत्रेन्द्रियेण केवलं शब्द एवानुभूयते न स्पर्शनादिकम्, त्वगिन्द्रियेण केवलं

स्पर्शमेवाऽनुभूयते न शब्दादिकम्, इत्थमेव चक्षुरिन्द्रियं रूपमेव गृह्णाति, रसनेन्द्रियं रसानेव समास्वदते, घ्राणेन्द्रियं गन्धान् एव जिघ्रति। इत्थमेव कर्मेन्द्रियाण्यपि स्वीयमेव स्वीयङ् कर्म कुर्वन्ति । प्रकारेणानेन समेषामपीन्द्रियाणां समेषामपि बाह्याभ्यन्तरकरणानां वृत्तयः सन्ति सुनिश्चिताः सुनिर्धारिताश्च। तस्मिन् करणे तद् तद् विषयग्रहणसामर्थ्यम्भवति, तत्रास्ति बीजं गुणवैषम्यमेव। तादृशेन तादृशेन स्वरूपेण तास्ता एव वृत्तयो भवन्तीति वर्त्तते निश्चप्रचम्।

बाह्यकरणैः सह प्रत्यक्षसम्बन्धवद् अन्तःकरणम्मनो वर्त्तते। यद्यप्येतत् बाह्यकरणगृहीतसर्वविषयसम्बन्धं स्वीयां सङ्कल्प-विकल्पात्मिकां वृत्तिं प्रस्तौति। परन्तु बाह्यविषयग्रहणम्मनसो वृत्तिर्नास्ति । मनसो वृत्तिस्तु केवलं सङ्कल्प-विकल्पाऽऽत्मिका वर्त्तते। अत्रोऽत्र बाह्येन्द्रियैः गृहीतानां विषयाणां सम्बन्धे मनस्तु केवलं स्वनियतवृत्त्युद्भावनमेव विदधाति। अनेनोपर्युक्तेन प्रसङ्गेन निर्धार्यते यदस्य मनसः स्वीया वर्त्तते वृत्तिरेका सुनिर्धारिता।

इत्थमेवाऽहङ्कारस्याऽपि वृत्तिरभिमानाऽऽख्या बुद्धेश्चाऽध्यवसायाऽऽत्मिका वृत्तिरस्ति सुनिश्चिता, न कथञ्चिदप्यहङ्कारोऽध्यवसायङ् करोति, न च कथञ्चिदपि बुद्धिरभिमानङ्करोति। इत्थमस्ति सर्वथा व्यवस्थितम्। इत्थमत्र साङ्ख्यदर्शने वृत्तिभेदव्यवस्था बाह्यकरणानीवान्तःकरणानि चाऽपि सुनिश्चितभेदेषु विभज्यते। तदनुसृत्य वक्तुं पार्य्यते वृत्तिभेदस्य हेतुः करणभेद एव वर्त्तत इति कथनस्यास्य भवत्याशयो यद्— यदत्र अहङ्कारतत्त्वम् महत्तत्त्वादतिरिक्तन्तत्त्वमेवास्ति, न तस्यैव नामान्तरमिति।
अहङ्कारस्य सृष्टिः रजस्तत्त्वस्य वैशिष्ट्येन तस्यैवोपादान-सामग्र्या भवति यस्योपयोगो बुद्धितत्त्वस्य रचनायां समभूदर्थात् त्रयो गुणा एवास्याऽपि सन्त्युपादानानीति ज्ञेयम्। रजस्तत्त्ववैशिष्ट्यमेव तत्त्वमेनदहङ्कारं बुद्धितत्त्वतः सर्वथा भिन्नन्तत्त्वान्तरमेवेति प्रतिपादयति।

बुद्धितत्त्वमिवाऽहङ्कारतत्त्वमपि सृष्ट्यादावेव प्रत्येकस्मै ह्यात्मने समुद्बभूव। तथा चास्य विषयेऽपि सैवाऽस्ति प्रक्रिया यदेतत् तत्त्वमपि तैस्तैरुपायैस्तैस्तैः पूर्वजननसंस्कारैश्च समुत्कृष्टमनुत्कृष्टं वा विधातुं शक्यते। यथा बुद्धितत्त्वम्। इत्थमेवैतदपि ज्ञेयम्, यन्मूलतोऽहङ्कारतत्त्वमपि बुद्धितत्त्वमिव सामान्यमेव भवति, किन्तु समाश्रयणीयस्याऽऽत्मनो पूर्वजन्मार्जितैः कर्माशयैः श्रैष्ठ्याश्रैष्ठ्ये जायेते। समानोपादानसामग्र्याः जायमानत्वात्तज्जातत्वाच्च समान्यप्यहङ्कारतत्त्वानि भवन्ति समानानि

सर्वथा । वातावरणेन जन्मान्तर-संस्कारपारवश्येन चाऽहङ्कारतत्त्वस्य न्यौनाऽऽधिक्ये मन्दतोत्कटते च भवतः । शारीरिक्याः रचनायाः वैशिष्ट्येन, प्रवृत्तीनाम्प्रवर्त्तनस्य पार्थक्येन, आहार-व्यवहारादीनां वैविध्येन चाऽहङ्कारतत्त्वस्य स्थितिषु वैलक्षण्यं समनुभूयते । परमत्राऽवधेयमस्ति यत् तत्राऽहङ्कारतत्त्वस्य मूलसृष्टौ मूलस्वरूपे च नास्ति कश्चन भेदलेशोऽपि ।

साङ्ख्यशास्त्रप्रक्रियाञ्च समनुसृत्याऽहङ्कारतत्त्वस्य स्वरूपादेवान्तरिन्द्रियम्मनः समजायत, तथा च श्रोत्रादीनि पञ्चज्ञानेन्द्रियाणि वागादीनि पञ्चकर्मेन्द्रियाणि च समजायन्त, तामसादहङ्काराच्च पञ्चतन्मात्राणि समुद्भवन्ति । अहङ्कारस्य मनसादीनाञ्च परस्परङ्कारण-कार्यभावं समनुसृत्य समुपादानोपादेयभावं वा समनुसृत्या ऽहङ्कारस्य त्रयो भेदाः जायन्ते ।

१. वैकारिकोऽहङ्कारः ।
२. तैजसोऽहङ्कारः ।
३. तामसोऽहङ्कारश्चेति ।

तत्र वैकारिकादहङ्कारान् मनस्तत्त्वं समुद्भवति, तैजसादहङ्काराद्, बाह्येन्द्रियाणि, तामसादहङ्काराच्च पञ्चतन्मात्राणि समुद्भवन्तीति ज्ञेयम् ।

वैकारिकादहङ्कारान्मनसः समुत्पत्तिः

वैकारिकादहङ्कारान्मनसः समुद्भवो भवतीति तु प्रथममेव निर्दिष्टम्, किन्तु तद्भवति केन प्रकारेणेति प्रतिपाद्यते ऽत्र । पूर्वमस्माभिर्निर्दिष्टमेव यद् रजोगुणस्याऽऽधिक्यमेवाऽहङ्कारतत्वस्याऽहङ्कारत्त्व-प्रतिपादकम्भवतीति । तत्राहङ्कारतत्त्वे रजोगुणविशिष्टत्वाऽऽपादको कश्चन विकारो जायते । तच्चेत्थमवगन्तव्यम्-यदऽहङ्कारतत्त्वे कश्चनांशो रजोगुणस्याभिवर्धते, तथा च कश्चनांशः सत्त्वगुणस्य न्यूनतामधिगच्छति, ह्येतादृशी परिस्थितिरेव मनः सञ्ज्ञाम्भजते ।

वयमवलोकयामो यद्—यैरुपादानकारणैरहङ्कारस्य समुद्भवो भवति, तानि समुपादानकारणानि यावत् स्वीयामेवाऽवस्थां संरक्षन्ति तावदऽहङ्कारसञ्ज्ञैव जायते, जाते हि न्यौन्याऽऽधिक्ये यो भवति परिणामस्तमनुसृत्यैव तस्य वैकारिकरिति सञ्ज्ञा सञ्जायते। स च विकारोऽहङ्कारे समभूदिति तस्य सञ्ज्ञा वैकारिकोऽहङ्कार रिति भवति। स एव मनसो हेतुर्भवति। इत्थञ्चाऽत्र स्पष्टीभूतम्- यद्वैकारिकादहङ्कारान्मनः कथमभूदिति।

तैजसावहङ्कारादिन्द्रियाणि जायन्ते

मनसः समुत्पत्तौ या भवत्युपादानसामग्री, तस्यां रजोगुणस्यांशः समभिवर्धते, रजोगुणश्च भवति सर्वदा सर्वथा गतिमान् इत्येतस्मादेव हेतोः तेजः स्वरूपकोऽयमिति मन्वते। रजोगुणस्याऽऽधिक्यवशादेवोपादानसामग्री सा तैजससञ्ज्ञां समधिगच्छति। सा च प्रक्रिया समग्राऽपि भवत्यहङ्कार-तत्त्व एवेति तस्य नाम तैजसो ऽहङ्कार इति भवति। तस्मादेव तैजसादहङ्कारादिन्द्रियाणि समुद्भवन्ति। तानि चेन्द्रियाणि द्विविधानि भवन्ति। कानिचिद् भवन्ति ज्ञानेन्द्रियाणि कर्मेन्द्रियाणि चेति कानिचित्।

इदमत्राऽवधेयमस्ति यदत्र तैजसादहङ्कारादेव ज्ञानेन्द्रियाणि कर्मेन्द्रियाणि च समुद्भवन्ति, किन्तु तत्राऽपि विशुद्धतैजसादहङ्कारात् समुद्भवन्ति ज्ञानेन्द्रियाणि तथा च तत्रैव किञ्चिन्मात्रायां तमोगुणस्य वृद्धौ सत्याङ्कर्मेन्द्रियाणि समुद्भवन्ति।

चेत् कश्चन विप्रतिपद्येत यदत्र, जाते परिवर्त्तने कथन्तदपि तैजसोऽहङ्कार एवेति, तस्याऽस्ति समाधानमेतद् यत्तत्र तमोगुणस्याऽभिवृद्धौ सत्यामपि रजोगुणस्य स्थितिः यथापूर्वमेव भवति, केवलं तत्र सत्त्वगुणस्य न्यूनता जायते तमोगुणस्य च वृद्धिः। रजोगुणविशिष्टत्वादेव च तस्याहङ्कारस्य सञ्ज्ञा तैजसोऽहङ्कारश्चेति भवति, उभयत्राऽपि च रजोगुणप्राधान्यम्भवत्येवेति नास्ति काचन विप्रतिपत्तिः। तमोगुणस्या-

ऽऽपेक्षिकरूपेणाऽऽधिक्यादेवैतानि कर्मेन्द्रियाणि ज्ञानसिद्धौ भवन्त्यसमर्थानि । इन्द्रियाणां सृष्टिं यावत् सृष्टिः सात्त्विकी सृष्टिरित्यभिधीयते । आत्मनः सान्निध्यवशात् भोगापवर्ग सिद्धये सन्नद्धत्वाच्च तत्त्वान्येतानि सात्त्विकानीति समुदीर्य्यन्ते । प्रोच्यतैषा सृष्टि-रध्यात्मसृष्टिरिति । यतो ह्येषा ह्यात्मनो भोगापवर्गयोः संसाधिका वर्त्तते सृष्टि-रियमिति ।

अध्यात्मसृष्टेरनन्तरन्तामसादहङ्कारात् पञ्चतन्मात्राणि समुद्भवन्ति । सा च सृष्टिः समभिधीयते ऽधिभूतसृष्टिरिति । अहङ्कारस्य कारणसामग्र्यां यदा सत्त्वांशो पर्य्याप्तरूपेण न्यौन्यम्भजते । तदनुपातेनैव द्विगुणादप्यधिकानि रजोगुणतत्त्वानि जायन्ते सत्त्वरजोगुणयोः मात्राऽपेक्षया द्विगुणमात्रायाञ्जायते तमो गुणः, तदा तन्मा-त्राणाञ्जायते सृष्टिः । तमोगुणस्य प्राधान्यादेवास्य तामसो ऽहङ्कारश्चेति सञ्ज्ञा सञ्-जायते । सृष्टिरेषा तन्मात्रनामधेयाऽपि वर्त्तते, स्थूल भूताऽपेक्षया सूक्ष्मतरेति तथा चेन्द्रि-याण्यपि तन्मात्राणि साक्षात्कर्त्तुं सामान्यरूपेण नैव शक्नुवन्तीति, महाभूतानाञ्च सूक्ष्-मरूपेण वर्त्तमानानि मूलकारणानि सन्तीति च प्रोच्यन्ते तन्मात्राणीति । पञ्चतन्मात्राणां नामानि चेत्थं सन्ति—

१. शब्दतन्मात्रम् ।
२. स्पर्शतन्मात्रम् ।
३. रूपतन्मात्रम् ।
४. रसतन्मात्रम् ।
५. गन्धतन्मात्रञ्चेति ।

क्रमशश्चैतानि पञ्चतन्मात्राण्याकाश-वायु-तेजो-जल- पृथिवीनां भवन्ति समुद्भवकारीणि ।

इत्थमत्रा ऽहङ्कारतत्त्वस्य मूलस्वरूपङ्कीदृशम्भवति, तस्य स्थितयो कास्काः सम्भवन्ति, ताभिश्च कानि कानि तत्त्वानि केन केन प्रकारेण समुद्भवन्तीति, सर्वमपि प्रतिपादितम्भवतीति शम् ।

मनस्तत्त्वम्

मनः शब्दो नैकत्र नैकधा प्रयुज्यमानो विराजते। कैश्चिदात्मस्थाने प्रयुज्यते, कैश्चिदहङ्कारस्थाने प्रयुज्यते, कैश्चिद् बुद्धि-स्थाने समुपयुज्यते कैश्चिच्चित्तस्थाने प्रयुज्यते, कैश्चिच्च ज्ञानकर्मोभयात्मकमिन्द्रियमिति स्थाने समुपयुज्यते। उपर्युक्तो प्रयोगो ऽयं वर्त्तते सर्वथौपलक्षणिकः। तद् भवतु नाम। तत्त्वस्यास्य मुख्यतया तु प्रयोगो भवति सुप्रसिद्धतया ज्ञानेन्द्रियाणाङ् कर्मेन्द्रियाणां परमोपकारकमुभयात्मकमिन्द्रियम्मैनरितीन्द्रियस्यार्थमिति वर्त्तते सुनिश्चितम्।

"मनः एव ममुष्याणाङ्कारणं बन्धमोक्षयोः"

इत्यादीनि वचांसि बोधयन्ति यदनेन मनसा सहैव सर्वाण्यपि ह्येतानीन्द्रियाणि स्वं स्वन्नियोगमनुतिष्ठन्ति। तैः सम्पादितानि कर्माण्येव चेदासक्त्या समाचरितानि स्युस्तर्हि बन्धकराणि भवेयुः, तान्येव विशुद्धे मनसि निःस्पृहतया केवलमस्ति कर्त्तव्यमिति बुद्ध्या च क्रियमाणानि मुक्तिप्रदानि भवन्त्येवेति। उभयेन्द्रियात्मकं यद् वर्त्तते तत्त्वन्तदेवाऽस्ति मनस्तत्त्वमिति वक्तुं शक्यते। तथा च तस्मिन् सर्वथा वशीभूते सति सर्वथा छिन्नीभवन्त्याशापाशबन्धनानि, भवति च सर्वथा विमुक्तः। सङ्कल्प-विकल्पयोश्च जाते संयमे सर्वथा सुखीभवति जनः। मनस्तत्त्वस्यैव जायन्तेकामाः। कामा एव भवन्ति बन्धनकारिणः। मूल- संयमे तेषामपि न सम्भाव्यते जनिरिति मनः संयमे सर्वथा तत्त्वज्ञानाय भवति सन्नद्ध जाते च तत्त्वज्ञाने विवेकख्यातौ च सत्यां भवति विमुक्तः नूनमेव।

वैकारिकादहङ्कारान्मनसः समुद्भवो केन प्रकारेण जायते तथा च कश्चात्र सङ्कल्पवृत्तिकञ्चेदन्तत्त्वम्भवतीति सुनिश्चितरूपेण वार्षगण्यादयश्चाऽप्याचार्यास्तत्त्वमिदमिन्द्रियत्वेनैव प्रतिपादयामासुः। तत्त्वस्याऽस्य विषये ऽप्यहङ्कार तत्त्वनिरूपणावसरे सुविशदरूपेण प्रतिपादितमेवेति शम्।

इन्द्रियाणि

सूक्ष्मशरीरे त्रयोदशकरणानि भवन्ति । तेषु, बुद्धिः, अहङ्कारः, मनश्चेति सन्त्यन्तःकरणानि । तदतिरिक्तानि करणानि लोकेऽस्मिन्निन्द्रियाणीति समुदीर्य्यन्ते । तेषाञ्च नामानि सन्ति, यत्—

१. श्रोत्रेन्द्रियम् ।
२. त्वगिन्द्रियम् ।
३- चक्षुरिन्द्रियम् ।
४. रसनेन्द्रियम् ।
५. घ्राणेन्द्रियम् ।
६, वागिन्द्रियम् ।
७. पाणिरिन्द्रियम् ।
८. पादेन्द्रियम् ।
९. पाय्विन्द्रियम् ।
१०. उपस्थेन्द्रियञ्चेति ।

एतदतिरिक्तन्तृतीयमन्तःकरणमपि ज्ञानकर्मोभयात्मकेन्द्रियरूपेण गृह्यते । तदिन्द्रियं वर्त्तते—

११. मनश्चेतिनामकम् ।

एतेषु पञ्च ज्ञानेन्द्रियाणि सन्ति पञ्च कर्मेन्द्रियाणि च सन्ति । मनश्चोभयात्मकमिन्द्रियं भवतीति सुनिश्चितम् ।

ज्ञानेन्द्रियाणि कर्मेन्द्रियाणि च बाह्यकरणत्वेन प्रगृह्यन्ते । मनोनामधेयमन्तःकरणञ्च ज्ञानेन्द्रियैः-सह, कर्मेन्द्रियैः सहैव च तिष्ठतीति तथा च तन्मन एव तानि तानि सर्वाण्यपि खानि स्वयं संयुज्य तत्तद् विषयमुपभोक्तुमर्हाणि विदधाति । इत्येतस्मादेव हेतोः प्रधानेन्द्रियमिति निगद्यते मनः।

ग्राह्यैः विषयैः सह साक्षात्सम्बद्धत्वादेव सर्वाणीमानीन्द्रियाणि तत्तद्

विषयस्यानुरूप्येणैव तानि नामानि समधिगच्छन्ति। विषयाश्चेत्थं वर्त्तन्ते—श्रोत्रस्य शब्दः, त्वचःस्पर्शम्, चक्षुषोःरूपम्, रसनायाः रसः, घ्राणस्य गन्धः, वाचो वचांसि, पाण्योरादानम्, पादयोर्विहरणम्, पायोरुत्सर्गः, उपस्थस्यानन्दः, मनसः स्मृतिश्चेति सन्ति ।

यद्यपि वर्त्तते पुरुषतत्त्वे व्यापकत्वम्, तथा च प्रकृतावपि वर्त्तते विभुत्वम्, किन्तु किमिति प्रत्येकम्परमाणुरणु र्वा नैव शृणोति, न स्पृशति, नालोकयते, न समास्वदते, न जिघ्रति, न वक्ति, न गृह्णाति, न विहरति, नोत्सृजति, नानन्दीभवति, न स्मरति, न च सङ्कल्पविकल्पौ वाऽपि विदधाति ।

तथा च वर्त्तते ऽयमात्मा चेतनधर्मा तथापि किमितितस्मिन् सर्वत्र विराज—माने सत्यपि चेतनधर्माः न प्रकटीभवन्ति, इत्येतावान् शङ्कासमूहः समुदेति चेत् ?

समुदीर्य्यते, यद्यपि प्रत्येकस्मिन् अणौ परमाणौ वा वर्त्तते ऽयमात्मा। किन्तु नैवाऽस्ति तत्र तत्र सूक्ष्मशरीरम् । इन्द्रियाणामन्तःकरणानाञ्चाऽभावान्न ते ते विषयाः भुज्यन्ते, न चेतरेऽपि चेतनधर्माः प्रस्फुटीभवन्ति ।

यत्र यत्र यावन्ति यावन्तीन्द्रियाणि प्रकटीभवन्ति, सुविकसितानि च जायन्ते। तत्र तत्र तावन्तस्तावन्त एव विषयाः गृह्यन्ते। चेतनत्वञ्च सुप्रकटीभवति । अतोऽत्र वर्त्तते ऽस्मिन् जगतीन्द्रियाणामपि परमावश्यकता, परमं महत्त्वञ्चेति शम्।

—०—

तन्मात्राणि

तन्मात्राणि पञ्च भवन्ति। तेषान्नामानि चेत्थं वर्त्तन्ते।

१. शब्दतन्मात्रम्।
२. स्पर्शतन्मात्रम्।
३. रूपतन्मात्रम्।
४. रसतन्मात्रम्।
५. गन्धतन्मात्रञ्चेति।

अधिभूतसृष्टौ सर्वप्रथमन्तन्मात्रवर्गो जायते। अधिभूतस्रष्टावप्युपादान-तत्त्वानि सत्त्व-रजस्तमांसि तु भवन्त्येव, परन्तत्र सत्त्वगुणस्य रजोगुणस्य च भवति न्यूनता तथा च तत्र तमो गुणस्य भवति वैशिष्ट्यम्। अधिभूतसृष्टौ यैस्तत्त्वैः स्वीयं स्वरूपं स्थायित्वेनोररीकृतन्तानि तत्त्वानि त्वाधुनिकैः तत्त्वविद्भिः वैज्ञानिकैः सम्यक् प्रकारेणाऽन्विष्टानि सन्ति। आधुनिकाः प्रतिपादयन्ति यदधिभूतसृष्टौ तादृंशि तत्त्वानि परस्परं सार्धैकगुणितं वैषम्यम्भजन्ते।

अधिभूतसृष्टौ तमो गुणस्य भवति प्राधान्यम्। सत्त्वगुणस्य रजोगुणस्य च भवत्यप्राधान्यम्। अतएव तन्मात्रसृष्टिस्तामससृष्टिरिति नाम्नाऽपि निगद्यते।

आधुनिकाः विद्वांसोऽत्रः एलीमेण्टेतिनाम्ना यस्य तत्त्वजातस्य निरूपणङ् कुर्वन्ति, तत्तन्मात्रवर्गमेवेति सम्भाव्यते। यतस्तैः यादृशं विवेचनं एलीमेण्टनामधेयस्य तत्त्व-जातस्य व्याख्याने कृतन्तद्भवितुमर्हति तन्मात्रवर्गस्याऽपि। तैः प्रतिपादितं यद्— एलीमैण्टतत्त्वन्तत्त्वमस्ति। यत् सृष्टिक्रमे विशेषां स्थितिं समधिगत्य स्वीयं स्थायि

स्वरूपन्धारयति। स्वस्वरूपे तदेकमेव तत्वन्तिष्ठति तस्मिन् तत्वे तत्वान्तरस्य सम्मिश्रणन्नाऽवतिष्ठते। साङ्ख्यशास्त्रप्रतिपादितस्य तन्मात्राऽऽख्यस्य तत्त्ववर्गस्यापि परिस्थितिरेतादृश्येव वर्त्तते।

तन्मात्रसञ्ज्ञैव तन्मात्रगतं वैशिष्ट्यमभिव्यनक्ति, तदेवास्तीति तन्मात्रम्, तादृशमेवास्तीति तन्मात्रम्, तस्मिन् तत्त्वाऽन्तरस्य सम्मिश्रणन्नास्तीति तन्मात्रम्, तन्मात्राऽऽख्यस्य तत्त्वग्रामस्य रचना स्वल्पतमस्य सत्त्वगुणस्य, तथा स्वल्पतमस्य रजोगुणस्य सर्वाधिकतमस्य च तमोगुणस्य विलक्षणेन सङ्घटनेन भवतीति वर्त्तते सर्वथा निश्चप्रचम्।

—o—

महाभूतानि

पञ्चतन्मात्रेभ्य एव पञ्चमहाभूतानि जायन्ते। येषान्नामानि निर्दिश्यन्ते क्रमशः।

१. आकाशमहाभूतम्।
२. वायुमहाभूतम्।
३. तेजोमहाभूतम्।
४. जलमहाभूतम्।
५. पृथिवीमहाभूतम्।

शब्दतन्तात्रतः समुद्भवत्याकाशमहाभूतम् ,स्पर्शतन्मात्रतः समुद्भवति वायुमहाभूतम्, रूपतन्मात्रतः समुद्भवति तेजोमहाभूतम्, रसतन्मात्रतः समुद्भवति जलमहाभूतम्, गन्धतन्मात्रतश्चोद्भवति पृथिवीमहाभूतम्।

अथ चैतदपि वक्तुं शक्यते, यदेतानि तत्तत् तन्मात्रमेव स्थौल्यं समधिगत्य प्रकटरूपतां वा समधिगत्य तत्तन्महाभूततां समधिगच्छन्तीति।

परमेतदत्रास्त्यवधेयम्, यदिमानि महाभूतानि प्रत्येकस्मात् प्रत्येकं सर्वथा नैव सन्त्यसम्पृक्तानि। अपि तु प्रत्येकस्मिन् महाभूते तदतिरिक्तानि समान्यपि महाभूतानि समधिगम्यन्ते। तद्यथा—

आकाशमहाभूते—	१।२	१।८	१।८	१।८	१।८
	आकाशमहाभूतम्	वायुः	तेजः	जलम्	पृथिवी
वायुमहाभूते—	१।२	१।८	१।८	१।८	१।८
	वायुः	आकाशम्	तेजः	जलम्	पृथिवी

तेजोमहाभूते—१।२	१।८	१।८	१।८	१।८
तेजोमहाभूतम्	आकाशम्	वायुः	जलम्	पृथिवी
जलमहाभूते—१।२	१।८	१।८	१।८	१८
जलमहाभूतम्	आकाशम्	वायुः	तेजो	पृथिवी
पृथिवीमहाभूते—१।२	१।८	१।८	१।८	१।८
पृथिवीमहाभूतम्	आकाशम्	वायुः	तेजो	जलम्

उपर्युक्तमात्रासु सर्वाण्यपि महाभूतानि परस्परं समनुस्यूतानि सन्ति ।

चेत् कश्चनाऽऽशङ्कते यदत्र समेषामपि महाभूतानां समवायो वर्त्तते तर्हि, किमिति पृथक् पृथङ् नामानि गृह्यन्त इति । तत्राऽस्ति समाधानं यद्-यद्यपि सर्वेष्वपि भूतेषु सन्ति सर्वाण्यपि भूतानि किन्तु तत्तन्नामके महाभूते तस्य-तस्य महाभूतस्यैव भवति प्राधान्यमिति, तत्तन्नाम्नैव समभिधीयते। यतो ऽत्र वर्त्तते सिद्धान्तोऽयं यत्- "प्राधान्येन व्यपदेशाः भवन्ति" यत्र-यत्र यस्य यस्य वर्त्तते प्राधान्यं तत्र-तत्र तस्य तस्यैव भवति नाम ।

आचार्याः श्रीमाठराः समुल्लिखन्ति यत्——

"शब्दतन्मात्रादाकाशं, स्पर्शतन्मात्रात्तेजः, रसतन्मात्रादापः, गन्धतन्मात्रात पृथिवीत्यादिक्रमेण पूर्वपूर्वानुप्रवेशेनैकद्वित्रिचतुष्पञ्चगुणकान्याकाशादीनि पृथिवीपर्य्यन्तानि महाभूतानीति सृष्टिक्रमः २२ ।"

तथा चाग्रे लिखन्ति यत्—

'शब्दादिभ्यो पञ्चभ्य आकाशादीनि पञ्चमहाभूतानि पूर्वपूर्वानुप्रवेशादेकद्वित्रि चतुष्पञ्चगुणान्युत्पद्यन्ते ।३८ ।। इति।"

लौकिके व्यवहरणे ऽपि पञ्च महाभूतानाङ् क्रमिको विकासः समवलोकयितुं शक्यते । तद् यथा—

चेत् कुत्रचित् कश्चन पुरुषो धावति तर्हि धावनक्रियायाम्भवत्याकाशतत्त्वस्य विकासः। तदनन्तरं श्वास-प्रश्वासयो र्वैलक्षण्येन भवति वातः। तत्पश्चाद् धावमानेन समनुभूयते महदुष्णता। तदनन्तरञ्च स्वेदकणाः समुल्लसन्ति शुष्कीभूते स्वेदवारिणि तदेव वारि पृथिवीरूपेण समवलोकयितुं शक्यते।

अतएवात्र प्रतिपाद्यते यदत्र सृष्टावपि प्रकारेणानेन, अनेनैव क्रमेण महाभूतानां सृष्टिर्भवति।

एतदतिरिक्तं यानि वस्तूनि साम्प्रतमस्माभिः समुपलभ्यन्ते। तमुपलब्धेषु-

तेषु कानिचित् पार्थिवानि कानिचिद्वायवीयानि कानिचित् तैजसानि इत्यादिकम्प्रतिपाद्यते। परमत्र विचारणीयम्भवति यदिमानि तत्त्वानि पार्थिवानीति वस्तूनि समवलोक्यन्ते। किं कृतेऽपि विश्लेषणे तानि सर्वथा पार्थिवान्येव सन्ति, उत तत्त्वान्तरयुक्तान्यपि सन्तीति,। प्रत्यक्षतः समवलोक्यते यदिमानि न सन्ति सर्वथा पार्थिवान्येव, किन्तु वर्त्तन्ते ऽत्र तत्त्वान्तराण्यपि। तानि चेत्थमवलोकयितुं शक्यन्ते, यथा- किमपि पार्थिवं वस्तु गृह्यताम्, तत्र तैलं पानीयं वा निपात्यताम्, वयमवलोकयितुं शक्नुमो यत्तत्र तद्द्रव्यन्तु तस्मिन् वस्तुनि पूरितम्भवति तेन सिध्यति यत्तत्रास्ति कश्चानाऽवकाशाऽऽत्मकमाकाशम्, यत्र यत्रावकाशः तत्र-तत्र वायुसञ्चारोऽपि नूनमेव भवतीति सिध्यति तत्र वर्त्तते वायुरपीति, कृते च सङ्घर्षणे तत्रैवाऽग्निः साक्षात् समवलोकितुं शक्यते तथा चोष्णता सम्यक् प्रकारेण समधिगन्तुं शक्यते। तेन च सिध्यति यत्तत्र वर्त्तते ऽग्निरपीति। सङ्गठनात्मकं स्नेहधर्मिणो जलस्य धर्मस्तत्र वर्त्तत एवेति सिध्यति, पृथिवी तु तत्र मुख्यरूपेण वर्त्तत एवेत्थमिह सिध्यति यत्तत्र तत्त्वान्तराण्यपि प्रत्येकस्मिन् महाभूते विराजन्त एवेति निश्चितम्। इत्थञ्चैतदपि स्पष्टीभवति, यदिमानि पृथिव्यादीनि किं स्वरूपाणि भवन्तीति शम्।

—०—

साङ्ख्यसिद्धान्तनिरूपणम्

प्रमाणादिविषये दर्शनान्तरैः सह साङ्ख्यस्य नैकमत्यमिति साङ्ख्यदर्शन दिशा साङ्ख्यसिद्धान्तनिरूपणाऽध्याये प्रमाणादिविषयाः सङ्क्षेपतो विविच्यन्ते। येन साङ्ख्यदर्शनजिज्ञासूनाङ्कृते ग्रन्थस्यास्य समुपयोगिता परिवर्धिष्यत एवेति निश्चप्रचम् ।

प्रमाणम्

साङ्ख्यशास्त्रे वर्णितानान्तत्त्वानाङ् केन प्रकारेण कियद्भिर्प्रमाणैः सिद्धिर्जायत इति जिज्ञासोपशान्तये प्रमाणवर्णनमपि वर्त्तते परमाश्यकमिति प्रमेयाणां सिध्यर्थं प्रमाणानि निरूप्यन्ते-साङ्ख्यशास्त्रे प्रमाणन्त्रिधा निरूपितमस्ति । अर्थात् साङ्ख्य-प्रक्रियायां प्रमाणस्य त्रयो भेदाः स्वीक्रियन्ते । तत्र प्रमाणम्प्रत्यक्षमस्ति । द्वितीयमनुमानमस्ति । तृतीयञ्च भवत्याप्तवचनाऽऽख्यम् ।

तत्र श्रोत्र-त्वक्-चक्षु-जिह्वा-घ्राणञ्चेति ज्ञानेन्द्रियाणि सन्ति । शब्द-स्पर्श-रूप-रस-गन्धाश्चेत्येतेषां विषयाः सन्ति । श्रोत्रेन्द्रियं शब्दङ् गृह्णाति, त्वगिन्द्रियं स्पर्शङ् गृह्णाति, रसनेन्द्रियं रसङ् गृह्णाति, घ्राणेन्द्रियङ्गन्धङ्गृह्णातीत्येतत् सर्वमपि कार्यजातम्प्रत्यक्षमित्येवाभिधीयते । अर्थात्-यदिन्द्रियं यत् साक्षात् करोति तद्भवति तत् प्रत्यक्षम् । यथा चक्षुषा घटमद्राक्षमित्यत्र चक्षुषा घटस्य प्रत्यक्षमभूत् । तथैव केनापि घट इत्युच्चार्यमाणं शब्दं श्रुतवान् ज्ञानञ्चाऽध्यगच्छदित्यत्र श्रोत्रेन्द्रियप्रत्यक्षता समभूत्। यदा हस्तेनास्पृशदित्यत्रत्वक् प्रत्यक्षमभूत् । यदा जिह्वा समास्वादनमकरोदिति प्रयोगः स्यात्तत्र रसनेन्द्रिय-प्रत्यक्षता । यदा घ्राणेन्द्रियेणाजिघ्रत्तत्र घ्राणेन्द्रियप्रत्यक्षता वर्त्तते । एवमेव सर्वाण्यपीन्द्रिय-गोचरीभूतानि वस्तूनि तथा-तथा साक्षात्कर्तुं शक्यन्ते तानि सर्वाणि सन्ति, प्रत्यक्ष-प्रमाणसिद्धानि । चतुर्विंशतितत्त्वेषु यानि स्थूलभूतानि प्रत्यक्षीकर्तुं शक्यन्ते तानि सन्ति प्रत्यक्ष-प्रमाण-साध्यानीति प्रत्यक्षम्प्रमाणमुररीक्रियते । तथा चानुमानादीनि प्रमाणान्यपि प्रत्यक्षमाधारीकृत्यैव साध्यन्त इति प्रत्यक्ष-प्रमाणम्प्रथमतः स्वीक्रियते ।

अनुमितिकरणमनुमानम् । तद्भवति त्रिविधम् । पूर्ववत्, शेषवत्, सामान्यतो दृष्टञ्चेति । यत्र कारणेन कार्यस्यानुमितिः क्रियते-यथा मेघान् समवलोक्य वर्षायाः ह्यनुमितिङ्करोति, यतोऽत्र पूर्वन्दृष्टं यन्मेघाऽऽगमे वृष्टिः समभूदिति । पूर्वदृष्टमिवानुमीयते ऽत्र तथा पूर्वाऽऽगमेन पश्चाद्भाविनी वर्षा समनुमीयतेऽतोऽत्र पूर्ववदनुमानमस्ति ।

यत्र कार्यात् कारणस्यानुमितिर्विधीयते, तत्र शेषवद् भवत्यनुमानम् । तद् यथा समुद्रादेकञ्जल-पलमादाय समास्वाद्य क्षारत्वमधिगत्य शेषमपि वारि सर्वं क्षारत्वविशिष्टमस्तीति समनुमीयते ऽतो ऽत्र शेषवदनुमानमस्तीति ज्ञेयम् ।

सामान्यतो दृष्टमनुमानमपि पुनर्द्विविधम्भवति । कुत्रचित् लिङ्ग-पूर्वकम्भवति कुत्रचिच्चलिङ्गि-पूर्वकम् भवति । लिङ्गपूर्वकन्तदभिधीयते यत्र लिङ्गेन लिङ्गिनोऽनु-मानङ् क्रियते यथा दण्डन्दृष्ट्वा दण्डिनः समनुमितिः क्रियते । यदेतद् दण्डमस्तीत्यत्र दण्डी भवितुमर्हति । दण्डमेतद् वर्त्तते दण्डिनः । इत्यत्र लिङ्ग-भूताद् दण्डात् लिङ्गिनो ऽनुमिति वर्तते ऽत्र लिङ्ग-पूर्वकं सामान्यतो दृष्टमनुमानम् ।

तथा च यत्र लिङ्गिनं समवलोक्य लिङ्गस्यानुमितिर्विधीयते तद्भवति लिङ्गि पूर्वकमनुमानम् । यथा सन्न्यासिनन्दृष्ट्वा दण्डस्यानुमितिः । कार्य-कारण-सम्बन्धाभावेऽपि केवलं लिङ्गस्य लिङ्गनश्चानुमानं विधीयते परस्परमनुमानमिति सामान्यतो दृष्टमनुमानम्भवति कार्य-कारणयोर्व्यतिरिक्तमनुमानम् ।

प्रत्यक्षेणाऽनुमानेन च यानि-यानि तत्त्वानि गृहीतुन्नैव शक्यन्ते, तानि-तानि समान्यपि तत्त्वानि ह्याप्तवचनैः गृह्यन्ते । यथेन्द्रो देवानामधिपतिः, उत्तराः कुरवः, स्वर्गेऽप्सरस इत्यादीनि स्थलानि ज्ञेयानि । आप्तवचनविश्लेषणे प्रतिपादितं शास्त्रकृद्भिर्यत्—

आगमो ह्याप्तवचनं आप्तं दोषक्षयाद् विदुः ।
क्षीणदोषोऽनृतं वाक्यं न ब्रूयाद्धेत्वसम्भवात् ।।
स्वकर्मण्यभियुक्तो यः सङ्गद्वेष-विवर्जितः ।
पूजितस्तद्विधैर्नित्यमाप्तो ज्ञेयः स तादृशः ।।

प्रमाणत्रिकविषये भगवता श्रीईश्वरकृष्णेन प्रतिपादितं यत——

दृष्टमनुमानमाप्तवचनञ्च सर्वप्रमाण-सिद्धत्वात् ।
त्रिविधम्प्रमाणमिष्टं प्रमेयसिद्धिः प्रमाणाद्धि ।।

प्रमाणानां स्वरूपन्निरूपयामासुर्यत्——

प्रतिविषयाध्यवसायो दृष्टन्त्रिविधमनुमानमाख्यातम् ।
तल्लिङ्ग-लिङ्गि-पूर्वकमाप्तश्रुतिराप्तवचनन्तु ।।

केन-केन प्रमाणेन कानि कानि तत्त्वानि साध्यन्त इति निर्दिशन्ति—

सामान्यतस्तु दृष्टादतीन्द्रियाणाम्प्रतीतिरनुमानात् ।
तस्मादपि चासिद्धं परोक्षमाप्तागमात् सिद्धम् ।।

न्यायदर्शनेन स्वीकृतमुपमानप्रमाणङ्गोसदृशो गवयरित्युदाहरणकमाप्तपुरुष-वचनमनुसृत्य वन्ये जन्तौ गोसादृश्यमवलोक्य परिचीयतेऽ तोऽत्र प्रमाणान्तरता न भवत्यपि तु शब्दप्रमाणे ऽस्याऽन्तर्भावो जायते । अथ चेत् कश्चित्तत्र गोः सादृश्यमव-लोक्य गवयोऽग्रमित्यनुमिनोति तर्हि तस्याऽन्तर्भावो भवत्यनुमानप्रमाणे । यदि केनचिद्-गवयम्प्रत्यक्षतोऽवलोक्याऽध्यवसीयते तस्य गवयत्वन्तदा प्रत्यक्षप्रमाणेऽन्तर्भावो भवतीति विज्ञेयम् । इत्थमिहैतेषु त्रिष्वपि यथाप्रसङ्गमन्तर्भाव्यते परम्प्रमाणान्तरत्वन्नोररी क्रियते ।

अर्थापत्तिरिति प्रमाणान्तरस्याऽपि स्वीकृतेरावश्यकता नास्ति यतस्तस्यान्तर्भावो भवत्यनुमितौ । यथा "पीनो देवदत्तो दिवा न भुङ्क्ते" तस्य रात्रिभोजनमर्थापत्तिप्रमा. णेन साध्यते । परमिह यो-यो भुङ्क्ते स-स पीनो भवति, यो न भुङ्क्ते, न स पीनो भवतीति दिवाऽभुञ्जानस्याऽपि देवदत्तस्य पीनत्वन्तस्य रात्रिभोजनमनुमापयतीति विषयोऽयं सर्वथाऽनुमानप्रमाणस्यास्तीति नार्थाशक्तिः प्रमाणान्तरम् । "वटेयक्षिणी वसतीति साधयितुन्दार्शनिकैरैतिह्याऽऽख्यं प्रमाणान्तरञ्चापि स्वीक्रियते, परमिह यदि वस्तुतस्तत्र यक्षिणी वसति, तर्हि शब्दप्रमाणमेतन्नो चेत्तत् प्रमाणमेव नैव भवतीति

नेदम्प्रमाणान्तरं सिध्यति। अभावाख्यम्प्रमाणमपि कैश्चित् स्वीक्रियते किन्तु तस्याऽपि नास्ति स्वीकृतेरावश्यकता। यतोऽत्र घटाभाववद्भूतलमिति साधयितु-मेवाऽभाव-प्रमाणं स्वीक्रियते, परमेतत्तु प्रत्यक्षप्रमाणेनैव सिध्यतीति नास्य प्रमाणान्तरता भवितुमर्हति।

"द्रोणो ब्रीहिः" इत्युदाहार्यं द्रोणान्तर्गतानामाढकादीनाञ्ज्ञानार्थं परिमाणाख्यमपि प्रमाणान्तरं स्वीकुर्वन्ति केचन विद्वांसः। परमेतस्य प्रमाणस्याऽपि यत् प्रमेयमस्ति तत्प्रत्यक्षतोऽनुमानप्रमाणेऽन्तर्भवतीति नैतत्प्रमाणान्तरतामर्हतीति निश्चितम्।

इत्थमिह नैकैराचार्यैः प्रमाणान्तराणि यानि स्वीकृतान्यासन् तानि सर्वाणि यान् विषयान् प्रमाणीकुर्वन्ति ते सर्वेऽपि विषयारेभिस्त्रिभिः प्रमाणैरेव सर्वथा प्रमाणिताः भवन्तीति त्रिविधमेव प्रमाणं साङ्ख्यशास्त्रस्येष्टं भवति, यतः सर्वाण्यपि प्रमेयाण्येभिरेव सिध्यन्तीति शम्।

—०—

सत्कार्यवादः

साङ्ख्यशास्त्रस्य प्रधानतमः सिद्धान्तः सत्कार्यवादोऽस्ति। सत्कार्यवाद-सिद्धान्त-भित्तावेव प्रकृत्यादीनां सूक्ष्मतमानां परमसूक्ष्मतमानान्तत्वानामव्यक्त-तत्त्वानां सिद्धिः क्रियते। सिद्धान्तमेनं सारांश-स्वरूपेण प्रतिपादयितुं शक्नुमो यत्- संसारेऽस्मिन् किमपि वस्तु सर्वथा नूतनन्नोत्पद्यते। अभावात् किमपि प्राप्तुन्नैव शक्यते, तथा च समुत्पन्ने वस्तुनि ये गुणाः समवलोक्यन्ते, ते गुणाः यस्मात् कारणत्वेन वर्त्तमानात् तत्त्वाद्वस्तुनो वा कार्यस्वरूपं वस्तु समुत्पद्यते, तन्नूनमेव कारण-स्वरूपेण वर्त्तमाने तत्वे सूक्ष्मरूपेण व्यक्तीभावात् प्रागपि तिष्ठत्येव।

बौद्धाश्चैतन्मन्वते यदसतः सज्जायते" एतेषाम्महानुभावानामस्त्याशयोऽयं यदेकस्य कारण-स्वरूपेण वर्त्तमानस्य पदार्थस्य नाशे सति कार्यमुत्पद्यते। पदार्था-न्तरमुत्पद्यत इत्यर्थः। उदाहरण-स्वरूपेण प्रतिपाद्यते, यदत्र बीजस्य नाशेऽङ्कुरोत्पत्तिः अङ्कुरस्य नाशे, वृक्षोत्पत्तिः सञ्जायते। परमत्रास्ति साङ्ख्य-शास्त्रस्य सर्वथा वैमत्यम्। साङ्ख्यशास्त्रम्प्रतिपादयति, यत् कस्यचिदपि वृक्षस्य बीजे यानि भूतद्रव्याणि सन्ति तेषान्नाशो न भवति परञ्चान्यान्येव द्रव्याणि पृथिव्यप्तेजोवायुभ्यः स्वानुकूलानि तत्त्वानि समाकृष्य सदङ्कुररूपिणीन्नूतनान्दशाम्प्राप्नुवन्ति। इत्थमेव यदा काष्ठानि दह्यन्ते, तदा तेषामेव धूमादीनि रूपान्तराणि जायन्ते। काष्ठस्य भूतद्रव्याणां विनाशेन धूम्रनामकङ् किमपि तत्त्वान्तरन्नैव जायते। "छान्दोग्योपनिषदि प्रोक्तमस्ति यत्[1]" कथमसतः सज्जायते यद्वस्त्येव नैव तत् कुतो जायेत। यदप्युपनिषत्सु जगताम्मूलकार-णत्वेन प्रतिपादिततत्त्वाय असच्छब्दस्य प्रयोगो भवति। तथापि तत्राऽसदितिशब्दस्यास-यार्थोऽभावो नास्ति। अपि त्वसचछब्देन केवलन्नामरूपात्मकस्य व्यक्तस्वरूपस्यावस-थायाः भावमात्रं विविक्षत-मस्ति। न ह्ययमत्यन्तासत्वाऽभिप्रायेण प्रागुत्पत्तेः कार्यस्यास-द्व्यपदेशः किन्तर्हि व्याकृत-नाम-रूपत्वात् धर्माद्व्याकृतनामरूपत्वं धर्मादव्याकृत-नाम-रूपात्मकत्वं धर्मान्तरम्, तेन धर्मान्तरेणायमसद्व्यपदेशः प्रागुत्पत्तेःसत एव कार्यस्य

१. छान्दोग्योपनिषद् ३। १२। १।
तैतिरियोपनिषत् 2-७-१

कारणरूपेणानन्यस्य दुग्धादेव दधिः समुत्पद्यते, न नीरात्कर्हिचिदपि, तिलेभ्य एव तैलन्निःसरति न सिकताभ्यः, इत्यादिभ्यो प्रत्यक्षानुभूतिभ्योऽपि एष एव सिद्धान्तः स्थैर्यमाप्नोति ।

चेदेषा मान्यता यत्कारणे ये ये नैव सन्ति गुणाः ते तेऽपि गुणाः कार्ये स्वातन्त्र्येण समुत्पद्यन्त इति । तर्हि नूनमस्य कारणं दर्शयितुन्न शक्यते । यदत्र नीराद्दधिः कथन्न जायत इति । सारांशोऽस्ति यद् यत्तत्वम्मूले सर्वथा नास्ति तत्तत्वं कुतः जायेत अविद्यमानङ् किमपि वस्तु कुतश्चिदपि केनापि प्रकारेण समुत्पत्तुन्नैव शक्नोति । अतएव साङ्ख्यशास्त्रं सिद्धान्तरूपेण प्रतिपादयति, यत् कस्यचिदपि कार्यस्य वर्त्तमानद्रव्यांश गुणाः तस्य मूलकारणेऽपि केनापि रूपेण तिष्ठन्त्येवेति निश्चितम् । एष एव सिद्धान्तः सत्कार्यवाद-नाम्ना समभिधीयते ।

आधुनिकस्य पदार्थ-विज्ञानस्याऽप्येष एव सिद्धान्तोऽस्ति, यत् पदार्थानां हेतु—भूतस्य द्रव्यस्य कर्मशक्तेश्च स्थितिः सदा भवत्येव । कस्यचित्पदार्थस्य कियन्तो ऽपि विभागाः, स्युः परमन्तेऽपि तस्य द्रव्यांशानाङ्कर्मशक्तेश्चयोगः समानरूपेणैव भवति । उदा-हरणार्थम्—कथयदा प्रोच्यते यदत्र दादादीपो प्रज्वलति तदा शनैः शनैः तस्यतैलन्नयूनताम् अन्ते चप्राप्नोति, तन्नश्यतीति समवलोक्यते परन्तस्वे भवति तस्य विनाशमेव प्राप्तस्य वा चैतस्य परमाणूनां सर्वथा सत्ताराहित्यं विनाशो वा नैव जायते । तेषामस्तित्वं धूम्रकज्जलादि नैकविधि-सूक्ष्मद्रव्याणां स्वरूपत्वेन तिष्ठत्येवेति। चेदिमानि सूक्ष्म-द्रव्याणि स्वीकृत्य कश्चिद् कथयेद्यत्तेषाम्भानं ने ज्वलन-समये सम्मिश्रितैः वायवीयैःतत्त्वैः सममेव भवेत् । एष एव नियमः कर्म शक्तिविषयेऽपि वक्तुं शक्यते । आधुनिकं पदार्थ-विज्ञानशास्त्रमतीवव्यापकरूपेण कथयति यत् कार्यस्य कोऽपि गुणकारणातिरिक्तगुणेभ्यो नैव समुत्पत्तुं शक्नोतीति ।

एतावदेव नैव परमिह यदा कारणङ् कार्यस्वरूपं प्राप्नोति तदा तस्मिन् विद्यमानद्रव्यांश-कर्मशक्त्यो र्न किञ्चिदपि नश्यति । पदार्थस्य विभिन्नास्ववस्थास्ववस्थितानां द्रव्यांश-कर्मशक्तीनां तथास्य भानं सर्वदा सदृशमेव भवति । न कर्हिचिदपि न्यौन्यमधिगच्छति न चाऽभिवर्धते । वार्त्तैषा गणितशास्त्रस्य प्रत्यक्ष-प्रयोगैः संसाधिता वर्त्तते ।

---

१. ब्रह्मसूत्रशाङ्करभाष्यम् २।१।१७

श्रीमद्भगवद्गीतायामपि सुस्पष्टमुद्घुष्टमस्ति यत्—

"नासतो विद्यते भावो नाऽभावो विद्यते सतः ।
उभयोरपि द्रष्टोऽन्तस्त्वनयोस्तत्त्वदर्शिभिः ।।"   (गी० २—१६)"

अर्थात् यद् वस्तु सर्वथा ऽसदस्ति तद् वस्तु कथञ्चिदपि भवितुन्नैव शक्नोति । तथा च यद् वस्तु सदस्ति तस्याभावो कथञ्चिदपि भवितुन्नैव शक्नोति । तत्त्वविद्भिः महात्मभिरेवं सदसदोः सिद्धान्तः सुस्थिरीकृतोऽस्ति ।

एषः श्लोकोऽपि सत्कार्यवादसिद्धान्तं परिपोषयति । यद्यप्यस्मिन् श्लोके सच्छब्द स्यार्ऽथः साक्षाद् ब्रह्म जीवात्मा वाऽस्ति, असच्छब्दस्यार्थश्च नामरूपात्मकन्दृश्यञ्जगत् सर्वथा भौतिकं शरीरञ्चेति वर्त्तते, तथापि कारणे सूक्ष्मरूपेण सर्वथाऽव्यक्तायां परिस्थितौ वर्त्तमानस्य कार्यस्यैव व्यक्तीभावो भवति । कस्यचिदप्यभूतपूर्वस्य कार्यस्योत्पत्तिर्न जायते । अस्मिन् सत्कार्यवादेऽपि श्लोकस्याऽस्य प्रयोगः कर्त्तुं शक्यते । साङ्ख्यशास्त्रं सत्कार्यवाद-सिद्धान्तमनुसृत्यैव दृश्याऽऽत्मकस्य जगतो मूलतत्त्वानि समन्विष्य सृष्टेः क्रमिकां श्रृङ्खलान्निरूपयामास । एषः सत्कार्यवाद-सिद्धान्तः श्रीमता ईश्वरकृष्णमहोदयेनाऽपि स्वविरचितायां साङ्ख्यकारिकायां प्रतिपादितोऽस्ति यत्—

असदकरणादुपादान-ग्रहणात् सर्व-सम्भवाभावात् ।
शक्तस्य शक्यकरणात् कारणभावाच्च सत्कार्यम् ।।"

सिद्धान्तेनानेनैतदपि सिध्यति यदेषा सृष्टिचाऽपि कस्मादपि पदार्थादेवाऽस्ति समुत्पन्ना शून्याद् अभावाद् वा नैव ।

साम्प्रतञ्च ये गुणाः सृष्टौ दृश्यन्ते त एव तस्मिन् मूल-पदार्थेऽपि सुनिश्चितमेव भवेयुः यदा वयं सृष्टौ दृष्टिक्षेपङ् कुर्मस्तदा पृथिव्यप्तेजोवाय्वाकाशात्मकानि बहूनि वस्तूनि नैकविध-स्वरूपेष्ववलोकयामः । एतेषां समेषामपि स्वरूपेषु पृथक् पृथग्गुणाः समुप-

लभ्यन्ते। साङ्ख्यशास्त्रस्य सिद्धान्तोऽस्ति यत्- भिन्नतैषा समेषामप्येतेषां मूलपदार्थे नास्ति। तन्मूलोपादानकारणभूतन्तत्त्वमेवाऽस्तीति ज्ञेयम्।

यद्यपि पाश्चात्यैर्विद्वद्भिर्वैज्ञानिकैः स्तेषामनुयायिभिश्च विभिन्नद्रव्याणां पृथक्-करणङ् कृत्वा द्विनवतिसङ्ख्याकानि तत्त्वानि सामञ्जस्येन वर्त्तन्त इति प्रतिपादितम्।

परमत्र त एव वैज्ञानिकाः साम्प्रतमेतन्निश्चयीकुर्वन्ति यदिमानि समान्यपि तत्त्वानि सर्वथा स्वतन्त्राणि स्वयं सिद्धानि वा नैव सन्ति। परमेतेषां समेषामपि मूले किमप्येकमेव तत्त्वं विद्यमानमस्ति। तस्मादेव तत्त्वानीमानि दृश्यमानानि समान्यपि तत्त्वानि तथा चाऽदृश्यमानानि तत्त्वानि चाऽप्रकटीभूतानीति। यदेतदेभिः महानुभावैस्त-त्वान्तरम्भूततत्त्वस्वरूपेण प्रतिपाद्यते तदेव तत्त्वं साङ्ख्यशास्त्रे प्रकृति-नाम्ना समभिधीयते।

'मूले मूलाभावादमूलम्मूलम्' (१—१६) तथा चसर्वभूतानाङ्कारणमकारणम्। "सुश्रुतसंहिता शा०" इतः परं यानि तत्त्वानि सन्ति तानि सर्वाण्यपि विकृतिनाम्ना व्यपदि-श्यन्ते, अर्थान्मूलप्रकृतेर्विकारा इति प्रतिपादयन्ति।

त्रैगुण्यम्—सर्वपदार्थानाम्मूलप्रकृतेः सर्वथैकत्वेऽपि यद्यस्यां गुणोऽपि सर्वथैक एव भवेत्तर्हि स्वर्ण-रजत-वारि-मृदादिषु विभिन्नेषु पदार्थेषु स्थितानामनेकेषां गुणानां सम्भूतिः भवितुन्नार्हति। सत्कार्यवाद-सिद्धान्तमनुसृत्य कारणे विद्यमानाना-मेव गुणानाङ् कार्ये प्रादुर्भावो भवितुं शक्नोति नान्येषाम्। अतएव साङ्ख्यशास्त्रं समेषामपि पदार्थानाङ् गुणविवेचनङ्कृत्वा सत्त्व रजस्तमोगुणाश्चेति त्रीन् विभागान् करोति। एतें त्रयोऽपि गुणाः जगताम्मूलतत्त्वभूतायाम्प्रकृतौ प्रारम्भत एव सन्ति। तथा चैतदेव कथनं सर्वथा सङ्गच्छते, यदेते त्रयोऽपिगुणा एवसामञ्जस्येन प्रकृतिरिति। लिखितमपि—

सत्त्वं रजस्तम इति ह्येषैव प्रकृतिः परा।
एषैव संसृतिर्जन्तोरस्याः पारं परं पदम्॥

एते गुणाः रूपरसादितुल्याः नैव सन्ति धर्मरूपाः, परं धर्मिस्वरूपिणो वर्त्तन्ते, अर्थाद् द्रव्य-स्वरूपिणः सन्ति । एवं पृथिव्यादीनिद्रव्याणीव संयोग-विभागादि-गुणानामाधार-भूमयः सन्ति । पुरुषम्प्रत्यमुख्यत्वादर्थात् ततो गौणत्वाद्गुणा इति समुदीर्यन्ते । अथ च पुरुषस्वरूपिणः पशोः बन्धनार्थङ्गुणरूपाः रज्जुपुरूपाः गुणाः सन्ति । सृष्ट्यादौ त्रयोऽपीमे गुणा भवन्ति सर्वथा समानाः ह्येतेषां भाने शक्तौ वा न किमप्यन्तरम्भवति । एषा सर्वथा साम्याऽवस्थैव प्रकृतिरिति समभिधीयते । अस्यां साम्यावस्थायान्न काचिदपि क्रिया भवति । दिग्देश-कालादि-सर्वविकल्पना-शून्या निरन्ध्रा निःस्तब्धतैव सर्वत्र सर्वथा व्याप्नोति । तस्याः स्थितेः प्रत्यक्षीकरणकर्तॄणां प्राणीनां सृष्टिश्चापि तस्मिन् समये नाऽभवत् ।] तस्याः स्थितेः स्वतन्त्रमुदात्तम्गलभम्मार्मिकञ्चेति वर्णनं ब्रह्म निःश्वसिते ऋग्वेदस्य दशममण्डलस्य सपाद-शततमे १२५, नासदीये सूक्ते हीत्थङ्कृतमस्ति । यत्—

नासदासीन्नो सदासीत्तदानीन्, नासीद्रजो नो व्योमा परो यत् ।
किमावरावः कुहकस्य शर्मन्, अम्भः किमासीद्गहनं गभीरम् ।।
न मृत्युरासीदमृतन्तर्हि न रात्र्या अह्नः आसीत् प्रकेतः ।
आनीदवातं स्वधया तदेकं तस्माद् धान्यन्न परः किञ्चनास ।।

यद्यपि तदानीमसन्नासीत्, सन्नो आसीत्, इत्यादि वचोभङ्ग्या निर्दिष्टाः सर्वे विकल्पाः न केवलं साम्प्रतिकस्य साङ्ख्यस्यैवेति वक्तुं शक्यन्ते । अपि तु व्यक्तायाः सृष्टेरुद्भवस्य प्राक् तस्याः मूलतत्त्वे किमासीद् इत्यस्यास्य विवेचने महर्षिभिः नैकैः नैकधा कल्पनाः कृताः, ताः सन्ति केवलन्दृष्टिकोणवैषम्यादेव तथा तथा प्रतिपादिताः तासामेवैतत् सूत्रमस्ति ।

याः समस्ताः [सर्वथा ऽऽस्तिक नास्तिकदर्शनानामाधार-भूताः कल्पनाः सन्ति, यासामुद्धारश्च श्रीमद्भिः मधुसूदनाऽऽचार्यैः कृत एवास्ति य आसन् साक्षान्मधुसूदनाऽवतारनिभाः । परमिह दर्शनानामान्दोलनात्प्राक् समस्तमपि ज्ञानं विज्ञानञ्च साङ्ख्य-नाम्नैव प्रसिद्धमासीत् । यथा साम्प्रतं पञ्चविंशति-तत्त्वानां विवेचनपरमेव शास्त्रं साङ्ख्यमस्तीति मन्वते, न तथा तदानीम् । "नासदासीत्तदानीम्" वचनेनानेन स्पष्टीभवति, यदसौ सत्कार्यवादसिद्धान्तः तथोद्भूतेः प्राक् कार्यस्याऽव्यक्ता दशा भवति सूचिता । योऽस्ति साङ्ख्यस्य मुख्यतमो विषयः । सहैवैको निष्कर्ष एषोऽपि

निःसारितो यदस्याः सुविचार-परम्परायाः सर्वतो प्राक् प्रारम्भणमपि साङ्ख्येनैव कृतमिति ।

एते गुणाः दोष-प्रत्यनीकाः धर्माश्चाऽपि नैव सन्ति । परं व्यक्त-रूपापन्नानामखिले जगति विद्यमानानान्धर्माणां धर्मिणां वा ऽवयवीनां वा ह्येतादृशोऽवयवाः सन्ति ये तान् अवयविनो पदार्थान् एव दोष-गुण-स्वरूपिभ्यो धर्मेभ्यो न्यौन्याऽऽधिक्येन स्वरूपेण सर्वदाऽनुप्राणन्ति। एतेषां व्यापक-परिधेः जगतः किमपि वस्तु पृथग्भूतन्नास्ति । एते सुख-दुख-मोहात्मकाः सन्ति । उदाहरणत्वेन—ह्येकं शोभनं वस्त्रङ् गृह्यतान्तदेव वस्त्रं धारयन्तं पुरुषमानन्दयति, तथा यैः दुष्प्राप्यं तान्दुःखीकरोति, तथा च यैस्तद्विषयकङ् किमपि ज्ञानन्नाऽऽकलितन्तान् मोहयति । एतदेव नैवाऽपि तु यदत्र सुख-दुःख-मोहाः सर्वथैकस्मादेव वस्तुनो नैकेषु जनेषु भवन्ति, परमेते त्वेकस्मिन्नपि सर्वे भवितुं शक्नुवन्ति ।

तद्यथा—

तदेव वस्त्रं परिधानवेलायां समानन्दयति, तस्करैः परिहृतं नष्टम्भ्रष्टं वा दुःखाकरोति । तथा तदेव स्वरचनादि-विषये मोहमपि जनयति । अज्ञानजन्यामासक्तिञ्च जनयति । चेतनस्याऽस्य व्यवहरणे सम्प्राप्यमाणानां समेषामपि जडजङ्गमानां स्थितिरेषैव भवति ।

—०—

सूक्ष्म-शरीरम्

त्रयोदशकरणानि पञ्चतन्मात्राणीत्यष्टादशतत्त्वानि सूक्ष्मशरीरत्वेन गण्यन्ते। तत्र सूक्ष्मतन्मात्राणि सन्त्याधारभूतानि तदितराणि च तत्त्वानि सन्त्याधेयभूतानि। स्थूलेऽस्मिन् शरीरे प्राणादीनामस्तित्वेनाऽऽत्मनो विद्यमानता संसाध्यते। साङ्ख्यशास्त्रे प्राणादयः समेषामपि करणानां सामान्यवृत्तित्वेन गृह्यन्ते। कथनस्यास्याभिप्रायोऽयमस्ति यत्—करणानां स्थितावेव प्राणादीनां स्थितिः सम्भवति। अतएव करणान्यात्मनो लिङ्गानीति प्रतिपादयन्ति। सूक्ष्मशरीरांशस्यास्य नाम लिङ्गशरीरम्भवति। पञ्चतन्मात्राणि सूक्ष्मशरीरे करणानां समाश्रयत्वात् कारणशरीरनाम्नाऽपि व्यवह्रियन्ते। क्वचिदांशिकरूपेणांऽऽशिकनाम्नैव सम्पूर्णस्याप्यन्तराभवदेहस्य नाम गृह्यते। तत्र मा भूच्छङ्केति विज्ञेयं यत्—तत्र तत्र तस्य तस्य अंशस्य वैशिष्ट्यम्भवत्येवेति तन्नाम्ना सम्पूर्णो ऽयमन्तराभवदेहो वर्ण्यते।

चेतनो ऽयमात्मा साधनरहितः सन् जडजगतां सम्पर्के न किमपि कर्त्तुं प्रभवति, किन्तु सूक्ष्मशरीरं समाश्रित्य स्थूलं शरीरञ्चाऽधिगत्य स्व-साक्ष्येण समान्यपि कर्माणि करोति विकरोति च।

विवेकख्यातिं यावदात्मनः सम्बन्धः सूक्ष्मशरीरेण सह भवति। जातायां विवेकख्यातौ पुरुषः सर्वथा मुक्तो भवति। कर्मसम्बन्धात् कर्माशयवासनानुगोऽयमात्मा सूक्ष्मशरीरी सन् देहाद् देहान्तरमभिधावन् नैकधा भवति भोगभाग् इत्यस्मादेव कारणात् तत् साधनीभूतोऽयं देहोऽन्तराभवनाम्ना समभिधीयते।
युक्तिदीपिकायां लिखितमस्ति यत्—

वैवर्त्तं शरीरं मातृ-पितृ-संसर्गकाले करणाऽऽविष्टं शुक्रं शोणितञ्चाऽनुप्रविशति। तदनुप्रवेशाच्च कललादिक्रमेण वर्धते व्यूढावयवन्तु समुपलब्धप्रत्ययं मातुरूदरान्निःसृत्य यौ धर्माधर्मौ षट्सिद्ध्युपभोगकाले कृतौ तद् वशादवतिष्ठते, यावत् तत्क्षयाच्छरी-

रपातस्तावत् । यदि धर्मसंस्कृतं करणन्ततो द्युदेशं सूक्ष्मशरीरेण समवाप्यते, तद् विपर्ययात्तु यातनास्थानन्तिर्यग्योनि वा मिश्रीभावेन मानुष्यम् । एवमातिवाहिकं सूक्ष्मशरीरमिन्द्रियाणां धारण-प्रापणा समर्थन्नित्यं बाह्येनापायिना परिवेष्ट्यते परित्यज्यते च ।"

सन्दर्भेणानेन स्पष्टीभवति यत्—असावात्मा सर्वाः क्रियाः स्वीयेन साक्ष्येण सूक्ष्मशरीरेणैव करोतीति । तथा च प्राप्ते समये तत्त्वज्ञानं समधिगत्य धर्माधर्मयोः साम्ये जाते सति, कर्माशयाणाञ्च जाते परिक्षये सूक्ष्मशरीरादऽपि विमुक्तो भवति । सूक्ष्मशरीरमेवातिवहति देहाद्देहान्तरमिति तस्यैव नामाऽऽतिवाहिकदेहोऽन्तराभवदेहश्चेति च भवतीति शम् ।

—०—

सिद्धिविज्ञानम्

ऊहः, शब्दोऽध्ययनम्, आध्यात्मिकदुःखविघातो ह्याधिदैविकदुःखविघातो, ह्याधिभौतिकदुःखविघातः सुहृत्प्राप्तिर्दानञ्चेत्यष्टौ सिद्धयः सन्ति, यासान्निरूपणं विधीयते क्रमशोऽत्र। तत्र ऊहः—वयङ्कुतः समागतास्तथा चैतस्मिन् जगति कानि कानि वस्तूनि सत्यानि वर्त्तन्ते, कानि कानि चाऽत्र सन्ति सर्वथा सत्यत्व-विरहितानि। तथा चैतस्माज्जगतो मुक्तिः केन प्रकारेण समधिगन्तुं शक्यते। कानि कानि च कार्याणि विदधन् सर्वथा कृतकृत्यो भवितुं शक्नोति मानव इति। इत्थमेव विचारयन्तो मानवाः कर्हिचित् समवगच्छन्ति, यदसौ पुरुषः सर्वथा प्रकृतेः पृथग्भूतो वर्त्तते। अर्थात् महत्तत्त्वं, अहङ्कारतत्त्वं, पञ्चतन्मात्राणि, पञ्चज्ञानेन्द्रियाणि, उभयात्मकमिन्द्रियम्मनः, पञ्चमहाभूतानि, सर्वाण्यपि चैतानि, तथा तथा परिदृश्यमानानि तत्त्वानि पुरुषतत्त्वतः सर्वथा पृथग्वर्त्तन्ते। इत्येवम्प्रकारके तत्त्वज्ञाने जाते सति समनुभूते सति च पुरुषाः सर्वथा जीवन्मुक्ताः मुक्ताश्च भवन्ति। प्रक्रियया चानया मोक्षदायिनी या वर्त्तते सिद्धिः सा चेह ऊहनाम्ना व्याह्रियते।

सारांशोऽस्य वर्त्तते यदिह विना केनाप्युपदेशेन पूर्वजन्मनामभ्यासबलेन स्वयमेव तादृशास्तादृशाः विचार-सन्दोहाः जायन्ते। तान् समनुसृत्य च क्रमशो मोक्षसिद्धिं समधिगच्छति। सैव सिद्धिः ऊहनाम्ना व्याह्रियते।

शब्दनाम्नी सिद्धिः सा वर्त्तते, यस्यां पुरुषः स्वयमेव पूर्वजन्मनामभ्यासबलेन तादृशान् विचारान् नाधिगच्छति यादृशैः मुक्तिभाग्भूयात्। परन्तादृशः शब्दान् समवलोक्य श्रुत्वा श्रुत्वा च तेषां मननेन ज्ञानं समधिगत्य मुक्तो भवति। मुक्त्याऽऽधायकैः शब्दैरेव प्रका-रेणानेनं मुक्तो भवतीति सिद्धेरस्याः नाम शब्दसिद्धिर्वर्त्तते।

अध्ययनमिति नामधेया सा वर्त्तते सिद्धिः या गुरुमुखाद्वेदादीना मोक्षशास्त्राणा

मध्ययनेन समधिगम्यते । यत्र वेदादीनाङ् ग्रन्थरत्नानां प्रकृष्टेन ज्ञानेन यज्ज्ञानं समधिगम्यते तेन, ज्ञानेन चाधिगच्छति विवेकख्यातिम्न्तथा चैतया समधिगच्छति मोक्षसिद्धिमध्ययनरूपाम् । अर्थाद् यत्र वेदादीनामध्यनेनैव तत्त्वज्ञानञ्जायते—पुरुषः, प्रकृतिः, महत्तत्त्वम्, अहङ्कारः पञ्चतन्मात्राणि पञ्चज्ञानेन्द्रियाणि, पञ्चकर्मेन्द्रियाणि, ज्ञानकर्मोभयात्मकम्मनश्चेति पञ्चमहाभूतानीति पञ्चविशंति-तत्त्वानां याथातथ्येनावबोधो जायते तेन च मुक्तः स्यादित्यनेन प्रकारेण या सिद्धिः समधिगम्यते सा ऽध्ययन-नाम्ना समभिधीयते ।

त्रिविधमस्ति दुःखम्—आध्यात्मिकम् आधिभौतिकम् आधिदैविकञ्चेति । तत्र चाध्यात्मिकन्दुःखद्विविधम्भवति शारीरम्मानसञ्चेति । शारीरं वात-पित-श्लेष्मणां वैषम्यान्नैकधा नैकदा भवति । मानसञ्च काम-क्रोध-लोभ-मोह-भय-ईर्ष्या विषाद-विषयविशेषादर्शननिबन्धनम्भवति ।

उपर्युक्त-प्रकारेण समुपलभ्यमानन्दुःखमान्तरोपायसाध्यत्वादाध्यात्मिकमुच्यते । वस्तुतस्तु मनस्येव सङ्कल्पविकल्पौ जायेते दुःखस्य मनो धर्मो ररीकृतमेव प्रत्यक्षसिद्धमेव चास्ति । किन्त्वत्र यदस्ति मनो मात्रजन्यन्तदस्ति मानसं यच्च, वर्त्तते बाह्यनिमित्तसापेक्षम्मनोजन्यन्तदस्ति शारीरम् । इत्यस्मादेव हेतोरत्राध्यात्मिकदुःखस्य द्वैविध्यम्प्रतिपाद्यते ।

बाह्योपायसाध्यन्दुःखमपि द्विविधमाधिभौतिकमाध्यात्मिकञ्चेति । तत्रास्ति ह्याधिभौतिकम्- मानुष-पशु-सरीसृप-स्थावर-निमित्तकम् । आधिदैविकञ्च यक्ष-राक्षस-विनायक-ग्रहावेशनिबन्धनमित्यनेन प्रकारेण त्रिविधं यद्दुःखमुपजायते । तस्य दुःख-समुदायस्य सर्वथा सर्वकालाय च केन प्रकारेण निवृत्तिर्जायेत एतादृशया जिज्ञासा-परम्परया तत्त्व-ज्ञानं समधिगम्य मुक्तो भवति । इत्यनेन प्रकारेण मुक्तिप्रदा या वर्त्तते सिद्धिः सा वर्त्तते नामत्रयात्मिका । तस्याः सन्ति नामानि क्रमशः-आध्यात्मिकदुःखविघात आधिदैविकदुःखविघात आधिभौतिकदुःखविघातश्चेति सन्ति । दैवयोगात् कश्चनो ज्ञानी सुहृद्रूपेण प्राप्येत तथा तस्य सौहार्दपरिपूर्णैः सदुपदेशैः क्रमशः सर्वथा तत्त्वज्ञानञ्‍ जायेत । जाते च विवेके मोक्षसिद्धिस्तु संसिद्धा भवत्येव अस्याम्मुक्ति-प्रापक-प्रक्रियायां सुहृत्प्राप्तिरेवास्ति मूलमिति सिद्धेरस्याः नाम सुहृत् प्राप्तिर्वर्त्तते ।

कश्चनः सम्पन्नो सामाजिकः श्रेष्ठेभ्यस्तत्त्वविद्भ्यो महात्मभ्यो भोजना-

च्छादनादीनि सदुपयोगीनि वस्तूनि वितरन् प्रसादरूपेण तेभ्यो महात्मभ्यस्तत्त्वज्ञानं समधिगच्छेत् । तेनैव च क्रमशस्तत्त्वज्ञानीभूय परमम्पुरुषार्थं प्राप्नोति । प्रकारेणानेन या मोक्षसिद्धिः समधिगम्यते तस्य मूलकारणत्वेन दानमेव विराजत इति सिद्धेरस्याः नाम दानमित्येव समभिधीयते ।

एताश्चैवाऽष्टौ सिद्धयो योग-शास्त्रे—तारम्, सुतारम्, तारतारम्, प्रमोदम्, प्रमुदितमिति, प्रमोदमानम्, रम्यकम्, सदाप्रमुदितमिति नामभिः सङ्गृहीताः सन्ति ।

भगवता श्री ईश्वरकृष्णेनाऽपि सिद्धीनामेतासान्निरूपणं साङ्ख्यकारिकाख्य-ग्रन्थे कृतं तद्यथा—

ऊहः शब्दोऽध्ययनं दुःखविघातास्त्रयः सुहृत् प्राप्तिः ।
दानं च सिद्धयोष्टौ ——॥

सामान्यरूपेण योगशास्त्रेऽप्यसम्प्रज्ञातसमाधिसिद्धेः सरण्यां समुपलभ्यमानाः सांसारिक्योऽपि बह्व्यः साक्षात् सिद्धयः प्रतिपादिताः सन्ति । तासामपि लाभः साम्प्रतिकानाम्बहुकरं स्यादिति वर्त्तमाने ऽप्यमुष्मिन् योगशास्त्रस्य।स्त्यपेक्षा ऽध्ययनाध्यापनयोः शास्त्रमेतन्न केवलं परम-पुरुषार्थमात्रसाधकमस्त्यपितु साम्प्रतिके जगति समुपस्थिताः सर्वाः समस्याः सम्यक्तया समाधातुमप्यलमिति, वर्त्तते सिद्धीनामेतासाम्महत्त्वमैहिकामुष्मिकञ्चेत्युभयथा समपेक्ष्यन्ते सिद्धयः सर्वैश्चाऽपि विचारचणैर्विद्वद्भिरिति शम् ।

—०—

मुक्तिः

यदा पुरुषः सर्वाण्यपि तत्त्वानि साक्षात्करोति तदा स त्रिगुणाऽऽत्मिकायाः प्रकृतेः सर्वथा मुक्तो भवति। तदा स प्रकृतिबन्धनेभ्यो विमुक्तः स्वतन्त्रः सन् नाट्यदर्शकमिव प्रकृतेः प्राकृततत्त्वानाञ्च निरीक्षणमेव विदधाति। भगवता श्री ईश्वरकृष्णेन साङ्ख्यकारिकायां लिखितमेवास्ति यत्—जाते ज्ञाने पुरुषो किङ्करोतीत्यस्य प्रश्नस्य समाधानम्। सर्वथा विशुद्धे कैवल्यज्ञाने समधिगते पुरुषः सुनिश्चितरूपेण केवलं प्रकृतिलीलाः समवलोकयति। यथात्र लौकिके व्यवहरणे नाटक नृत्यादिदर्शकाः नाटकानि नर्तक्यश्च समवलोकयन्ति। तस्यां वेलायान्निःस्पृहतया तस्मिन् पुरुषतत्त्वे न केऽपि विकाराः सञ्जायन्ते, स्वात्मरतः स्वात्मनि संस्थितः केवलं समवलोकयति प्रकृतिम्। प्रकृतिश्चापि निवृत्तप्रसवा जायते। यतस्तस्याः सुनिश्चितस्य प्रयोजनस्य संसिद्धौ सत्यामपि प्रवृत्तेर्नास्ति किमपि प्रयोजनान्तरम्। अतएव स्वयम्प्रकृतिश्चाऽपि पुरुषस्य बन्धनाय नोद्युङ्क्ते। लिखितमेवास्ति यत्—

तेन निवृत्त-प्रसवामर्थवशात् सप्तरूपविनिवृत्ताम्।
प्रकृतिम्पश्यति पुरुषः प्रेक्षकवदवस्थितः स्वस्थः॥

॥ साङ्ख्यकारिका ६५॥

प्रकृतिपुरुषयोः संयोगे सृष्टिर्भवतीति न्यायसरण्या सृष्टिर्भूयो ऽपि सम्भाव्यते, किन्तु तत्त्वज्ञानवेलायां जातेन तत्त्वज्ञानेन संयोगे सत्यपि न कथञ्चिदपि सृष्टिनिर्माणम्भवति यतस्तत्र पुरुषो विचारयति यन्मयाप्रकृतिरियं समवलोकिता तथा चास्याः कार्याणि समान्यपि समवलोकितानि प्राकृती सृष्टिरियं मया समनुभूतेति पुरुषो भवति सर्वथा विरक्तः।

मामसौ दृष्टवान् इति विचारयन्ती प्रकृतिश्चाऽपि मायाविनीन्नायिकामिव मायास्वरूपावबोधे स्वप्रपञ्चज्ञानवति पुरुषे न स्वीयम्प्रभावमभिव्यनक्ति। तथा

चाचरति ह्रीम् । अर्थात् यथा काचित् छद्मिनी नायिका कञ्चित् पुरुषं स्वप्रपञ्चे प्रपञ्चितं विदधाति, तथा च सोऽ पि तस्याः वस्तुस्थितिमनभिज्ञाय तस्याः प्रपञ्चमपि वस्तुस्थितित्वेन परिकल्प्य विश्वसिति, किन्तु यदा तस्याः प्रपञ्चस्य रहस्यं सुस्पष्टीभवेत् तदा पुरुषस्तस्याः सर्वथा विरज्येत, सा ऽपि च ह्रीपारवश्यात् तत् समक्षन्न किमपि समाचरितुमर्हति । तथैवात्र प्रकृति-पुरुषयोः स्थितिर्भवति । तया ह्रिया समाक्रान्तत्वादेव प्रकृतिः स्वीयं सृष्ट्यादिकङ् कार्यङ् कर्त्तुन्नार्हति । विषयेऽमुष्मिन् भगवता श्री ईश्वरकृष्णेनाऽपि लिखितं यत्—

दृष्टा मयेत्युपेक्षक दृष्टाहमित्युपरमत्यन्या ।
सति संयोगेऽपि तयोः प्रयोजन्नास्ति सर्गस्य ।।

"साङ्ख्य-कारिका"

यद्यपि तत्त्वज्ञाने समधिगते पुरुषः सर्वथा मुक्तो भवति, किन्तु न केवलञ्ज्ञाने जाते सत्येव तत्कालं सर्वथा शरीरं परित्यक्त्वा मुक्तो भवत्यपि तु संस्कारसमाप्ति यावज्-जीवन-मुक्ताऽवस्थायान्तिष्ठति ।य था कुलालः घटनिर्माणात्मकस्वोद्देश्यपरिपूर्त्तये कुम्भस्वरूपोपलब्धये मृत्तिका-पिण्डञ्चक्रे विन्यस्य दण्डेन चक्रम्भ्रामयति, किन्तु तत्र वयमवलोकयामो यदत्र जाते ऽपि कार्ये चक्रं यावत् संस्कारम्भ्रमत्येव, तथैवाऽत्र जीवन्मुक्ता-वस्थायाम्पुरुषो ऽपि संस्कारपूर्णतां यावज्जीवति अर्थाद् यावत् कालपर्य्यन्तं पुरुषस्य धर्माधर्मात्मकाः संस्काराः सर्वथा न क्षयमधिगच्छन्ति, यावच्च प्रारब्धानि कर्माणि नैव क्षीयन्ते, तावद्धृतशरीरस्तिष्ठति ।

क्षीणेषु सत्सु संस्कारेषु नान्ये संस्काराः पुनर्प्रादुर्भूय तं बद्धं भोक्तारं वा परिकल्पयितुं शक्नुवन्ति । यथा भ्राष्ट्रदग्धानि बीजानि पुनरङ्कुरतान्नाधिगच्छन्ति, तथैव ज्ञानाग्निना दग्धकर्माशयाः पुरुषसंस्काराश्च सर्वथा भवन्ति प्रभावशून्याः ।

प्रारब्धकर्मपरिसमाप्तौ च भवति सर्वथा मुक्तः । आशयेनानेनैव भगवान्

श्री ईश्वरकृष्णो लिलेख, यत्—

सम्यग्ज्ञानाधिगमाद् धर्मादीनामकारणप्राप्तौ ।
तिष्ठति संस्कारवशाच्चक्रभ्रमिवद् धृतशरीरः ।।

"साङ्ख्यकारिका"

प्रारब्धमनुसृत्यैव धर्माधर्मादयो भवन्तीति तेषां सङ्क्षयो ऽपि भोगेनैव भवति कृते च भोगे, जाते च तत्त्वज्ञाने तत्त्वज्ञानवशात् क्रियमाणेषु कर्मसु सर्वथा फलासक्त्यभावो जायते । तस्मान्न पुनः संस्काराः समुद्भवन्ति, पूर्वाजितानाञ्च क्षयो जायत एवेति संस्काराणामभावात् पुरुषः सर्वथा भवति मुक्तः । सर्वथा मुक्तिस्वरूपं प्रतिपादयता भगवता श्री ईश्वरकृष्णेन लिखितमस्ति यत्—

प्राप्ते शरीरभेदे चरितार्थत्वात् प्रधानविनिवृत्तौ ।
ऐकान्तिकमात्यन्तिकमुभयङ्कैवल्यमाप्नोति ।।

"साङ्ख्यकारिका"

उपर्युक्ता स्थितिरेवाऽत्र मुक्तिनाम्ना समभिधीयत इत्यस्ति सर्वथा निश्चप्रचम् ।

प्रणवस्य कृपादृष्ट्या तत्त्वज्ञानस्य सूचकम् ।
लिखितम्पुस्तकम्भायात् तत्त्वजिज्ञासुशर्मदम् ।।

● ● ●

परिशिष्टमाशा प्रदं साङ्ख्यम्

निम्नाङ्कितेषु स्थलेष्वपिसाङ्ख्यतत्त्वानि सन्तीति सम्भाव्यते। ग्रन्थविस्तर-भिया नात्र तेषां तेषां स्थलानां सम्यक् प्रकारेण विवेचनं व्यधायि केवलन्तेषान्निर्देशनमेव विधीयते। तद्यथा—

१. ऋग्वेदस्य दशम-मण्डले १२१ तमं सूक्तम्।

२. शतपथ-ब्राह्मणम्, ५, १, २, १०।

३. पुरुष-सूक्तम्, १०, ९०।

४. अदितिसूक्तम् १, ८९।

५. अथर्ववेदस्य स्कम्भसूक्तम् १० दशमम् काण्डम्।

६. अथर्ववेदस्य सप्तमाष्टमसूक्ते।

७. अथर्ववेदस्य, १०, ७, १२।

८. अथर्ववेदस्य १०, ७, २५।

९. अथर्ववेदस्य १०, ८, १।

१०. अथर्ववेदस्य १०, ८, ४४।

११. ऋग्वेदस्य १०, १२१, १।

१२. ऋग्वेदस्य १, ८९, १०।

१३. उच्छिष्टसूक्तानि तैः सूक्तैः सर्वथैतत् स्पष्टीभवति यत्—प्रजापतिः, पुरुषः, हिरण्यगर्भः, स्कम्भः, उच्छिष्ठश्चेति परमतत्त्वस्य पुरुषस्यैव पर्य्यायवाचकानि नामानि सन्ति।

१४. नासदीयं सूक्तम्, ऋग्वेदस्य १०, १२९।

१५. ऋग्वेदे, १, १६४, ४६,।

१६. कालवादः अथर्ववेदस्य १८, सूक्ते ५३, सूक्ते च।

१७. महाभारतस्य आदिपर्वणि।

१८. अहिर्बुध्न्यसंहिता १२-२०-२२

१९. भारतीयदर्शनम्, बलदेवोपाध्यानाम्।

२०. श्रीमद्भगवद्गीता, १३, १४ ।
२१, ,, ,, ११, २७ ।
२२. ,, ,, १३, १२ ।
२३. ,, ,, १३, १४ ।
२४. ,, ,, ४, ६ ।
२५. ,, ,, ७, ७ ।
२६. ,, ,, १३, १३ ।
२७. ,, ,, १०, ४२ ।
२८. ,, ,, ७, २४ ।
२९. ,, ,, १०, ४१ ।
३०. ,, ,, ७, ४, ५ ।
३१. ,, ,, १५, १६ ।
३२. ,, ,, १३, ५ ।
३३. ,, ,, २, २० ।
३४. ,, ,, २, ११ ।
३५. ,, ,, २, २४ ।
३६. ,, ,, १३, २८ ।
३७. ,, ,, १ नु. ७ ।
३८. ,, ,, ७, १० ।
३९. ,, ,, ७, १० ।
४०. ,, :, ६, १८ ।
४१. ,, ,, ८, १८, १९ ।

गीतायां साङ्ख्यानांप्रकृतिः—अव्यक्तानाम्ना, महन्नाम्ना ब्रह्मनाम्ना च निरूपिता वर्त्तते । पुरुषोत्तमः (१५ । १८) (८ । २०— २१) निरूपितः ।

—०—

प्रमाणतया समालोचिताः ग्रन्था:

१. साङ्ख्यकारिका (गौडपादभाष्ययुता)
२. साङ्ख्यतत्त्वकौमुदी (तत्त्वविभाकरीटीकोपेता)
३. साङ्ख्यतत्त्वालोकः (हरिहरानन्दयज्ञेश्वरघोषः)
४. साङ्ख्यदर्शनम् (विज्ञानभिक्षुकृतम्)
५. साङ्ख्यदर्शन का इतिहास (पं. उदयवीर प्रणीतः)
६. साङ्ख्यसङ्ग्रहः (साङ्ख्य-तत्त्व-विवेचनम्)
७. साङ्ख्यसारः (विज्ञानभिक्षुकृतः)
८. श्रीमद्भागवतम् (श्रीधरीटीकोपेतम्)
९. श्रीमद्भागवतम् (अन्वितार्थप्रकाशिकाटीकोपेतम्)
१०. श्रीमद्भागवतम् (सुबोधिनीटीकोपेतम्)
११. महाभारतम्
१२. शतपथ ब्राह्मणम् (श्रीमोतीलालशास्त्री कृत हिन्दी विज्ञानभाष्ययुतम्)
१३. साङ्ख्यकारिका (श्रीमद्धनुमत्प्रसादशास्त्रिपादप्रणीताभ्याञ्ज्योत्स्ना-राष्ट्रभाषाटीकाभ्यां समुल्लसिता) (हस्तलिखिताऽप्रकाशिता)
१४. साङ्ख्यसमन्वयः (श्रीहनुमत्प्रसादशास्त्रिपादप्रणीतः) (,,)
१५. याज्ञवल्क्यस्मृतिः
१६. मनुस्मृतिः
१७. चरकसंहिता
१८. ब्रह्मसूत्रम् (शाङ्करभाष्यसहितम्)
१९. ऋग्वेदः
२०. यजुर्वेदः
२१. सामवेदः
२२. अथर्ववेदः
२३. छान्दोग्योपनिषद्
२४. बृहदारण्यकोपनिषद्
२५. कठोपनिषद्
२६. प्राच्येतिह्यग्रन्थाः
२७. पुराणदिग्दर्शनम्

●●●